आशुबोध व्याकरणम्।

गवर्णमेण्टसंस्कृतपाठशालास्थ-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण सङ्कलितम्।

तदङ्गसम्भवेन वि, ए, उपाधिधारिणा

श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्येण

संस्कृतम्।

द्वितीय संस्करणम्।

कलिकातायाम्

द्वैपायन यन्त्रे

मुद्रितम्।

इंराजी १८७३।

The present work is an elementary treatise on Sanskrit grammar by Professor Táránátha Tarkavácháspti, who under the patronage of the Government of Bengal brought out in 1863 an erudite edition of the Siddhánta Kaumudi [Pánini's grammar as arranged and methodized by Bhattojidikshita] and enriched it with an excellent commentary. His object in the compilation of this treatise has been two-fold. Firstly, it is intended to teach Sanskrit Grammar, especially to the 3rd and 4th year under-graduates of the Calcutta University, in easier Sanskrit than has hitherto been done, and secondly familiarize the student with the nomenclature made use of by Panini. In this respect his plan has been different from those of Vopadeva, Kramadís'wara and Anubhutiswar-upácharya, authors of Mugdhabodha, Sankshiptasára, and Sáraswataprakriyá respectively, each of whom has his own peculiar nomenclature. The course followed by Professor Tarkaváchaspati has evident advantages over that pursued by those grammarians, in as much as it should be the aim of every teacher of Sanskrit Grammar to facilitate the study of Pánini, the highest authority on the subject, and in as much as in all ancient Sanskrit works wherever there is a reference to grammar it is in the phraseology and technical language of that patriarch of Sanskrit Philology.

Prasanna Kumára Sarvádhikárí,
Principal, Sanskrit College.

(Erom Trübner's American and Oriental Literary Record, No. 33.)

Asubodham Vyâkaranam.—Under this title—meaning "a grammar which may be quickly understood"—which must sound especially attractive to a Sanskrit student, the accomplished Pandit Târânâtha Tarkavâchaspati, Professor of Grammar in the Sanskrit College at Calcutta, to whom the learned world is already much indebted for an excellent edition of the "Siddhânta Kaumudi,' and other editions of Sanskrit works, has published a' Sanskrit Grammar, which is intended by him for the use of under-graduates of the Calcutta University, but will prove to be of great value also to European students who wish to attempt a study of Pânini. As the grammar of Pânini was written at a time when Sanskrit was a spoken language, and therefore could address itself to those who, though probably familiar with its grammatical forms, wanted to possess a scientific understanding of their mother tongue, the peculiar manner in which Pânini dealt with his subject matter, was no longer conveniently applicable to a period when Sanskrit had to be learned by natives, like any other foreign language. Various attempts were therefore made to arrange the rules of the ancient grammarian, so as to adapt his work to the altered conditions of a study of Sanskrit grammar. The most successful of these, it is well known, is that effected by Bhattojidikshita in the "Siddhânta-Kaumudi. The latter contains all the Sûtras of Pânini, but in a different order to that which they have in the original work. This order however has its inconvenience, too, since many rules in Pânini are intelligible only in the context in which they stand; and the comment which Bhattojidikshita attaches to them, would, therefore, not always follow from the place he assigned to them. Repetitions of Sûtras became for this reason likewise necessary in his work; but without being able to obviate altogether the difficulty which must always exist, when

the problem is put to harmonize a scientific system which arose under circumstances altogether different from those prevailing at later periods of Sanskrit studies with the requirements of these periods, and in the very words of its originator. Other later grammars, like the "Mugdhabodha," the "Sâraswataprakriyâ," etc., adopted, therefore, a method of their own, in no longer adhering to the text of Pânini. But since they created a new technical terminology also, another great inconvenience arose to the student intending to derive his grammatical knowledge from these works, since the important commentaries of Sâyana, Mahîdhara, Mallinatha, Jayamangala, and others, who constantly advert to Pânini's terminology, thus partly became unintelligible to him. To meet these difficulties, so far as beginners are concerned, Professor Târânâtha, in his present grammar, has tried to steer a middle course. His arrangement of the grammatical subject matter is analogous to, though not identical with, that of the Siddhanta Kaumudi; but while following Pânini's terminology, he has not always literally adhered to the wording of the Sutras of Pânini. Sometimes he has expanded one Sutra of the latter into several rules of his; sometimes he has contracted several Sutras of Pânini into one of his own; and sometimes he has altered the wording itself of the Sutras of the of the old grammarian, where, he thought, it might be too difficult for the capacity of a beginner. In the distribution, also, of the grammatical material, he has endeavoured to improve on that met with in the Siddhanta-Kaumudî, especially in the chapters relating to conjugation, the formation of feminine nouns, and Taddhita derivations. On the other hand, however, his book being intended for the earlier stages of Sanskrit studies, a good deal of matter contained in Pânini, and hence in the Siddhanta-Kaumudî, as concerning the advanced scholar only, has not been included in his *Asubodhamvyâkarana*.

We have given here a brief outline of what Professor Târânâtha proposed to himself to accomplish in his grammar; and when we add that he has well succeeded

in the carrying out of his plan, we have, by these words, expressed our belief that this book is a very good introduction to the study of the grammar of Pánini, and would be used to great advantage not only by native but also by such European students as would wish to approach the study of Sanskrit, not merely for the sake of obtaining marks, but for becoming acquainted also with the scientific literature written in this language. In a future edition of his grammar, we recommend, however its learned author to offer some further facilities, besides those already granted by him, to students of grammar, and especially Pánini students. We mean, in the first place, lists of paradigms, both as regards declension and conjugation; and, secondly, references in his rules to the Sutra of Pánini. By giving the former, he would doubtless meet the convenience of beginners, and aid their memory; and by adding the latter, he would induce students to combine with a study of his grammar an attempt, too, at understanding the sutras of Pánini, and more difficult commentaries on them. And by giving such references, he would then also enable them still more to appreciate the sound foundation on which his work is based.—G."

विज्ञप्तिः।

साम्प्रतिकसम्राट्सभाजितभारतवर्षीयविश्वविद्यालय-समाजाधीश्वरैः अन्यान्यविद्याभ्याससहकारेण संस्कृतभाषाभ्यासस्यावश्यविधेयत्वे व्यवस्थापिते (प्रसिडेन्सिकलेजनामक) विद्यालयस्थानामन्तेवासिनां कथङ्कारं स्वल्पेन समयेन आयासेन च संस्कृतभाषाभ्यासः सिध्येत् इत्यलौकिकसंख्यताविमुग्धतया संस्कृतभाषाध्यापकैः समाकुलहृदयैः समभावि। तेषु च (प्रेसिडेन्सिकलेजनामक) विद्यालयस्यसंस्कृतभाषाध्यापकेन मदन्तेवासिना परमकल्याणिना आयुष्मता समीक्ष्यकारिणा श्रीकृष्णकमल भट्टाचार्य्येणेदं निरणायि "संस्कृतभाषायां नैपुण्यसाधनाय संस्कृतव्याकरणमेव निदानं देशविशेषप्रचलितानाञ्च तत्तद्व्याकरणानां विभिन्नतया व्युत्पत्तिवैलक्षण्याधायकत्वेन विश्वविद्यालयसंसृष्टछात्राणां संस्कृतविद्याभ्यासस्य कुतस्तरामेकरूपता सम्भवेत् कथङ्कारं वा पाठ्यपुस्तकानामेकरूपताविरहे परीक्षासमये प्रश्नसाम्यम्। प्रश्नसाम्यस्य उत्तरसाम्यनियामकतया तदभावे छात्रदत्तोत्तरदर्शनेन तेषां व्युत्पत्तिवैलक्षण्यं परीक्षकैः कथं लक्ष्येत, किञ्च प्रचलितव्याकरणानां कलेवरबाहुल्येन बहुकालकलनीयतया, काठिन्यदोषेण दुरवधारणीयतया, अप्रसिद्धानेकशब्दसाधनोपयोगिसूत्रजालकलितत्वेन, तद्बोधे फलविशेषादर्शनेन, च तदंशे वृथापरिश्रमभाराधायितया, आधुनिकसामाजिकसमयानुपयोगितया

मत्सङ्कलितसरलालङ्कृते १८२० संवत्सरे मयैव मुद्रिते सिद्धान्त-कौमुदीग्रन्थे द्रष्टव्याः तदुद्भावनार्थञ्च तत्र तत्र पत्राद्यङ्का उट्टङ्किताः।

पठनपाठनासौकर्य्याय कार्य्यविशेषविधायकानां पूर्व्वोक्तानां सूत्राणां स्थलविशेषे स्मारणार्थं पत्राद्यङ्का उल्लिखिताः।

णत्वषत्वविधायकानि सूत्राणि क्वचित् प्रकरणमध्ये क्वचिच्च प्रकरणसमाप्तौ संकलितानि।

णत्वप्रसङ्गेन इदमप्यत्राभिधीयते संस्कृतभाषाभिज्ञेन उच्च-तरनगरवासिना श्रीमता महोदयेन मोक्षमूलरेण इंलण्डीयभा-षया स्वरचितव्याकरणस्य सुबन्धे ६पत्रे इदमुट्टङ्कितम् “प्रष्ठो-ऽग्रगामिनीति (८, ३, ९२ सूत्रे) पाणिनिना यदणत्वनिर्द्देशः कृतस्तत् कथङ्कारं सिध्येत् स्वोक्तणत्वविधायकसूत्रानुसारेण तत्र णत्वस्यैवसम्भवादिति”।

अत्रेदं प्रतिविधीयते। पूर्व्वपदात् संज्ञायामग इति (८,४,३ सूत्रेण सर्व्वनामशब्दस्य संज्ञाशब्दतया णत्वे सम्भावितेऽपि सूत्र-कारेण सर्व्वादीनि सर्व्वनामानीति (१, १, २७) सूत्रे यत् सर्व्वनाम-शब्दे अणत्वं निर्द्दिष्टं तत्समर्थनाय तत्सूत्रभाष्यकृता “इह सर्व्व-नामानीति पूर्व्वपदात् संज्ञायामग इति णत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः सर्व्वनामसंज्ञायां निपातनात् णत्वं न भविष्य-तीति। किमेतन्निपातनं नाम अथ कः प्रतिषेधो नाम अविशेषेण किञ्चिदुक्त्वा विशेषेण नेत्युच्यते तत्र व्यक्तमाचार्य्यस्यायमभिप्रायो गम्यते इदं न भवतीति, निपातनमप्येवंजातीयकमेव अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं क्रियते तत्र व्यक्तमाचार्य्यस्यायम भिप्रायो गम्यते इदं नभवतीति (पृ०।४४।५१प०) एतेन अत्र यथा

निपातनादेव णत्वाभाव इत्युक्तम् तथाऽत्रापि सांदंशिकन्यायेन "एकत्र निर्णीतः शास्त्रार्थो बाधकमन्तरेणान्यत्रापि प्रवर्त्तते" इति न्यायेन च निपातनादेव णत्वाभावः सेत्स्यति णत्वविधायक-सूत्रविरोधेन सूत्रकृतो निर्देशस्य निपातनात् णत्वाभावसाधकस्य उभयत्र तुल्यत्वात् तत्र हि पूर्वपदात् संज्ञायामग इति सूत्रेण सम्भावितप्रसङ्गं णत्वम् इह तु प्रातिपदिकान्तनुम्विभक्तिषु च (८,४,११) सूत्रेण, कुमति च (८,४,१२) सूत्रेण च सम्भावितप्रसङ्गं णत्वं तत्र तद्बाधकस्य सर्वनामस्थानेत्याचार्य्येण अणत्वस्य निर्देशः इह तु अग्रगामिनीति तथा निर्देशः तथा च णत्वबाधनबोधोभ-यत्र तुल्यत्वात् निपातनादेवात्र णत्वाभावः कल्प्यते सूत्रविरो-धिकार्य्यस्य सूत्रकृतो निर्देशस्य निपातनात्तदभावकल्पकताया बहुषु दर्शनात्। विस्तरभयाच्च तदुदाहरणानि नेह प्रदर्शितानि ऊह्यानि च तानि भाष्याद्यभिज्ञैः।

अतएव भाष्यकृता पिष्टपेषणदोषभिया, चर्वितचर्वण कलङ्क-शङ्कया अनवोक्तत्वदोषदर्शनेन वा प्रष्ठोऽग्रगामिनीति सूत्रमेव व्याख्यातम्। किन्तु प्रातिपदिकान्तनुम्विभक्तिषु चेति प्रकरण-विहितणत्वस्य निषेधार्थं वार्त्तिककृता युवादेर्नेति सूत्रमारब्धं तत्र च युवादेराकृतिगणत्वस्य सर्वनिबन्धृसम्मतत्वेन अग्रगामिन् शब्दस्य तद्गणान्तःपातित्वेन न णत्वकार्य्यभागिता।

किन्तु प्राचीनग्रन्थेषु भाष्यानुसारेण सर्वनामशब्द इव अग्र-गामिन्शब्देऽपि निपातनादेव णत्वाभावः सेत्स्यतीत्याशयेन युवादे-राकृतिगणत्वेऽपि तद्गणमध्येऽग्रगामिन्शब्दो न पठितः संक्षिप्त-सारकारैस्तु सन्धिपादे णत्वप्रकरणे प्रागुक्तवार्त्तिकसूत्रसमानार्थ-कस्य न युवादेरिति सूत्रस्य वृत्तौ युवादिगणेऽग्रगामिन्शब्दः

पठितः । मयापि युवादेर्नेति सूत्रवृत्तौ अग्रगामिन्शब्दः युवादिगणे स्पष्टार्थमेव सन्निवेशितः ।

अपि च क्षुभ्नादिषु च (८, ४, ३९) सूत्रे क्षुभ्नादेराकृतिगणत्वस्य सर्व्वनिबन्धसम्मतत्वेन अविच्छिन्नलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्य इति भाष्यकारोक्त्या च णत्वनिषेधकसूत्राभावे सर्व्वेषामेव सर्व्वसम्मताणत्ववतां क्षुभ्नादिषु पाठस्य कल्प्यत्वलाभात् तद्गणीयतयापि णत्वाभावः सेत्स्यति ।

अत्र च नानास्थानीयेषु विभिन्नपुस्तकेषु प्रक्रियाकौमुदी सिद्धान्तकौमुदीप्रभृतिग्रन्थेषु अष्टाध्यायीपुस्तकेषु चाणत्वनिर्देशोपलब्धेः संक्षिप्तसारेऽग्रगामिन्शब्दस्य युवादिषु स्पष्टं पाठाच्च णत्वशङ्का कथञ्चिदपि नोदेति इत्येवं अग्रगामिन्शब्दे णत्वाभावे स्थिरीकृते मोक्षमूलरसमुद्भाविता शङ्का निरालम्बेव प्रतिभाति ।

इदन्तु वक्तव्यं यद् आशुबोधं सर्व्वथा परिशुद्धमनवद्यञ्च समपद्यत किन्तु यावता परिश्रमेण शुद्धिमनवद्यताञ्चाभिपद्येत तावान् परिश्रमः स्वीकृतः यदि प्रमादादस्मात् स्खलितं सुधीभिर्लक्ष्येत तत्कृपया परिशोधनीयमित्यलं पल्लवितेन शिवमस्तु ।

कलिकाता
संस्कृतपाठशाला
१९२५ संवत्सरे

श्रीतारानाथशर्म्मणः ।

आशुबोधस्य सूचीपत्रम्।

आशुबोधम् ।

प्रणम्य जगदीशानं क्रियते शब्दशासनम् ।
आशुबोधाभिधं यत्नात् श्रीतारानाथशर्म्मणा ॥
पाणिन्यादीन् मुनीन्नत्वा तद्ग्रन्थाद्यनुसारतः ।
भूरिप्रयुक्तशब्दानां साधनायायमुद्यमः ॥
ग्रन्थाः सन्त्यत्र भूयांसः कठिनाः विपुलाश्च ते ।
अल्पायासेन भाषायाः शिक्षणाय ममाग्रहः ॥
प्रक्रियाकौमुदीं वीक्ष्य सिद्धान्तकौमुदीं तथा ।
बालानां सुखबोधाय प्रक्रियेयं विरच्यते ॥
प्रायेण पाणिनेः सूत्रं क्वचिच्च परिवर्त्तितम् ।
सुबोधं स्वकृतं क्वापि व्याख्यायोदाहरिष्यते ॥

अ इ उ ण्* । १ । ऋ ऌ क् । २ । ए ओ ङ् । ३ । ऐ औ च् ४ । ह य व र ट् । ५ । ल ण् । ६ । ञ म ङ ण न म् ।७। झ भ ञ् ।८। घ ढ ध ष् । ९ । ज ब ग ड द श् । १० । ख फ छ ठ थ च ट त व् ।११। क प य् । १२ । श ष स र् । १३ । ह ल् १४ ।

एषु सर्व्ववर्णेषु लुप्तप्रथमैकवचनम् । एतानि १४ सूत्राणि महर्षिपाणिनिना महेश्वरादधिगतानि । एषु सूत्रेषु णकारादयोऽन्त्यवर्णा इत्संज्ञका अणादि संज्ञार्थाः । हकारादिष्वकार उच्चारणार्थः ।

१· १· १·
इङ्गाद्युपयोगी वर्ण इत् संज्ञः ॥ १ ॥

इङ्गादिकार्य्यान्तरोपयोगी वर्ण इत्संज्ञः स्यात् । यथा णप्रत्ययादौ णकारादिर्वृद्ध्याद्यर्थः ।

१· १·
लोपोऽनुच्चारणम् ॥ २ ॥

प्रयोगकालेऽनुच्चारणं लोपसंज्ञं स्यात् ।

१· १: ६:·१· १· १·
लोपो लुब्लुकौ तयोश्च कार्य्यान्तरं प्रयोजनम् ॥ ३ ॥

लोप एव लुप्संज्ञः लुक्संज्ञश्च स्यात् । लुपि लुकि च सन्ध्यभावादिरूपं प्रयोजनम् । यथा हर एहीत्यत्र यलुपि न सन्धिः । हे वारि इत्यत्र सम्बुद्धिलुकि न गुणः ॥

६· १· ७·
इतो लोपः प्रयोगे ॥ ४ ॥

इत्संज्ञकस्य प्रयोगे लोपः स्यात् । प्रयोगे इत्युक्ते-र्निमित्तविधानादौ निर्द्देशे न लोपस्तेन इकौ यणचीत्यादौ इक् यण् अच् इत्येषु ककाराद्युच्चारणम् ।

अन्त्येनेता सहित आद्यवर्णः स्वस्य तन्मध्यगानाञ्च संज्ञा ॥ ५ ॥

इत्संज्ञकेनान्त्यवर्णेन सहित आद्यवर्णः स्वस्य तन्मध्यगानाञ्च संज्ञा भवेत् । यथा अणिति* णकारसहितोऽवर्णः स्वस्य अवर्णस्य इवर्णस्य उवर्णस्य च संज्ञा । एवमन्यत्रापि । ततश्च अण् * अक् अच् अट् अण् अम् अश् अल् ।८। इक् इच् इण् ।३। उक् ।१। ऋक् ।१। एङ् एच् ।२। ऐच् ।१। हश् हल् ।२। यण् यम् यञ् यय् यर् । ५ । वश्, वल्, । २ । मय् । १। ङम् ।१। झष् झय् झर् झश् झल् । ४ । भष् । १ । जश् । १ । बश् ।१। खय्, । खर्, ।२। छव् ।१। चय् चर् । २ । शर्, शल् ।२। पाणिनीयवार्त्तिकादावेताः ४१ प्रत्याहारसंज्ञा व्यवहृताः । एतासां मध्ये प्रायशः सर्व्वा एवात्राप्युपयोगिन्यो भविष्यन्ति । प्रत्याहारेष्वित्संज्ञकानां न ग्रहणम् ।

आद्योच्चारणे ऽन्त्यो हल् इत्संज्ञः ॥ ६ ॥

आद्योच्चारणकाले अन्ते उच्चारितो हल्वर्ण इत्संज्ञः स्यात् । यथा माहेश्वरसूत्रेषु णादयः ।

१· ·१·

अनुनासिकोऽच् ॥ ७ ॥

आद्योच्चारणे अनुनासिकोऽच् इत्संज्ञः स्यात्। यथा स्तोः श्चुना श्चुँ इत्यत्र चोरुकारः।

६:· १·

अचां स्वरसंज्ञा ॥ ८ ॥

अच्संज्ञकवर्णानां स्वरसंज्ञा स्यात्।

६:· १· १·

स्वराणामुच्चारणकालभेदो मात्रा ॥ ९ ॥

स्वरवर्णानामुच्चारणकालविशेषस्य मात्रा संज्ञा स्यात्।

६· १·

एकमात्रस्य ह्रस्वः ॥ १० ॥

एकमात्राकाले उच्चार्य्यमाणस्य स्वरवर्णस्य ह्रस्व संज्ञा स्यात्।

६· १·

द्विमात्रस्य दीर्घः ॥ ११ ॥

द्वयोर्मात्रयोः काले उच्चार्य्यमाणस्य स्वरवर्णस्य दीर्घसंज्ञा स्यात्।

६· १:

ऌभिन्नाचौ ह्रस्वदीर्घौ ॥ १२ ॥

ऌकारभिन्नानामच्संज्ञकस्वराणां ह्रस्वदीर्घौ संज्ञा भवतः।

यथा अ इ उ ऋ ऌ एते ह्रस्वाः । आ ई ऊ ॠ इत्येते दीर्घाः । एवमनुनासिका अपि ।

६· १·
एचो दीर्घः ॥ १३ ॥

एच्संज्ञकवर्णानां दीर्घसंज्ञा स्यात् ।

१:· १:· १:·
ह र भिन्ना अमोऽनुनासिकाः ॥ १४ ॥

ह, र, इत्याभ्यां भिन्ना अम्संज्ञका वर्णा अनुनासिकाः स्युः । यथा अँ इँ उँ । यँ वँ लँ इत्यादि ।

३: १· १·
मुखनासिकाभ्यामुच्चार्य्यमाणोऽनुनासिकः ॥ १५ ॥

मुखस्थकण्ठादिस्थाननासिकाभ्यामुच्चार्य्यमाणो वर्णोऽनुनासिकसंज्ञःस्यात् ॥

१:· १:· ·१·
अणोऽनुनासिकाश्च ॥ १६ ॥

अण्संज्ञका वर्णा अनुनासिका अपि स्युः ।

१:· ·१· १:·
एकस्थानोच्चार्य्याः मिथः सवर्णाः ॥ १७ ॥

एकत्र स्थाने उच्चार्य्यमाणा वर्णाः परस्परं सवर्णसंज्ञाः स्युः । यथा अ, आ ; अँ आँ इत्येते कालकृतमात्राभेदेऽपि एकत्र कण्ठस्थाने उच्चार्य्यमाणाः सवर्णाः । एवं क ख ग घ ङादयोऽपि ।

तत्र वर्णानां स्थानानि। अवर्ण हकार क ख ग घ ङ विसर्गाणां कण्ठः। इवर्ण च छ ज झ ञ य शानां तालु। ऋवर्ण ट ठ ड ढ ण र षाणां मूर्द्धा। लृकार त थ द ध न ल सानां दन्तमूलम्। उवर्ण प फ ब भ मानामोष्ठौ। ञ म ङ ण नानां नासिका च। एकारैकारयोः कण्ठतालु। ओकारौकारयोः कण्ठौष्ठम्। वकारस्य दन्तौष्ठम्। अनुस्वारस्य नासिका। एषु समस्थानजाः सवर्णाः।

६: १: ६: १: १:
अचाम् अचो हलां हलः सवर्णाः॥ १८॥

उक्तस्थानमध्ये एकत्र स्थाने उच्चार्य्यमाणानामपि अचामच एव सवर्णा न हलः। एवं हलां हलः एव सवर्णा नाचः। तेन अकारहकारौ, इकारयकारौ, च एकस्थानजावपि न मिथः सवर्णौ।

१: १:
यणोऽन्तःस्थाः॥ १९॥

यण्संज्ञका वर्णाः अन्तःस्थासंज्ञाः स्युः।

१: १:
शल ऊष्माणः॥ २०॥

शल्संज्ञकाः शषसहा वर्णा ऊष्मसंज्ञाः स्युः।

१: ६: १ १:
अन्तःस्थोष्मणां न सवर्णाः॥ २१॥

अन्तःस्थावर्णा ऊष्मणां तुल्यस्थाना अपि न सवर्णाः ।
तथाच यशयोः रषयोर्चैकस्थानजयोरपि न सावर्ण्यम् ।

१० ०१० १०
अनादिश्योऽण् सवर्णग्राहकः— ॥ २२ ॥

अनादिश्यमानाः अण्संज्ञका वर्णाः सवर्णग्राहकाः । तेन अ आ अँ आँ इत्यादिवर्णचतुष्कस्य, अ इति, ए एँ इत्यादि वर्णद्वयस्य, ए इति, य यँ इत्यादि वर्णद्वयस्य च, य इत्यादिर्ग्राहकः । एवञ्च अणादि सूत्रे अ, इत्यादिपदेन ह्रस्वदीर्घानुनासिकाननुनासिकानां सर्वेषां ग्रहणम् । अनादिश्य इति किं त्यदादीनाम इत्यादौ अ, इति सवर्णग्राहको यथा न स्यात्

०१० ०१० १० ०१०
उदित् चय् आदिश्यमानोऽपि । २३ ॥

उकारेतचटतकपा वर्णा आदिश्यमाना अपि सवर्णग्राहकाः स्युः । तेन चु, इत्यादि, च छ ज झ ञ इत्यादेर्ग्राहकम् । आदिश्यमानोऽपीत्युक्तेः स्तोः श्चुना श्चु इत्यादौ आदेशेऽपि सवर्णग्रहणम् ।

१ः १ः
वर्णान्ता अकः । २४ ॥

वर्णान्ता अक्संज्ञकवर्णाः सवर्णग्राहकाः ।

यथा अवर्णइत्यादि अ, आ, अँ आँ इत्यादीनां ग्राहकः।

२ः १ः १

चयो वर्गशब्दान्ताश्च ॥ २५ ॥

वर्गशब्दान्ताश्चयसंज्ञकवर्णाः सवर्ण ग्राहकाः। यथा चवर्गादिश्चछजझञादीनां ग्राहकः।

५ः १ः १ः १ १

वर्णेभ्यः कारतकारशब्दौ इतौ तदन्तश्च तुल्य

६ १

कालस्य ग्राहकः ॥२६ ॥

वर्णेभ्यः परं समुच्चार्य्यमाणौ कारतकारशब्दौ इतौ भवतस्तदन्तश्च तुल्यकालस्य ग्राहको न सवर्णानाम्। यथा अकारः अत् इत्यादि अ, अँ इति तुल्यमात्रस्यैव ग्राहको नतु आ, आँ, इत्येतयोरतुल्यमात्रयोरपि।

१ १ १ १ ६

आदारैज् वृद्धिः सा चाचः ॥ २७ ॥

आत्, आर्, ऐच्, एते वृद्धिसंज्ञाःस्युः। सा चाचः स्थाने स्यात्। तथा च वृद्धिविधाने यत्र स्थानिपदं न श्रूयते तत्र, अचइति षष्ठ्यन्तपदमेतत् सूत्रादनुषञ्जनीयम्। अचां मध्ये च अवर्णस्य स्थाने आत्, इवर्णस्य, एदैतोश्च स्थाने ऐ, उवर्णस्य, औदे-

तोश्च स्थाने औ, ऋवर्णस्य स्थाने च आर्, इत्येते भवन्ति । प्रसिद्धप्रयोगे आल् इत्यस्योदाहरणाभावात् आलो न वृद्धिसंज्ञा कृता ।

अदरलेङ् गुणः स चेकः ॥ २८ ॥

अत्, अर्, अल्, एङ्, एते गुणसंज्ञाः स्युः । स च इकः स्थाने स्यात् । तथाच गुणविधाने यत्रस्थानिपदं न श्रूयते तत्रइक इति षष्ठ्यन्तपदमस्मात् सूत्रादनुषञ्जनीयम् । तत्र समस्थानत्वात् इवर्णस्थाने ए, उवर्णस्थाने ओ, ऋवर्णस्थाने अर्, लृकारस्थाने अल् । अकारस्तु इकोऽसमस्थानतया न कस्याप्यादेशस्तथापि अतो गुणे इति पररूपोपयोगार्थमेव तस्य गुणसंज्ञा कृता ।

अर्थवद्धातुरप्रत्ययः प्रातिपदिकं नाम च ॥२९॥

धातुप्रत्ययाभ्यां भिन्नः सार्थकः शब्दः प्रातिपदिकसंज्ञः नामसंज्ञश्च स्यात् ।

गणपठिताः क्रियावाचिनो भ्वादयो धातवः॥ ३० ॥

भू सत्तायामित्यादिपाणिनीयगणेषु सत्तादिरूपक्रियावाचितया पठिताः भूप्रभृतयो धातुसंज्ञाः स्युः । हिरुगाद्यव्यया गणपठिता अपि न क्रियावाचिन इति न ते धातवः सनाद्यन्तास्तु लाक्षणिकधातवः ।

१· १:· १:· १·१·

क्रियायोगे प्रादय उपसर्गा गतिश्च ॥ ३१ ॥

क्रियया सह सम्बन्धे प्रादय उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः। प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप। एते प्रादयः।

१:· १:· १:·

अद्रव्यवाचिनश्चादयो निपाताः ॥ ३२ ॥

अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः। च, वा, ह, अह, एव, एवम्, नूनम्, शश्वत्, युगपत्, भूयस्, चेत्, कच्चित्, हन्त, माङ्, नञ्, यावत्, तावत्, वषट्, वौषट्, स्वाहा, स्वधा, तथाहि, खलु, अथ, सुष्ठु, स्म (उपसर्गप्रतिरूपाः प्रादयः) अहम्, अस्ति, अ, उ, यथा, ऐ, हे, अङ्ग, अये, विषु, यत्, तत् आहोस्वित्, व, चटु, चाटु, हुम्, इव, जातु, अद इत्यादयश्चादयः। एतेषामर्थभेदास्तु मत्कृतायां सरलाख्यायां सिद्धान्तकौमुदीव्याख्यायां पूर्व्वार्द्धे २०१ पृष्ठे द्रष्टव्याः। निपातोपसर्गयोर्नामत्वमपीच्छन्ति केचित्। तेन ततः स्वादयः स्युस्तेषाञ्च लुगिति भेदः।

१:· १·

नामधातूपसर्गनिपाताः प्रकृतिः ॥ ३३ ॥

नामादयः प्रकृतिसंज्ञाः स्युः।

प्रकृतेः परं विधीयमानः सार्थकः शब्दः प्रत्ययो निरर्थकस्तु विकरणः ॥ २४ ॥

उक्तप्रकृतिभ्य उत्तरं विधीयमानः सार्थकः सुबादिः शब्दः प्रत्ययसंज्ञः स्यात् । निरर्थकस्तु तथाभूतः शबादिविकरणसंज्ञः स्यात् । बहुच्-प्रत्ययस्तु प्रकृतेः परमेव विधीयते तस्य प्रयोगकाले तु प्राङ्निपातः । तत्र नामप्रकृतिकाः सुप्तद्धितादयः । धातुप्रकृतिकास्तिङ्कृदादयः । उभयप्रकृतिकाः क्यआदयः । तद्धिताःपुनः निपातोपसर्गप्रकृतिका अपि । तेन नतरां सुतरामित्यादि ।

संख्यावाचकः प्रत्ययो विभक्तिः ॥ २५ ॥

एकत्वादिसंख्यावाचकाः सुपस्तिङश्च प्रत्यया, विभक्तिसंज्ञाः स्युः ।

विभक्तेरेकैकसार्थकभागा एकवचनद्विवचनबहुवचनसंज्ञाः ॥ २६ ॥

सुपस्तिङश्च एकैकसार्थकभागाः क्रमेणैकवचनादिसंज्ञाः

स्युः। यथा सुप सुँ इत्येकवचनम् औ इति द्विवचनम्। जस् इति बहुवचनम्। एवं तिङः तिप् इत्येकवचनं तस् इति द्विवचनम् अन्ति इति बहुवचनमित्यादिक्रमेण ज्ञेयम्।

१· १·
विभक्त्यन्तं पदम्॥ ३७॥

सुबन्तं तिङन्तञ्च पदसंज्ञं स्यात्।

६· १· १·
पदस्यावसानं पदान्तः॥ ३८॥

उक्तरूपपदस्य चरमावयवः पदान्तसंज्ञः स्यात्। समासादौ लुप्तविभक्तिमाश्रित्य पदान्तत्वस्वीकारः। तेन वागीश इत्यादौ समस्तेऽपि वाक् इति भागस्य पदान्ततया जश्।

१· १ः १ः· १·
अचानन्तरिता हलः संयोगः॥ ३९॥

अचा व्यवधानरहिता हल्वर्णाः संयोगसंज्ञाः स्युः।

१ः १ः
ह्रस्वदीर्घौ लघुगुरू॥ ४०॥

ह्रस्वं लघुसंज्ञं दीर्घञ्च गुरुसंज्ञं स्यात्।

·१· ७· ·१·
लघु संयोगे गुरु॥ ४१॥

संयोगे परे लघु, गुरुसंज्ञं स्यात्।

परः सन्निकर्षः संहिता ॥४२॥

वर्णानामव्यवधानेन सन्निधिः संहितासंज्ञः स्यात्। संहिता च भाष्ये नियमिता। यथा

संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते इति।

समासे त्ववान्तरविभक्तिमन्ति बहुपदानि सन्ति तेन पृथङ्निर्देशः।

संहितायां कार्यविशेषः सन्धिः॥ ४३॥

पूर्वत्र परत्र च स्थितयोर्वर्णयोः सन्निकर्षविशेषे उत्पद्यमानः कार्यविशेषः सन्धिसंज्ञः स्यात्।

इति प्रसङ्गागतकार्यसहितसंज्ञाप्रकरणम्।

अथ परिभाषाप्रकरणम्।

शास्त्रीयसंज्ञां विना शब्दः स्वरूपस्य ग्राहकः— ॥१॥

शब्दशास्त्रे व्याकरणे या संज्ञा कृता तत्संज्ञाशब्दमपहाय सर्वत्र शब्दः स्वरूपस्यैव ग्राहकः स्यात्।

यथा राजाहः सखिभ्यष्ट इत्यादौ राजेत्यादिः शब्दः स्वरूपस्य ग्राहको न तु तदर्थकभूपत्यादिशब्दानामपि। व्याकरणकृतसंज्ञस्तु कर्म्मादिशब्दो न स्वरूपमात्रस्य ग्राहकः किन्तु तदर्थबोधकशब्दान्तरस्यापि तेन कर्म्मण्यणित्यादौ कर्म्मशब्देन पारिभाषिकस्यापि कर्म्मणो ग्रहणात् कर्म्मकार इव कुम्भकार इत्यादि सिद्ध्यति।

·१· ६· ·१·

क्वचित् तदन्तस्यापि ॥ २ ॥

क्वचित् (समास विधानादन्यत्र) सूत्रे श्रूयमाणः शब्दः स्वरूपस्य स्वान्तस्य च ग्राहकः। यथा एरजित्यत्र इवर्णस्य इवर्णान्तस्य च ग्रहणात् इणः, चिजिप्रभृतेश्च अच् तेन प्रत्यय इव चयः, जय इत्याद्यपि सिद्ध्यति।

२· ७· ६· ·१· १·

सप्तम्या वर्णग्रहणे तदादेश्च ग्रहणम् ॥ ३ ॥

यत्र वर्णविशेषात् परं सप्तमीनिर्द्देशेन कार्य्यमुपदिश्यते तत्र तद्वर्णस्य तदादिकस्य च ग्रहणम्। यथा अचि श्नुधातुभ्रुवामित्यादौ सप्तम्यन्तेन अच्शब्देन अचः, अजादेश्च ग्रहणात् भ्रुवौ इत्यत्र केवले अचीव, भ्रुव इत्यत्र अजादावपि उवङ्।

१ ७ ।१ १

सन्धिसूत्रेण लुपि न सन्धिः * ॥ ४ ॥

सन्धिसूत्रेण लुपा लोपे आद्यन्तयोः सन्धिर्न स्यात् । यथा हर एहि, हर एति इत्यादौ यविसर्गयोर्लुपा लोपान्न पूर्व्वपरयोः सन्धिः। सन्धिसूत्रेणेति किं राज-उचित राजोचित इत्यादौ अन्यसूत्रेण न लोपात् सन्धिर्यथा स्यात् ।

१ १ २

अनिश्चितार्था षष्ठी स्थानसम्बन्धार्था ॥ ५ ॥

अवयवादिरूपविशेषार्थानवगमे षष्ठी स्थानसम्बन्धार्थिका स्यात् । स्थानं च प्रसक्तिः । प्रसक्तस्यान्यथाभावः स्थानसम्बन्धः । यथा आद्यन्त इत्यत्र आदिइतीकारस्योच्चारणप्रसक्तौ तस्योच्चारणमन्यथा कृत्वा इको यणचीति यण्विधानात् यण् उच्चारयितव्यः । अनिश्चितेति किं ग्रास उपधाया इदित्यादौ ग्रास इति षष्ठी अवयवसम्बन्धार्थतया निर्णीतेति तत्र मा भूदित्येतदर्थम् । तथाच तत्र उपधाया एव स्थानित्वम् न ग्रासः ।

२ १ ।१

स्थानषष्ठ्या निर्द्दिष्टं स्थानि ॥ ६ ॥

स्थानसम्बन्धार्थकषष्ठ्या निर्द्दिष्टं स्थानिसंज्ञं स्यात् ।

* लुपा लोपे तस्मिन् परे कार्य्यं न भवति ।

पूर्व्वपरयोरेकादेशस्य सह संज्ञा तस्य च स्थानिनौ पूर्व्वपरौ ॥ ७ ॥

पूर्व्वपरयोरेकादेशस्य सहेति संज्ञा। तदादेशे च स्थानिनिमित्तोभयमेव स्थानि स्यात्। एकादेशश्च क्वचित् पूर्व्वरूपः क्वचिच्च पररूपः। यथा अमि पूर्व्वरूपः इत्यादिना देवम् नदीमित्यादि, एङः पररूपः इत्यादिना च प्रेजते इत्यादि सिध्यति।

स्थानिनोऽन्यथाभाव आदेशः ॥ ८ ॥

स्थानिनोऽन्यथाभाव आदेशसंज्ञः स्यात्। अन्यथाभावश्च सर्व्वरूपपरिहृत्या एकदेशपरिहृत्या वा यथापूर्व्वमनुच्चारणम्। तत्र इको यणचीत्यादौ सर्व्वरूपपरिहृत्तिः। त्यदादीनाम इत्यादौ चैकदेशपरिहृत्तिः। लोपोऽपि यथापूर्व्वमनुच्चारणादादेश एव। तत्र हर एतीत्यादौ विसर्गस्य, सर्व्वथानुच्चारणम् हर एहीत्यादौ चैकदेशस्य रकारस्यानुच्चारणम्।

वर्णाश्रितभिन्नविधौ स्थानिवदादेशः ॥ ९ ॥

स्थानिनो वर्णाश्रितविधिमपहाय आदेशः स्थानि-

वद्भवति । वर्णेत्यादि किम् स्थानिनः क्त्वाप्रत्ययस्य वलादितया तदादेशस्य ल्यपः स्थाने आर्द्धधातुकस्येड्वलादेरितीट्प्रसङ्गो यथा न स्यात् ।

६ १ १
स्थानिनः सदृश आदेशः ॥ १० ॥

आदिश्यमानस्यानेकत्वे स्थानिनः सदृश आदेशः स्यात् । सादृश्यञ्च समस्थानजाततया ग्राह्यम् । तेन झलां जशित्यादिना झलां स्थाने जश्प्राप्तौ चकारस्थाने जकारः, टकारस्थाने च डकार इत्यादि क्रमेण आदेशो न तु भिन्नस्थानजोऽपि ।

७ ५ १
स्थानिसाम्यासम्भवे निमित्तसाम्यादादेशः ॥११ ॥

यत्र स्थानिसाम्यं गृहीत्वा कार्य्य विशेषः सम्पादयितुं न शक्यते तत्र निमित्तसाम्यादपि कार्य्यविशेषः स्यात् । यथा अनुस्वारस्य ययि यम् इत्यत्र पररूपनिमित्तसामान्यात् यकारे परे यँकारः ककारादिषु परेषु तु ङादिरित्यादिक्रमेण जायते । तेन यय्यँस्यते शङ्कते इत्यादि ।

१ ६ ७
ह्रस्वदीर्घावचः स्थाने ॥ १२ ॥

अचः स्थान एव ह्रस्व दीर्घौ विधीयेते । तेन यत्र

अन्यस्थानिपदं न श्रूयते तत्र अच इति षष्ठ्यन्तं पदमेतत् सूत्रादनुषञ्जनीयम्।

१: १: ६· १:

यस्यादेशौ—टित्कितौ तस्याद्यन्तावयवौ॥१३॥

यस्य आदेशः टकारेत् स तस्याद्यावयवः, यस्य च ककारेत् तस्यान्त्यावयवः स्यात्। यथा भवितेत्यादौ आर्द्धधातुकस्येड्वलादेरित्यनेन जायमानो वलादेस्तकारस्यादेश इट्, टित्, तेन तकारपूर्व्वावयवः। पुण्यकृदित्यादौ च ह्रस्वस्य तुगित्यादिना जायमानो ह्रस्वस्यादेशस्तुक्, कित्, तेन ह्रस्वस्य कृञोऽन्त्यावयवः।

१· ६: ७· ५· ५· १·

मिदचां मध्येऽन्त्यादचः परः॥ १४॥

यस्य स्थानिनः आदेशो मकारेत् तस्य स्थानिनोऽचां मध्ये योऽन्त्योऽच् तस्मात् परः स्यात्। यथा क्रष्टेत्यादौ ऋदुपधस्यानिटोऽमित्यादिना विहितोऽम्, मित् तेनान्त्यादचः पर एव जायते।

१· १·

स्थानिषष्ठी चरमवर्णविकारार्था॥ १५॥

उत्सर्गतः स्थानिषष्ठ्या निर्देशे स्थानिनश्चरमवर्णस्यैव विकारः स्यात्। यथा त्यदादीनाम इत्यादौ अन्त्यवर्णस्यैव विकारकारकोऽकारादेशः।

ङिदादेशोऽनेकवर्णवानपि चरमवर्णस्यैव ॥ १६॥
स्थानिन आदेशो यदि ङकारेत् तदा सोऽनेकवर्णवानपि स्थानिनश्चरमवर्णस्य विकाराय स्यात् न तु सर्व्वावयवस्य। यथा गोरवङित्यादौ ङकारेत् अवङ् अनेकवर्णवानपि ओकाररूपान्त्यस्यैव विकारकारी न तु सर्व्वस्य।

अनेकवर्णवान् शिच्चादेशः सर्व्वावयवस्य ॥ १७॥
अनेकवर्णवान्, शकारेच्चादेशः स्थानिनः सर्व्वावयवविकारकारी स्यात्। यथा टास्थाने ना, ङेस्थाने च स्मै, इत्यादिरनेकवर्णवान्, जस्शसोः शिरित्यादौ शकारेच्च शिः, आदेशः सर्व्वावयवविकारकारी। अत्र इत्संज्ञकवर्णं विहायानेकवर्णता बोध्या।

सप्तमी वाच्यगम्योपपदपरत्वार्था ॥ १८॥
सूत्रेषु निर्द्दिश्यमाना सप्तमी प्रकरणवशात् अभिधेयं, द्योत्यम् उपपदं परत्वञ्च प्रकाशयति। यथा कर्म्मणि द्वितीयेत्यादौ कर्म्मरूपमभिधेयम्, लिङ्निमित्ते लृङ् क्रियाऽनिष्पत्तावित्यादौ क्रियाऽनिष्पत्तिरूपं द्योत्यम्, कर्म्मण्यणित्यादौ उपपदरूपम्,

इको यणचीत्यादौ परत्वरूपश्चार्थं सप्तमी प्रकाशयति।

१·　　१·　　　　६·　·१·　　४·

परार्था सप्तमी अव्यवहितपूर्व्वस्यैव कार्य्याय ॥१९॥

परत्वप्रकाशकसप्तमी वर्णान्तराव्यवहितपूर्व्वस्यैव तत्तत्कार्य्याय स्यात्। यथा अचि श्नुधातुभ्रुवामिति सूत्रे अचि परे भ्रूशब्दस्यैवोवङ् नतु भ्रूमूलशब्दस्यापि तस्य मूलशब्देन व्यवधानात्।

६·　　४·　　१·

अव्यवहितपरस्य कार्य्याय पञ्चमी ॥ २० ॥

सूत्रे निर्दिश्यमाना पञ्चमी वर्णान्तराव्यवहितपरस्यैव कार्य्याय स्यात्। यथा प्रस्योहोढ़ोढ़ीत्यादिसूत्रे प्रशब्दस्यावर्णात् परस्य ऊढ़िशब्दस्योकारस्याव्यवहितस्यैव वृद्धिर्न्न तु ढि-इत्यस्य व्यवहितस्यापि।

५·　　१·　६·　　७·　　६· ६·

पञ्चम्याः परं यस्य विहितं तस्यादेः ॥ २१ ॥

पञ्चम्यन्तात् परं यस्य कार्य्यं विहितं तस्यादेरेव स्यात् नत्वन्यस्य। यथा पूर्व्वोक्तोदाहरणे ऊढ़िशब्दस्यादेरेव वृद्धिर्नान्त्यस्य।

१ । ६

यथासङ्ख्यमादेशः समानाम् ॥ २२ ॥

समेषूद्देश्येषु समानां विधानं यथासंख्यं स्यात् ।
परिभाषा च नियमविशेषरूपा ।

दीपो यथा प्रभाद्वारा सर्व्वगेहप्रकाशकः ।
परिभाषा तथा बुद्ध्या सर्व्वशास्त्रोपकारिका ॥

इति परिभाषाप्रकरणम् ।

अच् सन्धि ।

६ । १ । ७

इको यणचि = ॥ १ ॥

इकः स्थाने यण् स्यादचि परे ।

तत्र इ स्थाने य, उ स्थाने व, ऋ स्थाने र इति ।
यथा आदि--अन्त आद्यन्तः । नदी--अम्बु नद्यम्बु ।
साधु-अस्त्र साध्वस्त्रम् । वधू-अन्तःपुर वध्वन्तःपुरम् ।
मातृ-अर्च्चन मात्रर्च्चनम् । एवं मुनि-आदि मुन्यादि । नदी-आदि नद्यादि । वाणी-उक्ति वाण्युक्तिः । नदी-ऋद्धि नद्यृद्धिः । नदी-एजते नद्येजते । वारि ऐक्य वार्य्यैक्यम् । दधि-ओदन दध्योदन इत्यादि । सवर्णेऽचि परे तु दीर्घरूपैकादेशो विशेषोऽग्रे वक्ष्यते ।

६। १:। ७। १। ६:। १। १।
एचोऽयवायावः पदान्ते तु तेषां वा लुप्॥ २॥
एचः स्थाने क्रमेण अय्, अव्, आय्, आव्, एते आदेशाः स्वरचि परे। पदान्ते तु तेषामन्त्यस्य लप् वा स्यात्। यथा मुनि-ए मुनये। साधो ए साधवे। नै-अक नायकः। पौ-अक पावकः। पदान्ते तु अग्ने-आगतः अग्नआगतः अग्नयागतः। साधो-एहि साधएहि साधवेहि। सन्धिसूत्रेण लुपा लोपात् पुनर्न सन्धिः। समासादौ तु न, गवीश्वर इत्येव। अत्रान्त्यलोपविधानाद् अन्त्यौ यवौ नेत्संज्ञौ।

६। १। ७। १।
गोरवङ् समासे वा। ३॥
अचि परे समासे गोशब्दस्य अवङ् आदेशः स्यात्। ङ इत्। तेनान्तादेशो न तु सर्व्वादेशः। गो ईश्वर अवङि वक्ष्यमाणेन गुणे गवेश्वरः गवीश्वरः।

६: १।
इन्द्राक्षयोर्नित्यम्॥ ४॥
इन्द्राक्षयोरचि परे पूर्व्वोक्तं नित्यं स्यात्। गो-इन्द्र गवेन्द्रः। गो-अक्ष गवाक्षः।

६। ६। ७। १। १।
गोरोतोऽति सन्धिर्वा॥ ५॥
समासे गोशब्दस्यौकारस्य अकारे परे सन्धिर्वा

स्यात्। गो-अर्चन गोअर्चनम् गवार्चनम्। पक्षे वक्ष्यमाणपूर्व्वरूपैकादेशात् गोऽर्चनमपि।

६: १: ७· ७·

ओदौतोरवावौ यि प्रत्यये ॥ ६ ॥

यकारादौ प्रत्यये परे ओकारौकारयोः स्थाने क्रमेण अव् आव् एतौ स्तः। गो-य गव्यम्। नौ-य नाव्यम्। प्रत्यये किं गोयानमित्यादौ न।

६· ६: ·१·

धातोस्तन्निमित्तयोरेव ॥ ७ ॥

यकारादिप्रत्ययनिमित्तयोरेव धातोरोकारौकारयोः स्थाने अवावौ स्तः न त्वन्यनिमित्तयोः। भो-य भव्यम्। भौ-य भाव्यम्। तन्निमित्तयोः किम् अन्यनिमित्तयोर्मा भूत् तेन ओयते औयत इत्यादौ न। आङ् पूर्व्वस्य वेञः संप्रसारणे कृते कर्म्मणि वाच्ये लटि लङि च रूपम्। अत्र ओकारादिरेकादेशनिमित्तो न तु यादिनिमित्तः।

५· ६· ·१: ·१·

आद्—इकः सह—गुणः ॥ ८ ॥

अवर्णात् परस्य इकः गुणरूपः सह (पूर्व्वपरयोरेकादेशः) स्यात्। जन—इन जनेन। परा-इत परेतः। नर ईश्वर नरेश्वरः। रमा-ईश्वर रमेश्वरः।

लोक-उक्ति लोकोक्तिः। नाना-उक्ति नानोक्तिः। धन-ऊन धनोनः। देव-ऋषि देवर्षिः। राजा-ऋषिः राजर्षिः।

१ ६
वृद्धिरेच ॥ ९ ॥

अवर्णात्परस्य एचः वृद्धिरूपः सह (पूर्व्वपरयोरेकादेशः) स्यात्। धन-एषणा धनैषणा। नाना-एषणा नानैषणा। जल ओघ जलौघः। नाना-ओदन नानौदनः। मत-ऐक्य मतैक्यम्। रोग-औषध रोगौषधम्। पीड़ा-औषध पीड़ौषधम्।

६ १
ऋतस्य तृतीयासमासे ॥ १० ॥

अवर्णात् परस्य ऋतशब्दस्यादेर्ऋकारस्य सह वृद्धिः स्यात् तृतीयासमासे। शीतेन-ऋतः शीतार्त्तः। अन्यसमासे तु परम-ऋतः। परमर्त्तः।

६ १
ऊठश्च ॥ ११ ॥

अवर्णात् परस्य ऊठः सह वृद्धिः स्यात्। भार-ऊह; भारौहः।

६ ६
स्वस्येररिणोः ॥ १२ ॥

स्वशब्दस्यावर्णात् परस्य ईर, ईरिण्, इत्येतयो

शादेरीकारस्य सह वृद्धिः स्यात् । स्व-ईर स्वैरम् । स्व-ईरिन् स्वैरी । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति सिद्धान्तात् स्त्रियामपि स्वैरिणी । एवं सर्व्वत्र ।

प्रस्योहोढोढ्येषैष्याणाम् ॥ १३ ॥

प्रशब्दस्यावर्णात्परेषाम् ऊह, ऊढ़, ऊढ़ि एष, एष्य, इत्येतेषामादेरचः सह वृद्धिः स्यात् । प्र-ऊह प्रौहः । प्र-ऊढ़ प्रौढ़ः । स्त्रियां प्रौढा । प्र-ऊढ़ि प्रौढिः । सार्थकग्रहणसम्भवे निरर्थकस्य न ग्रहणमिति सिद्धान्तात् क्तान्तमेव सार्थकमूढ़पदेन गृह्यते न तु निरर्थकः क्तवत्वेकदेशोऽपि । तेन तत्र प्रोढ़वान् इत्येव । प्र-एष प्रैषः । प्र-एष्य प्रैष्यः । वक्ष्यमाण पररूपापवादः । प्रेषः प्रेष्य इत्येते तु ईष गतिहिंसादावित्यस्मात् घञि ण्यति च ईषः ईष्यः इति सिद्धयोः शब्दयोः प्रादिसमासे गुणेन सिद्धे ।

उपसर्गस्य धातोर्ऋतः ॥ १४ ॥

उपसर्गस्यावर्णात्परस्य धातोर्ऋकारस्य सह वृद्धिः स्यात् । अप-ऋच्छति आर्पाच्छति । परा-ऋच्छति परार्च्छति । अत्र ऋत्यक इति वक्ष्यमाणः पक्षे सन्धिनिषेधो न ।

६: ६·
एत्येधत्योरैङ्॥ १५॥

उपसर्गसयावर्णात् परयोः एति, एधति, इत्यनयो-र्धात्वोरैङ्: सह वृद्धिः स्यात्। पररूपापवादः। उप-एति उपैति। परा-एति परैति। प्र-एधते प्रैधते। परा-एधते परैधते।

६· १·
एङ: पररूपः— ॥ १६॥

उपसर्गसयावर्णात् परस्य धातोरेङः पररूपः पूर्व्वपरयोरेकादेशः स्यात्। वृद्ध्यपवादः। प्र-एजते प्रेजते। परा-एजते परेजते। प्र-ओषति प्रोषति। परा-ओषति परोषति।

५· ६:
अवर्णादोमादिष्टाङोः॥ १७।

सर्व्वस्मादवर्णात् परयोः ओम्, आदिष्टाङ्, इत्य-नयोः पररूप एकादेशः स्यात्। वेद-ओङ्कारः वेदोङ्कारः। विद्या-ओङ्कारः विद्योङ्कारः। आ-इत एत अप-एत अपेतः। आ-उत ओतः प्र-ओत प्रोतः।

६· ७· ·१·
ओष्ठस्य समासे वा॥ १८॥

अवर्णात् परस्य ओष्ठशब्दस्यादेः पररूप एका-

देशो वा स्यात् समासे। पक्षे वृद्धिः। अधर-ओष्ठ अधरोष्ठः अधरौष्ठः। असमासे तु तवौष्ठ इत्येव।

१ः   १ः

मनीषाद्या निपात्याः॥ १९ ॥

मनीषाद्याः साधनसूत्राभावेऽपि पररूपादिना साध्याः। मनस्-ईषा मनीषा। कुल-अटा कुलटा सीम-अन्त सीमन्तः। पतत्-अञ्जलि पतञ्जलिः। सार-अङ्ग सारङ्गः। इत्याद्याः।

५· ५· ६ः   १·

पदान्तस्थाद् एङोऽतः पूर्व्वरूपः॥ २० ॥

पदान्तस्थादेङः परस्याकारस्य पूर्वरूपः सह (पूर्व्वपरयोरेकादेशः) स्यात्। भूपते-अव भूपतेऽव। साधो-अवेहि साधोऽवेहि।

६·   ७· ७·   १·

अकः सवर्णेऽकि दीर्घः॥ २१ ॥

सवर्णे अकि परे अकः दीर्घरूपः सह (पूर्व्वपरयोरेकादेशः) स्यात्। मिष्ट अन्न मिष्टान्नम्। लता-अन्त लतान्तः। भूमि-इन्द्र भूमीन्द्रः। धरणी-इन्द्र धरणीन्द्रः। कवि-ईश्वर कवीश्वरः। नदी-ईश नदीशः। साधु-उक्त साधूक्तम्। वधू-उपेत वधूपेतः। मधु-ऊन मधूनः। पितृ-ऋद्धि पितॄद्धिः।

६:॰ ६:॰७॰ ॰१॰ १॰

द्विवचनस्थानामीदूदेतामचि-न-सन्धि- ॥ २२ ॥

द्विवचनसंज्ञकविभक्त्यवयवस्थानाम् ईकार, ऊकार, एकार, इत्येषामचि परे सन्धिर्न स्यात्। कवी एतौ। साधू उक्तौ। लते इमे। पचेते एतौ। एधेते इमौ।

६॰ ६॰

बहुवचनस्यामीत्ह्रस्य ॥२३॥

बहुवचनस्यामीदितिशब्दस्याचिपरे सन्धिर्नस्यात्। अमी आययुः। बहुवचनस्येत्यस्य किम्, अमीरोगस्य-हान् अमी तस्यसन्धिभावत्येव अमी-अयम् अम्ययम्।

६॰ ६॰ ॰१॰ ६॰

एकमात्रस्वरस्य ओदन्तस्य च निपातस्य ॥२४॥

एकस्वरवर्णात्मकस्य उप्रभृतेः ओकारान्तस्य च निपातस्याचि परे सन्धिर्न स्यात्। उ उमापते उ अवनीपते। अहो ईश्वर। अत्राचीत्यनुवृत्तेः पूर्व्वस्वरेण स्यादेव भूप-उ भूपो। देव-अहो देवाहो।

७॰ ६॰ ॰१॰

ऋत्यको वा ॥२५॥

अक्संज्ञकवर्णानाम् ऋकारे परे सन्धिर्वा स्यात्। सप्त-ऋषीणाम् सप्तर्षीणाम्।

इत्यच्सन्धि प्रकरणम्।

हल्सन्धिः ।

६· २· ·१· ·१· ५·

स्तोः-श्चुना श्चुँ न शात्॥ १ ॥

शकारचवर्गाभ्यां योगे (पूर्व्वत्र परत्र वा तेषामन्यतमस्य स्थितौ) सकारस्य स्थाने शकारः, तवर्गस्य च स्थाने चवर्गः स्यात् न तु शकारात् परस्य । भूपतिस्-शेते भूपतिश्शेते । विपक्षस्-चिन्तयति विपक्षश्चिन्तयति । उद्यत्-चन्द्र उद्यच्चन्द्रः । याच्-ना याच्ञा । राजन्-जय राजञ्जय । शकारात्तु प्रश्नः ।

३· ·१·

ष्टुना ष्टुँ ॥ २ ॥

षकारटवर्गाभ्यां योगे (पूर्व्वत्र परत्र वा तेषामन्यतमस्य स्थितौ) सकारस्य स्थाने षकारः, तवर्गस्य च स्थाने टवर्गः स्यात्। मनस्-षष्ठम् मनष्षष्ठम् । हिमाद्रिस्-टङ्कः हिमाद्रिष्टङ्कः । इष्-त इष्टः । तत्-टीका तट्टीका ।

·१· ५· ५·

न पदान्तस्याट्टोः ॥ ३ ॥

पदान्तस्थात् टवर्गात् परस्य पूर्व्वोक्तं कार्य्यं न

स्यात् । षट् ते ! निट्सु । टोरित्युक्तेः पदान्त स्यात् षकाराद्भवत्येव चतुष्-तय चतुष्टयम् ।

·१· ·१· ·१· १:· १:·

षण्णां षण्णवतिः षण्णगर्य्यं एते निपात्याः ॥ ४ ॥

·१· ६· ७·

न तोः षि ॥ ५ ॥

तवर्गस्य षकारे परे पूर्व्वोक्तं कार्य्यं न स्यात् । गच्छत् षष्ठम् गच्छन् षट्पदः ।

६: ७· १·

तोर्लि लः ॥ ६ ॥

लकारे परे तवर्गस्य स्थाने लः स्यात् । चलत-लेखनी चलल्लेखनी । भवान्-लिखति भवाँल्लिखति । नकारस्थाने जातो लकारोऽनुनासिक एव ।

६:· ·१· ७· ७·

झलां जश् पदान्ते—ऽशि ॥ ७ ॥

पदान्ते स्थितानां झलां स्थाने जश् स्यात् अशि परे । वाक्-ईश वागीशः । दीव्यत्-रत्न दीव्यद्रत्नम् ।

६· ७· १· ·१·

चरः—पञ्चमे पञ्चमो—वा ॥ ८ ॥

पदान्ते स्थितानां चरप्रत्याहारवर्णानां स्थाने स्ववर्गीयपञ्चमवर्णे परे स्ववर्गीयः पञ्चमो वा

स्यात् । पक्षे जश् । बृहत् नाम बृहन्नाम बृहद्नाम । चलत्-मणि चलन्मणिः चलद्मणिः ।

७· ७· १·

प्रत्यये मे नित्यम् ॥ ९ ॥

पदान्तस्थस्य चरः स्थाने मकारादौ प्रत्यये परे पूर्व्वोक्तं कार्य्यं नित्यं स्यात् । वाक्-मय वाङ्मयम् । चित्-मय चिन्मयम् । अप्-मय अम्मयम् ।

५· ६· ·१· ·१·

चरो—हो झष् वा ॥ १० ॥

पदान्ते स्थितात् चरः परस्य हकारस्य स्थाने झष् वा स्यात् । चरः स्थाने तु (२०पृ० ७सू०) जश् । वाक्-हीन वाग्घीनः वाग्हीनः । पतत्-हविः पतद्धविः पतद्हविरित्यादि ।

६· १· ७·

शश्छोऽटि ॥ ११ ॥

पदान्ते स्थितात् चरः परस्य शकारस्य स्थाने अटि परे छो वा स्यात् । बृहत्-शान्ति बृहच्छान्तिः बृहच्शान्तिः । तकारस्य स्थानेऽत्र (२९पृ० १सू०) चुत्वम् । अटि किं वाक्-श्चोततीत्यत्र यथा न स्यात् ।

६· १· ७·

मोऽनुस्वारो—हलि ॥ १२ ॥

पदान्ते स्थितस्य मस्य हलि परे अनुस्वारः

स्यात्। ग्रामम्-गत ग्रामंगतः। पदान्ते किं गम्यते इत्यादौ न।

७॰ ६ः ७॰

अपदान्ते म्नोर्झलि॥ १३॥

अपदान्ते स्थितस्य, मस्य, नस्य च झलि परे अनुस्वारः स्यात्। रम् स्यते रंस्यते। यशान्सि यशांसि। बृन्-हित बृंहितम्। झलि किं गम्यते मन्यते इत्यादौ न।

६॰ ७॰ ॰१॰ ७॰ ॰१॰ ॰१॰

अनुस्वारस्य ययि यम् पदान्ते तु वा॥ १४॥

यय्प्रत्याहारवर्णेषु परेषु अपादन्ते स्थितस्यानुस्वारस्य स्थाने यम् स्यात्। तत्र यवलेषु यँ वँ लँः, वर्गेषु तु स्वस्ववर्गीयः पञ्चम इति विशेषः। पदान्ते तु वा स्यात्। यं-यम्यते यय्यँम्यते। वं-वन्यते वव्वँन्यते। अं-चति अञ्चति। वं-टति वण्टति। मं-थति मन्थति। अं-कति अङ्कति। लिं-पति लिम्पति। पदान्ते तु संयन्ता सय्यँन्ता। सं-वत्सरः सव्वँत्सरः। यंलोकम् यल्लोकम्। सं चलति सञ्चलति। सं-तनोति सन्तनोति। सं गच्छति सङ्गच्छति। सं-पद्यते सम्पद्यते।

६ः ·१· ७·

झलां—जश् झशि ॥ १५ ॥

अपदान्ते स्थितानां झल्संज्ञकवर्णानां स्थाने झश्-संज्ञकवर्णेषु परेषु जश् आदेशः स्यात्। लभ्-ध लब्धम्। दुघ्-ध दुग्धम्। बुध्-ध बुद्धम्। निष्-भ्याम् निड्भ्याम्। षस्यैकस्थानिको डः। मस्-जति मज्जति। सस्यैकस्थानिकोदस्तस्य(२९पृ०१सू०) त्वम्। पदान्ते तु पक्षे चर् भविष्यति। गोधुक् गोधुग्।

७· ·१·

खरि च ॥ १६ ॥

अपदान्ते स्थितानां झलां स्थाने खरि परे चर् स्यात्। आरभ्-स्यते आरप्स्यते। मधुलिढ्-सु मधुलिट्सु। बुभुध्-सति बुभुत्सति। धोष्-स्यति धोक्ष्यति। भेद्-ता भेत्ता। निड्-सु निट्सु। आस्-ते आस्ते। चय् इत्यनभिधाय चर् इत्युक्तेः सस्थाने स एव न तु तः। एवं षस्थाने ष एव न तु टः। तेन वस्ता द्रष्ट इत्यादि सिद्धम्।

७· १ः ३·

पदान्ते जश्चरौ पर्य्यायेण ॥ १७ ॥

पदान्तस्थानां झलां स्थाने जश्, चर्,इत्येतौ पर्य्यायेण स्याताम्। ककुभ्-ककुब् ककुप्। मधुलिढ्-मधुलिड्

मधुलिट्। युध्-युद् युत्। गोधुघ्-गोधुग् गोधुक्। एवं विद्-विद् वित्। वाक्-वाग् वाक्। अवड्-अवड् अवट् इत्यादि।

६· ७· ७· ·१· ·१· ७·

पुमोऽम्परे-खयि सुँग्-न ख्याशब्दे ॥ १८ ॥

अम्प्रत्याहारः परः परवर्त्ती यस्य सोऽम्परस्तस्मिन् खयि परे पदान्ते स्थितस्य पुम्स् इतिशब्दस्य संयोगान्तलोपे पुम् इति भागस्य स्थाने सुँक् इत्यागमः (स्थानिनोऽविकारकारकादेशः) स्यात् न तु ख्याशब्दे परे। उकावितो कित्त्वादन्तावयवः। पुम्-कोकिल पुंस्कोकिलः *। पुम्-प्रयत्न पुंस्प्रयत्नः। पुम्-स्वर पुंस्वरः। अम् परे किं पुंत्सयः। खयि किं पुंरूपम्। ख्याशब्दे परे तु पुंख्यानम्।

६· ७· ६·

नश्छव्यप्रशामः ॥ १९ ॥

पदान्ते स्थितस्य नस्य अम्परे छवि परे सुँक् इत्यागमः स्यात्। न तु क्विबन्तप्रशाम्शब्दस्य। राजन्त्राहि राजँस्त्राहि। सौ परेऽनुस्वारस्यानुनासिकत्वेति सिद्धान्तः।

---

* पुंस्कोकिल इत्यत्र सुकः सस्य विसर्गोऽपि भयस्वानादित्वात् पुनः सत्वम्।

७। ५। ६। १। ०।

पदान्ते ह्रस्वाद् ङमो द्वित्वमचि ॥ २० ॥

पदान्ते स्थितस्य ह्रस्वात् परस्य ङम्संज्ञकवर्णस्य अचि परे द्वित्वं स्यात् । सन् एति सन्नेति । ह्रस्वात् किं भवान्आगतः इत्यादौ दीर्घात् यथा न स्यात् । पदान्ते इत्यनुवृत्तौ सत्यामपि पुनः पदान्ते इतिग्रहणं समासे क्वचित् मा भूत् तेन सनन्तः यङन्त इत्यादौ न ।

५। ६। ५। ०१। ७। ०१।

अचश्छो दीर्घात्तु पदान्ते वा ॥ २१ ॥

अचःपरस्य छकारस्य द्वित्वं स्यात् दीर्घादचःपरस्य तु पदान्ते वा स्यात् । हषच्छाया । चेच्छिद्यते ॥ पदान्ते तु लताच्छाया लताछाया हरितकीच्छाया हरितकीछाया ।

इति हल्सन्धिः ।

विसर्गसन्धिः ।

५। १। १।

अन्त्यात् पूर्व्वं उपधा ॥ १ ॥

अन्त्यवर्णात् पूर्व्वं वर्णं उपधासंज्ञः स्यात् ।

६· १· ७·
विसर्गस्य—सँ—च्छवि ॥ २ ॥

छवि परे विसर्गस्य स्थाने सँः स्यात्। अकार इत्। मेघः छादक मेघश्छादकः विपन्नः चिन्तयति विपन्नश्चिन्तयति (२८ पृ० १ सू०) सस्य शः। लोकः तनोति लोकस्तनोति।

५· ७:· ७·
अतः कृकमिकुम्भपात्रेषु समासे ॥ ३ ॥

कृधातुकमिधातुजातशब्द, कुम्भ, पात्र, शब्देषु परेषु अकारात् परस्य विसर्गस्य स्थाने समासे सः स्यात् अयः-कार अयस्कारः, अहः कार अहस्कारः, तेजः-काम: तेजस्कामः। पयः-कुम्भः पयस्कुम्भः। पयः-पात्र पयस्पात्रम्। अतः किं वाः कुम्भएवमसमासे जमः कर्त्तैत्यादौ न।

७· ·१· ७· ·१· ·१· १·
शरि वा खर्परे तु वा लोपः ॥ ४ ॥

शरि परे विसर्गस्य सँः स्याद्वा। खर्परे शरि तु तस्य लोपो वा स्यात्। शिशुः-शेते शिशुश्शेते। जनाः-षट् जनाष्षट्। सकारस्य शे परे (२८पृ० १ सू०) शत्वम्। षे परे च (२८पृ०२सू०) षत्वम्। बालकः-स्वपिति बालकस्स्वपिति। खर्परे तु

धीरः-खाता धीरस्खाता धीरस् खाता ।
बुद्धिः-स्फुरति बुद्धिस्फुरति बुद्धिस् स्फुरति ।
द्वाः-स्थ द्वास्थः द्वास्स्थः ।

नमस्काण्डादयो निपात्याः । ५ ॥

नमस्काण्डम् । अयस्काण्डम् । मेदस्पिण्डम् । भास्करः । भ्रातुष्पुत्रः । इत्यादयः ।

अनव्ययस्य कप्रत्यये ॥ ६ ॥

अव्ययभिन्नस्य विसर्गस्य कप्रत्यये परे सँः स्यात् । हयोरः-क हयोरस्कम् । वक्ष्यमाणस्याव्ययस्य तु न प्रातस्तः-क ।

इणः षँः— । ७ ॥

इण्संज्ञकवर्णात् परस्यानव्ययस्य विसर्गस्य क प्रत्यये परे षँः स्यात् । अकारइत् । सर्पिः-क सर्पिष्कम् ।

इदुदुपधस्य चाप्रत्ययस्य कखपफेषु ॥ ८ ॥

कखपफेषु परेषु इकारोकारोपधस्य प्रत्ययभिन्नस्य विसर्गस्य स्थाने षँः स्यात् । निः-प्रत्यूह

निष्प्रत्यूहम्। आविःकृत आविष्कृतम्। दुः-कृत दुष्कृतम्। अप्रत्ययस्य किं कविः करोति। वायुः करोतीत्यादौ न।

६ः ७० ०।० ७० ०।० १०

इसुसोरेकवाक्ये वा समासे तु नित्यम्॥ ९॥

कखपफेषु परेषु इस्, उस्, इत्येतयोर्विसर्गस्य स्थाने एकवाक्ये षो वा स्यात्। समासे तु नित्यं स्यात्। सर्पिः करोति सर्पिष्करोति। धनुः- करोति धनुष्करोति। एकवाक्ये किं अस्तु हविः पिब क्षीरमिति वाक्यद्वये मा भूत्। समासे तु हविष्खण्डम्। धनुष्खण्डम्। इत्याद्येकमेव।

५० ०।० ७ः

अत उदश्योः॥ १०॥

अति हशि च परे अकारात् परस्य विसर्गस्य स्थाने उत्स्यात्। लोकः-अत्र लोकोऽत्र। दृष्टः-अस्ति दृष्टोऽस्ति। (२३पृ० ८सू०) गुणः (२७पृ० २०सू०) पूर्वं रूपञ्च। नृपः-मान्यः नृपोमान्यः। अतः किम् लोका अत्रेत्यादौ मा भूत्।

५ः ०।० ७०

अवर्णभोभ्यां लुगशि॥ ११॥

अवर्णं, भो, इत्येताभ्यां परस्य विसर्गस्य लुप्

स्यात् अशि परे। लोकाः-अत्र लोकाअत्र। भोः-एहि भोएहि। सन्धिसूत्रेण लुप्ता लोपात् शुभनं सन्धिः।

५० १०

इचो रँः—॥ १२ ॥

इचः परस्य विसर्गस्य रँः स्यादशि परे। अकारद्वत्। कविः-अत्र कविरत्र। धनुः आनय धनुरानय। मुनेः मानः मुनेर्मानः। साधोः-भोगः साधोर्भोगः।

५० ६०

आत् रजातस्य ॥ १३ ॥

अशि परे अवर्णात परस्य रजातस्य विसर्गस्य स्थाने रँएव स्यात् न तु उत् लुप्वा। पुनः-अत्र पुनरत्र। पितः-अत्र पितरत्र। द्वाः-आगतः द्वारागतः। वाः-गतम् वार्गतम्।

६० ७० ०१०

अहरादीनां पतिशब्दे वा ॥ १४ ॥

पतिशब्दे परे अहर्, गिर्, धुर्, इत्येषां शब्दानां रजातस्य विसर्गस्य स्थाने रँः स्याद्वा। अहः-पति अहर्पति.। गीः-पति गीर्पतिः गीष्पतिः। धूः-पति धूर्पति धूष्पतिः। उभयत्र पक्षे (२७सू० ८सू०) सत्वम्।

६॰ १॰ ७॰।

अह्नो न क, विभक्ति, रूप, रात्रेषु ॥१५॥

अह्नो रजातस्य विसर्गस्य स्थाने क, विभक्त्यादिपरेषु रो न स्यात्। अहः अहस्कर करः अहः-भिस्। अहोभिः। अहः-रूप अहोरूपम्। अहोरात्रः। काशिकायां तुरमाते न। तेन अहोरत्नम् अहोरमणीयतेत्यादि रूपमिति स्थितम्।

६॰७॰ ६॰ ७॰ ॰१॰ १॰ ६॰ ६॰ ॰१॰

रो रि ढो ढि च लोपः पूर्वाणो दीर्घश्च ॥१६॥

रेफे परे रेफस्य, ढकारे परे ढकारस्य च लोपः स्यात् तस्मिन् सति च पूर्वस्थितस्य अण् संज्ञवर्णानां दीर्घः स्यात्। भूपतिः-राजते भूपतीराजते। गुढ्-ढ गूढः। अण इत्युक्तेः ऋकारस्य न दीर्घ परिहढ्-ढ परिहढः।

५ः ६॰ १॰ ७॰

तदेतद्भ्यां सोर्लोपो हलि ॥ १७ ॥

तदेतद्भ्यां परस्य सोर्लोपः स्यात् हलि परे। सः-याति सयाति। एषः-गत एषगतः।

इति विसर्गसन्धिः।

शब्दसंज्ञा ।

सुँ औ जस् (१) अम् औट् शस् (२) टा भ्याम्

भिस् (३) ङे भ्याम् भ्यस् (४) ङसिँ भ्याम् भ्यस् (५)

ङस् ओस् आम् (६) ङि ओस् सुप् (७) एते सुप् ॥१॥ *

एते सुप्संज्ञाः स्युः । तेषु जशटङपा इतो न्यान्वि मादयः । सुङँस्योरच्च अनुनासिकतया इत् ।

त्रिशस्ते प्रथमादयः ॥ २॥

ते एकविंशतिः प्रत्ययाः क्रमेण त्रिकं त्रिकं प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी संज्ञाः स्युः ।

सम्बोधने प्रथमाया एकवचनं संबुद्धिः ॥ ३॥

सम्बोधनार्थप्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् ।

सुडक्लीबस्य सर्वनामस्थानम् = ॥४ ॥

सुँ, औ, जस्, अम्, औट् इत्ययं सुट् प्रत्याहारः सर्वनामस्थानसंज्ञः स्यात् क्लीवलिङ्गस्य तु न । वक्ष्यमाणभसंज्ञायाः पुरस्तादपवादः ।

---

* जसादिस्थान्त्यानामपि सकारादीनां नेत्त्वं न विभक्तौ तुस्मा इति पाणिनिना विभक्तिस्थ तवर्ग सकार मकाराणामित्त्वस्य निषेधात् औटि टकारः सुट् प्रत्याहारार्थः ।

७॰ १॰ ॰१॰

क्लीवे शिरेव ॥ ५ ॥

क्लीवलिङ्गे जस्-शस् स्थान-जातः शिरेव सर्व्वनामस्थानसंज्ञः स्यात्। नान्यः। पूर्व्ववद्भसंज्ञापवादः।

७॰ ७॰ १॰

असर्वनामस्थाने स्वादौ पदम् ॥ ६ ॥

सर्व्वनामस्थानभिन्ने स्वादौ प्रत्यये परे पूर्वं पदसंज्ञं स्यात्।

७॰ १॰ ॰१॰ ॰१॰ १॰

याजादौ नामप्रत्यये भं न तु पदम् ॥ ७ ॥

यकारादौ अजादौ च नामप्रकृतिकप्रत्यये परे पूर्व्वं भसंज्ञं स्यात् न तु पदसंज्ञम्। नामप्रत्यये इत्युक्तेर्धातुप्रत्यये न।

६ः॰ १॰ १॰

अचामन्त्याजादिष्टिः ॥ ८ ॥

अचां मध्ये अन्त्याजादिवर्णः टिसंज्ञः स्यात्।

१ः॰ १ः॰ १ः॰ ॰१॰ ॰१॰

षान्तनान्ताः संख्यावाचकाः डत्यन्ताश्च षट् ॥ ९ ॥

षान्ता नान्ताश्च संख्यावाचका डतिप्रत्ययान्ताश्च शब्दाः षट्संज्ञकाः स्युः।

१: ·१· १:·

बहु, गण, वतु-डत्यन्ताः संख्यावत् कार्य्यभाजः ॥१०॥

बहुगणशब्दौ वतु-डति-प्रत्ययान्तौ च संख्यावाचकवत् कार्य्यं भजन्ते। वरकारणानुरोधेऽपि न तथात्वम्। तेन यावती बह्वीत्यादौ संख्यावाचितया न ङीब्निषेधः।

१: १: १·

ईदूतौ—नित्यस्त्रीलिङ्गौ—नदी—॥ ११ ॥

लिङ्गान्तरानभिधायकौ नित्यस्त्रीलिङ्गौ ईकारान्त ऊकारान्तश्चैतौ शब्दौ नदीसंज्ञौ स्तः। वातप्रमीप्रभृतिस्तु पुंबोधकः स्त्रीबोधकश्च तेन न तस्य नदीत्वम्।

१· १· १:

अस्त्री—नेयङुवङ्स्थानी—॥ १२ ॥

इयङ्, उवङ्, स्थानीभूतौ नित्य स्त्रीलिङ्गौ स्त्रीशब्दभिन्नौ ईदूदन्तौ नदीसंज्ञौ न स्तः। यथा हे श्रीः हे भ्रूः। स्त्रीशब्दस्य तु स्यादेव। हे स्त्रि।

०· ·१·

आमि वा—॥ १३ ॥

आमि परे स्त्रीभिन्नौ पूर्वोक्तौ शब्दौ नदीसंज्ञौ वा स्तः। यथा श्रीणां श्रियाम्। भ्रूणां, भ्रुवाम्। स्त्रीशब्दस्य तु स्त्रीणामित्येव।

७· १ः ·१·

ङिति इदुदन्तौ च ॥ १४ ॥

ङिति परे नित्यस्त्रीलिङ्गौ, स्त्रीभिन्नौ इयङुवङ्-स्थानिनौ-ईदूदन्तौ, इदुदन्तौ च नदीसंज्ञौ वा स्तः। यथा श्रियै श्रिये। भ्रुवै भ्रुवे। सर्वत्र स्त्रीशब्दस्य तु नित्यमेव तेन स्त्रियै इत्येव। मत्यै मतये। धेन्वै धेनवे। अनित्यस्त्रीलिङ्गौ तु न। शुचये, साधवे।

१ः १ः १·

इदुदन्तावनदीसखी घिः॥ १५ ॥

नदीसंज्ञशब्द-सखिशब्द-भिन्नौ इदुदन्तौ घिसंज्ञौ स्तः।

१· ७· ·१·

पतिः समासः एव ॥ १६ ॥

समास एव पतिशब्दो घिसंज्ञः स्यात्। नान्यत्र।

१· १· ७ः १· ·१· ७·

प्रकृतिरङ्गंप्रत्ययविकरणयोर्विकरणादिस्तु प्रत्यये॥ १७

प्रत्ययविकरणयोः परयो प्रकृतिः, प्रत्यये परे विकरणागमादिश्च अङ्गसंज्ञः स्यात्। यथा भवतीत्यत्र शपि विकरणे, भवितेत्यादौ ताप्रत्यये च परे भूप्रकृतेरङ्ग संज्ञा तथा तनोतीत्यादौ तु उविकरणस्यैव तिप्रत्यये अङ्गसंज्ञा ततश्च तस्य गुणः।

१।१। १।२७।

सर्वादीनि—सर्व्वनामानि— ॥ १८ ॥

सर्व्वादयः शब्दाः सर्व्वनामसंज्ञाः स्युः। सर्व, विश्व, उभ, उभय, डतर-डतम-प्रत्ययान्त, इतर, अन्य, अन्यतर, त्वत्, त्व, नेम, सम, सिम, पूर्व, पर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर, त्यद्, तद्, यद्, एतद्, अदस्, इदम्, एक, द्वि, युष्मद्, अस्मद्, भवत्, किम्, इति सर्व्वादिः। उभशब्दो नित्यं द्विवचनान्तस्तस्येह पाठस्तु अकजर्थस्तेन उभकावित्यादि। कप्रत्यये तु उभयनेत्यादिवत् उभयकावित्येव स्यात् समासादिस्तो उभशब्दाद् अयचो नित्यत्वात्। अन्यतरशब्दग्रहणेनान्यतमस्य न। त्वत्त्वावन्यार्थौ। नेम इत्यर्द्धवाची। समः सर्व्वार्थकः। अत्रार्थविशेषो यथा।

समोऽतुल्ये व्यवस्थायां पूर्व्वाद्योऽन्तरोऽपुरि।
वाह्यदेशोत्तरीये च स्वस्त्वज्ञातिधनाभिधः।

व्यवस्था दिग्देशकालानामवधिनियमः। पुरि विशेष्यायां नेत्यर्थः। वाह्यदेशोभिन्नदेशसम्बन्धः।

७। १।

दिङ्नामसमासे वा ॥ १९ ॥

दिङ्नामवाचकसमासे सर्व्वनामसंज्ञा वा स्यात्।

उत्तरस्याः पूर्व्वस्याश्चान्तराला दिक् उत्तरपूर्व्वा। उत्तरपूर्वस्यै उत्तरपूर्व्वायै।

संज्ञोपसर्ज्जनीभूतानि न ॥ २० ॥

तानि सर्व्वादीनि संज्ञाभूतानि इतरविशेषणभूतानि च न सर्व्वनामसंज्ञानि स्युः। तत्र संज्ञायाम्, सर्वाय। विशेषणे, प्रियसर्वाय अतिसर्वाय।

७ ७ १

तृतीयासमासे तद्योग्यवाक्ये च ॥ २१ ॥

तृतीयासमासे तद्योग्यवाक्ये च नीतसंज्ञानि स्युः। मासपूर्वाय मासेन पूर्वाय।

७ ७ १ १

द्वन्द्वोत्तरपदे जसि तु वा ॥ २२ ॥

द्वन्द्वसमासोत्तरपदस्थानि तानि न सर्वनामसंज्ञानि स्युः। जसि तु वा स्युः। वर्णाश्रमेतराणाम्। जसि तु वर्णाश्रमेतरे वर्णाश्रमेतराः। उत्तरपद इत्युक्तेः पूर्वपदस्थस्य स्यादेव। तेन पूर्वपरे दिशौ इत्यादौ पूर्वाशब्दस्य सर्वनामतया पुंवद्भावः।

प्रथम चरम तयाय-प्रत्ययान्ताल्पार्द्ध कतिपय

१ १ १

नेमाः पूर्व्वाद्याश्च ॥ २३ ॥

प्रथमाद्या अष्टौ पूर्वाद्या गणोक्ताश्च नव एते सप्त

इत्र शब्दा जसि सर्व्वनामसंज्ञा वा स्युः। प्रथमे प्रथमाः। द्वये द्वयाः। द्वितये द्वितयाः। पूर्व्वे पूर्व्वाः इत्यादि।

१:० ७०
तीयप्रत्ययान्ताः ङिति ॥ २४ ॥

ङिति परे तीयप्रत्ययान्तशब्दाः सर्व्वनामसंज्ञा वा स्युः। द्वितीयस्मै द्वितीयाय। तृतीयस्याः तृतीयायाः।

६० ०१० १०
यणइक् संप्रसारणम् ॥ २५ ॥

यणः स्थाने आदिश्यमान इक् संप्रसारणसंज्ञः स्यात्। तत्रापि स्थानिसाम्यात् यस्थाने इः, वस्थाने उः, रस्थाने ऋ इत्येवं विशेषः।

७० १० १०
संबोधने प्रथमामन्त्रितम् ॥ २६ ॥

सम्बोधनार्थप्रथमा आमन्त्रित संज्ञा स्यात्।

१० १० १:० ०१० १०
द्विरुक्तौ धातुर्जक्षित्यादयश्चाभ्यस्तम् ॥ २७ ॥

कृतद्वित्वो धातुः जक्षित्यादयश्चाभ्यस्तसंज्ञाः स्युः। जक्ष, जागृ, दरिद्रा च चकास्तिः शास्तिरेव च। दीधी वेवी च विज्ञेयः जक्षादिः सप्तको गणः।

१० १०

स्वरादिनिपातमव्ययम् ॥ २८ ॥

स्वरादयो वक्ष्यमाणा (१० पृ० ३२सू०) उक्ता निपाताश्च एतेऽव्ययसंज्ञाः स्युः ।

इति शब्दसाधनोपयोगिसंज्ञाप्रकरणम् ।

परिभाषा ।

७० १० १०

प्रत्ययलोपे प्रत्ययनिमित्तं कार्य्यम् ॥ १ ॥

प्रत्ययलोपे प्रत्ययनिमित्तं गुणादिकार्य्यं भवेत् । यथा कवे साधो इत्यादौ संबुद्धिलोपेऽपि तन्निमित्तो गुणः । अत्र लोपे इत्युक्तेः लोपशब्देन लोपे एव कार्य्यं नतु लुका लोपेऽपि तेन कति यतीत्यादौ जसो लुका लोपे न गुणः ।

१० १० ७० १०

नलुबसिद्धः संज्ञासुब्विधावेव ॥२॥ *

संज्ञाविधौ सुपि परे सुपः स्थाने वा विधाने एव नलुप् असिद्धः स्यान्नान्यत्र । यथा पञ्च ब्राह्मण इत्यादौ लुप्तनकारान्तत्वेऽपि षट्संज्ञा । तेन संख्या

---

* न लुमिव न लोपोऽप्यन्यत्र सिद्धत्वेन राजभित्यत्र न लोपे तस्य सिद्धतया तत्र पूर्वस्यावर्णस्य लोपः ।

वाचकतया षट्संज्ञकत्वादीपो निषेधः, नान्ततया आपश्च न प्राप्तिः। सति तु सिद्धत्वे नान्तत्वाभावेन षट्संज्ञाऽप्रसक्तौ, ईप आपश्च निषेधो न स्यात्। सुपि विधौ, राजभ्यामित्यादौ अतो दीर्घो यञीति दीर्घो न, नलुपोऽसिद्धत्वात्। सुपः स्थाने विधौ यथा अतो भिस ऐस् इत्यनेन राजभिरित्यादौ न ऐस्। सति च सिद्धत्वे ऐस् स्यात्। एष्वेवासिद्ध इत्युक्तेः प्रानिषु इत्यादौ षत्वम् राजीयते राजायते इत्यादौ च क्यजादिपरे ईकारः दीर्घश्च स्यादेव। एवं दामोदर इत्यादौ सन्धिर्भवत्येव।

६। ।१। ७।

एच इग् ह्रस्वादेशे ॥ ३ ॥

एचःस्थाने ह्रस्वे आदिश्यमाने इगेव स्यात्। तत्रापि एकस्थानिकतया एदैतोः स्थाने इः, ओदौतोः स्थाने च उः स्यात्।

७। ।१। १।

संप्रसारणे न संप्रसारणम् ॥ ४ ॥

संप्रसारणे परे न पुनः संप्रसारणम्। यथा यून इत्यादौ युवन् इत्यस्य वकारस्य संप्रसारणे उ, इत्यस्मिन् कृते युइत्यत्र य् इत्यस्य इकाररूपं न पुनः संप्रसारणम्।

१· ५· ०१·

अङ्गकार्य्यं सन्धिकार्य्यात् बलवत् ॥ ५ ॥

अङ्गनिमित्तमङ्गस्थानिकार्य्यं वा अङ्गकार्य्यं तच्च बलवत्त्वेन सन्धिकार्य्यस्य बाधकं स्यात्। यथा नर-आ इति स्थिते सवर्णदीर्घं प्रसक्तं बाधित्वा टास्थाने इन एव भवतीत्याद्युह्यम्।

इति शब्दसाधनोपयोगिपरिभाषाप्रकरणम्।

अजन्त पुंलिङ्गाः।

५· १:·

प्रातिपदिकात् सुपः ॥ १ ॥

प्रातिपदिकात् सुप्‌संज्ञकाः प्रत्ययाःस्युः। तेषामर्थविशेषास्तु वक्ष्यन्ते।

७:· १:·

एकद्विबहुषु एकवचन द्विवचनबहुवचनानि ॥ २ ॥

एकत्वार्थे विभक्तिः एकवचनं, द्वित्वार्थे द्विवचनं, बहुत्वार्थे च बहुवचनं स्यात्।

७· ७· ·१· १·

जातिपरनिर्द्देशे एकस्मिन्—वा—बहुवचनम्

७·

असंख्याप्रयोगे ॥ ३ ॥

जातिपरनिर्द्देशे एकस्मिन्नप्यर्थे बहुवचनं वा स्यात्।

संख्यारूपविशेषणप्रयोगे तु न। यवो यवा वा। एकस्मिन्नित्युक्तेः व्रीहियवाविमौ इति द्विवचने न। संख्यारूपविशेषणप्रयोगे तु एको यव इत्यादौ न।

५० ७०

युष्मदो गौरवे।

गौरवे युष्मच्छब्दात् एकस्मिन्नप्यर्थे बहुवचनं वा स्यात्। त्वं मे गुरुरित्यर्थे यूयं मे गुरवः।

५० ५० ७। ०१०

अविशेषणाद्स्मदो द्वयोश्च ॥ ४ ॥

अविशेषणात् अस्मच्छब्दादेकत्वे द्वित्वे चार्थे बहुवचनं वा स्यात्। अहं वदामि आवां वदावः इत्यर्थे पक्षे वयं वदाम इति। सविशेषणस्य तु न, तेन सच्छात्रोऽहं वदामीत्येव स्यात् एवं द्वित्वेऽपि।

नर-स् इति स्थिते शब्दसाधनाय प्रक्रियाभिधीयते।

७० ६। ७० ७० ०१० १०

पदान्ते रसयोः खरि अवसाने च विसर्गः ॥ ५ ॥

खरि परे अवसाने च पदान्ते स्थितयोः रसयोः स्थाने विसर्गः स्यात्। पदान्ते इत्युक्तेः चस्कन्द पुंस्कोर इतरादौ न। इति सस्य विसर्गे नरः। नर-औ (२४ पृ० ८ सू०) वृद्धौ नरौ। नर-अस्।

५· ७· ·१· १·

अतो जसि, सह पूर्व्वसवर्णदीर्घः ॥ ६ ॥

जसि परे अकारस्य पूर्वसवर्णदीर्घरूप एकादेशः स्यात्। अतो गुणे इति वक्ष्यमाणपररूपापवादः। इति एकादेशदीर्घे विसर्गः। नराः। संबोधने एकवचने तु भेदो यथा हे नरस् इति स्थिते।

५· ६· ६··१· १·

एङ्ह्रस्वनदीभ्यः संबुद्धेः शसादेश लोपः ॥७॥*

एङन्तात् ह्रस्वान्तान्नदीसंज्ञकाच्च परस्य संबुद्धेः, शस आदेश लोपः स्यात्। इति संबुद्धिलोपे हे नर। संबोधनस्य स्पष्टप्रतीत्यर्थं हेभोः-प्रभृति-शब्दा अपि प्रयुज्यन्ते। नर-अम्। इति स्थिते।

७· १· ·१· ६·

अमि पूर्वरूपः सहाकः ॥ ८ ॥

अमि परे अगन्ताङ्गस्य पूर्वरूपः सह (पूर्वपरयोरेकादेशः) स्यात् अमीति (८३पृ०४२सू०) विहिताऽमोऽपि ग्रहणम्। इति पूर्वरूपे, नरम्। नर-औ। प्राग्वत् वृद्धिः। नरौ। नर-अस् इति स्थिते।

६· ७· ७··१· १·

ह्रस्वस्य शसि नामि च दीर्घः ॥ ९ ॥

ह्रस्वस्यागन्तस्य शसि नामि च दीर्घः स्यात्।

---

*शसादेशेत्यादिग्रहणं स्पष्टार्थं तदग्रहणेऽपि षष्ठ्याः परमित्यादिना (२० पृ० २१सू०) तल्लाभात् एवमन्यत्रापि।

५· ६· ६·१· ७·

तस्माच्छसोऽन्त्यस्य नः पुंसि ॥ १० ॥ *

तस्मात् परस्य शसोऽन्त्यस्य स् इत्यस्य स्थाने नँ इत्यादेशः स्यात् पुंलिङ्गे। अकार इत्। अन्त्यस्येत्युक्तेः (२५पृ०२१सू०) पञ्चम्याः परमित्यस्यापवादः। नरान्। नर-आ इति स्थिते।

५· ६·१· ६·३· १·३·

अतो भिस ऐस् टाङेङसिङसामिनयात्स्याः ॥११॥

अकारान्तादङ्गात् परस्य भिसःस्थाने ऐस्, टास्थाने इनः, ङेस्थाने यः ङसिस्थाने आत् ङसः स्थाने च स्यः इत्येवं क्रमेणैते आदेशाः स्युः। अनेकवर्णत्वात् सर्वादेशः। इति इने (२३पृ० ८सू०) गुणे च कृते।

५· ६· १· ७· ७·

ऋरषेभ्यो नो णोँऽपदान्ते एकपदेऽट्कुप्वनु-

७· ·१·

स्वारव्यवधानेऽपि ॥ १२ ॥†

ऋवर्णरकारषकारेभ्यः परस्यापदान्ते स्थितस्य नस्य णँः स्यात् निमित्तनिमित्तिनोरेकपदे स्थितौ अटा कवर्गेण पवर्गेणानुस्वारेण चैतैः व्यस्तैः समस्तैर्वा व्यवधा

---

*अन्त्यस्येत्युक्तिः प्रक्रिया लाघवार्थं तदनुक्तौ पञ्चम्याः परमित्यादिना आदिस्थाने आदेशेऽपि संयोगान्तलोपेन रूपसाधनमिति प्रक्रिया गौरवम्।

†षकारग्रहणं स्पष्टार्थं तद्ग्रहणेऽपि रकार ग्रहणेनैव रूपसिद्धेः षकारस्य रकारादित्वं भाष्यादौ स्पष्टतया स्वीकृतत्वात्।

नेऽपि। अकारइत्। यथा ऋवर्णात्, ऋणम् लृणम्। रेफात् तीर्णम् शीर्णम्। षात्, कृष्णः, विष्णुः। अपदान्ते किं नरानित्यादौ न। निमित्तं ऋवर्णादि निमित्ती नकारस्तयोरेकपदस्थत्वे किम् पितृनतिः मातृनमनम् दुर्नाम इत्यादौ न। अटा व्यवधाने रणः करणम् तोषणं पोषणम्। कवर्गेण हृकणम् रुग्णः। पवर्गेण अर्पणं दर्पणः। अनुस्वारेण हृंहणम् लृंहणमित्याद्युदाहरणानि द्रष्टव्यानि। प्रकृते षाऽनेन णत्वे कृते नरेण। नर-भ्याम् इति स्थिते।

६· १· ७· ७· ७· ·१·

अतो दीर्घो यञि सुपि तिङि च ॥ १३ ॥

यञादौ सुपि, तिङि च परे अकाराङ्गस्य दीर्घः स्यात्। नराभ्याम्। सुपि तिङीत्युक्तेः केशवः अङ्गनित्यादौ यञादौ तद्धिते न। अङ्गस्येत्युक्ति र्भवामीत्यादौ शपोऽकारस्यापि दीर्घार्थः। नर-भिस् (५२पृ० ११ सू०) ऐसि हृते विसर्गे च कृते। नरैः। नर-ए (५२ पृ० ११ सू०) ये, यञादितया तस्मिन् परे दीर्घः। नराय। प्राग्वत् नराभ्याम् नर-भ्यस् इति स्थिते।

६· ·१· ७ः ७· ·१·

अत एद् बहुवचनसुप्सभोःरोसि च ॥१४॥

सादौ भादौ च बहुवचनसंज्ञकसुपि ओसि च परे अकारान्ताङ्गस्य एत् स्यात्। इति एकारे कृते

सस्य विसर्गः। नरेभ्यः। नर-अस् (५३पृ० ११सू०) आति सवर्णदीर्घे च नरात् नराभ्याम् नरेभ्यः। प्राग्वत्। ङसः स्ये कृते। नरस्य। नर-ओस् (५४पृ० १४ सू०) एकारे (२२पृ० २सू०) अयादेशे विसर्गे च कृते। नरयोः। नर-आस् इति स्थिते।

५· ·१· ६·

ह्रस्वनद्यापो नुडामः॥ १५ ॥

ह्रस्वान्तान्नद्यन्तादाबन्ताच्च परस्यामः स्थाने नुँडागमः स्यात्। उटावितौ। टित्वादाद्यवागमः इति नुटि दीर्घे च कृते णत्वम्। नराणाम्। नर--ङि, इति स्थिते। (२३पृ०८सू०) गुणे कृते नरे। नर-ओस् नरयोः। प्राग्वत्। नर-सु (५४पृ १४सू) एति कृते।

५· ७· ६: ·६· ६·

इण्कोरपदादौ आदेशप्रत्यययोरसात् सस्य

१· ६:· ·१· ७· ·१·

षः शासिवसिघसीनाञ्च नुम्विसर्गव्यवधानेऽपि॥१६॥

इण्संज्ञकवर्णेभ्यः कवर्गाच्च परस्य अपदादौ स्थितस्य आदेशप्रत्ययावयवस्य सात्प्रत्ययभिन्नस्य शासि-वसिघसीनाञ्च सस्य षः स्यात् नुम्विसर्गव्यवधानेऽपि। अ इत् यथा इणः कविषु साधुषु मातृषु नरेषु गोषु नौषु चतुर्षु हलषु। कोः, वाक्षु त्वक्षु।

नुमा, व्यवधाने हवींषि यजूंषि। विसर्गेण, सर्पिःषु यजुःषु। सर्पिष्-षु यजुष्षु इत्यादौ तु विसर्गस्थाने सकारे कृते तस्यैवानेन षत्वे तद्योगे (२८पृ० २सू०) षत्वम्। अत नुम् इत्युक्तेः पुंसु सुहिंसु इत्यादौ न तत्रानुस्वारेऽपि नुम्रूपत्वाभावादिति। प्रकृते च अनेन सु इत्यस्य षत्वे। नरेषु। एवं जनमानवादयोऽकारान्ताः साध्याः। सर्व्वनामशब्देषु तु विशेषः।

५· ५· ६· १· ६· ·१· ६:
अतः सर्व्वनाम्नः—जसः शीः ङे स्मै ङसिङ्योः-

·१· १:
श्च स्मात्स्मिनौ ॥ १७ ॥

अकारान्तात् सर्वनामशब्दात् परस्य जसः स्थाने शीः ङे स्थाने स्मै, ङसिङ्योः स्थाने च क्रमात् स्मात्स्मिनौ स्याताम्। शइत्। शित्त्वात् सर्व्वादेशः। सर्व्व—अस्। जसःशीः ततो गुणे, सर्व्वे। सर्व्व—ए स्मैभावे कृते सर्व्वस्मै। सर्व—अस् स्माति कृते सर्व्वस्मात्। सर्व्व—आम्।

५· ६· ·१·
आदामः सुँट् ॥ १८ ॥

अवर्णान्तात् सर्व्वनामशब्दात् परस्य आमः स्थाने

सुँडागमः स्यात् । उटावितौ टित्वादादावागमः । इति सुटि (५४पृ० १४सू०) एत्वे षत्वे च कृते सर्वेषाम् । सर्व — ङि स्मिनि कृते सर्वस्मिन् । अन्यत् सर्वं नरसमानमेवं विश्वादयः । पूर्व्वादौ तु विशेषः । तत्र जसि (४६पृ० २२सू०) सर्वनामसंज्ञा-विकल्पेन पूर्वे पूर्वाः ।

५।३ ५।३ १।२ ·१·

पूर्वादिभ्यो नवभ्यः स्मात्स्मिनौ वा ॥ १८ ॥

पूर्व्वादिभ्यो नवभ्यः शब्देभ्यः परयोः ङसिङ्योः स्थाने स्मात्स्मिनौ वा स्तः । पूर्वस्मात् पूर्व्वात् । पूर्वस्मिन् पूर्वे । एवं परादयः । प्रथमादीनान्तु जसि (४६पृ० २२सू०) विकल्पेन सर्वनामत्वात् प्रथमे प्रथमा इत्यादिरूपम् । द्वितीयतृतीयशब्दयोस्तु ङित्सु (४७पृ० २४सू०) विकल्पेन सर्वनामत्वात् द्वितीयस्मै द्वितीयाय इत्यादि रूपम् । नास्ति निर्गता वा जरा यस्य स अजरो निर्जरो वा । तत्र विशेषः ।

६। ·१· ·१· ७। ७।

जराया असुँङ् वाऽचि सुपि ॥ २० ॥

अजादौ सुपि परे जराशब्दस्य असुङ् इत्यादेशः स्यात् । उङावितौ । ङित्वादन्तादेशः । एकदेशविकृतस्यानन्यतया निर्जरादिशब्देजरभागस्याप्यादेशः ।

अजर-औ अजरसौ। अजरस: अजरसम्। अजरसौ अजरस:। प्रकृतिप्रत्यययोर्मध्ये प्रकृत्याश्रितं कार्य्यं बलवदिति टादौ आदौ असुँङादेशे कृते अकारपरत्वाभावात् इनादेशो नैत्येव सिद्धान्तः। तेन अजरसा भिसि तु अजादित्वाभावेनाद्ये ऐसि कृते ततोऽजादित्वात् असुँङादेश इति विशेषः। अजरसैः पक्षे हलादौ च नरवत्। इत्यकारान्ताः। विश्वपाः विश्वपौ इत्यादि शसादावचि तु।

६· ६· ६· १·
आतो धातोर्भस्य लोपः॥ २१॥

भसंज्ञकस्य आकारान्तधातोराकारस्य लोपः स्यात्। विश्वपः विश्वपा विश्वपाभ्यामित्यादि। एवं सर्व्वदादयः इत्यादन्ताः।

कविः। कवि—औ इति स्थिते।

५·१·१ः ५··१·
घेरौयू पत्युश्च॥ ६२॥

घिसंज्ञकशब्दात् पतिशब्दाच्च परस्य औ इत्यस्य स्थाने क्रमेण ई ऊ इत्यादेशौ स्तः। तत्रापि इकारात् परस्य ई, उकारात् परस्य ऊ इति भेदः। (४४पृ०१६सू) पत्युर्घित्वेऽप्यसमासार्थं पृथग्ग्रहणम् इति ईत्वे कृते सवर्णदीर्घे कवी। कवि—अस्।

६ ७ ६ ७ १ १

ह्रस्वस्य जस्संबुद्ध्यो र्घेर्ङित्सु च गुणः ॥ २३॥

जसि संबुद्धौ च परतो ह्रस्वान्तस्य, ङित्सु परेषु च घिसंज्ञकस्याङ्गस्येको गुणः स्यात् । इति गुणे विसर्गः । कवयः । संबुद्धौ तु कवि-स् इति स्थिते (५२पृ० ७सू०) संबुद्धिलोपे (४८पृ० २सू०) गुणः कवे । (५२पृ० ८सू०) अमि पूर्वरूपे । कविम् । कवी । शसि दीर्घे नादेशे च कवीन् । कवि—आ ।

५ १ १ ७

घेः टा नाऽस्त्रियाम् ॥ २४ ॥

घेः परस्य टा इत्यस्य स्थाने ना स्यात् । कविना । कविभ्याम् कविभिः । कवि—ए गुणे अयादेशे च कृते कवये कविभ्याम् कविभ्यः । कवि अस् गुणे कृते ।

५ ६ ६ १

एङो ङसिङसोरादेर्लोपः ॥ २५ ॥

एङः परस्य ङसिङसोरादेर्लोपः स्यात् । इति आदिलोपे विसर्गे च । कवेः । कविभ्याम् कविभ्यः । कवेः कव्योः कवीनाम् । कवि—इ ।

५ ६ १

घेर्ङेर्डौः ॥ २६ ॥

घेः परस्य ङेः स्थाने डौः स्यात् । डइत् इति डौभावे ।

६· १· ७·
टेर्लोपो ङिति ॥ २७ ॥

ङिति परे पूर्वस्य टेर्लोपः स्यात्। इति इकार लोपे। कवौ। कव्योः। कविषु। एवं रविवह्निप्रभृतय इकारान्ताः। सखिशब्दे तु विशेषः।

५: ६· ६· १·
ऋवर्णसखिभ्यां सोरसंबुद्धेर्डा ॥ २८ ॥

ऋवर्णात्सखिशब्दाच्च परस्य संबुद्धिभिन्नस्य सोः स्थाने डा स्यात्। ड इत्। ङित्वात् टिलोपः। सखा। सखि-औ इति स्थिते।

६· ७· ७· १·
सख्युरसंबुद्धौ सर्वनामस्थाने वृद्धिः ॥ २९ ॥

संबुद्धिभिन्ने सर्वनामस्थाने परे सखिशब्दस्यान्त्यस्यैको वृद्धिः स्यात्। इति वृद्धौ आयादेशः। सखायौ एवं सखायः। हे सखे। सखायम्। सखायौ। सखीन्। सखि—आ इत्यत्र घिसंज्ञाभावात् न ना तेन (२१पृ० १सू०) यणि सख्या एवं सख्ये।

५: ५· ६:·१· ६·१· १·
इदुद्भ्यामघेः ङसिङसोरुत् ङेस्तु औः ॥ ३० ॥

घिसंज्ञकभिन्नाभ्यामिदुद्भ्यां परयोः ङसिङसोः

स्थाने उत्, ङेः स्थाने च औः स्यात् । पञ्चम्याः परमित्युत्तेरादेरेवादेशः । औः अकारेत् । शित्वात् सर्व्वादेशः । सख्युः । सख्युः । सख्यौ । असमस्तपतिशब्दस्तु सखिशब्दवत् । किन्तु तृतीयादौ क्वचिद् घित्वमपीच्छन्ति तेन पतिना नीयमानायाः पुरः—शक्रो न तुष्यति । सीतायाः पतये नमः । नष्टे मृते प्रव्रजिते क्लीवे वा पतिते पतौ इत्यादिसिद्धिः । समासे तु श्रीपतिशब्दादयः कविशब्दवत् । डति प्रत्ययान्ताः कतियतिप्रभृतयः नित्यं बहुवचनान्ताः इति सिद्धान्ते तत्र कति-अस् इति स्थिते ।

५ः ६ः ·१· ६·

डतिषड्भ्यो जस्शसोर्लुक् सर्वस्य ॥ ३१ ॥

डतिप्रत्ययान्तात् षट्संज्ञकेभ्यश्च शब्देभ्यः परयो र्जस्शसोः सर्वस्य लुक् स्यात् । कति कति । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु । एवं यति । त्र्यादयः संख्यावाचका अपि नित्यं बहुवचनान्ताः । तत्र त्रिशब्दस्य कतिशब्दवद्रूपम् आमि तु भेदः ।

६· १· ७·

त्रेस्त्रय आमि ॥ ३२ ॥

त्रिशब्दस्य स्थाने त्रयादेशः स्यादामि परे ।

त्रयाणाम्। द्विशब्दो द्विवचनान्तः। द्वि--औ।

६:· १· ७·

त्यदादीनामः सुपि ॥ ३३ ॥

सर्व्वादिगणेषूक्तानां त्यदादीनामः स्यात् सुपि परे। सामान्यतोऽन्तादेशः। इतीकारस्थाने अकारे कृते द्वौ द्वौ। एवं सर्व्वत्र अकारे कृते नरशब्दद्विवचनवत्। इतीकारान्ताः।

वातप्रमीशब्द औणादिकप्रत्ययान्तः। वातप्रमीः। (२१ पृ० १सू०) यण्। वातप्रम्यौ वातप्रम्यः। अमि तु (५२पृ० ८सू०) पूर्व्वरूपे एकादेशे वातप्रमीम् वातप्रम्यौ। शसि तु

५: ५: ६· ·१·

अनदीधातुभ्यामी दूदन्ताभ्यां शसो नुँ श् ॥२४॥*

नदीसंज्ञकशब्दधातुवर्जाभ्यामीदूदन्ताभ्यां परस्य शसः स्थाने नुँश स्यात्। उशावितौ। शित्वात्सर्व्वादेशः। वातप्रमीन्। वातप्रम्या इत्यादयः। आमि तु ह्रस्वनदीत्वाभावान्न नुट्। वातप्रम्याम्। ङौ तु पूर्व्वसवर्णदीर्घे। वातप्रमी। सुधीः। सुधी-औ।

७· ६:· ७· ६: १:

अचि—श्नुधातुभ्रुवां प्रत्यये—य्वोरियँङुवँङौ ॥२५॥

अजादौ प्रत्यये परे श्नु प्रत्ययस्य धातोर्भ्रुवश्च इवर्णो-

* शित्करणं प्रक्रियालाघवार्थं तदकरणेऽपि आदि स्थाने आदेशे संयोगान्तलोपेन साधने गौरवम्।

वर्णयोः स्थाने क्रमादियँङुवँङौ स्याताम्। अङा-वितौ। ङिच्चादन्तादेशः। इति इयङि कृते सुधियौ। सुधिय इत्यादि। प्रधीः प्रधी-औ।

६· ६· ६· ६· ६· १·
एरनेकाचोऽधातोरसंयोगादेरसुधियो यँः॥२६॥
अजादौ प्रत्यये परे अनेकाचो धातोर्धात्ववयव संयोगपूर्व्वकभिन्नस्य इवर्णस्य स्थाने यँः स्यात् न तु सुधीशब्दस्य। अकार इत्। इयङोऽपवादः। अत्र सुधीति पर्य्युदासात् क्विबन्तधातोरपि धातुत्वम-स्तीति गम्यते। इति ये कृते प्रध्यौ प्रध्यः प्रध्या इत्यादि। एवं सर्य्यभीदुर्भीप्रभृतयः। संयोगपूर्व्वस्य तु सुश्रियौ सुश्रियः इत्यादिषु पूर्व्वेण इयङेव। धात्ववयवेति किं दुर्धीशब्दस्य य एव तस्य धात्ववय-वमात्रेण संयोगाभावात्। शुद्धा धीर्यस्य शुद्धधीः। शुद्धधी-औ इतिस्थिते।

६· ६:· १· १: ७·
अगतिकारकपूर्व्वकस्य यूँनि यवौ सुपि॥२७॥
गतिसंज्ञकशब्द—कारक—पूर्व्वकभिन्नस्य धातोरिव-र्णोवर्णयोः स्थाने अजादौ सुपि परे यवौ न स्या-ताम्। किन्तु इयङुवङावेव। इति इयङि शुद्धधियौ शुद्धधियः। अत्र सुपीत्युक्तेस्तिङि य एव तेन

निन्यतुः। सेनां नयतीति सेनानीः प्रधीवत् ङौ तु विशेषः।

५ः ६ १

नद्याब्नीभ्यो ङेराम्ँ॥ ३८॥

नदीसंज्ञकादाबन्तात् नीशब्दाच्च परस्य ङेराम्ँ स्यात्। उदित्। इति आमि सेनान्याम्। इतीकारान्ताः। साधुः कविवत् साध्यः। साधुः साधू साधवः। हे साधो। साधुम् साधू साधून्। साधुना साधुभ्याम् साधुभिः। साधवे साधुभ्याम् साधुभ्यः। साधोः साधुभ्याम् साधुभ्यः। साधोः साध्वोः साधूनाम्। साधौ साध्वोः साधुषु। एवं मनुभानुक्रमानुप्रभृतयः। इत्युकारान्ताः।

खलपूः। खलपू—औ इति स्थिते

६ ६ ६ ६ १ ७ ७

अनेकाचोधातोरसंयोगादेरोर्वो-ऽचि-सुपि-

१ ६

न भुवः॥ ३९॥

अनेकाचो धातोर्धात्ववयवसंयोगपूर्वकभिन्नस्य उवर्णस्य स्थाने वँः स्यात् अजादौ सुपि परे न तु भुवः। अदित्। इति वे कृते खलप्वौ खलप्वः। भुवस्तु स्वयंभुवौ स्वयंभुव इत्यादौ उवङेव। अत्रापि अगतिका

रंकपूर्वस्येति निषेधात् परमलुवौ परमलुवइत्यादौ उवङेव। संयोगपूर्वस्य तु न वः किं तूवङेव अच्युवौ अच्युव इत्यादि। सुधीत्युक्तिस्तिङि नुनुवतुरित्यादौ न वः। वर्षाभू पुनर्भू शब्दयोस्तु भेदः।

६ः १०
वर्षाभ्वश्च ॥ ४० ॥

वर्षाभूपुनर्भूशब्दयोरुवर्णस्य वः स्यात् अजादौ सुपि परे। वर्षाभ्वौ वर्षाभ्वः पुनर्भ्वौ पुनर्भ्वः इत्यादि। पुनर्भूर्यौगिकः पुंसि। अतिचमूप्रभृतयस्तु वातप्रमीवत्। किन्तु विग्रहे नदीत्वेन हस्वो नदीकार्य्यमिति सिद्धान्तस्तेन ङित्सु अतिचम्वै अतिचम्वै इत्यादि संबुद्धौ च अतिचमु इति भेदः। नदीकार्य्यं च स्त्रीलिङ्गे वक्ष्यते। इत्यूदन्ताः।

धातृ-स् (६०पृ०२८सू०) डाभावे धाता धातृ-औ

६० १० ७ः
ऋतो ङिसर्वनामस्थानयोः ॥ ४१ ॥

ऋकारान्तस्य गुणः स्यात् ङौ सर्वनामस्थाने च परे इति गुणे कृते।

अप्, तृन्, स्वसृ, नप्तृ, त्वष्टृ, क्षत्तृ, प्रशा-
६ः ६० १० ७० ७०
स्तॄणामुपधाया दीर्घोऽसंबुद्धौ सर्व्वनामस्थाने ॥४२॥

असंबुद्धौ सर्वनामस्थाने परे अबादीनामुपधाया

दीर्घः स्यात् । इति दीर्घे । धातारौ धातारः । संबुद्धौ गुणे कृते उपधादीर्घाभावः रस्य विसर्गश्च । हे धातः । धातारम् धातारौ धातॄन् धात्रा धात्रे इत्यादि । ङसिङसोस्तु ।

५· १· ६:
ऋतो डुत् ङसिङसोः ॥४३॥

ऋदन्तात् परयोर्ङसिङसोरादेः स्थाने डुत् स्यात् । डइत् । इति डुति कृते टिलोपे च सस्य विसर्गः । धातुः धातुः धातॄणां धातरीत्यादि ।

पिता माता ननन्दा ना सव्येष्ठभ्रातृयातरः ।
जामाता दुहिता देवा न तृणन्ता इमे दश ॥

इत्युक्तेः सर्वनामस्थाने परे एषाम् ऋतो गुणे कृते नोपधादीर्घः । तेन तत्र पितरौ पितर इत्यादि तत्रापि नृशब्दस्य तु विशेषः

६· ·१· ७· १·
नुर्वा नामि दीर्घः ॥ ४४ ॥

नामि परे नृशब्दस्य दीर्घो वा स्यात् । नृणाम् नृणाम् । शेषं पितृवत् । इत्यृदन्ताः । गो-स् इति स्थिते ।

६· ·१· ७·
ओरौत् सर्वनामस्थाने ॥ ४५ ॥

सर्वनामस्थाने परे ओकारान्तशब्दस्य औत् अन्ता-

देशः स्यात् । इति औति गौः गावौ गावः ।

६· ·१· ७·

औत आदम्शसोः ॥ ४६ ॥

अमि शसि च परे ओकारान्तशब्दस्य आद् अन्तादेशः स्यात् । गाम् गावौ गाः इत्यादि । ङसि ङसोस्तु (५८पृ०२५सू०) अतोलोपे गोः गोरित्यादि । इत्योकारान्तः ।

६· ·१· ७·

राय आहलि ॥ ४७ ॥

रैशब्दस्य आद् अन्तादेशः स्याद्धलि परे । राः । अचि तु आयादेशः । रायौ रायः राया राभ्यामित्यादि । इत्यैकारान्तः । ग्लौः । अचि आवादेशः । ग्लावौ ग्लावः इत्यादि इत्यौदन्तः ।

इत्यजन्तपुंलिङ्गाः ।

अजन्तस्त्रीलिङ्गशब्दाः ।

लता- स् इति स्थिते ।

५· ६· १·

हलाबीब्भ्यः सो लोपः ॥ १ ॥

हलन्तादाबन्तादीबन्ताच्च शब्दात्परस्य सोर्लोपः स्यात् । इति सुलोपे लता । लता-औ ।

५॰ १॰ १॰
आप औः शीः ॥ २ ॥

आवन्तात्पर औः शीः स्यात्। शइत्। शित्त्वात् सर्व्वादेशः। इति शीभावे गुणे च कृते लते। जसि सवर्णदीर्घविसर्गौ लताः। संबुद्धौ तु।

६॰ ॰१॰ ७ः॰
आप एत् संबुद्धिटौसु॥ ३ ॥

संबुद्धौ टौसोश्च परत आवन्तस्य स्थाने एकारः स्यात्। अन्तादेशः। सुलोपेऽपि तन्निमित्तके एकारे कृते लते। अमि पूर्व्वरूपे लताम्। लते। शसि तु सवर्णदीर्घविसर्गौ। लताः। लता-आ एति अयादेशे च लतया। लताभ्याम् लताभिः। लता-ए इति स्थिते।

५॰ ६ः॰ ॰१॰
आपो ङितां याट्॥ ४ ॥

आवन्तात् शब्दात् परेषां ङितां स्थाने याट् स्यात्। टकार इत्। टित्त्वादादावागमः। इति याटि वृद्धौ च लतायै लताभ्याम् लताभ्यः। ङसौ याटि सवर्णदीर्घं विसर्गं च लतायाः लताभ्याम् लताभ्यः। ङसि लतायाः। ओसि एति अयादेशे विसर्गं च लतयोः। आमि (५५पृ॰ १५सू॰) नुटि लतानाम्।

ङौ तु (६४पृ० ४सू०) आमो याटि सवर्णदीर्घे च लतायाम् लतयोः लतासु। एवं रमामायाप्रभृतय आबन्ताः शब्दाः। आबन्तसर्वनाम्नान्तु।

५० ११० ११११०

सर्व्वनाम्नः स्याट् ह्रस्वश्च॥ ५॥

आबन्तात् सर्व्वनाम्नः परेषां ङितां स्थाने स्याट् स्याटि च पूर्व्वस्य ह्रस्वः स्यात्। टइत् टित्त्वादादावागमः। याटोऽपवादः। स्याटि वृद्धौ, सर्व्वस्यै सर्व्वस्याः सर्व्वस्याः। आमि तु (५६पृ० १८सू०) सुटि सर्व्वासाम्। ङौ सर्व्वस्याम् इत्येव भेदः। अन्यत्र लतावत्। एवं विश्वादयः। द्वितीयातृतीयाशब्दयोस्तु ङित्स्विव (४७पृ० २४सू०) विकल्पेन सर्व्वनामतया सर्व्वावत् पक्षे लतावच्च रूपम् द्वितीयस्यै द्वितीयायै इत्यादि। उत्तरपूर्व्वादिशब्दादेरपि (४५पृ०१५सू०) विकल्पेन सर्व्वनामतया ङित्सु उत्तरपूर्व्वस्यै उत्तरपूर्व्वायै इत्यादि रूपद्वयम्। अम्बाशब्दस्य तु संबुद्धावेव भेदः।

६१ ७० १०

अम्बानदीसृभ्रुवां संबुद्धौ ह्रस्वः॥ ६॥ *

संबुद्धौ परे अम्बाशब्दस्य नदीसंज्ञकशब्दस्य सृभ्रूशब्दस्य चान्तस्य ह्रस्वः स्यात्। संबुद्धिसुलोपे

* पाणिनीयमपि सृभ्रूशब्दग्रहणं भूरिप्रयोगानुरोधात् तच्च विभाषया सृभ्रु कुतः इत्यादि (७१ पृ० १८०) दर्शितम्।

तन्निमित्ते कृते हे अम्ब। शेषं लतावत्। जराशब्दस्य जरसादेशे (५७पृ० २०सू०) पक्षे असुडि जरसौ जरसम् जरसौ जरस इत्यादि पक्षे हलादौ च लतावत् इत्याबन्ताः। विश्वपादयस्तु पुंवत्। मतिशब्दः कविशब्दवत् किन्तु स्त्रीत्वात् शसः स्थाने न नः टास्थाने च न ना। मतीः मत्या। ङित्सु तु नदीत्वपक्षे मति ए इति स्थिते।

५· ६:· ·१·
नद्या ङितामाट्॥ ७॥

नदीसंज्ञकशब्दात् परेषां ङितां स्थाने आट् स्यात्। टइत्। टित्वादादावागमः। इत्याटि हलौ यणि च कृते, मत्यै, नदीत्वाभावपक्षे घित्वात् कविवत्, मतये। ङसिङसोस्तु नदीत्वपक्षे आटि सवर्णदीर्घे यणि च कृते, मत्याः मत्याः ङौ तु आमौ आटि यणि च कृते, मत्याम्। पक्षे घित्वात् कविवत्, मतेः मतेः मतौ। एवं श्रुतिस्मृतिबुद्धिप्रभृतयः। त्रिशब्दस्य तु

७· ६: ·१· ७· ·१·
स्त्रियां त्रिचतुरोस्तिसृचतसृ सुपि न गुण

१:
दीर्घौ॥ ८॥

स्त्रियां वर्त्तमानयोस्त्रिचतुरोः स्थाने क्रमात् तिसृ, चतसृ इत्यादेशः स्यात् सुपि परे तयोश्च

निमित्ते सति न गुणदीर्घौ स्याताम्। तिस्रः तिस्रः तिसृभिः तिसृभ्यः तिसृभ्यः तिसृणां तिसृषु। इतीकारान्ताः।

नदीशब्दस्य सुलोपे नदी। यणि नद्यौ नद्यः। संबुद्धौ ह्रस्वे नदीत्वेन घित्वाभावात् न गुणः हे नदि। अमि पूर्व्वरूपे। नदीम्। नद्यौ। नदीत्वान्न नुम् दीर्घविसर्गः नदीः। यणि नद्या। ङित्सु नित्यनदीत्वात् आटि, नद्यै नद्याः नद्याः नद्यामित्यादि एवं वाणीभवानीसरस्वतीप्रभृतय ईबन्ताः। वातप्रमीशब्दस्तु पुंवत्। लक्ष्मीप्रभृतयः औणादिकेप्रत्ययान्ता नित्यस्त्रीलिङ्गाः नेबन्तास्तेन तत्र न सुलोपः। लक्ष्मीः। एवं तरीः तन्त्रीः। एतेषां सावेव भेदः अन्यत्र नदीवत्। स्त्रीशब्दस्य तु नदीत्वात् ह्रस्वः। हे स्त्रि अजादौ तु भेदः।

६· १· ३· ३· ·१· ·१· ७:

स्त्रिया इयँङचि सुपि वात्वम्शसोः ॥ ८ ॥

स्त्रीशब्दस्य इयँङ् स्यादजादौ सुपि परे अमि शसि तु वा स्यात्। अङावितौ। ङित्वादन्तादेशः। स्त्रियौ स्त्रियः। अमि तु स्त्रियम् स्त्रीम्। स्त्रियौ, शसि स्त्रियः स्त्रीः। स्त्रिया। ङित्सु नित्यनदीत्वात् स्त्रियै स्त्रियाः स्त्रियाः स्त्रियामित्येव

रूपाणि। आमि तु नित्यनदीत्वात् नुडेव स्त्रीणाम्। श्रीधीह्रीभी शब्दास्तु क्विबन्ताधातवो नेबन्तास्तेन न सुलोपः। श्रीः। इयङ्स्थानित्वेन नदीत्वाभावेन संबुद्धौ न ह्रस्वः। हे श्रीः। (६२ पृ० २५सू०) अजादौ तु इयङ् श्रियौ श्रिय इत्यादि। ङित्सु विकल्पेन (४४ पृ० १४सू०) नदीत्वेन नदीत्वपक्षे आटि वृद्धौ इयङि च कृते, श्रियै श्रियाः श्रियाः इति पक्षे इयङ्मात्रे, श्रिये श्रियः श्रिय इति च रूपाणि आमि च (४२ पृ० १२ सू०) विकल्पेन नदीत्वात् नदीत्वपक्षे नुटि श्रीणाम्। पक्षे इयङि श्रियाम्। ङौ तु नदीपक्षे आमौ आटि च, श्रियाम्। पक्षे श्रियि इति भेदः एवं धीह्रीभीप्रभृतयः। सुष्ठु धीर्यस्याः सा सुष्ठु ध्यायति या वेति वाक्ये सुधीः श्रीवदेव। सेनानीशब्दस्तु पुंवदेव। इतीकारान्ताः।

धेनुर्मतिवत् साध्यः धेनुः धेनू धेनव इत्यादि धेन्वै धेनवे इत्यादि च। एवं तनुचञ्चुप्रभृतयः। गुरुलघुप्रभृतयस्तु न नित्यस्त्रीलिङ्गास्तेन स्त्रियामपि शस्टाभिन्नं साधुवत्। इत्युकारान्ताः।

वधूर्गौरीवत् साध्यः। सावेव भेदः। वधूः। वध्वौ वध्वः इत्यादि। भ्रूः श्रीवत्। (६२पृ० २५सू०) उवङि भ्रुवौ भ्रुवः। संबुद्धौ हे भ्रूरित्येव सुभ्रूशब्दस्य तु

(६८पृ०६सू०) ह्रस्वः हे सुभ्रु । विमानना सुभ्रु कुतः पितुर्गृहे इति कुमारः । ङित्सु भ्रुवे भ्रुव इत्याद्येकैकमेव रूपम् । एवं भूप्रभृतयः । खलपूः पुंवत् । वर्षाभूपुनर्भ्वावपि पुंवत् उवङः स्थानित्वाभावेन न नदीत्वनिषेधस्तेन ह्रस्वे हे पुनर्भु । हे वर्षाभु । आमि ङित्सु च नित्यं नदीकार्य्यम् । तत्र आमि नदीत्वेन नुटि कृते ।

५० ५० . ७०
पूर्वपदस्थान्निमित्तादेकाच्सकवर्गोत्तरपदे नामा-
६० ६० १० ७० ११०
न्तनुम्विभक्तिस्थस्य नो णोऽड्वादिव्यवधानेऽपि अन्यो-
७० ११० ११०
त्तरपदे तु वा ॥ ८ ॥

एकाच् सकवर्गञ्च उत्तरपदं यस्मिन् तस्मिन् समासोत्तरपदे पूर्व्वपदस्थेभ्यः ऋरषेभ्यः परस्य प्रातिपदिकान्त, नुम, विभक्ति, स्थस्य नस्य णः स्यादट्कवर्गपवर्गानुस्वारव्यवधानेऽपि । तद्भिन्नोत्तरपदे तु वा स्यात् । अकारवत् । इति णत्वे पुनर्भूणाम् । वर्षाभूणाम् । अन्यत्र समानम् । स्वयंभूः अत्यूः पुंवत् । इत्यूकारान्ताः ।

स्वसृ—स् इति स्थिते । सोर्डाभावे स्वसा-सर्व्वनामस्थाने परे तु (६५पृ०४१सू०) गुणे उपधा-

दीर्घं स्वसारौ स्वसारः स्वसारं स्वसारौ स्वसॄः। स्वस्रा इत्यादि। मातृदुहितृयातृननान्दृप्रभृतयः पितृवत्। माता मातरौ मातर इत्यादि किन्तु शसो न नः तेन मातॄः इत्यादि भेदः। इत्यृकारान्ताः। द्योशब्दो गोवत् द्यौः द्यावौ द्यावः द्याम् द्यावौ द्याः द्यवा इत्यादि। इत्योदन्तः। नौर्ग्लौवत्। नौः नावौ नावः नावा इत्यादि। इत्यौदन्ताः।

इत्यजन्तस्त्रीलिङ्गप्रकरणम्।

अजन्तक्लीवलिङ्गाः।

ज्ञान—स् इति स्थिते।

५॰ ५॰ ६ः ॰१॰

अतः क्लीवात् स्वमोर्मुँम् ॥ १ ॥*

अकारान्तात् क्लीवात् परयोः स्वमोः स्थाने मुँम् स्यात्। उम्भावितौ। मित्त्वात् सर्व्वादेशः। ज्ञानम् संबुद्धौ तु (५२पृ॰ ७सू॰) तल्लोपे, हे ज्ञान। ज्ञान— औ इति स्थिते।

५॰ १॰ १॰

क्लीवा—दौः शीः ॥ २ ॥

सर्वं क्लीवलिङ्गशब्दात् पर औः शीः स्यात्। शइत

---

* सुमः मित्करणं लाघवार्थम् अम आदिस्थाने त्वाऽपि संयोगान्तलोपेन रूपसिद्धेः। एतच्च स्वमसंबुद्धिविषये चरितार्थं तथा न संबुद्धिविषयम् अपवादो यद्यन्यत्र चरितार्थस्तदा तस्य बाधकत्वाभावविधानात्।

तेन सर्वादेशः । क्लीवादित्यनुवृत्तौ पुनर्ग्रहणं सर्व-क्लीवप्राप्त्यर्थम् । इति श्यां ज्ञाने । ज्ञान-अम् ।

६: १·

जश्शसोः शिः ॥ ३ ॥

सर्वक्लीवात् परयोर्जसः शसश्च स्थाने शिः स्यात् । शद्गत् सर्वनामस्थानसंज्ञार्थः । सर्वादेशः ।

६· ६· १· ७·

क्लीवस्य झलचो नुँम् धौ ॥ ४ ॥

धौ परे झलन्तस्याजन्तस्य च सर्वक्लीवलिङ्गस्य नुँम् स्यात् । उमावितौ मित्त्वादन्त्यादचः पर आगमः । इति नुमि कृते ।

६· ७· ७·

नान्तस्योपधादीर्घोऽसंबुद्धौ सर्वनामस्थाने ॥ ५ ॥

नान्तस्य उपधाया दीर्घः स्यात् असंबुद्धौ सर्वनाम-स्थाने परे । असंबुद्धाविति पर्य्युदासात् लिङ्गान्तरेऽपि । अन्यथा क्लीवे शिमात्रस्यैव सर्वनामस्थानतया संबुद्धेरप्रसक्तेः पर्य्युदासासम्भवात् । इत्युपधादीर्घे, ज्ञानानि । द्वितीया प्रथमावत् । शेषं नरवत् । एवं फलधनवनादयोऽकारान्ताः । सर्वनाम्नान्तु जसि लिङ्गविहितकार्य्यस्य बलवत्त्वेन शीभावं

बाधित्वा शिरेव तेन सर्व्वाणि इत्यादि। ङेप्रभृतिषु तु पुंवदेव। तत्र कतरादौ विशेषः।

५: ५: ५: ६: ·१·
क्लीबेभ्यो डतरादिभ्यः पञ्चभ्यः स्वमोर्डत्
·१· ·१· ५·
नत्वेकतरात् ॥ ६ ॥

डतरप्रत्ययन्तादिभ्यः सर्वनामगणपठितेभ्यः पञ्चभ्यः क्लीवलिङ्गस्थेभ्यः परयोः स्वमोः स्थाने डत् स्यात् नत्वेकतरात्। ड इत्। डित्त्वात् टिलोपः। कतरत्। कतमत् अन्यत्, अन्यतरत् इतरत्। एकतरस्य तु एकतरम्। एकतमस्य तु स्यादेव एकतमत्। संबुद्धाव्ययमादेश इष्यते। हे कतरत् इत्यादि। अजरशब्दस्य त्वजादौ असुङि, पक्षे तदभावे, च रूपद्वयम्। अजरसी अजरे। जसि तु शिभावे असुङादेशे झलन्ततया नुमि कृते अजरन्स् इति स्थिते।

६: ६· १· ७·
नृसन्तमहतोर्न उपधादीर्घोऽसंबुद्धौ सर्व्वनाम·
७·
स्थाने ॥ ७ ॥

नृसद्इत्यन्तस्य महतश्च यो नकारस्तस्य उपधाया दीर्घः स्यादसंबुद्धौ सर्व्वनामस्थाने परे। अत्रापि

असंबुद्धावित्युक्तेः सर्व्वलिङ्गविषयता । अजरांसि । पुनस्तद्वत् । शेषं पुंवत् । इत्यकारान्ताः ।

विश्व पा-स् इति स्थिते ।

७· ६· १·
क्लीबे प्रातिपदिकस्य ह्रस्वः ॥ ८ ॥*

क्लीबे स्थितस्य प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात् । तत्राप्येकस्थानत्वेन (४८पृ० २सू०) एदैतोः स्थाने इः, ओदौतोश्च उः । इति ह्रस्वे ज्ञानवत् टदावपि आकारान्तत्वाभावातोलोपः इत्याकारान्तः ।

वारि-स् इति स्थिते ।

५· ६· ·१·
क्लीबात् स्वमोर्लुक् ॥ ९ ॥

सर्व्वक्लीबलिङ्गात् परयोः स्वमोर्लुक् स्यात् । अकारान्तात्तु मुम्भावोऽस्यापवादः । वारि । वारि-औ शीभावे ।

६· ·१·७· ७·
इको नुमचि सुपि ॥ १० ॥

इगन्तस्य क्लीबस्य नुमागमः स्यादजादौ सुपि परे । उमावितौ । इति नुमि णत्वे च वारिणी वारीणि ।

६· ६· १··१· ७·
क्लीबस्येको गुणो वा संबुद्धौ ॥ ११ ॥†

* अच इत्युक्तावपि ह्रस्वदीर्घाचः स्थाने ह्रस्वेन लाभात् इत्तौ अच इत्युक्तम् ।

† इको ग्रहणं स्पष्टार्थम् अदेङ्गुणः स चेक इति परिभाषयैव तस्य लाभात् ।

संबुद्धौ परे इगन्तस्य क्लीबस्य गुणः स्याद्वा। हे वारे हे वारि ना गु णवृद्धौत्वानि बाधित्वा नुमिति सिद्धान्तात् न गुणादि। तेन वारिणे वारिणा वारिणः वारिणः। आमि तु नुडेवादौ नुमो गुणादेरेव बाधकत्वात् तेन नुटि (५२पृ०८सू०) दीर्घः। वारीणाम्। वारिणि। शेषं कविवत्। ये शब्दाः इगन्ता क्लीवलिङ्गाः पुंलिङ्गाश्च तेषु क्वचित् विशेषः। सुधीशब्दस्य क्लीवे ह्रस्वे सुधि सुधिनी सुधीनि। पुनस्तद्वत्।

१० १० ७० ·१० ७० ७०

उक्तपुंस्कमिगन्तं क्लीवे पुंवत् तृतीयादावचि ॥१२॥

अजादौ तृतीयादौ परे एकस्मिन्नर्थे पुंलिङ्गवाचकमिगन्तं क्लीवे वर्त्तमानं पुंवत् कार्य्यं वा भजते। इति पुंवत्पक्षे दीर्घभावात् इयङि सुधिया। पक्षे क्लीवत्वेन ह्रस्वतया नाभावः। ङेपरे पुंवत्पक्षे इयङि सुधिये। पक्षे सुधिने इत्यादि। एकस्मिन्नर्थे इत्युक्तेर्विभिन्नार्थे पुंलिङ्गबोधकत्वे न, यथा मधुशब्दः वसन्तचैत्रवाची पुंलिङ्गः क्षौद्रवाची तु क्लीवलिङ्गस्तस्यार्थभेदात् न पुंवद्भावः। उक्तपुंस्कं किं वारिशब्दस्य मा भूत्। एवमनादिशुचिप्रभृ-

तयः। तत्र पुंवत् पक्षे कविशब्दवदिति भेदः।

दधि-अ इति स्थिते।

६॰ ०१॰ ७॰ ७॰

दध्यस्थिसक्थ्यक्ष्णामनँङचि तृतीयादौ ॥१३॥

दधि, अस्थि, सक्थि अचि इत्येषां शब्दानामनङ् अन्तादेशः स्यादजादौ तृतीयादौ सुपि परे। अङावितौ। इत्यनङि।

१॰ ६॰ १॰ ६॰ ७॰ ०१॰ ०१॰

अवमन्तसंयोगादनोऽल्लोपो भस्य ङिश्योस्तु वा॥१४॥

वमन्तसंयोगभिन्नात् परस्य भसंज्ञकस्यानन्तस्याकारस्य लोपः स्यात् ङौ शयाञ्च परतस्तु वा स्यात्। अत्रान् निरर्थकोऽपि गृह्यते अनिनस्मन् इत्येतानि निरर्थकान्यपि गृह्यन्ते इति सिद्धान्तात्। इत्यकारलोपे। दध्ना दध्ने दध्नः दध्नोः दध्नाम्। ङौ तु दध्नि दधनीत्यादि। एवमस्थ्यादयः। इतीकारान्ताः। मधु मधुनी मधूनि। पुनस्तद्वत्। हे मधो। हे मधु। शेषं वारिवत् नुमादि। एवमम्बु प्रभृतयः। तनुलघुगुरुप्रभृतयस्तु पुंवाचका अपि तेन तत्र तृतीयाद्यचि पक्षे पुंवद्रूपम्। तनवे तनुने इत्यादि खलुशब्दस्यतु खलुना खल्वा इत्यादौ स्वयंभुशब्दस्य स्वयंभुवा स्वयंभुना इत्यादौ च भेदः। इत्युदन्ताः। ज्ञातृ ज्ञातृणी

ज्ञातृणि पुनस्तद्वत्। ज्ञाता ज्ञातृणाज्ञाति ज्ञातृणि ज्ञातुः ज्ञातृणः इत्यादि। एवं धातृकर्तृप्रभृतयः इत्यृकारान्ताः। क्लीवे ओकारान्तादिशब्दानां ह्रस्वादेशे इगन्तवद्रूपं किन्तु तेषामुक्तपुंस्कत्वेऽपि न पुंवत् इगन्ताङ्गस्यैव पुंवद्भावविधानात्।

इत्यजन्तक्लीबलिङ्गाः।

हलन्तपुंलिङ्गाः।

मधुलिह् स् इति स्थिते। (६७७० १ सू) सुलोपे।

६० १० ०० ७० ०१०
हो—ढो झलि—पदान्ते च॥ १ ॥

झलि परे पदान्ते च हस्य ढः स्यात्। अ इत्। इति पदान्ततया हस्य ढत्वे तस्य च जश्चरौ मधुलिड् मधुलि। मधुलिहौ। मधुलिहः। मधुलिहम्। मधुलिहौ मधुलिहः। मधुलिहा। मधुलिड्भ्याम् मधुलिट्सु। गोदुह् स् इति स्थिते सुलोपे।

६· ६· १··१··१· ६:·
दादेर्धातो—र्घो वा तु द्रुहमुहष्णुहष्णिहाम् ॥२॥
झलि परे पदान्ते च दकारादेर्धातोर्हस्य घँः स्यात्। द्रुहादीनान्तु वा घोऽन्तादेशः स्यात्। अ इत्। इति हस्य घे कृते।

६· ६· ६· ·१· ७: ७··१·
एकाचो झषन्तस्य बशो भष् स्ध्वयोरन्ते च ॥३॥
धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे च परे पदान्ते च। इति दस्य धत्वे घस्य जश्चरौ। गोधुग् गोधुक्। गोदुहौ गोदुहः। गोदुहम्। (४२पृ० ६सू०) पदान्तत्वेन भ्यामादौ घत्वभष्भावे गोधुग्भ्याम् गोधुक्षु। मित्रद्रुहस्तु सुलोपे हस्य घत्वे पक्षे ढत्वे भष्भावे च तयोर्जश्चरौ। मित्रध्रुग् मित्रध्रुक्। मित्रध्रुड् मित्रध्रुट्। मित्रध्रुग्भ्याम् मित्रध्रुड्भ्याम्। मित्रध्रुक्षु मित्रध्रुट्सु। एवं मुहष्णुहष्णिहाम्। विश्ववाहादिशब्दानां भसादावचि तु।

६: ·१· ६· १·
वाह ऊठ् भस्य संप्रसारणम् ॥ ४ ॥
भसंज्ञकस्य वाहान्तस्य सम्प्रसारणरूपमूठ् स्यात्। इति व् इत्यस्य संप्रसारणरूपे ऊठि कृते।

६ ७ १ १
संप्रसारणस्याचि पूर्व्वरूपः सह ॥ ५ ॥

अचि परे संप्रसारणस्य पूर्व्वरूपः सह (पूर्व्वपरयोरेकादेशः) स्यात् । इत्येकादेशे(२४पृ०११सू०) वृद्धिः । विश्वौहः विश्वौहेत्यादि । शेषं मधुलिड्वत् । एवं भारवाहादिरूपम् । वारिवाहस्तु ऊठि वार्य्यूह इत्यादि । अनडुह् स् इति स्थिते सुलोपे ।

६ १ ७ ७ १
चतुरनडुहोराम् सर्व्वनामस्थाने संबुद्धौ त्वम् ॥६॥

सर्व्वनामस्थाने परे चतुर्शब्दस्य अनडुहशब्दस्य च आम् स्यात् संबुद्धौ त्वम् । मइत् । मित्त्वादन्त्यादचः परः । इत्यामि यणि च कृते ।

७ ६ १
सावनडुहो नुम् ॥ ७ ॥

सौ परे अनडुह् इत्यस्य नुम् स्यात् उमावितौ मित्त्वादन्त्यादचः परः इति नुमि ।

६ १
संयोगान्तपदस्य लोपः ॥ ८ ॥

संयोगान्तं यत्पदं तस्यान्तस्य लोपः स्यात् । इत्यन्तहलोपे तस्यासिद्धवद्भावात् न प्रातिपदिकान्तनलोपः । अनड्वान् अनड्वाहौ अनड्वाहः । अनड्वाहम् । अनड्वाहौ अनडुहः । अनडुहा ।

६:॰ १॰ ७॰

सान्तवसुस्रंसुध्वंस्वनडुहां दँः पदान्ते ॥ ९ ॥

पदान्ते स्थितानामेषां दोऽन्तादेशः स्यात्। सान्तेत्युक्तेः विद्वानित्यादौ संयोगान्तस्य लोपे न। इति ह्रस्वदत्वे अनडुद्भ्याम्। अनडुत्सु। शेषं मधुलिड्वत्। तुरासाहस्तु।

६॰ ६॰ ६॰ ९॰

सहेः साडः सस्य षँः ॥ १० ॥

साड् इत्येवं रूपस्य सहेः सस्य षः स्यात्। अकार इत् तुराषाड् तुराषाट्। साड्रूपेत्युक्तेः ढत्वाभावे न, तुरासाहौ तुरासाहः तुराषाड्भ्यामित्यादि इति हान्ताः। चतुर्शब्दो बहुवचनान्तः जसि (८२पृ०६सू) आमि यणि च कृते चत्वारः चतुरः चतुर्भिः चतुर्भ्यः चतुर्भ्यः।

५:॰ १॰ ६॰

षट्चतुर्भ्यो नुँडामः ॥ ११ ॥

षट्संज्ञकात् चतुर् इति शब्दाच्च परस्यामः स्थाने नुडागमः स्यात्। उटावितौ। इति नुटि णत्वे च चतुर्णाम्।

६॰ १॰ ७॰ १॰

रोरेव सुपि विसर्गँः ॥ १२ ॥

सप्तमीबहुवचने परे रोः स्थाने एव विसर्गो ना-

न्यरेफस्य। इति न विसर्गः। षत्वे चतुर्षु। इति रान्तः। प्रशाम् शब्दस्य सुलोपे।

६· १· ६· ७· ७: ·।·

मो नँ। धातोः पदान्ते मवयोश्च ॥ १३ ॥

धातोर्मस्य नँः स्यात् पदान्ते मकारे वकारे च परे। अद्वत्। इति मस्य नत्वे प्रशान्। प्रशामौ। भ्यामादौ (४२पृ० ६सू०) पदान्तत्वात् प्रशान्भ्यामित्यादि। किम्शब्दस्य।

६· १· ७·

किमः को विभक्तौ ॥ १४ ॥

विभक्तौ परे किम्शब्दस्य स्थाने क इत्यादेशः स्यात्। इति कादेशे कः कौ के इत्यादि सर्व्ववत्। इदम् स इति स्थिते त्यदाद्यत्वे

६· ७· १· ·१·

अतो गुणे पररूपः सह ॥ १५ ॥

गुणसंज्ञकवर्णे परे अकारान्तस्य पररूपः सह (पूर्व्व-परयोरेकादेशः) स्यात्। इति पररूपैकादेशे।

६· ६· १: ७: ७·

इदम्—इदस्यायमियमौ पुंस्त्रियोः सौ ॥ १६ ॥*

इदम् शब्दस्य इदभागस्य स्थाने पुंसि अयम् स्त्रियाञ्च इयमित्यादेशः स्यात् सौ परे।

* अयमियमोर्मित्त्वं मित्कार्य्यस्यान्त्यात्परत्व आदेशस्या-न्त्यासम्भवात् अनेकवर्ण्णं तथा च तयोः सर्व्वादेशत्वात्।

इतीद्भागस्य स्थाने पुंसि अयमादेशे हल्परत्वात् सुलोपे अयम्। औप्रभृतिषु सर्व्वत्र त्यदाद्यत्वे पररूपे।

१० १० ७०

दो मो विभक्तौ॥ १७॥

विभक्तौ परे इदमो दस्य मः स्यात्। इति दस्य मत्वे इमौ इमे सर्व्वनामकार्य्यं।

६० १० ७:

इदस्त्रा—नः टौसोः॥ १८॥

टौसोः परयोः इदस्य स्थाने अन इत्यादेशः स्यात्। सर्व्वादेशः। इत्यनादेशे टास्थाने इने कृते अनेन।

०१० ७:

अश् सभोः॥ १९॥

सभयोः परयोः इदस्यस्थाने अश् स्यात्। शित्वात् सर्व्वादेशः। इतीदस्य स्थाने अशि कृते (५४पृ० १६सू) दीर्घे आभ्याम्। भिसि तु। अशि

५: ६० ०१० ०१०

इदमदोभ्यां भिसो नैस्॥ २०॥

इदमोऽदसश्च परस्य भिसः स्थाने ऐस् न स्यात्। इत्यैसो निषेधे (५४पृ० १४सू०) एत्वे विसर्गे च एभिः। ङेविभक्तौ ङेस्थाने स्मैभावे से परे इदस्याशि

अस्मै। एवम् अस्मात् अस्य। अनादेशे अनयोः आमि तु सुटि सकारे परे इदस्याशादेशे एत्वे च एषाम्। अस्मिन् अनयोः एषु। अन्वादेशे तु

६: ७· ७:·१·
इदैतयोरन्वादेशे द्वितीयाटोःस्वेनः ॥ २१ ॥

किञ्चित् कार्य्यं विधातुमुक्तस्य कार्य्यान्तरं विधातुं पुनरुपादानमन्वादेशस्तस्मिन् विषये द्वितीया, टा, ओस्, इत्येषु परेषु इदैतयोः स्थाने एनः स्यात्। अनेन व्याकरणमधीतमेनं काव्यमध्यापय। एवम् एनौ एनान्। एनेन एनयोः इति मान्ताः। राजन्शब्दस्य सुलोपे (७५पृ०५सू०) उपधादीर्घे

६· ६· ६· ·१· ७·
पदान्तस्य प्रातिपदिकस्य नो लुबसंबुद्धौ ॥२२॥*

पदान्तस्य प्रातिपदिकस्य न इत्यस्य लुप् स्यात्। संबुद्धौ तु न। इति नलुपि राजा। राजानौ राजानः। हे राजन्। राजानम्। राजानौ। शसाद्यचि तु (७८पृ०१४सू०) अल्लोपे ञत्वे राज्ञः राज्ञा। भ्यामादौ तु पदान्तत्वात् नलुपि राजभ्यामित्यादि अत्र (४८पृ०२सू०) नलुपोऽसिद्धत्वान्न दीर्घादि। ङौ तु राज्ञि राजनि। एवं यज्वन्ब्रह्मन्प्रभृतयः। शसाद्यचि तु यज्वनः ब्रह्मणः। इनन्तादेस्तु।

---

* प्रातिपदिकस्येत्युक्त्या पचेरन् अभवन्नित्यादौ न नलोपस्तयो पदान्तत्वेऽपि प्रातिपदिकत्वाभावात्।

६:॰ ७॰ ७॰ ॰१॰ १॰

इन्हन्पूषार्यम्णां सौ शौ चोपधादीर्घः ॥२३॥

सौ शौ च परे एषामुपधाया दीर्घः स्यात् नान्यत्र । ज्ञानी ज्ञानिनौ । धनी धनिनौ । निरर्थकस्यापीनो ग्रहणात् यशस्वी यशस्विनौ । वाग्मी वाग्मिनौ इत्यादि । ब्रह्महन् ब्रह्महा । (७२पृ०८सू) णत्वे ब्रह्म-हणौ । शसाद्यचि तु अल्लोपे ब्रह्मघ्न इति स्थिते

६॰ १॰ ॰१॰ ६॰ ॰१॰ १॰

हनोह्नो घ्नस्तस्य न णत्वम् ॥ २४ ॥

हन् इत्यस्य स्थानजातस्य ह्न इत्यस्य स्थाने घ्न आदेशः स्यात् । तस्य च णत्वहेतौ न णत्वम् । हन इति सार्थकस्य ग्रहणात् अहनः स्थाने जातस्य ह्नस्य न घ्नादेशः । इति घ्ने ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्मह-भ्यामित्यादि । एवम् अर्य्यमा अर्य्यमणौ । ङौ तु अर्य्यम्णि अर्य्यमणि । पूषा पूषणौ । पूष्णि पूषणि इत्यादि । मघवन्शब्दस्तु नान्तस्तस्य सुटि हलि च राजवत् । मघवा मघवानौ मघवभ्यामित्यादि शसादावचि तु ।

६:॰ ७॰ ७॰ ७॰ ॰१॰ ॰१॰

श्वन्युवन्मघोनां शसादावचीपि च संप्रसारणम् ॥२५॥

श्वन् युवन् मघवन् इत्येषां संप्रसारणं स्यात् शसा-दावचि ईपि च परे । इति व् इत्यस्य संप्रसारणे

अकारेण सह (८२ पृ० ५सू०) पूर्व्वरूपैकादेशे, गुणे, मघोनः मघोनेत्यादि एवं शुनः शुना। यूनः यूनेत्यादि। अर्व्वा। अन्यत्र

६· ९· ७· ७·
अर्व्वणस्तृँ सुप्यसौ ॥ २६ ॥

असौ सुपि परे अर्व्वन् शब्दस्य स्थाने तृँइत्यन्तादेशः स्यात्। ऋकार इत्। इति चादेशे

६ः· ·१· ७· ६·
उगिदचां नुम् सर्व्वनामस्थानेऽधातोः ॥ २७ ॥

अधातोः उक्संज्ञकवर्णेतो नलोपिनोऽञ्चतेश्च नुँम् स्यात् सर्व्वनामस्थाने परे। उमावितौ। मित्त्वादन्त्यादचः परः। अञ्चतेः पृथग्ग्रहणात् धातोश्चेत् उगित्कार्य्यं तर्हि अञ्चतेरेव तेन स्रन्सु ध्वन्सुप्रभृतेः उतद्दत्त्वेऽपि न नुम्। इति ऋकारेत्त्वात् नुमि अनुस्वारसवर्णौ सवर्णतया जातनस्य च न णत्वम् अर्वन्तौ अर्वन्त इत्यादि। अर्व्वतः अर्व्वता अर्व्वद्भ्यामित्यादि। पथिन् स् इति स्थिते

६ः· ·१· ७·
पथिमथ्यृभुक्षा—मा—त् सौ ॥ २८ ॥

पथिन् मथिन् ऋभुक्षिन् इत्येषामात् अन्तादेशः स्यात् सौ परे। इति स्वरादेशत्वात् सुलोपं बाधित्वा नइत्यस्यात्त्वे

६० १० ७०
इतोऽत् सर्वनामस्थाने ॥२९॥
पथ्यादीनामितोऽत् स्यात् सर्वनामस्थाने परे। इतीकारस्य अति

६ः ९० १०
पथिमथोस्थो न्थः ॥३०॥
पथिमथोस्थस्य न्थादेशः स्यात् सर्वनामस्थाने परे। इति थस्य न्थादेशे विसर्गः पन्थाः। हे पन्थाः। औप्रभृतिषु तु इतो ऽति थस्य न्थादेशे नान्ततयोपधादीर्घं च पन्थानौ पन्थानः। शसादावचि तु

६ः० ६ः० ६० ९०
पथ्यादीनां भानां टेर्लोपः ॥ २१ ॥
भसंज्ञकानां पथ्यादीनां टेर्लोपः स्यात्। इति टिलोपे पथः पथा। भ्यामादौ पदान्ततया (८६पृ० २२सू० नलुपि पथिभ्यामित्यादि। एवं मन्थाः। ऋभुक्षस्तु न्थादेशं विना पथिवत् कार्य्यम्। पञ्चन् शब्दो बहुवचनान्तः (६१पृ० २१सू०) जस्शसोर्लुकि पञ्च, पञ्च, पञ्चभिः पञ्चभ्यः पञ्चभ्यः (८३पृ११सू०) नुटि।

६० १० ७०
नान्तस्योपधादीर्घो नामि ॥ ३२ ॥
नामि परे नान्तस्योपधाया दीर्घः स्यात्। इति दीर्घे (४२पृ० ६सू०)पदान्ततया नलुपि पञ्चानाम् पञ्चसु।

अष्टन् शब्द बहुवचनान्त।

६· ·१· ·१· ७·

अष्टन आ वा सुपि ॥२३॥

सुपि परे अष्टन् शब्दस्य आ अन्तादेशो वा स्यात्। इति आकारादेशे।

५:· ६: ·१·

अष्टाभ्यः जस्शसोरौश् ॥ २४ ॥

कृताकारादष्टन्शब्दात् परयोर्जस्शसोः स्थाने औश् स्यात्। श इत्। शित्त्वात् सर्व्वादेशः। इति औशितद्वौ अष्टौ अष्टौ। आकाराभावपक्षे (६१पृ० २१सू०)लुकि अष्ट अष्ट। अष्टाभिः अष्टभिः। अष्टाभ्यः अष्टभ्यः। अष्टानाम् अष्टासु अष्टसु। इति नान्ताः। ऋत्विजः सुलोपे।

६:· ६:·

क्विनन्तानां स्पृगृत्विग्दधृक्स्रग्दिगुष्णिगक् कुञ्चां

६: ·१· १· ७·

क्विबन्ताञ्चुयुञ्ज्योश्चकुः पदान्ते ॥ २५ ॥*

पदान्ते स्थितानामेषां कुः रन्तादेशः स्यात्। उकार इत्। इति कुत्वे जश्त्वे ऋत्विग् ऋत्विक् ऋत्विजौ ऋत्विग्भ्यामित्यादि। युजेस्तु

६· ७· ·१· ७·

युजेरसमासे नुम् सर्व्वनामस्थाने ॥ २६ ॥

सर्व्वनामस्थाने परे युजेरसमासे नुम् स्यात्। उमा

---

* चोः कुरित्यनेनैव सूत्रेणैव अञ्चुयुजकुञ्चां कुत्व सम्भवे पुनरत्र पृथग्ग्रहणमन्यस्य संयुक्त चवर्गान्तस्य लोपादादौ न कुत्वमिति ज्ञापयति। तेन खञ्ज खन् भनज् भन् इत्यादि।

वितौ। मित्त्वादन्त्यादचः परः। इति नुमि। अनुस्वारसवर्णौ युङ् युञ्जौ युञ्जः। समासे तु सुयुक् सुयुग्। सुखभाज् सुलोपे।

६· १· ७· ७· ·१·
चोः कुर्झलि पदान्ते च ॥ २७ ॥

झलि परे पदान्ते च स्थितस्य चवर्गस्य स्थाने कवर्गः स्यात्। इति जस्य कुत्वेन गत्वे जश्चरौ सुखभाग् सुखभाक् सुखभाजौ सुखभाग्भ्यामित्यादि। राज्शब्दस्य सुलोपे

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छान्तशान्ता-
६· १· ७· ७· ·१· ६· ·१· ७·
नां षो झलि पदान्ते च परिव्राजस्तु पदान्ते ॥२८॥

व्रश्चादीनां सप्तानां छान्तस्य शान्तस्य च षोऽन्तादेशः स्यात्। झलि पदान्ते च परिव्राजस्तु पदान्ते। अ इत्। इति जस्य षत्वे

६· १· ७·
षो डः पदान्ते ॥ २९ ॥*

षस्य डः स्यात् पदान्ते। अइत् चरोऽपवादः, इति षस्य डत्वे जश्चरौ राड् राट् राजौ राजः। राड्भ्यामित्यादि। एवं विश्वसृट् परिमृड् विभ्राट् परिव्राड् इत्यादयः। भ्रस्ज्शब्दस्य सुलोपे

* पदान्ते जश्चरोर्विकल्पेन जश्पक्षे रूपसिद्धावपि चर् पक्षे षःस्थाने षोऽसात् ष एव स्यात् न तु ट इति तत्र डत्वविधानार्थं सूत्रम्।

६· ६ः ·१· ७· ७·१·

स्कोः संयोगाद्योर्लोपो झलि पदान्ते च ॥४०॥
पदान्ते झलि च परे संयोगाद्योः सकारककारयोर्लोपः स्यात्। संयोगान्तलोपापवादः। इति सस्य लोपे जस्य षत्वे तस्य डत्वे जश्चरौ भ्रड् भ्रट्। अन्यत्र तु श्चुनायोगे सस्य शत्वे तस्य च जश्त्वेन जत्वे भ्रज्जौ भ्रज्ज इत्यादि। इति जान्ताः। यच्छब्दस्य अत्वे (८४पृ०१५सू०) पररूपे यः यौ ये इत्यादि सर्ववत्। त्यदशब्दस्य अत्वेपररूपे च

६ः· ६ः १·

सौ त्यस्तोदेतददसां तदोः सः॥ ४१॥
एषां तदोः स्थाने सः स्यात् सौ परे। अकार इत्। स्यः त्यौ त्ये। एवं सः तौ ते। एषः एतौ एते इत्यादि शेषं सर्ववत्। अन्वादेशे तु एतेन न्यायोऽधीतो वेदमेनमध्यापयेत्यादौ (८६पृ०२१सू०) एनादेशः। एवम् एनौ एनान् एनेन एनयोः। युष्मदस्मदोस्तु त्यदाद्यत्वे

६ः ६ः १ः ७· १ः

युष्मदस्मदोर्युष्मस्मोयोस्त्वाहौ सौ, युवावौ

७· १ः ७· १ः ७· १ः

द्विवचने, यूयवयौ जसि, त्वमावेकवचने, तुभ्यमह्यौ

७· १: ·१· ७·

ङयि, तवममौ च ङसि ॥ ४२ ॥

युष्मदस्मदोर्युष्मदस्मदोः स्थाने, सौ परे त्वाहौ, द्विवचने विषये युवावौ, जसि परे यूयवयौ, परिगणितभिन्ने एकवचने विषये त्वमौ, ङे इति परे तुभ्यमह्यौ, ङसि परे च तवममौ क्रमेण स्तः। इति सौ परे त्वे अहे (८४पृ०१५सू०) पररूपे च सति।

५: ६:· १· ६·

युष्मदस्मद्भ्यां ङेप्रथमाद्वितीयानामम्ँ: शस·

·१· १·

स नँ: ॥ ४३ ॥ *

युष्मदस्मद्भ्यां परस्य ङे इत्यस्य, प्रथमाया, द्वितीयायाश्च स्थानेऽम्ँ: शसश्च नँ: स्यात्। उकार इत् नोऽकारश्च। इत्यमि। (५२पृ०८सू०) पूर्व्वरूपे त्वम् अहम्। द्विवचने च अत्वे युवावादेशे पररूपे

६: ·१· ७· ७· ·१·

अनयोराङ् प्रथमाद्विवचने द्वितीयायाश्च ॥ ४४ ॥

प्रथमाद्विवचने परे द्वितीयायाश्च परतो युष्मदस्मदोः स्थाने आङ् स्यात्। ङित्वादन्तादेशः। इत्याङि, अमि, पूर्व्वरूपे च युवाम् आवाम्। जसि अत्वे यूयवयादेशे पररूपे ततः अमि, पूर्व्वरूपे च ययम्

अत्र: "पञ्चम्याः परस्मिन्नौ"राद्स्थाने नादेशे संयोगान्तलोपे रूपसिद्धेर्नं चितकरणम्।

वयम्। अमि अत्वे एकवचनतया त्वमादेशे पर-
रूपे आङि, अमि, पूर्व्वरूपे च कृते त्वाम् माम्।
युवाम् आवाम्। शसि अत्वे पररूपे आङि नादेशे
युष्मान् अस्मान्। टाविभक्तौ अत्वे एकवचनतया त्वमा-
देशे पररूपे

७· ७· ७· ७· ·१·

अनादेशेऽचिसुप्येङ् ॥ ४५ ॥

अनादिष्टे अजादौ सुपि परे अनयोः स्थाने एङ् स्यात्।
ङित्त्वादन्तादेशः। इत्येङि त्वया मया। भ्यामि
त्यदाद्यत्वे द्विवचनतया युवावादेशे पररूपे

·१· ७·

आङ् हलि ॥ ४६ ॥

हलादौ परे अनयोराङ् स्यात्। ङित्त्वादन्ता-
देशः। युवाभ्याम् आवाभ्याम्। भिसि अत्वे पर-
रूपे प्रकृत्याश्रितत्वेन बलवत्त्वात् आदावाङि अत्य-
रत्वाभावान्न ऐस् युष्माभिः अस्माभिः। ङयि
त्यदाद्यत्वे तुभ्यमह्यादेशे पररूपे अमि, पूर्व्वरूपे च
तुभ्यम् मह्यम्। युवाभ्याम् आवाभ्याम्। भ्यसि
त्यदाद्यत्वे पररूपे

५ः ६· १ः

आभ्यां—चतुर्थीभ्यसोऽभ्यसुँ ॥ ४७ ॥

आभ्यां परस्य चतुर्थीभ्यसः स्थानेऽभ्यसुँः स्यात्।

उकारइत् । इत्यभ्यमि पुनः पररूपे युष्मभ्यम् अस्मभ्यम् । ङसौ अत्वे एकवचनं त्वमादेशे पररूपे

६: ·१·

ङसिपञ्चमीभ्यसोरतुँ ॥ ४८ ॥

आभ्यां परयोः ङसिपञ्चमीबहुवचनयोः स्थाने अतुँ स्यात् । उकारइत् । इत्यति पुनः पररूपे च त्वत् मत् । युवाभ्याम् आवाभ्याम् । भ्यसि अत्वे पररूपे भ्यसः स्थाने अति पुनः पररूपे च कृते युष्मत् अस्मत् । ङसि अत्वे तवममादेशे पररूपे

६: ·१·

ङसोऽश् ॥ ४९ ॥

आभ्यां परस्य ङसः स्थाने अश् स्यात् । शित्वात् सर्वादेशः । इत्यशि पुनः पररूपे तव मम । ओसि अत्वे युवावादेशे पररूपे एङि सन्धौ च कृते युवयोः आवयोः । आमि अत्वे पररूपे सुटि आङि च

६: ·१·

साम: कमुँ ॥ ५० ॥

आभ्यां परस्य ससुट्कस्यामः स्थाने कमुँ स्यात् । उकार इत् । सर्वादेशः । इतिकमि कृते युष्माकम् अस्माकम् । साम इत्युक्तेर्गौणे, सर्वनामत्वाऽभावेन सुटोऽप्रसक्तौ न कम् । तेन अतित्वयाम् अतिमया-

मित्याद्येव। ङौ अत्वे एकवचनतया त्वमादेशे पररूपे एङि अयादेशे च त्वयि मयि। युवयोः आवयोः। सुपि अत्वे पररूपे आङि युष्मासु अस्मासु। अत्र एकवचनार्थकयुष्मदस्मदोर्युष्मास्मभाग स्थाने त्वमादेश इति स्वीकारात् तव पुत्त्र इत्यर्थेऽपि त्वत्पुत्त्र इत्यादिसिद्धिः। द्विवचनार्थकयोस्तयोस्तु विभक्ताविव परतो युवावादेशो नान्यत्र तेन युवयोर्धनमित्यर्थे युष्मद्धनमित्येव।

षट्संज्ञका युष्मदस्मदश्च त्रिषु लिङ्गेषु समास्तेन न तेषु लिङ्गभेदकार्य्यमिति बोध्यम्।

५॰ ७॰
एकवाक्यस्थपदाद् अपादादौ षष्ठीचतुर्थीद्वितीया-
६ः॰ ७ः॰ ६ः १ः १ः
नामेकद्विबहुवचनेषु स्थितयोः तेमयौ, वांनावौ वस्-
१ः ॰१॰ ७॰ ॰१॰ १ः १॰
नसौ, वा अमि तु त्वामौ न चवाऽहहैवाऽदर्शनार्थ-
७॰
दृश्यर्थकधातुयोगे ॥ ५१ ॥

एकवाक्यस्थपदात् परयोरश्लोकादिचरणादौ षष्ठी-चतुर्थीद्वितीयानामेकवचने स्थितयोस्तयोः स्थाने तेमे इत्येतौ, द्विवचने वांनौ इत्येतौ, बहुवचने वस् नस इत्येतौ, क्रमेण वा स्याताम्, अमि स्थितयोस्त

त्वा मा इत्येतौ भवतः। न तु च, वा, अह, हा, एव, योगे नापि अदर्शनार्थकदृश्यर्थकधातुयोगे। अयञ्च प्रकृतिप्रत्ययसमुदायादेशः।

शिवस्त्वा मापि पायात् सः शं ते मेऽपि दद्यात्वसौ।
गतिस्ते मेऽपि गोविन्दः स वां नावपि रक्षतु।
दद्याद् वां नावपीशः शं विष्णुर्वां नावपि प्रभुः।
रक्षेद् वो नोऽपि गौरीशः दद्याद्वो नोऽपि शं शिवः।
शिवो वो नोऽपि मोक्षाय प्रभविष्णुर्भवत्वसौ।

अत्र सर्व्वत्र पक्षे यथायथं त्वां मामित्यादि।

एकवाक्यस्थपदात्, अपदादौ चेति किम्
येन भक्ता हरौ युष्मानस्मांस्तेन स रक्षतु।

अत्र युष्मानिति वाक्यादौ, अस्मानिति चरणादौ, च वर्त्तमानमतो नादेशः। अत्र स्थितयोरित्युक्तेः श्रूयमाणविभक्तिकयोरेवादेशस्तेन त्वत्पुत्र इत्यादि समासादौ न। चादियोगे तु न
हरिस्त्वां माञ्च संरक्षेत् कृपया त्वा मपेक्षते इत्यादौ।
दर्शनार्थे तु स्यादेव चक्षुषा त्वा समीक्षते इति।

७· ५· ५· ·१·
अन्वादेशे सपूर्व्वायाः प्रथमाया वा ॥ ५२ ॥

अन्वादेशविषये विद्यमानपूर्व्वादेव प्रथमान्तपदात् पूर्व्वोक्तं वा स्यात्। अन्वादेशेऽन्यस्मात्तु नित्यमिति

फलितम्। भक्ता यूयं वयञ्चेशे तत् स वो नोऽपि रक्षतु। पक्षे युष्मान् अस्मान् वा। भक्ता यूयं वयञ्चेशे तस्मात् वो नोऽपिसोऽवतु इत्यादौ नित्यम्।

१· १· ·१·

आमन्त्रितं पूर्वमविद्यमानवत्॥५३॥

वाक्यादिस्थितमामन्त्रितं पदमविद्यमानवत् स्यात्।

हरे तवाहं भक्तोऽस्मि देव मां पाहि तत् सदा।

अत वाक्यादिस्थयोः हरे, देवेति पदयोरविद्यमानवद्भावात् तवेति मामित्यस्य च एकवाक्यस्थपदात् परत्वाभावेन नादेशः।

·१· १· ७·

न विशेष्यमभिन्नविशेषणे॥५४॥

विशेष्यमामन्त्रितपदमभिन्ने विशेषणे परे अविद्यमानवत् न स्यात्। हरे दयालो नः पाहि शिव सेव्य ममार्थदः इत्यत्र आदेशो न इति, पक्षे आदेशाभावे च ममेति सिद्धम्। सुपात् सुपादौ सुपादः। शसादावचि तु

६· ६· ·१·

पादो भस्य पत्॥५५॥

भसंज्ञकस्य पाच्छब्दस्य स्थाने पत् स्यात्। इति पदादेशे सुपदः सुपदा सुपाद्भ्यामित्यादि।

दाम्नाः। पाच्छब्दस्य सुलोपे (८८पृ०२७सू०) नुमि

नकारस्य परसवर्णेङकारे संयोगान्तलोपे च प्राङ् । नुमि अनुस्वारे परसवर्णे ञे च क्षते प्राञ्चौ प्राञ्चः । प्राञ्चम् । असादावचि तु

६· ६· ६· १· ६· १· ·।·

अचोर्भस्यातो लोपो पूर्व्वाणो * दीर्घश्च ॥५६॥

लुप्तनकारस्याञ्चते र्भसंज्ञकस्याकारस्य लोपः स्यात् तस्मिन् सति च पूर्व्वाणो * दीर्घः । इत्यलोपे पूर्व्वाणो दीर्घे च प्राचः प्राचेत्यादि । एवं प्रत्यच्- प्रत्यङ् प्रतीचःप्रतीचेत्यादि । अलुप्तनकारस्य तु प्राञ्चः प्राञ्चेत्यादि ।

६· १· ७·

सहस्य सध्रिः वप्रत्ययान्ताञ्चतौ— ॥ ५६ ॥

वप्रत्ययान्ताञ्चतौ परे सहस्य स्थाने सध्रिः स्यात् । इति सध्री सध्र्यङ् सध्र्यञ्चौ । सध्रीचः सध्रीचा

६· १·

समः समिः ॥ ५८ ॥

वप्रत्ययान्ताञ्चतौ परे समः स्थाने समिः स्यात् । इति सम्यादेशे सम्यङ् सम्यञ्चौ । असादावचि अ लोपे पूर्व्वाणो दीर्घे समीचः समीचेत्यादि ।

६· १· ७·

तिरसस्तिर्य्यकारालोपे ॥ ५९ ॥

अलुप्ताकारे वप्रत्ययान्तेऽञ्चतौ परे तिरसः स्थाने

तिरि: स्यात् । इति तिरो तिर्य्यङ् तिर्य्यञ्चौ । लुप्ताकारे तु न, तेन तिरश्च: तिरश्चेत्यादि । उदच्-उदङ्

५· ६· ६· ·१· ।· ·१·
उदोऽचोर्भस्येद् दीर्घश्च॥ ६० ॥

उच्छब्दात् परस्य भसंज्ञकस्य लुप्तनकारवप्रत्ययान्ताञ्चतेरादेरित्स्यात् भावदीर्घश्च । (२०पृ०२१सू०) पूर्व्वादेश: । अल्लोपापवाद: । उदीच: उदीचेत्यादि । जलमुच्: सुलोपे (८१पृ०२७सू०) कुत्वे जश्त्वे जलमुग् जलमुक् जलमुचौ इति चान्ता: । महच्छब्दस्य सुलोपे (८८पृ०२७सू०) नुमि (७६पृ०७सू०) उपधादीर्घे संयोगान्तलोपे महान् । नुमुपधादीर्घौ महान्तौ महान्त: महान्तम् महान्तौ । महत: महता महद्भ्यामित्यादि । धीमच्छब्दस्य सुलोपे

६· ६· ।· ७· ७·
अत्वसन्तस्याधातोरुपधादीर्घोऽसंबुद्धौ सौ ॥६१॥

असंबुद्धौ सौ परे अतुभागान्तस्य धातुभिन्नासन्तस्य चोपधाया दीर्घ: स्यात् । इत्युपधादीर्घे नुमि संयोगान्तलोपे च धीमान् हे धीमन् । नुमि धीमन्तौ धीमन्त इत्यादि । एवं गोमान् धनवान् इत्यादि भवच्छब्दो वत्वन्तस्तेन भवान् भवन्तावित्यादि धीमद्वत् । त्यदाद्यत्वे तु असत्यर्थेन्तानामेव ग्रहणं

तेनेह न। वत्वन्तमघवच्छब्दस्य तु मघवान् मघवन्तावित्यादि। अवन्तभवच्छब्दस्य नुम्संयोगान्तलोपौ भवन् भवन्तावित्यादिरूपम्। एवं गच्छन् पचन्। अभ्यस्तधातोः अवन्तात्तु

·१· ५· ६· ·१· ७·

नाभ्यस्ताच्छतु नुँम् सर्व्वनामस्थाने ॥ ६२ ॥

सर्व्वनामस्थाने परे यो नुम् विहितः सोऽभ्यस्तसंज्ञकाद्धातोः परस्य अवन्तस्य न स्यात्। इति नुम्निषेधे ददत् ददतौ। एवं दधत् जाग्रत् लेलिहदित्यादि इति तान्ताः। तादृश् इत्यस्य सुलोपे (८०पृ०२५सू०) कुत्वे जश्त्वे तादृग् तादृक् तादृशौ तादृग्भ्यामित्यादि। एवमन्यादृक् भवादृक्। कुत्वे सृग् सृक् सृशौ सृग्भ्यामित्यादि। इति शान्ताः। षट्शब्दो बहुवचनान्तः (६१पृ० २१सू०) जस्शसोर्लुकि, (८१पृ०२८सू०) षस्य डत्वे तस्य जश्त्वे षड् षट् षड्भिः षड्भ्यः षड्भ्यः आमि तु (८२पृ०११सू०) नुटि (२०पृ० ४सू०) निपातनात् षणाम् षट्सु। धनमुष् इत्यस्य षस्य डत्वे जश्त्वे धनमुड् धनमुट् धनमुषौ धनमुड्भ्यामित्यादि। काष्ठतक्शब्दस्य

सुलोपे स्कोरिति कलोपे षस्य डत्वे काष्ठतट् काष्ठतक्षौ काष्ठतड्भ्याम् । दिधच् पिपच् शब्दस्य तु कत्वस्यासिद्धतया न संयोगादिकलोपस्तेनापवादाप्रसक्तेः संयोगान्तलोपे दिधक् दिधचौ पिपक् पिपचावित्यादि । षान्ताः । पिपठिस् इत्यस्य सुलोपे

६ः ६॰ ॰१॰ ।॰ ७॰

इसुसोर्दीर्घोऽङ्कः रुँः पदान्ते ॥ ६३ ॥

पदान्ते स्थितानामेषां रुँरन्तादेशः स्यात् । उ इत् । इति रुत्वे

६॰ ६॰ १॰ ॰१॰ ७॰

रावान्तधातोरुपधेको दीर्घो नाच्तद्धितययोः ॥ ६४ ॥

रेफान्तस्य वान्तस्य च धातोरुपधाया इको दीर्घः स्यात् नाजादौ प्रत्यये न च यादौ तद्धिते । इति दीर्घे विसर्गे च पिपठीः । षत्वम् पिपठिषौ (८३पृ० १२सू०) रोरेवेति नियमात् विसर्गः पिपठीःषु । चिकीर्स् इत्यस्य सुलोपे

५॰ ६॰ ॰१॰ १॰ ७॰

रात् सस्यैव लोपः पदान्ते ॥ ६५ ॥

पदान्ते स्थितस्य संयोगावयवस्य रकारात् परस्य सस्यैव लोपो नान्यस्य । संयोगान्तलोपनियमार्थः । इति सलोपे रस्थाने विसर्गः चिकीः

षत्वे चिकीर्षौं सुपि तु रुत्वाभावेन न रस्य विसर्गः चिकीर्षु। अत्र रात्सस्यैवेति नियमात् रसंयोगान्तस्यान्यस्य न लोपस्तेन ऊर्क् इत्यादौ न संयोगान्तलोपः। दसेर्डोसि दोस इत्यस्य सुलोपे रुत्वविसर्गौ दोः। षत्वे दोषो दोर्भ्याम् दोःषु। विद्वस्शब्दस्य सुलोपे नुमि (७६पृ० ७सू०) नसान्ततया दीर्घे संयोगान्तलोपे विद्वान् हे विद्वन्। नुमुपधादीर्घौ विद्वांसौ विद्वांसः। असावदादचि तु

६ ६ १ ६ १ १

वसोर्भस्य संप्रसरणं तत्सांर्ते टस्य लोपः॥६६॥

वसन्तस्य भस्य संप्रसारणं स्यात् सति संप्रसारणे तत्स्थानिकस्येटो लोपः स्यात्। इति व् इत्यस्य संप्रसारणे (८२पृ०५सू०) पूर्वरूपैकादेशे च विदुषः विदुषा (८२पृ०८सू०) सस्य दत्वे विद्वद्भ्याम्। एव मुपसेदिवान् उपसेदिवांसौ। उपसेदुषः उपसेदिवद्भ्याम्। जग्मिवस् जगन्वस् इत्यनयोस्तु असादौ जग्मुष इत्याद्येव रूपम् वसोर्वस्य संप्रसारणे उति कृते तन्निमित्तस्य मस्थानिकनस्य निवृत्त्या (१२८पृ० ५सू०) वक्ष्यमाण सूत्रेणोपधाऽतोलोपात् जग्मिवस्—जग्मिवान् जग्मुषः। ध्वस् इत्यस्य दत्वे ध्वत्। ध्वसौ ध्वसः ध्वद्भ्याम् एवं स्रद्। पुम्स्शब्दस्य सुलोपे

६॰ ॰।॰ ७॰

पुंसोऽसुँङ् सर्व्वनामस्थाने ॥ ६७ ॥

सर्व्वनामस्थाने परे पुमस् शब्दस्य असुँङ् स्यात्। उङावितौ। ङित्त्वादन्तादेशः। इति सस्यासुङि नुमि न्सान्ततयोपधादीर्घे संयोगान्तलोपः पुमान्। असुङ्नुमुपधादीर्घाः पुमांसौ पुमांसः। पुंसः पुंसा संयोगान्तलोपे पुम्भ्याम् पुंसु। अत्रानुस्वारस्य नुम्रूपत्वाभावान्न षत्वम्। उशनस् इत्यस्य सुलोपे

६॰ ॰।॰ ७॰ ७॰

उशनसनेहसोरनँङसंबुद्धौ सौ ॥ ६८ ॥

असंबुद्धौ सौ परे एतयोरनँङ् स्यात्। अङावितौ। ङित्त्वादन्तादेशः। इत्यनङि नान्ततयोपधादीर्घे प्रातिपदिकान्तस्य न् इत्यस्य लुप् उशना। उशनसौ उशनसः। संबुद्धौ तु

६॰ ७॰ ॰१॰ ॰१॰ ॰।॰ ॰१॰ ७॰ ॰।॰

उशनसः संबुद्धौ वानँङ् वा च तस्मिन् नलुप् ॥ ६९ ॥

संबुद्धौ परतः उशनसः शब्दस्य अनँङन्तादेशो वा स्यात्तस्मिंश्च सति नलुप् वा स्यात्। इत्यनङि नलुपि च हे उशन पक्षे हे उशनन् हे उशनः। उशनोभ्यामित्यादि। अनेहा अनेहसौ अनेहसः। असन्ततया सौ दीर्घे वेधाः वेधसौ वेधसः।

अदस्शब्दस्य अत्वे पररूपे (९२पृ०४१सू०) सत्वे सान्ततया नोत्वमत्वे।

५. ६. १.

अदसः सोरौः॥ ७०॥

अदस् शब्दात् परस्य सोः स्थाने औः स्यात् इत्यौत्वे। असौ। अन्यत्र त्यदाद्यत्वे पररूपे सर्व्ववत् कार्य्यं कृत्वा यथायोगमुदूतौ ईत् दस्य मत्वञ्च कार्य्यम्। औं तत्रोक्तरीत्या अदौ इति सिद्धे

६. ६. ५. ६. १: ६. १.

अदसोऽसोर्दाद् ह्रस्वदीर्घयोरुदूतौ दस्य च

१.

मः॥ ७१॥

सान्तभिन्नस्य अदस्शब्दस्य दात् परयोः ह्रस्वदीर्घयोः स्थाने क्रमेण उदूतौ स्तः तत्सहयोगे च दस्य मः। इत्यौकारस्थाने ऊत्वे दस्य मत्वे अमू। जसि पूर्व्ववत् सर्व्वनामतया जसःशीभावेऽदे इति सिद्धे

६. १. ७.

एत ईद्बहुवचने॥ ७२॥

बहुवचनजातस्य अदस्शब्दात् परस्यैतः स्थाने ईत् स्यात् तस्मिंश्च सति दस्य मः। पूर्व्वसूत्रापवादः। इत्येतः स्थाने ईत्वे दस्य मत्वे अमी। शस्वत् अदम् इति सिद्धे अतः उत्वे दस्य मत्वे

अमुम्। अमू। अदान् इति सिद्धे आतः स्थाने ऊत्वे मत्वे अमून्। टाविभक्तावत्वे पररूपे

५· १·१· ६· ७·२·१· १·

अदसः टा नाऽस्त्रियाम् तस्मिंश्च न दीर्घः ॥७२॥

अदस् शब्दात् परस्य टा इत्यस्य स्थाने ना स्यात् न तु स्त्रियाम् तस्मिंश्च परे न दीर्घः। इनादेशापवादः। इति नाभावे अतो दीर्घो यञीति प्राप्तदीर्घस्य निषेधेन अकारस्थाने उत्वे दस्य मत्वे अमुना। प्राग्वत् अदाभ्यामिति सिद्धे आतःस्थाने ऊत्वे मत्वे अमूभ्याम्। भिसि अत्वे भिसः स्थाने (८५पृ०२०सू०) ऐसोनिषेधेन(५४पृ०१४सू०) एत्वे एतः स्थाने ईत्वे मत्वे च अमीभिः। प्राग्वत् सर्वनामकार्य्ये अदस्मै इति सिद्धे अस्य उत्वे मत्वे षत्वे च अमुष्मै अमूभ्याम्। प्राग्वत् अदेभ्य इति सिद्धे एत ईत्वे मत्वे अमीभ्यः। अमुष्मात् अमूभ्याम् अमीभ्यः। अमुष्य। प्राग्वत् अदयोरिति सिद्धे अत उत्वे मत्वे अमुयोः। अदेषामिति सिद्धे एत ईत्वे मत्वे अमीषाम्। अमुष्मिन् अमुयोः। अदेषु इति सिद्धे एत ईत्वे मत्वे अमीषु। इति सान्ताः।

इति हलन्तपुंलिङ्गाः।

हलन्तस्त्रीलिङ्गाः ।

उपानह्शब्दस्य सुलोपे

६॰ १॰ ७॰ ७॰ ॰१॰

नहो धः झलि पदान्ते च ॥ १ ॥

झलि परे पदान्ते च नहो हस्य धोऽन्तादेशः स्यात् । अकारइत् । इति हस्य धत्वे जश्चरौ उपानद् उपानत् उपानहौ उपानद्भ्याम् उपानत्सु । उष्णिह्शब्दस्य सुलोपे (९०पृ० ३५सू०) कुत्वेन हस्य घत्वे जश् चरौ उष्णिग् उष्णिक् उष्णिहौ उष्णिग्भ्याम् उष्णिक्षु ।*
मधुलिह् गोदुहादयः पुंवत् । इति हान्ताः ।

६॰ १॰ ७॰

दिव औः सौ ॥ २ ॥

सौ परे दिव् शब्दस्य औरन्तादेशः स्यात् । इत्यौत्वेन सुलोपः द्यौः दिवौ दिवः इत्यादि ।

॰१॰ ७॰

उद्धलि । ३ ॥

हलिपरे दिव्शब्दस्य उदन्तादेशः स्यात् । इति उत्त्वे द्युभ्यामित्यादि । अप्रत्ययेऽपि हलि उत्त्वमिष्यते तेन द्युमणिरित्यादि । इति वान्तः । गिर्शब्दस्य सुलोपे (१०२पृ० ६४ सू०) उपधादीर्घे विसर्गः

---

* हस्य कुत्वे कर्त्तव्ये महाभाष्यादिभिरपि घत्वस्याभ्यासात् घत्वमेव जायते इत्याशयेन घत्वे इत्युक्तम् ।

गौः गिरौ गीर्भ्याम् (८३पृ०१२सू०) सूत्रे रोरेवेति नियमान्न विसर्गः गीर्षु। पूः पुरौ पूर्भ्याम् पूर्षु। चतुर् शब्दो बहुवचनान्तः(७०पृ०८सू०) चतस्रादेशे चतस्रः चतस्रः चतसृभिः चतसृभ्यः २ चतसृणाम् चतसृषु। इति रान्ताः। किमः कादेशे आपि का के का इत्यादि सर्व्वावत्। इदमः सौ अत्वे पररूपे (८४पृ० १६सू०) इयमादेशे सुलोपे इयम्। अन्यत्र अत्वे पररूपे दस्य मत्वे आपि सर्व्वावत् इमे इमाः इमाम् इमे इमाः। सभयोस्तु अशादेशे आपि आभ्याम् आभिः। ङेप्रभृतिषु अत्वे आपि स्याडागमे अशि ह्रस्वे च अस्यै अस्याः अस्याः अनयोः। आमि अत्वे आपि स्याडागमे अशादेशे च आसाम् ङौ तु अत्वे आपि स्याडागमे ङेरामि कृते अशि ह्रस्वे च अस्याम् अनयोः आसु। अन्वादेशे तु अत्वे एनादेशे आपि एनाम् एने एनाः एनया एनयोरिति भेदः। इति मान्ताः। सीमन् शब्दस्य राजवत् रूपम् सीमा सीमानौ सीमभ्याम् ङौतु (७८पृ०१४सू०) वाऽल्लोपे सीम्नि सीमनीत्यादि। पञ्चादयः पुंवत्। इति नान्ताः। ककुभ्शब्दस्य सुलोपे जश्चरौ ककुब् ककुप् ककुभौ ककुभः ककुप्सु। एवमनुष्टुप् (६० पृ० २५ सू०) कुत्वे नुमो

त्रिष्टुप्प्रभृतयः । समिध्शब्दस्य सुलोपे जश्चरौ समिद् समित् समिधौ समिद्भ्याम् एवं युध् । इति धान्ताः । (८० पृ० २५ सू०) कुत्वे जश्चरौ स्रग् स्रक् स्रजौ स्रग्भ्याम् स्रक्षु । रुज् (८१पृ०२७सू०) एवं रुक् रुजावित्यादि । सुखभाज् इत्यादयः पुंवत् । इति जान्ताः । दृषद् दृषत् दृषदौ दृषद्भ्यामित्यादि । एवमुद्दुपनिषदसंसद्संविद् इत्यादयः । त्यदादीनान्तु श्रत्वे आपि सर्व्वावत् तत्र सौ तदोः सत्वे स्या त्ये त्याः । सा ते ताः । एषा एते एताः इत्यादि । अन्वादेशे तु इदम्वत् इति दान्ताः । (८१पृ०२७सू०) वाचः कुत्वे वाग् वाक् वाचौ वाग्भ्याम् वाक्षु । एवमृच्रुच्त्वच् इत्यादयः । इति चान्ताः । प्रतिश्रुत् प्रतिश्रुतौ प्रतिश्रुद्भ्याम् प्रतिश्रुत्सु इति एवं पुरीतत् त्रान्तः । अप्शब्दो बहुवचनान्तः । जसि (६५पृ० ४२सू०) दीर्घे आपः अपः ।

६· १· ०·
अपस्तोँ भि ॥ ४ ॥

भादौ प्रत्यये परे अप्शब्दस्य तोँऽन्तादेशः स्यात् अ इत् । इति पस्य तत्वे अद्भिः अद्भ्यः अद्भ्यः अपाम् अप्सु । पान्तः । (८०पृ० २५सू०) कुत्वे दिक् दिशौ

दिग्भ्याम् दिक्षु। एवं दृक्। स्पृक्ताहमादयस्तु पुंवत्। विश्शब्दस्य (८१पृ० ३८सू०) षत्वे षस्य डत्वे विट् विशौ विड्भ्याम् विट्सु। इति शान्ताः। षस्य डत्वे जशचरौ रुड् रुट् रुषौ रुड्भ्याम् रुट्सु। एवं त्विट्। षड्धनमुडादयस्तु पुंवत्। आशिषोरुत्वे उपधादीर्घविसर्गौ: आशीः आशिषौ आशीर्भ्याम् आशीःषु। इति षान्ताः। स्रस् ध्वस् शब्दौ पुंवत्। सुमनस् वेधोवत्। अदस्शब्दस्य सौ त्यदाद्यत्वे आपि सोरौत्वे दस्य सत्वे हृदौ असौ अन्यत्र त्यदाद्यत्वे आपि उत्वमत्वे अमू। अमूः। अमूम् अमू अमूः। टाविभक्तौ त्यदाद्यत्वे आपि एङि अयादेशे उत्वमत्वे अमुया अमूभ्याम् अमूभिः। ङेप्रभृतिषु त्यदाद्यत्वे आपि स्याडागमे ह्रस्वे उत्वमत्वषत्वानि अमुष्यै अमुष्याः अमुष्याः। ओसि टावत् अमुयोः। आमि त्यदाद्यत्वे आपि सुटि ऊत्वमत्वषत्वानि अमूषाम्। ङौ अत्वे आपि स्याटि ङेरामि ह्रस्वे उत्वमत्वषत्वानि अमुष्याम्। अमुयोः अमूषु। इति सान्ताः।

इति हलन्तस्त्रीलिङ्गप्रकरणम्।

हलन्त क्लीबलिङ्गाः।

स्वमोर्लुक्। (७७पृ०८सू०) वाः। औ शी वारी। अझलन्तत्वान्न नुम् वारि। पुनस्तद्वत्। चत्वारि चत्वारि शेषं पुंवत्। इति रान्ताः। स्वमोर्लुका लुप्तत्वान्न कत्वम् किम् के कानि पुनस्तद्वत् शेषं सर्व्ववत्। एवम् इदम् इमे इमानि अन्वादेशे तु द्वितीयायाम् इदम् एने एनानि टादौ पुंवत्। मान्ताः। ब्रह्म ब्रह्मणी ब्रह्माणि।

७० ६० ०१० ७० ०१०

संबुद्धौ नान्तस्य नलुप् क्लीबे वा ॥ १ ॥

संबुद्धौ परे क्लीबे नान्तस्य नलुप् वा स्यात्। हे ब्रह्म ब्रह्मन् (१०२पृ०६३सू०) वत्वे अहः। वाऽल्लोपे अह्नी अहनी। अहानि। अह्ना अहोभ्यामित्यादि। ज्ञानि ज्ञानिनी (८७पृ०२२सू०) दीर्घे ज्ञानीनि इति नान्ताः। असृग् असृक् असृजी असृञ्जि। असृजा असृग्भ्यामित्यादि इति जान्ताः। त्यद् त्ये त्यानि। एवं तद् ते तानि यत् ये यानि एतत् एते एतानि अन्वादेशेतु एनत् एने एनानीति भेदः। इति दान्ताः। तिर्य्यक्। शेरेव सर्व्वनामस्थानतया तदन्याजादेर्भत्वेन (८९पृ०५६सू०) अच्चोरतो लोपे तिरश्ची। तिर्य्यञ्चि। एवं सम्यक्। इति चान्ताः।

यक्षत् यक्षतो यक्षन्ति। शक्षत् शक्षतो शक्षन्ति। पदादीनां पृथक् शब्दत्वात् न पादादेः पदादेशो विहितः ददत् ददती। क्लीवे शेः सर्व्वनामस्थानतया अभ्यस्तात् परस्य शतु (१०१पृ०६२सू०) नुम्निषेधे प्राप्ते

५· ६· ·१· ·१· ७·

अभ्यस्ताच्छतु—र्वा—नुँम्—शी॥ २॥

शी परे अभ्यस्तोत्तरशतन्तात् नुँम् वा स्यात्। उभावितौ। इति नुमि ददन्ति ददति। तुदत्।

·१· ७:

आच्छीनद्योः—॥ ३॥

अवर्णात् परशतन्तस्य स्थाने नुँम् स्याद्वा श्यामीपि च परे। प्राचां मते नदीति ईपः संज्ञा। तुदती तुदन्ती। तुदन्ति। पचत्

६: ·१·

शपश्यनोर्नित्यम्॥ ४॥

शपः श्यनश्चावर्णात् परशतन्तस्य नित्यं नुँम् स्यात् श्यामीपि च परे। पचन्ती पचती। पचन्ति। दीव्यत्। दीव्यन्ती दीव्यती। दीव्यन्ति। कुर्व्वत्। कुर्व्वती। कुर्व्वन्ति। इति तान्ताः। धनुः धनुषी (७६ पृ०७सू०)नुसान्ततयोपधा दीर्घं नुम्व्यवधानेऽपि(५४ पृ०१६सू०) षत्वे धनूंषि पुनस्तद्वत्। भ्यामि (१०२पृ० ६३सू०) रुत्वेऽपि धातुत्वाभावात् न उपधेकोदीर्घः।

धनुर्भ्याम् धनुःषु एवं चक्षुर्हविःप्रभृतयः। अदः। विभक्तिकार्यात्परमूत्त्वमत्वे अमू अमूनि। पुन-स्तद्वत् शेषं पुंवत् इति सान्ताः।

इति हलन्तक्लीबलिङ्गप्रकरणम्।

अव्ययप्रकरणम्।

स्वरादिनिपातानामव्ययत्वमुक्तं तत्र निपाता उक्ताः स्वरादयोऽधुनोच्यन्ते। स्वर् अन्तर्, प्रातर्, पुनर्, उच्चैस्, नीचैस्, शनैस्, ऋते, युगपत्, आरात्, पृथक्, ह्यस्, श्वस्, दिवा, सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तूष्णीम्, वहिस्, अधस्, समया, निकषा, स्वयम्, वृथा, नक्तम्, नञ्, अद्धा, सामि, (क्त्वातोसुन्कसुनः) ॥ (वत्प्रत्ययान्तम्) तिरस्, अन्तरा, अन्तरेण, भ्रम्, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, वषट्, वौषट्, अस्ति, उपांशु, दोषा, मृषा, मिथ्या, मुधा, पुरा, मिथो, मिथस्, प्रायस्, मुहुस्, अभीक्ष्णम्, साकम्, सार्द्धम्, समक्षम्, समम्, धिक्, अथ, मा, माङ्, कामम् प्रकामम्, भूयस्, साम्प्रतम्, परम्, साक्षात्, साचि, सत्यम्, मङ्क्षु,

अवश्यम्, सपदि, प्रादुस्, आविस्, ओम्, भूर्, भुवर्, सुष्ठु, दुष्ठु, सु, अधि, अञ्जसा, किञ्चित्, अस्तम्, स्थाने, सह, सतस्, वरम्, कष्टम्, स्वित्, इत्यादि। आमन्ताः क्त्वोर्थान्तास्तसिलान्ताः वत्यन्ताश्च। क्त्वातुमुन्मान्तकृदन्ता अव्ययीभाव समासनिष्पन्नाश्च। एते (१०पृ० ३२सू०) प्रागुक्ता निपाताश्चाव्ययाः।

५· ६· ·१·

अव्ययात् सुपो लुक्॥ १॥

अव्ययसंज्ञकात् शब्दात् परस्य सुपो लुक् स्यात्। स्वः प्रातः। आमन्तादयस्तु सुतराम् नितराम्, पञ्चकृत्वः, द्विः, त्रिः, सर्व्वतः, सर्व्वत्र, सर्व्वदा, कृष्णवत्, पक्त्वा, कर्त्तुम्। स्मारंस्मारम्। उपवारि।

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्युक्ते-रल्लोपे अवगाहः वगाहः अपिधानम् पिधानम्।

५· ६· ·१·

उदः स्थास्तम्भोर्लोपः॥ २॥

उच्छब्दात् परस्य स्थास्तम्भोरादेः सस्य लोपः स्यात्। उत्थानम्। उत्तम्भनम्।

इत्यव्ययप्रकरणम्।

इति सुपप्रयोगप्रकरणम्।

तिङन्तप्रकरणम् ।

अथ तिङः प्रदर्श्यन्ते ।

तिप्, तस्, अन्ति, सिप्, थस्, थ, मिप्, वस्, मस् । ते, आते, अन्ते, से, आथे, ध्वे, ए, वहे, महे । (लट्) यात्, याताम्, युस्, यास्, यातम्, यात, याम्, याव, याम । ईत, ईयाताम्, ईरन्, ईथास्, ईयाथाम्, ईध्वम्, ईय, ईवहि, ईमहि । (विधिलिङ्)तुप्, ताम्, अन्तु, हि, तम्, त, आनिप्, आवप्, आमप् । ताम्, आताम्, अन्ताम्, स्व, आथाम्, ध्वम्, ऐप्, आवहैप्, आमहैप् । (लोट्) दिप्, ताम्, अन्, सिप्, तम्, त, अम्प्, व, म । त, आताम्, अन्त, थास्, आथाम्, ध्वम्, इ, वहि, महि । (लङ्) दि, ताम्, अन्, सि, तम्, त, अम्, व, म । तन्, आताम्, अन्त, थास्, आथाम्, ध्वम्, इ, वहि, महि । (लुङ्) णप्, अतुस्, उस्, थप्, अथुस्, अ, णप्, व, म । ए, आते, इरे, से, आथे, ध्वे, ए, वहे, महे । (लिट्) ता, तारौ, तारस्, तासि, तास्थस्, तास्थ, तास्मि, तास्वस्, तास्मस् । ता, तारौ, तारस्, तासे, तासाथे,

* तिप तस् झि सिप् थस्थमिब्वस् मस् तातां झथा साथां ध्वमि वह महिङ् इति पाणिनिनाष्टाध्याय्यैव पठिता लडादिषु तेषामादेशेन तास्यादि विकरणयोगेन च रूपविशेषाः संपादिता प्रक्रिया लाघवाय चेह संपादित रूपाण्येव तिङादय पठिताः ।

ताध्वे, ताहे, तास्वहे, तास्महे। (लुट्) यात्, यास्ताम्, यासुस्, यास्, यास्तम्, यास्त, यासम्, यास्व, यास्म। सीष्ट, सीयास्ताम्, सीरन्, सीष्ठास्, सीयास्थाम्, सीध्वम्, सीय, सीवहि, सीमहि। (आशीर्लिङ्) स्यति, स्यतस्, स्यन्ति, स्यसि, स्यथस्, स्यथ, स्यामि, स्यावस्, स्यामस्। स्यते, स्येते, स्यन्ते, स्यसे, स्येथे, स्यध्वे, स्ये, स्यावहे, स्यामहे। (लृट्) स्यत्, स्यताम्, स्यन्, स्यस्, स्यतम्, स्यत, स्यम्, स्याव, स्याम। स्यत, स्येताम्, स्यन्त, स्यथास्, स्येथाम्, स्यध्वम्, स्ये, स्यावहि, स्यामहि। (लृङ्)

१ः १ः १ः ॰१॰

एतानि तिङो लकाराश्च ॥१॥

तिबादीनि साशीतिशतसंख्यकानि तिङ्संज्ञानि लसंज्ञानि च स्युः। तत्र एकवचनादिसंज्ञाः (११पृ० ३६सू०) प्राग्वत्। तत्र णौ दिस्योरिकारः तनौ नवेत् स्यात्। तनौ नित्करणं तु चिणर्थम्।

१ः १ः

तान्यष्टादशशो लड्विधिलिङ्लोड्लङ्लुङ्लिट्

१ः

लुट् आशीर्लिङ् लृट्लृङः ॥२॥

तान्यष्टादशशः क्रमेण लडादिसंज्ञानि स्युः।

६:· १: १:

तेषां पूर्व्वापरौ परस्मैपदात्मनेपदे ॥ ३ ॥

तेषामष्टादशानां पूर्व्वापरभागौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः । तद्व्यवस्था चाग्रे वक्ष्यते ।

६:· ६:· ·१· १·

आद्याः पञ्च शिच्च सार्व्वधातुकम् ॥ ४ ॥

तेषां दशानामाद्या लट्, विधिलिङ्, लोट्, लङ्, लुङ्, इत्येते पञ्चलकाराः शित्प्रत्ययश्च सार्वधातुकसंज्ञाः स्युः । अन्ये कृदादय

१· १·

शेषमार्द्धधातुकम् ॥ ५ ॥

अवशिष्टाः पञ्च लकाराः अन्ये कृदादयश्चार्द्धधातुकसंज्ञाः स्युः ।

५:· ·१· १·

गाङ्कुटादिभ्योऽञ्णित् ङित् ॥ ६ ॥

इङादेशगातेः कुटादिभ्यश्च परः ञिद्णिद्भिन्नः प्रत्ययो ङित् स्यात् । तत्र गणपाठे कुटादिः । ते च (सि० कौ० १५३पृ०) द्रष्टव्याः ।

५· १· ५· ·१· ·१·

विज इट् उर्णोस्तु वा ॥ ७ ॥

विजधातोःपरइट् ङित्स्यात् उर्णोस्त परइट् वा ङित् ।

१· १·

सार्वधातुकमपित् ॥ ८ ॥

अपित् सार्वधातुकं ङित् स्यात् ।

१० १० १० ०१० ५००१०

आशीर्लिङ्परस्मैपदं कित् लिट् च संयोगात्तु

०१०

वा ॥ ९ ॥

अपिल्लिट् आशीर्लिङ्परस्मैपदञ्च कित् स्यात् संयोगात्तु परः लिट् किद्वा ।

५:० १००१०

श्रन्थिग्रन्थिदम्भिभ्यस्थप् वा ॥ १० ॥

एभ्यो लिटस्थप् किद् वा स्यात् ।

५:० ०१०

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ ११ ॥

एभ्यः क्त्वा कित् स्यात् । (१२०पृ०२१सू०) वक्ष्यमाणविकल्पाद्यपवादः ।

५:० ०१००१०

रुदविदमुषग्रहिस्वपिप्रच्छिभ्यः संश्च ॥ १२ ॥

एभ्यः क्त्वा सन्प्रत्ययश्च कित् स्यात् । पूर्व्ववत् किन्निषेधापवादः ।

५० ५० ५० ०१० ०१० ०१०

इको झलन्तादिगुपधा—च्चानिट्—सन् ॥ १३ ॥

इकः, झलन्तादिगुपधाच्चानिट् सन् कित्स्यात् ।

५० ०१० ६: ७० ५००१००१०

उश्च लिङ्सिचावात्मनेपदे गमस्तु वा ॥ १४ ॥

इगुपधात् झलन्तात् ऋवर्णान्ताच्च परावनिटौ आत्मनेपदविषये लिङ्सिचौ कितौ स्तः गमस्तु वा ।

५· ·१· ५··१· ७· ७··१··१·

हनः सिच् यमस्तु सूचने विवाहे तु वा ॥ १५॥

हनः सूचनार्थे यमश्च परोऽनिट् आत्मनेपद निमित्तकं सिच् कित् विवाहार्थे यमः परस्तु वा स्यात्।

·१· ·१· ·१·

न—क्ता सेट्— ॥ १६ ॥

सेट् क्ता किन्न स्यात्।

१· ५· ५··१· ७·

निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषो मृषस्तु क्षान्तौ ॥१७॥

एभ्यः सेट् निष्ठा किन्न स्यात्। मृषस्तु क्षमायाम्।

५· ५· ७: ·१·

उदुपधात् शब्वतो भावादिकर्म्मणो र्वा ॥१८॥

कृतशब्विकरणादुदुपधाद्धातोः भावे आरम्भकर्म्मणि च विहिता सेट् निष्ठा किन्न स्याद्वा।

पूङः क्ता च ॥ १९ ॥

पूङो धातोः परा सेट् निष्ठा क्ता च किन्न स्यात्।

५· ५·

नोपधात् थफान्तात् तृषिमृषिकृशिवञ्चिलुञ्चृ-

५··१·१··१·

तश्च क्ता वा ॥ २०।

नकारोपधात् थकारान्तात् फकारान्ताच्च तृष्यादिभ्यश्च परः सेट् क्ता किद्वा स्यात्।

५॰   ५॰ ॰१॰   ५॰ ॰।॰ १॰

इदुदुपधाद्रलन्ताच्च हलादेः संश्च ॥ २१ ॥

इकारोकारोपधात् रलन्तात् हलादेर्धातोः क्तः सेट् क्त्वा संश्च किद्वा स्यात्।

॰।॰   १॰ ॰।॰

अपिद्दाधा घु ॥ २२ ॥

अपित् दा धा च घुसंज्ञः स्यात्।

६॰ ॰।॰   ॰१॰

द्विरुक्तस्यादिरभ्यासः ॥ २३ ॥

कृतद्वित्वस्यादिरभ्याससंज्ञः स्यात्।

इति संज्ञाप्रकरणम्।

७॰   ५॰   १॰

धात्वर्थक्रियाप्राधान्ये धातो—स्तिङ्—॥१॥

धात्वर्थक्रियाप्राधान्ये द्योत्ये धातोस्तिङ् स्यात्। कृत्सु तु न धात्वर्थक्रियाप्राधान्यम्।

५॰   ७ः   ५॰   ७ः

सकर्म्मकात्कर्त्तृकर्म्मणोरकर्म्मकात्तुकर्त्तृभावयोः ॥२॥

सकर्म्मकाद्धातोः कर्त्तरि कर्म्मणि च अकर्म्मकात्तु कर्त्तरि भावे चार्थे तिङ् स्यात्। तत्र पदव्यवस्था लडाद्यर्थविशेषाश्चाग्रे वक्ष्यन्ते। भू सत्तायाम् भू—— —ति इति स्थिते

७॰ ७॰ ॰१॰

कर्त्तरि सार्व्वधातुके शप्॥ ३॥

कर्त्रर्थकसार्व्वधातुके परे धातोः शप् स्यात्। शपावितौ। असति विशेषे सर्व्वधातुभ्य एव शप्। तथाहि धातवस्त्रिविधाः सौत्रा गणपठिताः पारिभाषिकाश्च। तत्र सौत्राणां पाठानुसारेण तत्तद्गणकार्य्याणि। गणपठितास्तु दशविधा यथा

भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च।
तुदादिश्च रुधादिश्च तनक्र्यादि चुरादयः॥

एते च दशविधा धातवो गणपाठे पाणिनिना गणभेदेन पठितास्ते च सिद्धान्तकौमुदीग्रन्थोत्तरार्द्धे प्रकरणभेदेन दर्शिताः। तत्र भ्वादिप्रभृतीनां नवविधानां सार्व्वधातुकविषये विकरणतद्रूपकार्य्यभेदात् तेषां विभिन्नगणीयत्वम् आर्द्धधातुके तु सर्व्वगणीयानामेकरूपमेव कार्य्यम्। तत्र च सामान्यतः कर्त्रर्थे सार्व्वधातुके भ्वादिभ्यः शप्, अदादिभ्यः शपो लुक्, जुहोत्यादिभ्यः कृतस्य शपो लुकि द्वित्वम्, दिवादिभ्यः श्यन्,स्वादिभ्यः श्नुः, तुदादिभ्यः शः, रुधादिभ्यः श्नम्, तनादिभ्यः उप्, क्र्यादिभ्यः श्ना। एतान् विशेषानादायैवैषां तत्तद्-

गणीयताव्यवहारः। चुरादिभ्यस्तु स्वार्थे णिचि तदन्तत्वेन प्रत्ययान्ततया पुनः पारिभाषिकधातुसंज्ञा। एवञ्च णिच्प्रत्ययान्ततया कृतधातुसंज्ञेभ्यस्तेभ्यः अन्येभ्यः पारिभाषिकेभ्यश्च अबेव विकरण इति विशेषः। तत्र गणभेदेन सार्व्वधातुके कार्य्यविशेषार्थमिदं प्रकरणम्। तत्र भुवो भ्वादिगणीयतयानेन अपि कृते।

६: १· ७·

इग्लघूपधयोर्गुणः किद्ङिद्भिन्नप्रत्यये ॥ ४॥

किद्ङिद्भिन्ने प्रत्यये परे इगन्तस्य लघूपधस्य च गुणः स्यात्। इति गुणे अवादेशे भवति। एवं भवतः। (८४पृ० १५सू०) पररूपे भवन्ति। भवसि भवथः भवथ। (५४पृ० १२सू०) दीर्घे भवामि भवावः भवामः। प्राप्तयर्थकस्य तु भवतेरात्मनेपदे

५· ६:· ६· ·१·

अतो—ङितामातईत् ॥ ५ ॥

अकारात् परस्य ङित्संज्ञकस्य तिङ आतः स्थाने ईत् स्यात्। इतीत्वे भवेते। भवन्ते, भवसे, भवध्वे। पररूपे भवे। दीर्घे भवावहे भवामहे। विधिलिङि अपि गुणे अवादेशे च कृते।

६॰ ६॰॰ १॰॰

विधिलिङोयायुस्यामामिदियुसियमः ॥ ६ ॥ *

अकारात् परस्य विधिलिङो या, युस्, याम् इत्येषां स्थाने क्रमेण इत् इयुस् इयम् एते स्युः। इतीत्वे गुणे भवेत् भवेताम्। युस इयुसि भवेयुः। भवेः भवेतम् भवेत। याम इयमि भवेयम् भवेव, भवेम। भवेत भवेयाताम् भवेरन् भवेथाः भवेयाथाम् भवेध्वम् भवेय भवेवहि भवेमहि। लोटि शपि गुणे अवादेशे च भवतु भवताम् पररूपे भवन्तु।

५॰ ५॰ ५॰५॰॰१॰६॰ १॰

अतः शपोऽसंयुक्ताच्चोश्च हेर्लोपः ॥ ७ ॥

अकारात्, शपः, असंयुक्तात् उप्रत्ययाच्च, परस्य हेर्लोपः स्यात्। इति हिलोपे भव भवतम् भवत। भवानि, भवाव, भवाम। भवताम्। आत ईत्वे भवेताम्। पररूपे भवन्ताम् भवस्व भवेथाम् भवध्वम्। भवै भवावहै भवामहै। लङि

७॰ ६॰॰१॰ ६॰॰१॰॰१॰ ॰१॰

लङ्लिङ्लृङ्क्षु धातोरडजादेस्त्वाट् न माङ्माङ्माभ्याम् ॥ ८ ॥

१ः

एषु परेषु धातोरट् स्यात् अजादेस्तु आट्, न तु माङ्माङ्माभ्यां योगे। ट इत् टित्वादादावागमः।

---

* इयुसियमो विभक्त्यादेशतया विभक्तित्वात् तत्स्थसकार-मकारयो नेत्त्वं न विभक्तौ तुस्मा इति पाणिनीयात् इतसकारस्तु उसक्ष मकारश्च ग्रहणार्थतया इत्।

इत्यटि अपि गुणेऽवादेशे च अभवत् अभवताम्। पररूपे अभवन्। अभवः अभवतम् अभवत। अभवम् अभवाव अभवाम। अभवत। आत ईत्वे अभवेताम्। पररूपे अभवन्त। अभवथाः अभवेथाम् अभवध्वम् अभवे। दीर्घे अभवावहि अभवामहि। लुङादिरूपमग्रे तत्तत्प्रकरणे वक्ष्यते।

५॰ ६॰ ॰१॰ ६॰ ॰१॰ ॰।॰

श्रुवः शपः श्नुः श्रुवः शृ च ॥ ९ ॥ *

श्रुवःपरं विहितस्य शपःस्थाने श्नुः स्यात् तस्मिंश्च परे श्रुवः शृ इत्यादेशः स्यात्। श इत्। विकरणे न विकरण इति सिद्धान्तात् पुनर्न शप्। इति श्नौ शृ इत्यादेशे (४४पृ० १७सू०) नु इत्यस्याङ्ग-संज्ञया गुणे शृणोति। शृणुतः। (६२पृ० २५सू०) उवङि प्राप्ते

६ः ॰।॰ ७॰ ७॰ ७॰

असंयुक्त श्नुहुवो र्वं ङ् सार्व्वधातुकेऽगुणेऽचि ॥१०॥†

सार्व्वधातुके गुणसाधनभिन्ने अजादौ प्रत्यये परे असंयुक्त श्नोर्हुवश्च वङ् स्यात्। अङावितौ। इति वङि शृण्वन्ति। अगुणे किम् शृणवै।

---

* श्नोः ञितकरणं सार्व्वधातुक संज्ञार्थं तत श्चापित् सार्व्व-धातुकत्वेन ङित्वात् तस्मिन् परे न गुणः एवं श्नान् यादावपि द्रष्टव्यम्।

† श्नुवः संयोगादित्वा सम्भवेन श्नोरेवासंयोगेति विशेषणम्।

६· ६· ६· ·१· ६· १· ·१· ·७: ५· ·१·
असंयुक्तस्य नोरुपधयोतोलोपो वा म्वोः कृञस्तु
७· ·१· २·
ये च नित्यम् ॥ ११ ॥

मादिमांदिप्रत्यययोः परयोरसंयुक्तस्य नो रुपस्य उतो लोपो वा स्यात् कृञस्तु ये तयोश्च परतोनित्यम् । शृण्वः शृणुवः । शृण्मः शृणुमः । उत इत्युक्तेः शृणोमीत्यादौ ओतो लोपो न (१२२पृ०७सू०) हिलोपे शृणुहि ।

५: ६· १· ६: ·१· १:
कृविधिविभ्यां शपः श्नुस्तयोश्च कधौ ॥ १२ ॥

आभ्यां शपः श्नुः स्यात् सति च तस्मिन् धात्वोः क्रमेण कधौ स्याताम् । कृवि-कृणोति धिवि-धिनोति ।

५: ·१·
अक्षतनूकरणार्थतक्षिभ्यां वा ॥ १३ ॥

अक्षतेस्तनूकरणार्थतक्षतेश्च परस्य शपः स्थाने श्नुः स्याद्वा । इति शपः श्नौ णत्वे गुणे च अक्ष्णोति अक्ष्णुतः संयुक्तत्वान्नवङ् । उवङि अक्ष्णुवन्ति, अक्ष्णुवः अक्ष्णुमः । अक्ष्णुहि, पक्षे अक्षतीत्यादि । एवं तक्ष्णोतीत्यादयः । अन्यार्थे तु तंसतक्षति भर्त्संयतीत्यर्थः । क्रमधातोः शपि

भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसियसिसंयसित्रुटि-
५ः १ १
लषिभ्यः श्यन् वा ॥ १४ ॥

एतेभ्यः शपः श्यन् वा स्यात् । शनाविती इति श्यनि

६ः ७ १ ६ १ ७
ष्ठिवक्लमाचमां शिति दीर्घः क्रमस्तु परस्मैपदे ॥१५॥

शिति परे एषां दीर्घः स्यात् क्रमस्तु परस्मैपदविषये । इति दीर्घे क्राम्यति पक्षे क्रामति । आत्मनेपदे तु क्रम्यते क्रमते इत्येव । एवं क्लाम्यतीत्यादि । ष्ठिवस्तु (१०२पृ० ६४सू०) अजादौ दीर्घनिषेधेऽनेन दीर्घे ष्ठीवति । आचामति । आङोऽन्यत्र चमति विचमति

पा, घ्रा, ध्मा, स्था, म्ना, दाण, दृश्यर्त्ति, यम, गम,
६ः
शद, सदीर्षि, ज्ञा, जनां, पिब, जिघ्र, धम, तिष्ठ,
१ः
मन, यच्छ, पश्यर्च्छ, यच्छ, गच्छ, शीय, सीदेच्छ, जाः
७ ६ १ १ ७
शिति सरतेस्तु धौर्वेगगतौ ॥ १६ ॥

शिति परे एषामेते आदेशाः क्रमात् स्युः । वेगगत्यर्थकसरतेस्तु धौरित्यादेशः । पा-पिबति घ्रा-जिघ्रति ध्मा-धमति स्था-तिष्ठति म्ना-मनति दाण-यच्छति दृश-पश्यति ऋ ऋच्छति यम-यच्छति गम-गच्छति ।

५॰ ७॰ १॰

शदः शपि आत्मनेपदम् ॥ १७ ॥

शब्विषये शद आत्मनेपदं स्यात् । इत्यात्मनेपदे शद-शीयते सद-सीदति इषिश्चादीनां रूपमग्रे वक्ष्यते । सरतेस्तु वेगे धावति अन्यत्र सरति ।

६:॰ १॰ ७॰ ६॰ ॰१॰

दन्शसन्जस्वन्जां नलोपः शपि रन्जस्तु भाव-

७:॰ ॰१॰

करणघञसनघकेषु च ॥ १८ ॥

शपि परे दन्शादीनां नलोपः स्यात् रन्जस्तु भावकरणार्थे घञि असि अने घके शपि च। इति नलोपे दन्श-दशति सन्ज-सजति स्वन्ज-स्वजते ।

६॰ ७॰ ॰१॰ १॰ १॰

आटोऽचि सह वृद्धिः पररूपः ॥ १९ ॥

अचि परे आटः पररूपः सह (पूर्व्वपरयोरेकादेशः) वृद्धिः स्यात् । इति वृद्धौ ऊह-औहत ।

इति भ्वादि ।

अदादिप्रकरणम् ।

५॰: ६॰ ॰१॰

अदादिजुहोत्यादिभ्यः शपो लुक् ॥ १ ॥

एभ्यः शपो लुक् स्यात् । अद भक्षणे इत्यादयो

गणपठिता अदादयस्ते च (सि० उ० १०८ पृ०) द्रष्टव्याः। अद्-ति चरि अत्ति अत्तः अदन्ति।

५: ६० १०

हुझल्भ्यां हेर्धिः ॥ २ ॥

जुहोतेः झलश्च परस्य हेर्धिः स्यात्। इति धौ अद्धि

५० ६: ०१० ५० ०१० १०

अदो लङ्दिस्योरट् हलस्तु लोपः ॥ ३ ॥

अदः परयोर्लङ्दिस्योरडागमः, हलः परयोस्तु तयोर्लोपः स्यात्। टइत्। इत्यटि आदत् आदः। हन्-ति हन्ति। तसि

६: १० ७० ७

तनाद्यनिटोः पञ्चमवर्णलोपोऽगुणे अक्किचि —

७० ७० ०१०

झलि ल्यपि च ॥ ४ ॥

तनादीनामनिटाञ्चान्त्यपञ्चमवर्णस्य लोपः स्यात्अगुणे झलादौ ल्यपि च परे अक्किचि। तत्र तनु, षणु, क्षिणु ऋणु, तृणु, घृणु, वनु, मनु इति तनादयः। अनिटस्तु गमि, नमि, मन्यति, यमि, रमि, हनि इत्येत एव पञ्चमान्ता अनिटः। इति नलोपे हतः।

६:० ६० १० ७० ७०

गमहनजनखनघसामुपधातोलोपोऽनङ्यचि ॥५॥

एषामुपधाकारस्य लोपः स्यादनङि अगुणे अजादौ

परे। इति उपधाकारस्य लोपे (८७ पृ०२४ सू०) घादेशे घ्नन्ति। अनुस्वारे हंसि

२· ६:· १:·
हिना हन्त्यस्तिशाधीनां जह्येधिशाधयः ॥६॥

हिसहितानामेषां स्थाने क्रमेणैते आदेशाः स्युः। जहि। दिस्योर्लोपे अहन् अहन। लिह्--ति गुणे हस्य ढत्वे

५· ६: १· ६·
झषस्तथोर्धोऽधः ॥ ७ ॥

झषः परयोस्तथोः स्थाने धः स्यात् नतु धाञः। अहत्। इति तकारस्य धत्वे टुत्वेन ढत्वे (४०पृ०-१६सू०) ढे ढलोपे लेढि। तसि गुणाभावे पूर्व्वाणो दीर्घे लीढः। लिहन्ति। सिपि हस्य ढत्वे

६· १· ७·
षढोः कः सि ॥ ८ ॥

से परे षढयोः कःस्यात्। इति ढस्य कत्वे षत्वेच लेक्षि। ईश-ते शस्य (८१पृ०३८सू०) षत्वे टुत्वे ईष्टे।

५:· ६: ·१·
ईशीडिजनिभ्यः सार्व्वधातुकसध्वयोरिट् ॥९॥

एभ्यः परयोः सार्व्वधातुकसंज्ञयोः सध्वयोः स्थाने इडागमः स्यात्। टइत्। टित्वादादौ इतीटि ईशिषे ईशिध्वे एवमीडिषे इत्यादि। सू—ते सूते ऐपि तु

६॰ ७॰ १॰ ६॰ ॰१॰ ॰१॰

शीङः सार्व्वधातुके गुणः सुवस्तु न ॥१०॥

शीङो गुणः स्यात् सार्व्वधातुके परे सुवस्तु तस्मिन्न। सुवै। शी-ते गुणे शेते गुणेऽयादेशे च शयाते।

५॰ ६॰ ६॰ ॰१॰ ५॰ ॰१॰ ॰१॰

शीङोऽन्तोऽतो रुँट् विदस्तु वा ॥ ११ ॥

शीङः परस्यान्तः स्थाने जातस्यात्इत्यस्य स्थाने रुँडागमः स्यात् विदः परस्य तु वा स्यात् उटावितौ। (१५५पृ॰५सू॰) वक्ष्यमाणेनान्तस्थाने अति रुटि च शेरते शेरताम् अशेरत। विदस्तु संविद्रते संविदते।

५॰ ६ः॰ ६ः॰ १ः॰ ॰१॰

विदस्तिबादीनां नवानां णबादयो वा ॥ १२ ॥

विदः परेषां तिबादीनां नवानां स्थाने क्रमेण णबादयो नव वा स्युः। वेद वेत्ति, विदतुः वित्तुः, विदुः विदन्ति, वेत्थ, वेत्सि, विदथुः वित्थः, विद वित्थ, वेद वेद्मि, विद्व विद्वः, विद्म विद्मः। लोटि

५॰ ॰१॰ ॰१॰ ७ः ७॰ ॰१॰ १॰॰१॰ १॰

विदोऽङाम् वा लिड्लोटौ लोटि तु कञेवातु ॥१३॥

लिटि लोटि च परे विदः परंङाम्स्याद्वासति च ङामि लोटि कञेवानुप्रयुज्यते। ङइत्। ङित्त्वान्न गुणः। इति ङामि कञ्प्रयोगे च विदाम् क तु इति स्थिते

५:० ०१० ७० ७०

तनादिभ्यः श्नुप् कर्त्तरि सार्व्वधातुके ॥१४॥

कर्त्तरि सार्व्वधातुके परे तनादिभ्यः श्नुप्स्यात्। शपाविती। इति श्नुपि गुणे च विदाङ्करोतु। पक्षे वेत्तु। तामि

६० ६० ०१० ७०

श्नुप्प्रत्ययान्तकृञोऽतः उदगुणे ॥१५॥

श्नुप्प्रत्ययान्तकृञोऽकारस्य उत्स्यादगुणे प्रत्यये परे। इति अत उत्त्वे विदाङ्कुरुताम् वित्ताम् (१२२पृ० ७सू०) हिलोपे विदाङ्कुरु। पक्षे हेर्धौ विद्धि। लङि दिलोपे अवेत्। अवित्ताम्। अनि तु

५: ६० ०१० ५० ०१०१०

सिजभ्यस्ताभ्यामनउस् द्विषविदातस्तु वा ॥१६॥

सिचः, अभ्यस्ताच परस्यानः स्थाने उस् स्यात् द्विषे-र्वेत्तेराद्न्ताच तु वा स्यात्। अविदुः अविदन्। सिपो लोपे पदान्तत्वे

७० ६: ६० ७०१०

पदान्ते दधो रुः सिपि वा ॥१७॥

पदान्तस्थस्य धातोर्दस्य धस्य च रुः स्याद्वा सिपि परे। उद्गत्। इति रुत्वे अवेः पक्षे अवेत्।

अस्—ति अस्ति। तसादौ तु

६: १० ७० ७० ६० ०१० ७०
अमस्त्योरल्लोपोऽगुणे सार्व्वधातुकेऽस्तेस्तु से
१० ०१०
सलोपश्च॥ १८॥

अम्प्रत्ययस्य अस्तेरकारस्य च लोपः स्यादगुणे सार्व्वधातुके परे से तु अस्तेः सलोपश्च। इत्यल्लोपे स्तः। सन्ति। सलोपे असि। लङि

५० ६: ०१० ५०: ०१००।०
अस्तिविद्यमानसिचोर्द्दिस्योरीट् रुदादिभ्यस्त्वट्
०१०
च॥ १९॥

अस्तेर्व्विद्यमानसिचश्च परयोर्द्दिस्योरीट् स्यात् रुदादिभ्यस्तु अडीटौ पर्य्यायेण स्तः। टइत्। इतीटि आसीत् आसीः। रुद्-ति

५:० ६० ६० ०१०
रुदादिभ्यः सार्व्वधातुकस्य वलादेरिट्॥ २०॥

रोदितिः स्वपतिश्चैव श्वसितिः प्राणितिस्तथा।
जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चकोगणः।

इत्युक्तरुदादेः परस्य सार्व्वधातुकस्य वलादेरिट् स्यात्। ट इत्। आदावागमः। रोदिति रुदितः। वलादित्वाभावात् रुदन्ति। लङीटि पक्षे अटि

च अरोदीत् अरोदत् । अरोदीः अरोदः । एवं स्वपित्यादयः । जक्षिति जक्षितः । (४७पृ० २७सू०) अभ्यस्तसंज्ञायाम्

५· ६· ·१·

अभ्यस्तादन्तोऽतिः ॥ २१ ॥

अभ्यस्तात् परस्य अन्त् इत्यस्य स्थाने अतिः स्यात् । इकार इत् । इत्यति जक्षति(१२१पृ० १६सू०) अनउसि अजक्षुः । जागृ जागर्त्ति जागृतः । अनि तु अनउसि

६· १· ६· ७· ६· ·१· ७· ·१·

अभ्यस्तस्य गुणोऽनउसि जागुस्त्वचिसब्ङितिच॥२२॥

अभ्यस्तस्य गुणःस्यात् अनौ जातेउसिपरे जागर्त्तस्तु चिण् णब्-ङिङ्भिन्ने उसिच परे । इति गुणे अजागरुः । सिपि गुणे (१२८पृ० ३सू०) सिपोलोपे अजागः । दरिद्रा दरिद्राति ।

६· ·१· ७· ७· ७· ६: ·१· ·१·

दरिद्र इदगुणे-हलिसार्व्वधातुके-हाग्भ्योस्तु वा॥२३॥

अगुणे हलादौ सार्व्वधातुके परे दरिद्राधातोरित् अन्तादेशः स्यात् हाग्भ्योस्तु वा । इति इत्वे दरिद्रितः ।

६: ६· १· ७· ·१· ·१· ·१· ६·

आभ्यस्तयोरातो लोपो हलि लोत् न घोः ॥२४॥

आप्रत्ययस्य अभ्यस्तस्य च आकारस्य लोपः स्यादगुणे

सार्व्वधातुके परे, हलादौ तु ईत् न तु घुसंज्ञस्य । इति आलोपे अत्यादेशे दरिद्रति । शास्-ति शास्ति

६· ·१· ७ः ६· ७· ·१· ६· ·१·

शासइदङ्हलोरुपधायाः क्वौ त्वाशासश्च ॥२५॥*

शास्ते रुपधाया इत् स्यादङि अगुणे हलादौ च परे क्वौ तु शास्तेराशास्तेश्च स्यात् । इति इत्वे (५५पृ० १६सू०) षत्वे टुत्वे शिष्टः । (१२२पृ० २१सू०) अन्तःस्थाने अति शासति । (१२९पृ० २सू०) शाधि ।

६· ६· ·१· ७· ७· ·१· ·१· ·१·

पदान्तस्य सस्य दः दिपि सिपि तु रुँ वा ॥२६॥

दिपि परे पदान्तस्य सस्य दः स्यात् सिपि तु रुँः स्याद्वा । अकारः रोरुकारश्चेत् । दिपि अशात् । सिपि अशाः अशात् ।

६· १· ७· ·१· ·१· ७· ७·

मृजेर्वृद्धिरक्ङिति वा त्वज्गुणे ॥ २७ ॥

मृजेर्वृद्धिः स्यात् किद्ङिद्भिन्नप्रत्यये परे अगुणे अजादौ तु वा । इति वृद्धौ (८१पृ० ३८सू०) जस्य षत्वे टुत्वे मार्ष्टि । मृष्टः । मार्ज्जन्ति मृजन्ति । जस्य षत्वे तस्य झवि जश्त्वेन डत्वे हेर्धित्वे टुत्वे मृड्ढि दिलोपे षत्वडत्वे जश्चरौ आमार्ड् अमार्ट् । रात्सस्यैवेति (१०२पृ० ६५सू०) नियमात् न संयोगान्तलोपः ।

---

* सार्व्वधातुक इति नानुवर्त्तते क्वौ स्थिति तुकार स्वरसात् अगुणे इत्वे वानुवर्त्तते क्विपि तत्सम्भवात् ।

६· ६· १· ७· ७· ७·
अनभ्यस्तस्योतो वृद्धिः सार्व्वधातुके पिति हलि
·२· ·१· ६·
वा तूर्णोतेः ॥ २८ ॥

अभ्यस्तभिन्नस्य धातोरुतो वृद्धिः स्यादूर्णोतेस्तु वा सार्व्वधातुके पिति हलादौ परे। इति वृद्धौ यु-यौति नु-नौति

५· ·१· ६· ६· ६·
ब्रुव-ईट् सार्व्वधातुकस्य पितो वलो रुस्तुयङ्-
५:· ·१· ६· ·१·
लुङन्तेभ्यस्त्वपितोऽपि ॥ २९ ॥

ब्रुवः परस्य सार्व्वधातुकस्य पितो वलादेरीट् स्यात् रुस्तुयङ्लुगन्तेभ्यस्तु अपितोऽपि स्यात्। टइत्। इतोटि गुणे ब्रवीति। ब्रूतः। ब्रुवन्ति। रु-ति रवीति रौति। रु-तस् रुवीतः रुतः। रुवन्ति। स्तु-ति स्तवीति स्तौति। स्तु-तस् स्तुवीतः स्तुतः।

५· ६:· ६:· १:· १:· ६· ·१· १·
ब्रुवस्तिबादीनां पञ्चानां णबादयः पञ्च ब्रुवश्चाहः॥३०॥

ब्रुवः परेषां पञ्चानां तिबादीनां स्थाने पञ्च णबादयो वा स्युः तस्मिन्सति ब्रुवश्चाहः। इति णबाद्यादेशे आहि च आह आहतुः आहुः।

६· १·̆ ७·

आहस्थस्थपि ॥ २१ ॥

आह इत्यस्य थौ ऽन्तादेशः स्यात् । अद्त् । इति थत्वे चरि आत्थ, आहथुः । पक्षे ब्रवीति ब्रूतः ब्रुवन्तीत्यादि । इण-ति एति इतः (६२पृ० ३५सू०) इयङि प्राप्ते

६· ·१· ७· ७·

इणो यँङच्यगुणे ॥ २२ ॥

अगुणे अजादौ परे इणो यँङ् स्यात् । अङावितौ । इति यङि यन्ति । अगुणे किम् अयानि । इक् इङ् च अधिपूर्व्वक एव प्रयुज्यते । तत्रेकः

६· ·१· ७· १·

इक इण्वत्तिङि रूपम् ॥ २३ ॥

इण इव इकस्तिङोरूपम् स्यात् । अध्येति अधीतः अधियन्ति । तिङ इत्युक्तेः क्तिति न तेन तत्र सति निमित्ते इयङेव तेन समीतयो राघवयोरधीयत् इति भट्टिः । वश-ति षत्वटुत्वे वष्टि तस्मादेङित्त्वात्

६:· ७· १·

वचिस्वपियजादीनां किति संप्रसारणं ग्रहिज्या-

६:· ७· ·१·

व्यधिवष्टिविचतिव्रश्चतिपृच्छतिभ्रज्जतीनां ङिति चो-

६:· ६· ·१· ६· ७·

भयेषां व्यथसाभ्यासस्यस्य लिटि ॥ २४ ॥

किति परे वच्यादीनां, किति ङिति च परे ग्रहि-

ज्यादीनां संप्रसारणं स्यात् लिटि तूभयेषां, व्यध-स्याभ्यासस्य। तत्र यजादयो यथा—

यजिर्वपिर्वसिश्चैव वेञ्व्येञौ ह्वयतिस्तथा।

वदिर्वसिश्च श्वयतिरिते नव यजादयः॥

इति संप्रसारणे (८२पृ० ५सू०) पूर्व्वरूपे च उष्टः। उश्नन्ति। वचेस्तु वक्ति वक्तः। वचेरन्तिप्रयोगो नास्तीति सिद्धान्तः।

इत्यदादि।

जुहोत्यादि।

जुहोत्यादीनां द्वित्वं कर्त्तरि सार्व्वधातुके॥ १॥

कर्त्रर्थे सार्व्वधातुके परे जुहोत्यादीनां द्वित्वं स्यात्। इति द्वित्वे हु हु-ति इति स्थिते अपितश्चुकि च

अभ्यासस्य—ऋ, झष्, खय्, कुह, दीर्घाणामद्, जश्, चय्, चुज, ह्रस्वाः॥ २॥

अभ्यासस्थानाम् ऋवर्णझष्खयकवर्गहकारदीर्घाणां स्थाने क्रमेण अकारजश्चयचवर्गजकारह्रस्वा इत्या-देशाः स्युः। इत्यभ्यासस्थहस्य जत्वे गुणे जुहोति

जुहुत: (१२४पृ॰ १०सू॰) वङि (१३३पृ॰ २१सू॰) अति च जुह्वति। (१२८पृ॰ २सू॰) हेर्धौ जुहुधि (१३१पृ॰१६सू॰) अन उसि (१३३पृ॰२२सू॰) गुणे च अजुहवु:। भी-ति द्वित्वे अभ्यासभस्य बत्वे ह्रस्वे गुणे बिभेति (१३३पृ॰२३सू॰) वा इत्वे बिभित: पक्षे बिभीत: (९२ पृ॰ ३९ सू॰) ये अत्यादेशे च बिभ्यति। ह्री-ति द्वित्वे ह्री ह्री-ति स्थिते

७॰ १॰ ॰१॰ ॰१॰ १॰
अभ्यासे आदिर्हलच्च शेष: शरादिखयन्तसं-
९: ॰१॰ १॰
योगादेस्तु द्वितीय: ॥ ३ ॥

अभ्यासे हलांमध्ये आदिर्हल् अच्च शिष्यते अन्ये हलोऽचश्च लुप्यन्ते शर्पूर्व्वखयन्तसंयोगादेस्तु द्वितीय एव शिष्यते। इति रस्य लोपे ह्रस्वे हस्य जत्वे गुणे च जिह्रेति। जिह्रीत: (९२पृ॰ ३५सू॰) इयङि अतौ च जिह्रियति। पृ—पालने

९:॰ ९॰ ९॰ ॰१॰
अर्त्तिपृभृञ्माङ्हाङामभ्यासस्याच इत् सार्व्व-
७॰
धातुके ॥ ४ ॥

सार्व्वधातुके परे एषामभ्यासस्याच इत् स्यात्। अत्वापवाद:। इत्यभ्यासाच इत्वे गुणे पिपर्त्ति।

६· ·१·७· 　　५··१··१·

ऋतइरगुणे ओष्ठ्यवर्णात्तूर् ॥ ५ ॥

अगुणे परे ऋकारस्य इर् स्यात् ओष्ठ्यवर्णात् परस्य तु उर् स्यात् । इत्युरि (१०२पृ० ६४सू०) दीर्घे पिपूर्त्तः । उरि अच्परत्वाद्दीर्घाभावे अति च कृते पिपुरति । भृ-ति इत्वे गुणे बिभर्त्ति बिभृतः बिभ्रति । लुङि दिपि सिपि च गुणे हल्परतया दिस्योर्लोपे अबिभः । अन उसि गुणे च अबिभरुः । मा-ते (१२२पृ० २४सू०) अ त ईत्वे मिमीते । हाङ्-ते जिहीते जिहाते जिहते । हाकस्तु जहाति (१२२पृ० २३सू०) इत्वे जहितः पक्षे ईत्वे जहीतः । आतो लोपे अदादेशे च जहति ।

६· ·१··१· ७·

जहाते—रा च हौ ॥ ६ ॥

हौ परे जहातेरात्त्वमिदीतौ च प्राप्तौ स्याताम् । जहाहि जहिहि जहीहि ।

६· 　१· 　　७·

आतो लोपो विधिलिङि ॥ ७ ॥

विधिलिङि परे जहातेरातो लोपः स्यात् । जह्यात् । दा-ति ददाति (१२२पृ० २४सू०) ईत्वनिषेधे

आलोपे चरि दत्तः ददति। दत्ते। दा-हि स्थिते

६: ६: १: ७·

दाधोर्द्विरुक्तयोर्देधे हौ ॥ ८ ॥

हौ परे द्विरुक्तयोः दा, धा, इत्यनयोः क्रमेण दे, धे इत्यादेशौ स्तः। देहि। अददात्। अददुः। धा-ति दधाति। तसि तु द्वित्वे धस्य दत्वे आलोपे

६· ६· १· ७: ६· ७·

धाञोऽभ्यासदस्य धँस्तथोरन्त्यातोलोपे ॥ ९ ॥

धाञोऽभ्यासस्थस्य दस्य धँः स्यात् अन्त्यातोलोपे सति तथयोः परयोः। इत्यभ्यासस्य दस्य धत्वे चरि धत्तः। दधति। द्वित्वे आलोपे धत्वे (८१पृ० ३सू०) भष्भावे धस्य चरि धत्से। भष्भावे जश्चि धद्ध्वे। धेहि। निज्-ति द्वित्वे आदिभिन्नहलो लोपे

६: ६· १· ८·

निजविजविषामभ्यासस्य गुणः सार्व्वधातुके ॥१०॥

एषामभ्यासस्य गुणः स्यात् सार्व्वधातुके परे। इत्यभ्यासगुणे मूलधातुगुणे कुत्वे च नेनेक्ति, नेनिक्तः।

१· ६· १· ७· ७·

नाभ्यस्तस्योपधागुणोऽचि सार्व्वधातुके ॥ ११ ॥

अभ्यस्तधातोरुपधागुणो न स्यात् सार्व्वधातुके अजादौ परे। इति गुणनिषेधे नेनिजानि। एवं विजविषौ। जन-ति जजन्ति। तसि तु

६: ·१· ७· ७· ७· ·१· ·१·

जनसनखनामात् झलि क्ङिति ये तु वा ॥ १२ ॥

एषामादन्तादेशः स्यात् किति ङिति च झलादौ परे ये तु तथाभूते वा। इत्यात्वे द्वित्वे ह्रस्वे च जजातः। (१२८पृ० ५सू०) उपधातोलोपे जज्ञति इटि जज्ञिषे जज्ञिध्वे। ऋ-ति द्वित्वे अभ्यासस्येत्वे धातोर्गुणे

६· ६: १: ७· ७·

अभ्यासस्य य्वोरियँङुवँङावसवर्णेऽचि ॥ १३ ॥

असवर्णे अजादौ परे अभ्यासस्य इदुतोः स्थाने क्रमात् इयँङुवँङौ स्याताम्। अङावितौ। इतीयङि इयर्त्ति इयृतः। इयृति। लङि ऐयः आनि ऐयरः।

इति जुहोत्यादि।

दिवादिप्रकरणम्।

५: ·१· ७· ७·

दिवादिभ्यः श्यन् कर्त्तरि सार्व्वधातुके ॥ १ ॥

कर्त्रर्थे सार्व्वधातुके परे दिवादिभ्यः श्यन् स्यात्। शनावितौ। शपोऽपवादः। दिवादयश्च (सि० उ० १२३पृ०) द्रष्टव्याः। दिव्-ति श्यनि (१०२पृ० ६४सू०) दीर्घे दीव्यति दीव्यतः (८४ पृ० १५सू०) पररूपे

दीव्यन्ति दीर्घे दीव्यामि (१२३पृ० ६सू०) याभाग-स्येत्त्वे गुणे दीव्येत्। हेर्लोपे दीव्य। एवमन्येऽपि तद्वणीयाः। जॄ-ति श्यनि (१३८पृ० ५सू०) इरि दीर्घे जीर्य्यति। शो-ति श्यनि

६· १· ६· १· ७·

ओतो लोपो मिदेर्गुणः श्यनि॥ २॥

श्यनि परे ओकारस्य लोपः मिदेस्तु गुणः स्यात्। इत्योतो लोपे श्यति। सो-स्यति। दो-द्यति। जन-ति श्यनि (१२६ पृ० १६सू०) जादेशे जायते। रन्‌जस्तु-श्यनि अपित्त्वेन ङित्त्वात्

६ः· ६· ७·

अनिदितामुपधानलोपः क्ङिति॥ ३॥*

किति ङिति च परे इदिदन्यधातूनामुपधाभूतनका-रस्य लोपः स्यात्। इति नलोपे रज्यति रज्यते। अनिदितामित्युक्तेः इदितां न। इदितान्तु

६· ·१· ६·

इदितो नुम् धातोः॥ ४॥

गणपाठे इदितोधातोर्नुम् स्यात्। इति नुमि सति निमित्ते न नलोपः। इदि इन्द्यात् कुथि कुन्थ्यात् व्यध-ति श्यनि (१२६पृ० २४सू०) संप्रसारणे पूर्व्व-रूपे च विध्यति मिद-ति श्यनि गुणे मेद्यति भ्रम-ति श्यनि

---

* अपूजार्थाञ्चतेरित्यपि वक्तव्यं तेन अञ्चितः पूजितः इत्यर्थेन न लोपः।

६: १ ७

शमादीनां दीर्घः श्यनि ॥ ५ ॥

श्यनि परे शमादीनां दीर्घः स्यात्। इति दीर्घे शाम्यति। शमादयश्च शम, तम, दम, श्रम, चम, क्लम भ्रम, मद, इत्येतेऽष्टौ।

इति दिवादि।

स्वादि।

५: १ ७ ७

स्वादिभ्यः श्नुः कर्त्तरि सार्व्वधातुके ॥ १ ॥

कर्त्रर्थे सार्व्वधातुके परे स्वादिभ्यः श्नु स्यात्। श इत्। शपोऽपवादः। स्वादयश्च (सि० उ० १४५पृ० द्रष्टव्याः। इति श्नो अपित्त्वाद्गुणाभावे धिकरण गुणे सुनोति सुनुतः (१२४पृ० १०सू०) यङि सुन्वन्ति (१२५पृ० ११सू०) पक्षे उतो लोपे सुन्वः सुनुवः, सुन्मः, सुनुमः। हेर्लोपे सुनु। एवं चिनुमिनुहिनुप्रभृतयः। आपस्तु परस्य श्नोः संयुक्तत्वात् उवङि आप्नुवन्ति। एवं तस्मादेवोतोलोपाभावे आप्नुवः आप्नुमः। तस्मादेव च हेर्लोपाभावे आप्नुहि इत्यादिभेदः।

इति स्वादि।

तुदादि।

५ः १ ७ ७

तुदादिभ्यः शः कर्त्तरि सार्व्वधातुके ॥ १ ॥

कर्त्तर्थे सार्व्वधातुके परे तुदादिभ्यः शः स्यात्। श इत्। शपोऽपवादः। ते च (सि० उ० १४८पृ०) द्रष्टव्याः। अस्य अपित्त्वेन ङित्वात्गुणाभावे तुदति तुदतः। पररूपे तुदन्ति। दीर्घे तुदामि। या इत्यस्येत्त्वे तुदेत्। हेर्लोपे तुद। एवं नुदविशादयः। भ्रस्ज-ति शे संप्रसारणे पूर्व्वरूपे सस्य दत्वे चुत्वे भृज्जति। व्रश्चव्यचप्रच्छोनाञ्च संप्रसारणपूर्व्वरूपे वृश्चति, विचति पृच्छति, इत्यादिरूपम्। इषः शे (१२६पृ०१६सू०) इच्छादेशे इच्छति। लस्ज-ते शे सस्य दत्वे चुत्वे लज्जते। एवं मस्ज-ति मज्जति

६ ०१०७ ७ः ०१०

ऋतो रिङ् शे यक्‌किदाशीर्लिङोश्च ॥ २ ॥

ऋकारस्य रिङ् स्यात् शे यकि किल्वक्काशीर्लिङि च परे। ङइत्। इति ऋतोरिङि इयङि ध्र-भ्रियते। दृङ्तु आङ्पूर्व्वकएव प्रयुज्यते आद्रियते। पृङ् व्याङ्पूर्व्वकएव प्रयुज्यते व्याप्रियते। सृङो ङित्त्वेन सर्व्वत्रात्मनेपदप्राप्तौ

५· ७: ७: ·१· १·

मृङः शिति लुङ्लिङोश्चात्मनेपदम् ॥ ३ ॥

शिति लुङि लिङि च परे मृङः परमात्मनेपदं स्यात् नान्यत्र। इति नियमे शे विषये आत्मनेपदे रिङि म्रियते। अन्यत्र परस्मैपदं ममारेत्यादि। मॄ--ति शे इरि अच्परतया दीर्घाभावे च

६· ६· १·· ७· ७··१··१·

गिरो रो लँ यङि अचि तु वा ॥ ४ ॥

गिर इत्यस्य रस्य लँः स्यात् यङि परे अजादौ तु वा। अदृत्। इति रस्य लत्वे गिलति पक्षे गिरति।

कॄ-ति किरति

५: ७· ५··१· ७· ६· ·१·

प्रत्युपाभ्यां हिंसायामुपात्तुच्छेदने किरः सुँट् ॥५॥

प्रत्युपाभ्यां परस्य हिंसार्थकस्य, उपात्तु छेदनार्थकस्य च किरतेः सुँट् स्यात्। उटावितौ। टित्त्वादाद्यागमः। इति सुटि प्रतिस्किरति उपस्किरति मल्लं हिनस्तीत्यर्थः। उपस्किरति धान्यम् छिनत्तीत्यर्थः।

६:· ·१· ७·

मुचादीनां नुँम् शे ॥ ६ ॥

शे परे मुचादीनां नुँम् स्यात्। उमावितौ। इति

नुमि अनुस्वारपरसवर्णे मुञ्चति। मुच, लुप, विद, लिप, सिच, कृत, विद, पिश, इति मुचादयः।

इति तुदादि।

रुधादिप्रकरणम्।

५ः ·१· ७· ७·
रुधादिभ्यः श्नम् कर्त्तरि सार्व्वधातुके ॥ १ ॥
कर्त्रर्थे सार्व्वधातुके परे रुधादिभ्यः श्नम् स्यात्। शमावितौ। मित्त्वात् अनादिष्टस्यापि अन्त्यादचः परः। शपोऽपवादः। रुधादयश्च (सि० उ०१५८पृ०) द्रष्टव्याः। इति श्नमि तकारस्य (१२८पृ० ७सू०) धत्वे जश्चि णत्वे च रुणद्धि। (१२२पृ० १२सू०) श्नमोऽल्लोपे नस्यानुस्वारे परसवर्णे रुन्धः। सवर्ण-जातस्य नस्य न णत्वमित्युक्तं प्राक्। रुन्धन्ति। सिपि तु श्नमि चर्भावे णत्वे रुणत्सि। मिपि रुणध्मि। रुन्धः। रुन्ध्मः। * हेर्धौ जश्चि रुन्द्धि। दिपि धस्य दत्वे अरुणत्। सिपि (१२१पृ० १७सू०) पक्षे रुत्वे अरुणः अरुणत्। एवं छिद-भिदादयः। शिषस्तु शिनष्टि शिंष्टः। शिंषन्ति। हेर्धौ षस्य डत्वे टुत्वेऽल्लोपे परसवर्णे शिण्ड्ढि। (१४२पृ० ४सू०) हिंसेरिदित्त्वान्नुमि हिन्स-ति श्नमि

* रुन्ध इत्यत्र ४१८ पृ० का० झरि झरो लोपः।

५॰ ६॰ १॰
श्नमो नो लोपः ॥ २ ॥

श्नमः परस्य नइत्यस्य लोपः स्यात्। इति श्नमो नलोपे हिनस्ति श्नमोऽल्लोपे हिंस्तः। हिंसन्ति।

६॰ ७॰ ७॰ १॰
तृणहः पिति वलि इम् ॥ २ ॥

कृतश्नम्विकरणस्य तृह् इत्यस्य इम् स्यात् पिति वलादौ परे। मइत्। मित्त्वादन्त्यादचःपरः। इतोमि गुणे हस्य ढत्वे तत्परतकारस्य धत्वे ष्टुत्वे ढे ढलोपे णत्वे च तृणेढि। तसि तु श्नमोऽल्लोपे हस्य ढत्वे तकारस्य धत्वे ष्टुत्वे ढे ढलोपे नस्यानुस्वारे परसवर्णतयैव णत्वे तृण्ढः। तृंहन्ति। अञ्जः श्नमि नलोपे कुत्वे अनक्ति अङ्क्तः।

इति रुधादि।

तनादिप्रकरणम्।

तनादयश्च (सि॰उ॰पृ॰१६१) तनादिभ्यः (१२पृ॰ १४सू॰) उपि गुणे उतश्च गुणे कृते तनोति। तनुतः। यणि तन्वन्ति। उतो वा लोपे तन्वः तनुवः तन्मः तनुमः। हेर्लोपे तनु। कृञस्तु नित्यमुतो

लोपे कुर्व्वः कुर्म्मः। यादावप्युतो लोपे कुर्य्यात्।

५ः० ७ः ६० ०१०

संपर्य्युपेभ्यो भूषणसंघातयोः कृञः-सुँट् ॥ १॥

भूषणसंघातयोर्व्वर्त्तमानस्य संपर्य्युपेभ्यः परस्य करोतेः सुँट् स्यात्। उटावितौ। संस्करोति उपस्करोति परिष्करोति बालमलङ्करोतीत्यर्थः।*
संस्कुर्व्वन्ति केशाः संघीभवन्तीत्यर्थः।

५० ७ः०

उपात्प्रतियत्नविकृतवाक्याध्याहारेषु ॥ २ ॥

एष्वर्थेषु उपात् परस्य कृञः सुँट् स्यात्। प्रतियत्नो गुणाधानं विकृतं विकारः। वाक्यस्याध्याहारः आकाङ्क्षितैकदेशपूरणम्। उपस्करोति कन्याम् भूषयतीत्यर्थः। एधोदकस्योपस्कुरुते एधोदकमाहितगुणं करोतीत्यर्थः। उपस्करोति वाक्यं विकरोति अध्याहृत्य वा ब्रूते इत्यर्थः। अयञ्च सुट् द्वित्वादादौ मूलधातोरेवेष्यते अथ वा द्वित्वात् पूर्व्वं सुट् ततो धातुर्द्विरुच्यते तेन संचस्करेत्यादि सिद्धम्। अट् तु सुटः प्रागेव जायते वक्ष्यमाण षत्वविधायकसूत्रेऽड्व्यवधानेऽपीति निर्द्देशात्। तेन पर्य्यष्कार्षीदित्यादि। एवं किरतेः सुडपि।

इति तनादि।

---

*परिष्करोतीत्यत्र सुटः षस्य (१८६पृ० ४सू०) वक्ष्यमाणेन सूत्रेण षत्वम्।

क्र्यादिप्रकरणम् ।

५: १· ७· ७·

क्र्यादिभ्य: श्ना कर्त्तरि—सार्व्वधातुके— ॥१॥

कर्त्रर्थे सार्व्वधातुके परे क्र्यादिभ्य: श्ना स्यात् । श इत् । शपोऽपवाद: । ते च (सि० उ० १६४ पृ०) द्रष्टव्या: । क्रीणाति: । श्ना इत्यस्य (१३३ पृ० २४ सू०) श्नात ईत्वे क्रीणीत: । तेनैव सूत्रेण आतो लोपे क्रीणन्ति । क्रीणीते क्रीणाते क्रीणते । एवं प्रीञ्मीञ्प्रभृतय: ।

५: १:

स्तन्भादिभ्य: श्नुश्ना ॥ २ ॥

स्तन्भादिभ्य: कर्त्रर्थे सार्व्वधातुके श्नु, श्ना, उत्येतौ पर्य्यायेण भवत: । इति श्नो (१३३ पृ० २४ सू०) नलोपे स्तभ्नोति श्नापक्षे स्तभ्नाति । ते च स्तन्भुस्तुन्भु स्कन्भु स्कुन्भु स्कुञ् इत्येते । ग्रह—श्ना (१३६ पृ०-२४ सू०) संप्रसारणे णत्वे गृह्णाति गृह्णीत: गृह्णन्ति । ह्रौ तु श्ना तस्मिन् परे संप्रसारणे

५· ६· १· ७·

हल: श्न आनो ह्रौ ॥ ३ ॥

हल्वर्णात् परस्य श्ना इत्यस्य स्थाने आन: स्यात् ह्रौ परे । सर्व्वादेश: । इत्याने गृहाण । बन्ध-ति श्ना नलोपे बध्नाति बध्नीत: ह्रौ तु बधानेत्यादि ।

६:· ७· १·

प्वादीनां शिति ह्रस्वः ॥ ४ ॥

शिति परे प्वादीनां ह्रस्वः स्यात्। पुनाति पुनीते ते च (सि० उ० १६५पृ०) ज्ञेयाः। एवं लुनाति लुनीते इत्यादि। ज्या—ति श्ना संप्रसारणे

५· ६· ६· ·१·

हलः संप्रसारणस्यान्त्यस्य दीर्घः ॥ ५ ॥

हलः परस्य संप्रसारणस्यान्त्यस्य दीर्घः स्यात्। इति दीर्घे प्वादितया ह्रस्वे च जिनाति। मन्थस्तु श्ना नलोपे मथ्नाति मथ्नीते इत्यादि। अन्येषां भ्वाद्यादिगणीयप्रसिद्धधातूनां रूपं मत्कृतधातुरूपादर्शे ज्ञेयम्।

इति क्र्यादि।

चुरादिप्रकरणम्।

दशसु गणेषु मध्ये भ्वाद्यादयो नवैव सार्व्वधातुके विशेषविकरणवन्तश्चुरादयस्तु न तथा तेभ्यः सर्व्वत्र लकारे स्वार्थे णिचो विधानात्। चुरादेस्तु

५:· ·१· ७·

चुरादिभ्यो णिच् स्वार्थे ॥ १ ॥

चुरादिभ्यः स्वार्थे णिच् स्यात्। णचावितौ। णिचि

१:· १:·
णिच्सनन्ताद्यन्ताः धातवः॥ २॥
णिजन्ताः सन्प्रत्ययाद्यन्ताश्च धातुसंज्ञाः स्युः। इति धातुसंज्ञायामपवादाप्रसक्तौ सामान्यतः शपि गुणेऽयादेशे च चोरयति। चोरयतः। अदन्तानान्तु

५· ६· १· ७·
हलोऽतोलोपोऽशिति॥ ३॥
अशिति परे हलः परस्यातो लोपः स्यात्। इत्यल्लोपे तस्य स्थानिवद्भावादप्राप्तोपधावृद्धिः। गणयति कथयतीत्यादि। अन्यत् प्रेरणार्थणिचि वक्ष्यते

इति चुरादि।

स्वार्थिकप्रत्ययान्ततिङन्तधातुप्रकरणम्।

५:· ७· ·१· ६·१··१··१·
गुपतिज्कितेभ्यः स्वार्थे-सन् तस्य च नेट् मान
५:·३··१· ६·
बधदानशानेभ्यस्त्वीङ् चाभ्यासस्य॥१॥
गुपादिभ्यः स्वार्थे सन् स्यात् तस्य च न इट् मानादेस्तु सन् तेषामभ्यासस्य ईङ् च स्यात्। तत्र गुपेर्निन्दायाम्,तिजेः चान्तौ, कितेर्व्याधिप्रतीकारे, निग्रहेऽपनयने, संशये च, मानेर्विचारणे, बधे-

श्चित्तविकारे, दानेरार्जवे, शानेर्निशाने, एतेष्वेवार्थेषु वर्त्तमानेषु तेभ्यः सन्। इति सनि

६ १
सन्यङन्तयोर्द्वित्वम् ॥ २ ॥

सनन्तस्य यङन्तस्य च द्वित्वं स्यात्। इति द्वित्वे आदिहल्शेषे अभ्यासस्थगस्य जत्वे (११८पृ० १२सू०) अनिट्सनः कित्त्वेन गुणाभावे जुगुप्स इत्यस्य (१५१पृ० २सू०) धातुसंज्ञायाम्

६ १ १
आयसनोः प्रकृतिवत् पदव्यवस्था ॥ ३ ॥

आयान्तस्य सनन्तस्य च धातोस्तत्प्रकृतेरिव परस्मैपदात्मनेपदव्यवस्था स्यात्। इति गुपेरात्मनेपदितया सनन्तस्य आत्मनेपदे सामान्यतः कर्त्तरि अपि परुरूपे जुगुप्सते। तिजः सनि द्वित्वे कुत्वे षत्वे तितिक्षते। कित-चिकित्सते। मानेः सनि अभ्यासस्य ईङि च मीमांसते। बधेः भष्भावे चरि बीभत्सते दानेः—दीदांसते शानेः-शीशांसते। गुपू रक्षणे

५ १ ५ १ ७ ५ १
गपूधूपपनिभ्य आयः पणेस्तु स्तुतौ कमेर्णिङ्

५ १ ७ १ १ १
ऋतेरीयङ् आर्द्धधातुके तु ते वा ॥ ४ ॥

गुपादिभ्यः स्वार्थे आयः स्यात् पणेस्तु स्तुतावेव

कमेर्णिङ् ऋतेरीयङ् स्यात् । आर्द्धधातुके परे त्वायादयो वा स्युः । इत्याये गुणे पुनर्धातुसंज्ञायां अपि पररूपे गोपायति धूप-धूपायति । पन-पनायते । स्तुतौ–पणायते अन्यत्र पणते । कमेर्णिङि

६· ६· ६·· १· १· ७· ७·· १·

अत उपधाया इकस्य वृद्धिर्णिति ञिति च ॥५ ॥

णिति ञिति च परे उपधाभूतस्याकारस्य इगन्ताङ्गस्य च वृद्धिः स्यात् । इत्युपधाभूतातो वृद्धौ कामि इत्यस्य धातुसंज्ञायां अपि गुणे अयादेशे कामयते ऋतेरीयङि ऋतीयते ।

इति स्वार्थिकप्रत्ययान्ततिङन्तधातुप्रकरणम् ।

लुङ् तिङन्तप्रकरणम् ।

अथ सर्व्वगणीयेभ्यो लुङादौ कार्य्यमुच्यते तत्र लुङि

५· ७· ·१·

धातोर्लुङि सिच् ॥ १ ॥

लुङि परे धातोः सिच् स्यात् । अबाद्यपवादः । इति भुवः सिचि

५ः ६· ·१· ७·

गातिस्थाघुभूपाभ्यः सिचोलुक् परस्मैपदे घेसो

५· ·१· ·१· ५ः ७ः

च्छोग्रस्तु वा तनादिभ्य स्तथासोः गुहदुहदिहलिहे-

५ः ·१· ७ः ·१·

भ्यस्तु तथासध्वम्वहिषु वा ॥ २ ॥

परस्मैपदे परे एभ्यः परस्य सिचो लुक् घेटादि-
भ्यस्तु वा। तनादिभ्यस्तु तथास् इत्यनयोः परयोः,
गुहादिभ्यस्तु तनादिषु परेषु वा। इति सिचोलुकि,
लुङोऽपित्सार्व्वधातुकत्वेन ङित्वात् सिचश्च लुका
लुप्तत्वान्न गुणः। अभूत् अभूताम्।

६· ·१· ७· ७· ·१· ७·

भुवो वुग् लुङि लिटि चाचि ॥ ३ ॥

अजादौ लुङि लिटि च परे भुवो वुगागमः स्यात्।
कइत्। कित्वादन्तावयवः। इति वुकि अभूवन्।
अभूः अभूतम् अभूत अभूवम् अभूव अभूम।

६· ६· ·१· ५ः ५· ·१·

वलादेरार्द्धधातुकस्येट् सेड्भ्यः स्नुक्रमस्तु पर-

७·

स्मैपदे ॥ ४ ॥

सेड्धातुभ्यः परस्य वलादेरार्द्धधातुकस्य स्थाने इट्
स्यात् स्नुक्रमाभ्यां तु परस्मैपदे। टइत्। टित्वा

टादावागमः। इतीटि गुणेऽवादेशे षत्वे टुत्वे च कृते अभविष्ट। अभविषाताम्। भू-अन्त

६· ६· १· ५·

आत्मनेपदस्यस्यान्तोऽतिरनतः ॥ ५ ॥

अकारभिन्नात् परस्य आत्मनेपदस्थस्य अन्त् इति भागस्य स्थाने अतिः स्यात्। इकार इत्। इत्यतो अभविषत अभविष्ठाः अभविषाथाम्। भू-ध्वम्

७· १· ·१·

धि सलोपो वा ॥ ६ ॥

धकारे परे सस्य लोपो वा स्यात्। इति सलोपे

५· ६:· ६· १· ५· ·१· ·१·

इणः षीध्वंलुङ्लिटां धस्य ढ इट्परात्तु वा ॥७॥

इण्संज्ञकवर्णात् परस्य षीध्वमित्यस्य लुङ्लिटोश्च धस्य ढः स्यात् इडुत्तरात्तु वा। अ इत्। इति धस्य ढत्वे अभविढ्वम् पक्षे सलोपे अभविध्वम् पक्षे सस्य जश्भावे अभविड्ढ्वम्। अभविषि अभविष्वहि अभविष्महि।

चित—दि अटि सिचि इटि (१२२पृ०१८सू०) ईटि

५: ७· ६· १· ५· ·१· ७·

झस्भलभ्यां झलि सेर्लोप इटस्तु ईटि ॥ ८ ॥

झलि परे झस्मात् झलश्च परस्य, इटस्तु परस्य

ईटेऽव परे, सेर्लोपः स्यात्। इति सिलोपे दीर्घे अचेतीत्। सौ—अचेतीः। (१३१पृ० १६सू०) अनउसि। अचेतिषुः।

६॰ ७॰ १॰ ७॰

एकाचः सिचि—वृद्धिः परस्मैपदे ॥ ८ ॥

परस्मैपदे विहिते सिचि परे एकाचइगन्तस्य वृद्धिः स्यात्। यु—अयावीत् नु—अनावीत्। वृञ—अवारीत् तॄ—अतारीत्। एकाचः किम् अजागरीत् अध्वनयीत्। श्वेस्तु अश्वयीत्।

६॰ ६॰ ॰१॰ ६॰

व्रजवदारन्तालन्तस्यानिटश्चाचः ॥ १० ॥

परस्मैपदे सिचि परे व्रजेर्वदेररन्तस्यालन्तस्यानिटश्चाचो वृद्धिः स्यात्। व्रज-अव्राजीत् वद-अवादीत्। अनयोर्वक्ष्यमाणविकल्पापवादः। ज्वर-अज्वारीत् ज्वल — अज्वालीत्। अनिटः नी — अनैषीत् स्तु-अस्तौषीत् कृ-अकार्षीत्। भिद्—अभैत्सीत्। पच-अपाक्षीत्। अत्र प्रसङ्गादनिटः संगृह्यन्ते।

श्विश्रिडीशीयुरुनुस्नुक्षुक्ष्णु वृङ्वृञ्विवर्जिताः।
ऊदॄदन्ता विनैकाचोऽनिटोऽजन्तेषु संमताः॥
शक्लृ कान्तेषु चान्तेषु पचिर्मुचिरिचो वचिः।
विचिः सिचिश्च छान्तेषु प्रच्छिर्जान्तेष्वनिट् त्यजिः॥

निजिर्भजी भञ्जति च भुज्भ्रस्जी मज्जतिस्तथा ।
यजिर्युजी रञ्जिरुजी विजिर्स्वञ्जी तथानिटः ॥
सृजिः स्वञ्जिश्च, दान्तेषु क्रमादेतेऽनिटो मताः ।
अदिः क्षुदिः खिदिस्तद्वत् छिदतुदौ नुदपद्यतौ ॥
भिदिर्विद्यविनत्तौ च शदसदौ स्कन्दतिस्तथा ।
स्विद्यतिर्हदिरेते स्यु धान्तेषु, क्रुध्यतिर्मतः ॥
क्षुधिर्बन्धिर्बुध्यतिश्च युधिश्च राध्यतिस्तथा ।
रुधिश्च व्यधिरन्येयः शुध्यतिः साधिसिध्यतौ ॥
नान्तेषु मन्यहन्तौ च पान्तेष्वापिः क्षिपिस्छुपिः ।
तपिस्तिपि चानिटोऽमी तृप्यतिर्दृप्यतिर्लिपिः ॥
लुपिर्वपिः शप्स्वपौ च सृपिर्भान्तेषु यभ्रभौ ।
लभिर्मान्तेष्वमौ ज्ञेया गम्नमौ यम्रमौ तथा ॥
शान्तेष्वमी क्रुशिर्दंशिर्दिशिर्दृशिर्मृशौ रिशिः ।
रुशिर्लिशिर्विशिः स्पृशौ च षान्तेष्वेते कृषिस्तुषिः ॥
त्विषिर्दुषिर्द्विषौ पिष्च पुषविषौ शिष्शुषौ तथा ।
श्लिष्यतिश्च मता एते सान्तेषु घस्वसौ मतौ ॥
हान्तेष्वेते दहिर्दिहौ दुहिर्नहिर्मिहौ रुहिः ।
लिहिर्वहिर्हसन्तेषु धातवोऽत्राधिकं शतम् ॥
विकल्पितेटो वेटः स्युस्तेऽपि पचेऽनिटो मताः ।
तृपिदृप्योरथादित्वे न वेट्त्वेऽप्यसमर्थमिह पाठः ॥

६ ६ ६ ६ १ १ ७
अतोहलादेर्लघोरूर्णोश्च वा सेटि ॥ ११ ॥

परस्मैपदे सेटि सिचि परे हलादेर्धातोर्लघुसंज्ञस्य अकारस्य ऊर्णोतेश्च वृद्धिर्वा स्यात्। गद-अगादीत् अगदीत्। ऊर्णोस्तु ङित्त्वाभावपक्षे और्णावीत् और्णवीत्। ङित्पक्षे उवङि और्णुवीत्। हलादेः किम् अट-मा अटीत्। लघोः किम् तक्ष-अतक्षीत्। एकाच इत्यनुवृत्तेः दरिद्रातेर्न।

१ ६
नेदिद्हमयान्तक्षणश्वसवधश्वयतीनाम् ॥ १२ ॥

परस्मैपदे सिचि परे एषां नित्यं विभाषया वा वृद्धिर्न स्यात्। एदित्-हस-अहसीत्। ह-ग्रह-अग्रहीत् य—ह्वय—अह्वयीत्। म—क्रम—अक्रमीत् क्षण-अक्षणीत् श्वस-अश्वसीत् वध-अवधीत्। श्वि अश्वयीत्।

५ १ १ ७
क्रुषिमृषिसृशितृपिदृपिभ्यः सिज् वा लुङि ॥ १३ ॥

लुङि परे एभ्यः सिज् वा स्यात्। इचावितो इति सिचि

६ ६ १ १ ७ ७ ६ १
ऋदुपधस्यानिटोऽम् वाऽकिति झलि दृशसृजोस्तु
२
नित्यम् ॥ १४ ॥

अकिति झलादौ परे ऋदुपधस्यानिटो धातोरम् वा स्यात् दृशसृजोस्तु नित्यम्। मद्गत्। मित्वादन्त्यादचः परः। इत्यमि यणि सिचि वृद्धौ सस्य (१२९पृ०८सू०)

कत्वे षत्वे च अक्राक्षीत्। अमभावपक्षे वृद्धौ अकार्क्षीत्। सिजभावपक्षे

५· ५· ५· ५· १· ७· ५·

अदृश: शल इगुपधादनिट: क्सो लुङि श्लिष

·१· ७·

स्त्वालिङ्गने ॥ १५ ॥

लुङि परे दृशिवर्जात् इगुपधात् शलन्तादनिटो धातोः क्सः स्यात् श्लिष्यतेस्त्वालिङ्गनेऽर्थे। क इत्। इति क्से षस्य कत्वे षत्वे अकृक्षत्। गुह संवरणे सनि(१५४पृ० २सू०) सिचो वा लुकि हस्य ढत्वे सत् परस्य तकारस्य धत्वे ष्टुत्वे ढे ढलोपे अपित् सार्व्वधातुकत्वे न ङित्त्वात् गुणाभावः। पूर्व्वाणो दीर्घे अगूढ़। पक्षे सिचो बाधेन क्से ढत्वकत्वे भष्भावे षत्वे अघुक्षत। सिचो लुकि दुह-दिहोर्दीदितया हस्य घत्वे तकारस्य धत्वे घस्य जश्-भावे अदुग्ध अदिग्ध। पक्षे क्से घत्वे भष्भावे चरि षत्वे अधिक्षत। लिहस्तु सिचो लुकि हस्य ढत्वे तकारस्य धत्वे ष्टुत्वे ढे ढलोपे पूर्व्वाणो दीर्घे अलीढ़। पक्षे प्राग्वत् अलिक्षत। इ-विभक्तौ तु

६· ६· १· ७·

क्सस्यातो लोपोऽचि ॥ १६ ॥

अजादौ परे क्सस्यातो लोपः स्यात्। अलिक्षि।

५: ७ ७ १

णिश्रिद्रुस्तुभ्यः कर्त्तरि लुङि चङ् श्विधेटश्व-

५: १ १

निभ्यस्तु वा ॥ १७ ॥

कर्त्रर्थे लुङि परे ण्यन्तात् श्रयादिभ्यश्च चङ् स्यात्। श्विधेटश्वनिभ्यस्तु वा। चङावितौ। इति श्रियश्चङि

६ ६ १ ७:

अनभ्यासस्य धातोर्द्वित्वं लिट्चङोः ॥ १८ ॥

लिटि चङि च परे अकृतद्वित्वस्य धातोर्द्वित्वं स्यात्। इति द्वित्वे आदिहल्शेषे च (६२पृ० २५सू०) इयङि अशिश्रियत्। द्रुवउवङि अदुद्रुवत्। धेटस्तु चङि

अशित्येचो गणोक्तस्य स्यादात् व्येञस्तु नो लिटि इत्युक्तेरात्वे द्वित्वे अभ्यासकार्य्ये च

६ १ ७ ७ ७ ७ १

आतोलोपोऽचि क्ङित्यार्द्धधातुके इट्युसि च ॥१९॥

धातोरातो लोपः स्यादार्द्धधातुके किति ङिति चाजादौ इटि उसि च परे इ। त्यालोपे अदधत्। चङभावपक्षे (१५४पृ० २सू०) सिचो वा लोपे अधात्। तदभावपक्षे

५: ६ १ ७ ६:

यमरमनमाद्भ्यः सिच इट् परस्मैपदे तेषां

१ १

सक् च ॥ २० ॥

एभ्यः सिच इट्स्यात् परस्मैपदे सति च इटि

तेषां सक् च । अकावितौ । किलादन्तौ आगमः । इतीटि सकि च अधासीत् । ह्वेञस्तु

५ः ५० ०१० ०१० ७०

वत्तयस्यख्यातिभ्यो लिपिसिचिह्वेञयाङ्-कर्तरि

७० ५० ०१० ७० ०१०

लुङि-लिप्यादेस्त्वात्मनेपदे वा ॥ २१ ॥

कर्त्रर्थे लुङि परे वत्तयादिभ्यः लिप्यादिभ्यश्च अङ्, लिप्यादेस्तु आत्मनेपदे वा स्यात् । सिचोऽपवादः । ह्वेञ् । इत्यङि आति आल्लोपे अह्वत् । आत्मनेपदे तु अह्वत अह्वास्तेत्यादिरूपद्वयम् ।

५० ५ः ०१० ७०

लृदितः शास्तिपुषादिद्युतादिभ्यश्च परस्मैपदे ॥ २२ ॥

गणपाठे लृकारेतः, शास्तेः, पुषादिभ्यः, द्युतादिभ्यश्च परस्मैपदे लुङिपरे अङ् स्यात् । इत्यङि पुष-अपुषत् द्युत-अद्युतत् । पुषादयः (सि० उ०१३८पृ०) द्युतादयश्च (सि०उ०७७पृ०) द्रष्टव्याः । च्युतिरस्तु

५० ०१० ०१०

जॄस्तिम्भेरितो वाङ् ॥ २३ ॥

कर्त्रर्थे परस्मैपदे लुङिपरे जॄप्रभृतेः गणपाठे इरितश्च अङ् वा स्यात् । इत्यङि अच्युतत् पक्षे अच्योतीत् ।

५ः ७० ०१०

सर्त्तिशास्त्यर्त्तिभ्यामात्मनेपदे च ॥ २४ ॥

उभयपदयोर्लुङि सर्त्तेरर्त्तेश्च परमङ्स्यात् । इत्यङि

६: ७· १·

ऋदृशोरङि गुणः ॥ २५ ॥

ऋवर्णान्तस्य दृशेश्चाङि परे गुणः स्यात्। इति गुणे ऋ-आरत्। सृ-असरत्।

५· ·१· ७· ७·

घदश्चिण् कर्त्तरि तनि दीपजनबुधपूरितायिप्या-

५:· ·।· ·१·

यिभ्यस्तु वा ॥ २६ ॥

कर्मार्थे तनि परे घ्वतेश्चिण् स्यात् दीपादिभ्यस्तु वा। चणावितौ। इति चिणि

५· ६· १·

चिणस्तनो लोपः ॥ २७॥

चिणः परस्य तनो लोपः स्यात्। सर्व्वलोपः। अतायि पक्षे अतायिष्ट। इति लुङि सिजादिप्रकरणम्

६:· ·१· १· ७· ७· ७·

जनिवधिसेडमन्तानां न वृद्धिश्चिणि णिति ञिति

७· ·१· ६:· ६· ·।· ·१·

कृति चावमक्रमाचमाममयसविश्रमस्तु वा ॥२८ ॥

चिणि, ञिति णिति कृति, च परे जनेर्वधेः सेडमन्तस्य च वृद्धिर्न स्यात् न तु वमादेः अमादेस्तु वा। जन-चिणि अजनि पक्षे अजनिष्ट।

५· ५: ५· ५· ·।· ५· ६·

ऋतोहल्हल्भ्यां संयोगादेर्ऋतश्चास्कुः मन

६:· ·।· ·।· ·१·

घ्यात्मनेपदाशीर्लिङ्सिचोश्च वेट ॥ २९ ॥

ऋकारान्तात्, वृङो, वृञः, संयोगादेर्ऋदन्ताच्च परस्य सन आत्मनेपदस्याशीर्लिङ्सिचोश्च स्थाने इट् वा स्यात् नतु सस्टकस्य इतीटि

५· ६· ६·
ऋवृङ्वृञ्भ्योऽलिट्—परस्मैपदसिज्—लिङ इटो
१· ·१· ५· ·१· ६· २·
दीर्घो वा ग्रहेस्त्वलिटो नित्यम् ॥ २० ॥

ऋदन्ताद्, वृङो, वृञश्च परस्य लिट्,-परस्मैपदसिज्, लिङ्,-भिन्नस्थानजातस्येटो दीर्घो वा स्यात् ग्रहेः परस्य तु अलिट इटो नित्यम्। इति दीर्घे स्तॄ—अस्तरीष्ट पक्षे अस्तरिष्ट। इडभावपक्षे कित्त्वेन इरि दीर्घे च अस्तीर्ष्ट। वृङो वृञश्च अवरीष्ट अवरिष्ट पक्षे कित्वे गुणाभावे सिचो लोपे अवृत। स्कुस्तु समस्कृत। ग्रहेः-अग्रहीष्ट

५· ·१·
स्वरतिसूतिसूयतिधूञ्रधादिदिष्कुषूदितो वार्द्ध
६· ६· ·१·
धातुकस्य वलादेरिट् ॥ २१ ॥

स्वरत्यादिभ्य ऊदितश्च परस्यार्द्धधातुकस्य वलादेरिट् वा स्यात्। तत्र रध, नश, तृप, दृप, द्रुह, स्नुह, मुह स्निह इति रधादि। स्वृ-अस्वारीत् अस्वार्षीत्। सूतिसूयत्योः असविष्ट असोष्ट। धूञः परस्मैपदे

५ः ७ ६ १

सुस्तुधूञ्भ्यः परस्मैपदे सिच इट् ॥ ३२ ॥*

एभ्यः परस्मैपदे सिच इट् स्यात्। इति नित्यमिटि अधावीत्। तनि तु अधविष्ट अधोष्ट। सु-इटि ईटीति सिचो लोपे वृद्ध्यादौ च असावीत्। तृपेः सिचो वेटि अतर्पीत्। इडभावपक्षे अमि अत्राप्सीत्। अमभावपक्षे अतार्प्सीत् सिजभावपक्षे पुषादित्वादङि अतृपत्। एवं दृपेः। मुह—अमोहीत् अमुक्षत्। द्रुह-अद्रोहीत् अध्रुक्षत्। निरः कुषेः निरकोषीत् पक्षे निरकुक्षत्। ऊदितः गाहू—अगाहिष्ट अगाढ। अन्जस्तूदित्वेन वेट्कत्वेन

५ ६ १ २

अन्जः सिच इट् नित्यम् ॥ ३३ ॥*

अन्जः परस्य सिचो नित्यमिट् स्यात्। आञ्जीत्।

६ ७ १

जभोऽचि नुम् ॥ ३४ ॥

अजादौ परे जभेर्नुम् स्यात्। उमाविती। अजम्भिष्ट

---

* सुस्तु धूञ्भ्य इति पाणिनीय सूत्रे षुञ् गतौ ष्टुञ् स्तुतौ धूञ् कम्पे इत्येते उभयपदिन एव त्रयो गृहीता अकारेण लिभिः सम्बन्धात् तेन धूधातोर्दीर्घान्तस्यैवेह ग्रहणम् इत्यत्र पाठस्तु पाणिनीय विरुद्धत्वादनादेयः।

* अञ्जेः सिचीति (७।२।७१ पा० सू०) परस्मैपदादित्यत्र इह न तदित्यर्थः। तेनात्मनेपदे कर्मणि चात्मने आञ्जिषाताम् आङ्क्षातामिति विकल्पं नेषेट्।

६॰ ॰१॰ ॰१॰ ७॰

सहवहोरदोत् ढि । २५ ॥

ढकारे परे सहेः वहेश्चातः स्थाने ओत् स्यात्। इत्योति वह-अवोढ। सिचः कित्वे गुणाभावे सिलोपे अहृत। विद-अवित्त। बुध (१६२पृ०२६सू०) च्विणि अबोधि पक्षे अबुद्ध।

६॰ ॰१॰ ७॰ ७॰

सस्य द आर्द्धधातुके से ॥ २६ ॥*

आर्द्धधातुके सादौ परे सस्य दः स्यात्। अवात्सीत् आर्द्ध धातुक इत्युक्तेः सार्व्वधातुके न चर्।

६ः १॰ ७॰ ७॰ ॰१॰ ७॰ ॰१॰ ॰१॰

मिम्योर्ङा ल्यप्यकिङिति च सनि तु वा ॥२७॥

मिनोतेर्मीनातेश्च ङा स्यात् ल्यपि किदङिद्भिन्ने परे सनि तु वा। ङइत्। इति ङादेशे आदन्ततया इटि सकिच अमासीत्। तनि तु अमास्त।

६ः ॰१॰ ७॰ ७॰ ॰१॰ १॰

स्थाघ्वोरिदात्मनेपदे लुङि न गुणः ॥ २८ ॥*

आत्मनेपदविषये लुङि तिष्ठतेर्घुसंज्ञकस्येदन्तादेशः स्यात् तस्य च न गुणः। प्रास्थित। अदित अधित।

१॰ ७॰ ७॰ ७॰ ॰१॰ ॰१॰

दरिद्रालोप आर्द्धधातुकेऽसनि लुङितु वा ॥२९॥

दरिद्रातेरन्तस्य लोपः स्यात् आर्द्धधातुके परे नतु सनि लुङि तु वा। इत्यालोपे अदरिद्रीत्

---

* २३पृ० १६ चरिचरिति सूत्रेण चरिकर्त्तव्ये घोषाद्यक्षात् स स्थाने स एव प्राप्त इत्यतो दत्वविधानार्थमिदम्।

* स्था धातोः परस्मै पदित्वेऽपि २१८पृ०१६ पंक्तौ। आत्मने पदित्वसम्भवात् प्रास्थितेरुदाहृतम्।

पक्षे अदरिद्रासीत् ।(११७पृ०६सू०) ङित्वे स्फुट अस्फुटीत् स्फुर—अस्फुरीत् स्फुल—अस्फुलीत्। विजस्तु इटः (११७पृ०७सू०) ङित्त्वे अविजिष्ट।

गोहोऽजादौ भवेद्गूहो १ ऽक्लृपादौ च क्लृपेः* क्लृपः २।
भ्रस्जेर्भर्ज्जो ३ वचिर्ब्रूञो ४ भूरस्ते ५ ह्यार्द्धधातुके।
नाने नोऽससि तत्रैव चक्षिङः ख्याञ ६ वर्ज्जने।
क्शाञुक्तो भाष्यकारेण लिटि तौ च विभाषया।
अदो घस्लृ ७ लुङि सनि घञपोर्वा तु तल्लिटि।
आशीर्लिङि वधो हन्ते ८ र्लुङि वा त्वात्मनेपदे।
गाः९ ङिङो लिटि वा तु स्यात् लुङ्ल्ङोर्गास्त्विणो
१० लुङि।
ल्ये ख्यो ११ वोचो १२ वचेः पप्तः १३ पतेरस्थो १४ ऽस्यतेरङि।
नश्यतेर्वाङि नेशः १५ स्यात् व्याख्यानोदाहृती क्रमात्।

अचि परे कृतगुणस्य गुहेर्गूहः स्यात् १। अगूहिषाताम्। एवं सार्व्वधातुकेऽपि गूहते। क्लृपा, क्लृपणक्लृपाणाद्यन्यत्र क्लृपेः क्लृपः स्यात् २। द्युतादित्वादङि अक्लृपत्। अपि कल्पते॥ आर्द्धधातुके परे भ्रस्जः स्थाने भर्जः स्यात् ३। इति भर्ज्जादेशे इटि अभर्ज्जीत् पक्षे संयोगादिसलोपे कृते जस्य षत्वे* तस्य कत्वे षत्वे च अभ्राक्षीत्। आर्द्धधातुके परे

* अजादावित्युक्तेर्गोह्य इत्यादौ न गूहादेशः तेन गुणमात्रनिमित्तं गूहादेशविधानमपाणिनीयत्वादनादेयम्।

* भ्रस्जादेशे स्थानिवत्त्वं नास्तीत्युक्तेः अभर्ज्जीदित्यत्र इट्

ब्रूञो वचिरस्तेस्तु भूः स्यात् ४-५। इति वचादेशे अङि, वचेर्वोचः स्यादङि १२। इति वोचादेशे अवोचत्। तनि अवोचत। भ्वादेशे तु सिचो लुकि अभूत्। चक्षिङः ख्याञादेशः स्यादार्द्धधातुके परे,न तु भने नोस्ति नासि च लिटि तु वा स्यात् ६। भाष्ये तु कशाञ् इति पठितम् इति ख्यादेशे (१६१पृ० २१सू०) अङि आलोपे अख्यत्। तनि अख्यत। लुङि सनि घञि अपि च परे अदः स्थाने घस्लृ लिटि परे तु वा स्यात् ७। लृदित्वादङ्। अघसत्। आशीर्लिङि लुङि च परे हन्तेर्वधः स्यात् आत्मनेपद-लुङि तु वा ८। वधस्यादन्तः। इति वधादेशे सिचि* अतो लोपे अवधीत्। आत्मनेपदे तु आवधिष्ठ (११८पृ०१५सू०)सिचः कित्त्वे न नलोपे आहत। लिटि परे इणो गाङ्स्यात् लुङिलृङि च परे तु वा ९। इङ्त्। इति गादेशे (११७पृ०६सू०) सिचोङित्त्वे

६:· ६·१·७· ७·

घुमास्थागापाजहातिसांमातईद्धलि किति

७· ७· ७·

ङित्यार्द्धधातुके—ऽल्यपि ॥ ४० ॥

किति ङिति च आर्द्धधातुके हलादौ परे घुमादीनामा-तईत् स्यात् न तु ल्यपि। इतीत्त्वे अध्यगीष्ट। अध्यैष्ट

---

* लक्षणप्रतिपदोक्तयोर्मध्ये प्रतिपदोक्तस्यैव ग्रहणमिति न्यायात् प्रतिपदोक्तवधस्यैव वृद्धिनिषेधादस्य च वाचनिकत्वा निषेधात् वृद्धि प्रसक्तौ अदन्त इत्युक्तं तेन १५१पृ०२ इलोप अकार-लोपे अकारलोपप्रभूतत्वाभावेन अवधीत् अवधि अवधिषाता-मित्यादौ न वृद्धिः।

लुङि परे इणो गा स्यात् (१०) इति गादेशे सिचो लुकि अगात्। एवम्, अधीकः अध्यगात्। श्वयतेः श्वः स्यादङि (११)। इत्यङि श्वादेशे अश्वत्। पक्षे चङि द्वित्वे आदिहल्शेषे इयङि अशिश्वियत् तदभावपक्षे सिचि वृद्धिनिषेधे अश्वयीत्। पतेः ऌदित्त्वादङि, पतेः पप्तः स्यादङि (१२) इति पप्तादेशे अपप्तत्। अस्यतेरस्थः स्यादङि (१४)। इत्यस्थादेशे आस्थत्। नश्यते र्नेशो वा स्यादङि (१५)। इति वा नेशादेशे अनेशत् भाष्यमतम्। अनशत् इति सूत्रमतम्।

इति लुङ्प्रकरणम्।

लिट् प्रकरणम्।

भू—अ इति स्थिते वुकि द्वित्वे आदिहल्शेषे जश्चि

६· ६· ·१· ७·

भवतेरभ्यासस्यात् लिटि ॥ १ ॥

लिटि परे भवतेरभ्यासस्योकारस्य स्थानेऽत् स्यात् इकार इत्। इत्युतोऽत्वे बभूव इह वुक् गुण वृद्धी बाधते बभूवतुः बभूवुः। बभूविथ। बभूवथुः बभूव।*

* गुणस्येव वृद्धे वुकश्च बाधनं वाच्यं तेन बभूवेत्यादौ न वृद्धिः बभूविवेत्यादौ च न उवङ्।

बभूव बभूविव बभूविम । बभूवे बभूवाथे बभूविरे । बभूविषे बभूवाथे बभूविढ्वे, बभूविध्वे बभूवे बभूविवहे बभूविमहे । अट-द्वित्वे उपधातो ह्रस्वो आट । अतुसि पररूपप्राप्तौ

६· ६· ६· १·

अत आदेरभ्यासस्य—दीर्घः ॥ २ ॥

अभ्यासस्यादेरतो दीर्घः स्यात् । पररूपापवादः । आटतुः आटुः । अर्च-द्वित्वे अभ्यस्तलोपे

५· ५· ६· ६: ६··१· ७· ·१·

दीर्घादतः संयुक्तस्याश्नोतेर्ऋतश्च लिटि-नुँट् ॥३॥

अभ्यासस्य दीर्घीभूतादतः परस्य संयुक्तस्याश्नोतेः ऋंकारस्य च नुँट् स्यात् । उटावितौ । इति नुटि आनर्च । अश-आनशे ऋध-आनृधे । एधङ् इतो लिटि द्वित्वे प्राप्ते

५· ५· ५· ५·

इजादेर्गुरुमतोऽनृच्छूर्णोरनेकाचः कासदयाया-

५· ·१·१· ५··१· ·१·

सथासुँ दरिद्राकासजागृभस्तु वा ॥ ४ ॥

ऋच्छतिऊर्णोतिभ्यान्यस्मात् गुरुमत इजादेः, अनेकाचः, कासादेश्च परमाम् स्यात् लिटि परे दरिद्रादेस्तु वा । उ इत् । इत्यामौ

५· ६· ·१· १:·१· १:·

आमोलिटो लुक् कृभ्वस्तयोऽनु लिट्‌परा: ॥ ५॥

आमन्ताद्धातोर्लिटो लुक् स्यात् तदुत्तरमव्यवहितमेव लिडुत्तरा: कृभ्वस्तय: प्रयुज्यन्ते। इति कृाद्यनुप्रयोगे आमन्तधातोरिव कृञ एव पदव्यवस्था न भ्वस्त्योरितिसिद्धान्तात् कृञआत्मनेपदे द्वित्वे अभ्यासकार्य्ये एधाञ्चक्रे। एधाम्बभूव एधामास। अस्ते: पृथग्ग्रहणसामर्थ्यात् न भ्वादेश:। कासकासामास। कासाञ्चक्रे। अनेकाच: चकाशामास। दय-दयामास दयाञ्चक्रे। अय-अयामास अयाञ्चक्रे। आस-आसामास आसाञ्चक्रे। दरिद्रा-दरिद्रामास (१६५ पृ० २८सू०) आलोपे ददरिद्र। जागृ-जागरामास जजागार।

५:· ७· ·१··१··१· ·१·

भीह्रीभृहुभ्यो लिटाम् तच्च सार्व्वधातुकवत्॥६॥

लिटि परे एभ्य आम् स्यात् तच्च सार्व्वधातुकवत् कार्य्यं लभते। तेन सार्व्वधातुकवद्‌द्वित्वे अभ्यासकार्य्यगुणे लिट्‌परकृभ्वाद्यनुयोगे भी—बिभयाम्बभूव ह्री-जिह्रयामास भृ-बिभराञ्चकार बिभराञ्चक्रे हु-जुहवामास जुहवाञ्चकार। विद (१२०पृ०१२सू०) वा ङामि ङित्त्वाद्‌गुणाभावे विदाम्बभूव विवेद।

---

*आमन्तात् लिटो लोप विधानात्तदन्तं पदं तेन तस्य कश्चित् स्वतन्त्र प्रयोगोऽपि तं पातयां प्रथममासेति उचां प्रचक्रुरित्यादौ। किन्त्वनुप्रयोगाद्‌ग्रामात् पदान्तरव्यवधाने नास्य साधुतेति वार्त्तिककाराशय:।

* सार्व्वधातुकवदिति वत्करणात् न सर्व्वथा तद्रूपत्वम् तेनाभ्यासोऽपित्त्वेऽपि न ङित्त्वं ततश्च बिभरांबभूवेत्यादौ गुण:।

मन्थ-लिटो (११८पृ० ८सू०) वा कित्त्वे नलोपे ममथतुः ममन्थतुः। पतेर्द्वित्वे

६·

असंयुक्तहल्मध्यस्य तॄफलभजत्रपहिंसाधैरा-
६:·१·६· ·१· १··१· ७· ७· ७· ७·
धाचात एदभ्यासलोपश्च किति लिटि सेटि थपि
·१· ·१· ६:·
च न विशसतादिशसददवादिगुणिनलोपिनां जॄवम-
६··१··१·
भ्रमत्रसफणादेस्तु वा ॥ ७ ॥

किति लिटि, सेटि थपि, च परे असंयुक्तहल्मध्यस्य, तॄफलादेश्च अतः स्थाने एत् स्यादभ्यासलोपश्च नत्वादिष्टादेः न च शसददादेश्च जॄादेस्तु वा। इत्येत्त्वेऽभ्यासलोपे पेततुः पेतिथ। फल-फेलतुः फेलिथ। तॄ द्वित्वे अभ्यासकार्ये

६· १· ७· ७·

ऋतो गुणो लिटि किति ॥ ८ ॥

किति लिटि परे ऋकारस्य गुणः स्यात्। इति गुणे अतएत्त्वेऽभ्यासलोपे तेरतुः तेरिथ। आदिष्टादेस्तु गद-जगदतुः। शस-शशसतुः। गुणिनः पॄ-पपरतुः। वादेः वल-ववलतुः। नलोपिनः रन्ज-ररजतुः। जॄ-जेरतुः जजरतुः जेरिथ

जजरिथ। फण राज भ्राज भ्राश भ्लाश स्यम स्वन इति फणादि। एषामातोऽत्वेत्त्वमिष्यते। रेजतुः रराजतुः।

६· ·१· ७ः
जेर्गिः सन्‌लिटोः ॥ ९ ॥

सनि लिटि च परे जेर्गिः स्यात्। जिगाय। जिग्यतुः। धे—आत एत्वे द्वित्वेऽभ्यासकार्य्ये

५· ६· १·
आतो णप औः ॥ १० ॥

आतः परस्य णपः स्थाने औः स्यात्। दधौ। (१६०पृ०१९सू०) आलोपे दधतुः गै-जगौ सो-ससौ।

६ः ६· १· ७· ७ः
ऋत्सिंसंयोगाद्योर्ऋतो गुणो यङ्‌यकोः कितो

७ः ·१· ६··१· ७·
लिङाशीर्लिङोश्च स्कुस्तृ लिटि ॥ ११ ॥

ऋत्तेः संयोगादेश्च ऋकारस्य गुणः स्यात् यङि, यकि, किति, लिटि, आशीर्लिङि च परे स्कुस्तृ, लिटिच परे। इति गुणे ऋ-आरतुः स्मृ-सस्मरतुः स्कृ-संचस्करतुः।

६ः ६· १·
द्युतस्वाप्योरभ्यासस्य संप्रसारणम्— ॥ १२ ॥

द्युतेः स्वापेश्चाभ्यासस्य संप्रसारणं स्यात्। इति संप्रसारणे पूर्व्वरूपैकादेशे च दिद्युते।

६· ७:

श्वेर्यङ्लिटोः ॥ १३ ॥

श्वयतेः संप्रसारणं स्यात् यङि लिटि च परे । इति संप्रसारणे

·१· ५· ·१· १· ७· ७·

न द्वित्वात् प्रागजादेशो द्वित्वनिमित्तेऽचि ॥ १४ ॥

द्वित्वनिमित्तेऽचि परे द्वित्वात् प्रागजादेशो न स्यात् । इति शु शु इत्यस्य द्वित्वे हलादौ शुशाव । उवङि शुशुवतुः ।

६· ७· १·

ह्वेञो द्वित्वहेतौ संप्रसारणम् ॥ १५ ॥

द्वित्वहेतौ परे ह्वेञः संप्रसारणं स्यात् । इति संप्रसारणे प्राग्वत् जुहाव जुहुवतुः । अद (१६६पृ० ८प०) वा घसादेशे जघास आद । उपधालोपे जक्षतुः आदतुः । हन्तेर्द्वित्वे आदिहल्शेषे

५· ६·६· १· ७· ७· ·१·

अभ्यासात् हन्तेर्हो घो ञिति णिति च ॥ १६ ॥

अभ्यासात् परस्य हन्तेर्हस्य घः स्यात् । ञिति णिति च परे अनभ्यासादपि । जघान उपधालोपे जघ्नतुः । इणो द्वित्वे हस्वो इयङि इयाय । अतुसि द्वित्वे ।

५॰ ६॰ १॰ ७॰ ७॰ ॰१॰ ७॰
अभ्यासादिणो दीर्घः किति ङिति चाशीर्लिङि
॰१॰ ॰१॰ ५॰
तु नोपसर्गात् ॥ १७ ॥

अभ्यासात् परस्य इणो दीर्घः स्यात् किति ङिति च परे आशीर्लिङि तु नोपसर्गात्। ईयतुः ईयुः। इङो गादेशे अधिजगे। वचेः संप्रसारणे उवाच ऊचतुः। खन-चखान। उपधाऽलोपे चख्नुतुः।

तासि नित्यानिडजन्तो गणे वाऽकारवानपि।
सृजिदृशिभ्यां वेट्कोऽयम् व्येऽदत्तिरह्वितस्यपि।
तादृग्टरन्तो नित्यानिट् थपि क्रसृस्तुवर्ज्जितः।
नित्यानिटः क्रादिभिन्ना सेटस्ते लिटि थादिषु।

स्रु स्रु भृवृस्तुद्रुस्रुश्रु एते क्रादयः। तत्र अजन्तस्य, नी—निनयिथ निनेथ निन्यिव निन्यिम। च्यु—चुच्यविथ चुच्योथ चुच्युविव। स्रु—सस्रर्थ सस्रिव। अकारवतः, गम-जगमिथ जगन्थ जग्मिव संजग्मिषे। पच-पेचिथ पपक्थ पेचिव। पेचिषे। सृज—ससर्जिथ सस्रष्ठ सस्रजिव। दृश-ददर्शिथ दद्रष्ठ ददृशिव। संददृशिषे। वे—विवयिथ। अद—आदिथ ऋ—आरिथ। हृ—जहर्थ

स्त—संचस्करिथ अन्यत्र चकर्थ। क्रादिष्वसुट्-कस्यैव ग्रहणात् चकृव चकृषे। इटि तु संचस्करिव।

६· १··१· ७:
चेः किर्वा लिट्सनोः॥ १०॥

चिनोतेः किः स्यात् लिटि सनि च परे। इति कादेशे चिकाय चिचाय। ऊर्णु=(१६८पृ०५सू०) आम् निषेधे सर्व्वद्वित्वे प्राप्ते

६· ६· ५· ६· १· ७·७·
अजादेर्द्वच आद्याचः परस्य द्वित्वं तत्राद्ये
६··१·
नन्द्रसंयोगादेर्न॥ १८॥*

अजादेरनेकाच आद्याचः परस्य द्वित्वम् तस्मिन् द्वितीये नन्द्रसंयोगादेर्न द्वित्वं स्यात् न तु ये। इति ऊर् इत्येतौ विहाय णु, णु, इति द्वित्वे हृडिणत्वे ऊर्णुनाव। उवङि ऊर्णुनुवतु। (११७पृ०७सू०) इटो वा ङित्त्वे ऊर्णुनुविथ ऊर्णुनविथ। गुहेर्गूहे-जुगूह। जुगुहतुः। कृपेः क्लृपादेशे चक्लृपे। अस्ते र्भ्वादेशे बभूव। ब्रुवो वच्यादेशे ऊचतुः। चक्षिङः ख्याञा-देशे चख्यौ चख्ये चचक्षे। ग्रहेरिटो दीर्घनिषेधे जग्रहिथ। संप्रसारणे जगृहिव।

* नन्वेकस्य प्रसक्त द्वित्वे इत्यर्थसत्यार्थद्योतनाय इत्थो द्वितीये इत्युक्तम्।

६ः १· ·१· ७· ७·

शॄदॄपां ह्रस्वो वा लिटि किति ॥२० ॥

किति लिटि परे एषां ह्रस्वो वा स्यात् । इति ह्रस्वे शश्रतुः पक्षे गुणे शशरतुः ।

७· ६ः ·१· १·

लिटि वेञ्प्रच्छव्रश्चभ्रस्जां न संप्रसारणम् ॥२१॥

लिटि परे एषां संप्रसारणं न स्यात् । इति संप्रसारणनिषेधे प्रच्छ-पप्रच्छतुः व्रश्च-वव्रश्चतुः । भ्रस्ज-वा भर्ज्जादेशे बभर्जतुः बभ्रज्जतुः । संप्रसारणे यज-इयाज ईजतुः । व्यध-विव्यधे । स्वप-सुष्वाप सुषुपतुः । गुणे जागृ-जजागरतुः ।

इति लिट्प्रकरणम् ।

अथ लुट्प्रकरणम् ।

भू-लुटि इटि गुणावादेशौ भविता भवितारौ भवितारः । भवितासि भवितास्थः भवितास्थ । भवितास्मि भवितास्वः भवितास्मः । भविता भवितारौ भवितारः । भवितासे भवितासाथे भविताध्वे । भविताहे भवितास्वहे भवितास्महे ।

५. ६. ०।००१.

इषसहलुभरुषरिष आर्द्धधातुकतस्य वेट्॥ १॥

एभ्यः परस्य आर्द्धधातुकतस्य इट् स्याद्वा। इष—एषिता एष्टा। सह-सहिता (१६५पृ०२५सू०) ओत्वे सोढ़ा। लुभ लोभिता लोब्धा। रुष-रोषिता रोष्टा। रिष-रेषिता रेष्टा (१६२पृ०२१सू०) वेटि स्वृ स्वरिता स्वर्त्ता। सु सविता सोता। ऊदितः गुहू गूहादेशे गूहिता गोढ़ा। नश-नशिता पक्षे

६ः ०।० ७० ६ः ७.७.

नशमस्जोर्नुम् झलि रभलभोरशब्लिटाचि॥२॥

झलि परे नशमस्जोः, अशप्यलिटि चाजादौ परे रभलभोश्च नुँम् स्यात्। उभावितौ। इति नुमि (८१पृ०२सू०) पक्षे षत्वे तस्य धत्वे जसि नङ्ग्धा पक्षे मस्य षत्वे टुत्वे नंष्टा। मस्ज-मंष्टा। रभ-रब्धा लभ- लब्धा। क्लपेस्तु ऊदित्वाद्वेटि प्राप्ते

५. ६. ७. ०।००।.

क्लपेर्लुटः परस्मैपदे नेट्॥ ३॥

क्लपेः परस्य लुटः स्थाने इट् न स्यात् परस्मैपदविषये। अतएव परस्मैपदम्। एवं वृतादित्वादप्यपि। तेन लुटि लृटि लृङि च परे, वृतादिपाठेनाङ्प्रसक्तये लुङि च क्लपेः परस्मै-

पदमन्यत्रात्मनेपदम्। क्लृपादेशे कल्प्ता आत्मनेपदे तु कल्पितासे कल्प्तासे। अस्तेर्भ्वादेशे भविता। ब्रूञो वच्यादेशे वक्ता। भ्रस्ज वा-भर्जादेशे भर्ज्जिता भ्रष्टा। चक्षिङः ख्यादेशे ख्याता। ऊर्णोः (११७पृ० ६सू०) ऊर्णुविता ऊर्णविता। विज-विजिता। कुटादित्वादगुणाभावे त्रुट-त्रुटिता। स्फुट्-स्फुटिता स्फुर-स्फुरिता।

इति लुट्प्रकरणम्।

आशीर्लिङ्प्रकरणम्।

आशीर्लिङः परस्मैपदस्य कित्त्वेन गुणाभावे भूयात् भूयास्ताम् भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म।

६० १० ७० ७० १० ७०
इको दीर्घो यि-क्ङति-न क्वसार्व्वधातुके॥१॥

क्किति ङिति च यादौ परे इगन्ताङ्गस्य दीर्घः स्यात् न तु क्वति सार्व्वधातुके च परे। इति दीर्घे जि- जीयात्। चि-चीयात् स्तु-स्तूयात्।

५० ६० १०
उपसर्गादूहतेर्ह्रस्वः॥ २॥

उपसर्गात् परस्य ऊहतेर्ह्रस्वः स्यात् प्रागुक्तरूपे

यादौ परे इति ह्रस्वे समुह्यात्। (१७४पृ०१७सू०) दीर्घं ईयात् उपसर्गात्तु समुदियात्। (१७२पृ०११सू०) गुणे ऋ-अर्य्यात् ऋ-अर्य्यात् (१४४पृ०२सू०) रिङि ह-ह्रियात्। क्र-क्रियात्। स्म-स्मियात्। तॄ-तीर्य्यात्। पॄ पूर्य्यात्। नलोपे मन्थ-मथ्यात्। इदितान्न वदि वन्द्यात्। हन्तेर्वधादेशे वध्यात् (१४१पृ०१२सू०) पक्षे ङा खायात् खन्यात् सायात् सन्यात्।

घुमास्थागापाजहातिसामिल्लंयोगादेस्तु वा॥२॥

घुसंज्ञस्य मास्थादीनामेदन्तादेशः स्यात् स्यान्य-संयोगादेस्तु वा। दा-देयात्। धा-धेयात्। मा-मेयात्। स्था-स्थेयात्। पा-पेयात्। हा-हेयात्। सो-सेयात्। संयोगादेस्तु म्ना-म्नेयात् म्नायात्। ग्ला-ग्लेयात् ग्लायात्।

आत्मनेपदे इटि गुणादेशपत्वानि भविषीष्ट भविषीयास्ताम् भविषीरन्। भविषीष्ठाः भवि-षीयास्थाम् (१५५पृ०७सू०) वा ढत्वे भविषीढ्वम् भविषीध्वम्। भविषीय भविषीवहि भविषीमहि। (१६२पृ०२८सू०) वेटि दीर्घाभावे तॄ-तरिषीष्ट इड-भावे (११८पृ०१४सू०) कित्त्वे तीर्षीष्ट। स्तॄ-स्तरिषीष्ट

स्तृषीष्ट। वृ-वरिषीष्ट वृषीष्ट। ग्रहेस्तु ग्रहीषीष्ट। स्कृ-संस्कृषीष्ट। गुहे:-वाइट् गूहिषीष्ट पक्षे (११८पृ० १४सू०) किच्चेन गुणाभावे ढत्वे भष्भावे कत्वे षत्वे घुक्षीष्ट। दुहे: दादितया (८१पृ०२सू०) हस्य घत्वे भषि चरि षत्वे धुक्षीष्ट। वेटि सविषीष्ट सोषीष्ट। क्लृपे: कल्पिषीष्ट क्लृप्सीष्ट। ऊर्णु-ऊर्णुविषीष्ट ऊर्णु-विषीष्ट। भ्रस्ज—भर्जिषीष्ट भ्रक्षीष्ट। हन—आव-धिषीष्ट ब्रूञो वक्षीष्ट। यज-यक्षीष्ट चक्षिङ्-ख्यासीष्ट।

इति आशीर्लिङ्प्रकरणम्।

लृट्प्रकरणम्।

भू-लृटि गुणावादेशषत्वानि भविष्यति भविष्यतः भविष्यन्ति। भविष्यसि भविष्यथः भविष्यथ। भविष्यामि भविष्यावः भविष्यामः। भविष्यते भविष्येते भविष्यन्ते। भविष्यसे भविष्येथे भविष्यध्वे भविष्ये भविष्यावहे भविष्यामहे।

५· ६··१·
ऋद्धन: स्यस्येट्—॥१॥

ऋकारान्तात् हन्तेश्च परस्य स्यादेरिट् स्यात स्मृ· सरिष्यति हन-हनिष्यति।

५॰ ६॰ ६॰ ७॰

गम आर्द्धधातुकस्य सस्य परस्मैपदे ॥ २ ॥

गमः परस्यार्द्धधातुकस्य सस्य स्थाने इट् स्यात् परस्मैपदविषये । गमिष्यति । आत्मनेपदे तु संगंस्यते । (१६२पृ० २१सू०) वेटि सू—सविष्यते सोष्यते नश-नशिष्यति (१७७पृ० २सू०) नुमि घत्वे धत्वे चरि, षत्वकत्वे वा नंक्ष्यति । वृतादेरुदित्त्वे न वेटि प्राप्ते

५॰ ५॰१॰ ६॰ ७॰१॰

वृतादिभ्यः क्लृपेश्च स्यसनोः परस्मैपदे न ॥ २ ॥

वृतादिभ्यः परस्य स्यादेः सनश्च स्थाने इट् न स्यात् परस्मैपदविषये । वृत वृध शृध स्यन्द वृतादि । अतएव परस्मैपदम् । वृत-वर्त्स्यति वृध-वर्त्स्यति स्यन्द—स्यन्त्स्यति । आत्मनेपदे तु वर्त्तिष्यते वर्त्स्यते । कल्पिष्यते कल्प्स्यते ।

५॰ ६॰ ६॰१॰

कृतचतच्छृदतृदनृतोऽसिचः सस्य वा ॥ ४ ॥

कृतादिभ्यः परस्य असिचः सस्य स्थाने इट् न स्याद्वा । कृत-कर्त्स्यति कर्त्तिष्यति । नृत-नर्त्स्यति नर्त्तिष्यति । अस्तेः—भविष्यति । गुहेः-गूहिष्यति घोक्ष्यति । भ्रस्ज-भर्ज्जिष्यति भ्रक्ष्यति । ब्रुवः वक्ष्यति ।

चचिङः-ख्यास्यति ख्यास्यते। प्रच्छ-प्रक्ष्यति। यज-यक्ष्यति यक्ष्यते तॄ-तरीष्यति तरिष्यति धे-धास्यति। गै-गास्यति। ऊर्णु-ऊर्णुविष्यति ऊर्णविष्यति। विज-विजिष्यति स्फुर-स्फुरिष्यति।

इति लृट्प्रकरणम्।

लृङ्प्रकरणम्।

भू-लृङि अटि इटि गुणावादेशषत्वानि अभविष्यत् अभविष्यताम् अभविष्यन्। अभविष्यः अभविष्यतम् अभविष्यत। अभविष्यम् अभविष्याव अभविष्याम। अभविष्यत अभविष्येताम् अभविष्यन्त। अभविष्यथाः अभविष्येथाम् अभविष्यध्वम्। अभविष्ये अभविष्यावहि अभविष्यामहि। अजादेस्तु आटि अट-आटिष्यत् अन्यत् सर्व्वं लृङ्वत्। इङस्तु (१६६पृ० १०सू०) पक्षे गादेशे (११७पृ०६सू०) ङित्त्वेन (१६७पृ०४० सू०) ईत्वे अध्यगीष्यत अध्यैष्यत इति भेदः। एवं सर्व्वत्र धातुषूह्याम्। विस्तरस्तु मत्कृतधातुरूपादर्शे ज्ञेयः।

इति लृङ्प्रकरणम्।

तिङन्तेषु णत्वषत्वप्रकरणम् ।

विशेषविधिं विना निमित्तस्य नकारसकारयोरेकपदस्थत्वे एव णत्वषत्वे प्राप्ते तयोपसर्गादिरसमस्ततया भिन्नपदत्वेऽपि संहितानित्यत्वस्वीकारेण णत्वषत्वयोः साधनार्थमारभ्यते ।

णोपदेशषोपदेशौ गणे यौ णादिषादिकौ ।
नृताद्यन्यस्वपाद्यन्यौ तौ णत्वषत्वभागिनौ ।
नादयो धातवो ये स्युर्गणे ते णादयो मताः ।
नृत्यतिं नन्दतिं नाथिं विना ते णोपदेशकाः ।
स्वरान्तसादयो ये च दन्त्यवर्णान्तसादयः ।
स्वपस्विदस्वदस्मिङ्श्च सृप्सृजस्त्यैस्तु विवर्जिताः ।
एकाचश्च गणे प्रोक्ताः षादयः षोपदेशकाः ।
णादिषादी गणेषूक्तौ प्रयोगे नादिसादिकौ ।
प्राप्नुतो णत्वषत्वे तावुपसर्गादियोगतः । यथा

५ः ६॰ ६॰
प्रपरापरिनिरन्तर्भ्यः णोपदेशस्य नादेः शान्त-
६॰ ६॰ ६॰ ६॰ ६॰ १॰ ५॰ १॰
नशोर्हिमुमीनात्योरानिपोर्हन्तेरतत्पूर्व्वस्य च नो णः
१॰ ६ः ।॰ १॰
—प्राग्वदननिन्दयोस्तु वा ॥ १ ॥

एभ्यः परस्य णोपदेशस्य नादेर्धातोः, शान्तनशो,

हिनुमीनात्योः, आनिपः प्रत्ययस्य, अदुक्तस्य हन्तेश्च नस्य णत्वं प्राग्वदडादिव्यवधानेऽपि स्यात् अन-निन्दयोस्तु वा। प्रणदति प्रणश्यति शान्तेत्युक्तेः प्रनंष्टेत्यादौ न। प्रहिणोति प्रमीणाति प्रभवाणि। प्रहण्यात् अत्पूर्व्वस्य किं प्रघ्नन्ति। प्राणिति प्रानिति। परिणिन्दति परिनिन्दति।

६·
नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्राति

७:·
प्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु ॥ २ ॥

गदादिधातुषु परेषु प्रादिभ्यः परस्य नेरुपसर्गस्य नस्य णत्वं स्यात्। प्रणिगदति। प्रणिनदति प्रणिपतति। प्रणिपद्यते प्रणिददाति प्रणिदधाति।

७· ७· ७· ६· ·१··१·
अकखादावषान्ते शेषे भवान्तहन्तेश्च वा ॥ ३ ॥

कादिखादिभिन्ने षान्तभिन्ने च गदादेरन्यस्मिन् धातौ परे प्रादिभ्यः परस्य नेर्भवान्तहन्तेश्च नस्य णत्वं वा स्यात्। इति विभाषया णत्वे प्रणिभवति प्रनिभवति। प्रहणु: प्रहन्वः। प्रहण्मः प्रहन्मः। कखादौ तु प्रनिक्रामति प्रनिखादति। षान्ते प्रनिम्लषति।

इति णत्वप्रकरणम्।

षत्वप्रकरणम् ।

६.५.

उपसर्गस्येकः—सुनोतिसुवतिस्यतिस्तौतिस्तोभति

६: ५. ६..१. .१.

स्थासेनयसेधसिचसञ्जस्वञ्जामप्रतेः सदेश प्राग्वत्

६. १.

सः—षः = ॥ १ ॥

प्राग्वदनुम्विसर्गव्यवधानेऽपि उपसर्गस्येकः परेषामेषां सस्य षः स्यात् । ग्रहणसामर्थ्याद्षोपदेशस्यापि णिजन्तसेनाशब्दस्य षत्वम् । सुनु-अभिषुणोति परिषुणोति । सुव — अभिषुवति सो — अभिष्यति । स्तु-अभिष्टौति स्तुभ-परिष्टोभते । स्था-अभिष्ठाता । सेनय—अभिषेणयति । सेध — अभिषेधति । सिच—अभिषिञ्चति । सञ्ज—अभिषजति । स्वञ्ज — अभिष्वजते । सद—अभिषीदति । प्रतेस्तु प्रतिसीदति ।

६..१.५..१. ७:

स्तम्भेसावाद्वालम्बनसामीप्ययोः ॥ २ ॥

उपसर्गस्येकः परस्य स्तम्भेः सस्य षः स्यादवात्तु आलम्बनसामीप्ययोरर्थयोः । अभिष्टभ्नोति प्रतिष्टभ्नाति अवष्टभ्नाति यष्टिम् अवलम्बते इत्यर्थः । अवष्टभ्यते गौः सामीप्ये निरुध्यते इत्यर्थः ।

५ः ६· ७·

व्यवाभ्यां स्वनो भोजने ॥ ३ ॥

आभ्यां परस्य भोजनार्थे स्वनः सस्य षः स्यात्। विष्वणति अवष्वणति सशब्दं भुङ्क्ते इत्यर्थः। आभ्यां* किं निस्वनति। भोजने किम् विस्वनति वीणा।

५ः·

परिनिविभ्यः। सेवसितसयसिवुसहसुट्स्तु स्वन्-
६ः·
जाम् ॥ ४ ॥

एभ्यः परेषामेषां सस्य षः स्यात्। सेव-परिषेवते निषेवते विषेवते। क्तान्त सो-परिषितः। अजन्त सि-परिषयः विषयः। सिवु—परिषीव्यति निषीव्यति। सह-परिषहते। सुट्-परिष्करोति। स्तु-परिष्टौति स्वन्ज-परिष्वजते। एषु किम् अभिसेवते। स्तु स्वन्जोः पूर्व्वेणैव सिद्धे उत्तरत्रानुवृत्त्यर्थमिह पुनर्ग्रहणम्।

५ः· ६ः· ७· ·१·

एभ्यः सिवादीनामड्व्यवधाने वा ॥ ५ ॥

परिनिविभ्यः परेषां सिव सह सुट् स्तु स्वन्ज इत्येषामड्व्यवधाने सस्य षत्वं वा स्यात्। सिव—पर्य्यषीव्यत् पर्य्यसीव्यत्। सह—पर्य्यषहत पर्य्यसहत। सुट्—पर्य्यष्करोत् पर्य्यस्करोत्।

* सति तूपसर्गाभ्यां तिङन्तपदैः समस्तत्वे समासत्वेन प्राति-पदिकसंज्ञाप्राप्त्या ततः सुपः प्रसङ्गः सामान्ये नपुंसकतया सुपो लोपे समर्थने तु प्राभवन् प्रकुर्वीरन्नित्यादौ नलोपस्य, प्रकुरुते इत्यादौ क्लीबे ह्रस्वस्य चापत्तिरित्यत उक्तम् समस्तेति अतस्तत्र समासविधानमतीव प्रामादिकम्।

स्तु—पर्य्यष्टौत् पर्य्यस्तौत्। स्वन्ज—पर्य्यष्वजत पर्य्यस्वजत।

६:· ७· ·१·
सेवान्तानामड्व्यवधानेऽपि नित्यम्॥ ६॥

सुनोतीत्यारभ्य सेवपर्य्यन्तानां पञ्चदशानामड्व्यवधाने नित्यं षत्वं स्यात्। सुनु-अभ्यषुणोत् सुव-पर्य्यषुवत्। सो-अभ्यष्यत् स्तु—अभ्यष्टौत्। व्यष्टोभत। स्था-व्यष्ठात्। सेनय-अभ्यषेणयत्। सिध-पर्य्यषेधत्। सिच-अभ्यषिञ्चत्। सन्ज—पर्य्यसजत्। स्वन्ज—अभ्यस्वजत। पर्य्यादिभ्यस्तु स्तुस्वन्जोः पूर्व्वेणैव वा। सद—पर्य्यषीदत् स्तन्भ—व्यष्टभ्नात् अवाष्टभ्नात्। स्वन्—अभ्यष्वणत् अवाष्वणत् सेव-पर्य्यषेवत।

७:· ६:· २· ६· ·१·
तेषु स्थादीनामभ्यासेनाभ्यासस्य च॥ ७॥

प्रागुक्तानां पञ्चदशानां मध्ये स्थादीनां दशानामभ्यासेन व्यवधानेऽपि षत्वं स्यात् अभ्यासस्य च। स्था-अभितष्ठौ। सेनय-अभिषिषेणयिषति। सिध-अभिषिषेध सिच-अभिषिषेच। सन्ज-अभिषिषङ्क्षति*। स्वन्ज-अभिषिष्वङ्क्षते। सद-निषषाद।

* अभिषिषङ्क्षतीत्यत्र २·१४·१२सू· सन्नेव षत्व निवारकेण न षत्वस्य बाधः तस्य उपसर्गे रहिते चरितार्थत्वात्।

स्तब्ध-अभितष्टब्ध। स्वन-विषष्वाण अवषष्वाण। सेव-परिषिषेव।

५:· ६· ६·
अनुविपर्य्यभिनिभ्य: स्यन्तेरप्राणिकर्त्तृकस्य
·१·
वा—॥ ८ ॥

एभ्य: परस्य स्यन्दे: सस्य षो वा स्यात् प्राणिकर्त्तृकस्य तु न। अनुषन्दते विषन्दते निषन्दते इत्यम्। पक्षेऽषत्वम्। प्राणिकर्त्तृकस्य तु निस्यन्दते मत्स्य:। विधानसामर्थ्यादसोपदेशस्यापि षत्वम्।

५· ६·५··१· ७·
परे: स्कन्देर्विस्त्वनिष्ठायाम्॥ ९ ॥

परिपूर्व्वकस्य स्कन्दे: सस्य षो वा स्यात् विपूर्व्वकस्य त्वनिष्ठायाम्। परिष्कन्दति परिस्कन्दति। विष्कन्दति विस्कन्दति। निष्ठायान्तु विस्कन्नम्। परेस्तु विभाषया स्यादेव परिष्कन्नं परिस्कन्नम्।

५:· ६:
निर्निविभ्य: स्फुरस्फुल्लो:॥ १० ॥

एभ्य: परयोरनयो: सस्य षो वा स्यात्। निष्फुरति निष्फुलति पक्षेऽषत्वम्।

५: ६· ७· ७·७··१·
उपसर्गप्रादुर्भ्यामस्तेरचि ङिति ये च॥ ११ ॥

आभ्यां परस्यास्ते ङिंसंज्ञकेऽचि ये च परे स: ष:

स्यात्। निषन्ति निष्यात् प्रादुःषन्ति प्रादुःष्यात्।

उपसर्गात् सुञःस्ये नो सिवस्तम्भोषणेषङि॥

सहेरीति च सः षत्वं वयुक्तस्य स्वपेश्च न।

सेधेर्गतौ न षत्वं स्यान्न कथञ्चित् सिचेर्यङि। यथा परिसोष्यते। पर्य्यसीषिवत् व्यतस्तम्भत्। पर्य्यसीषहत् विसोढा। सुसुष्वाप अन्यत्र सुषुषुपतुः। ग्रामं परिसेधति गच्छतीत्यर्थः। एषु तु मूलधातोस्तु इणकोरित्यनेन षत्वम् उपसर्गात् परस्यैव निषेधात्। सेसिच्यते इत्यत्र तु कथञ्चिदित्युक्तेर्न षत्वम्।

इति षत्वप्रकरणम्।

णिजन्तप्रकरणम्।

१० ०।० ७०

धातोर्णिच् प्रवर्त्तनायाम्॥ १॥

प्रवृत्तिजनको व्यापारः प्रवर्त्तना तदर्थे धातोर्णिच् स्यात्। इचावितौ। णिचि इत्यादौ भावि (१५१पृ० २सू०) धातुसंज्ञायां सामान्यतः अपि गुणादिर्भावयति। भावयेत्। भावयतु। अभावयत्। वच-वाचयति। हन-हस्य (१७२पृ० १६सू०) घत्वे

६· ·१· ७· ७·

हन स्तङ्णप्चिणि ञ्णिति ॥ २ ॥

हन्तेस्तङ्स्यात् ञिति णिति च परे नतु णपि चिणि च। ङ्इत्। इति नस्य तङि घातयति।

६· ·१· ७· ६:· ·१·

अर्त्त्यातोः पुक णिचि—शा, सा ह्वेवेपिबान्तु

·१·

युक् ॥ ३ ॥

णिचि परे अर्त्तेरा दन्तस्य च पुक् स्यात् शा, सादीनान्तु युक्। ऋ—अर्पयति आतः स्था—स्थापयति या—यापयति। शो—शाययति सो—साययति ह्वे—ह्वाययति वे—वाययति पिबतेः पाययति।

६:· .६· ·१· ६· ·१· ·१·

क्रीङ्जीनामच आत् चिस्फुरप्रजनार्थवीयतेस्तु वा ॥ ४

णिचि परे एषामच आत् स्यात्। चिस्फुरादेस्तु वा। इत्यात्वे पुकि क्री-क्रापयति इङ्-अध्यापयति जि—जापयति। चि—चापयति चाययति। स्फुर—स्फारयति स्फोरयति। वी-वापयति वाययति परीवातो गर्भं ग्राहयतीत्यर्थः। अन्यत्र वाययति

५: ·१· ५· ७· ६· ·१· ·१· ७·

भीस्मिङ्भ्यां तङ् हेतोर्भयस्मये तयोर्यात् णिचि ॥५॥

प्रयोजकाद्भये स्मये च गम्यमाने भीस्मिङ्भ्यामात्मने-

पदं स्यात् तयोश्चाच आत् णिचि। तङित्यात्मने-
पदसंज्ञा। विस्मापयते।

६· ६· ·१· ७·
भियो भीषो वा तङ्विषये ॥ ६ ॥

प्रागुक्तात्मनेपदविषये भियो भीषः स्याद्वा णिचि।
भीषयते पक्षे भापयते। हेतुभये किम् अस्त्रेण
भाययति

पातेः पाल्गो,ऽगतौ शातः शदेः, रोपस्तु वा रुहेः।
दुषेर्दूषि, र्वा विकारे, ऽज्ञाने गमिरिणो णिचि।
स्नेहद्रवे लियो लापि:, सिधेः साधस्तु लौकिके।
प्रीञः प्रीणो णिचि भवेत्, धूञो धूनिश्च वा णिचि

पातेः—प्रजाः पालयति। शद—पत्रं शातयति
नाशयतीत्यर्थः गतौ तु शादयति गाः गमयतीत्यर्थः।
रुह-रोपयति रोहयति। दुष-दूषयति। चित्तविकारे
तु दूषयति दोषयति वा चित्तम्। इण-गमयति
वक्ष्यमाणेन ह्रस्वः। ज्ञाने तु प्रत्याययति। लियः-
घृतं विलापयति। अन्यत्र लौहं विलाययति।
सिध-अन्नं साधयति। अन्यत्र यज्ञोऽरिष्टं सेधयति
सेवयतीत्यर्थः। प्रीञ्—प्रीणयति प्राययति धूञ्—धून
यति धावयति।

घटधातोर्णिचि उपधाभूताकारस्य ह्रस्वे

६: ६ ६

घटादिजनीजीर्य्यतीनामकमामचमोऽमन्तस्योपधा-

६ ६ ७ ७।।। ६।

या-ह्रस्वो-णौ-चिण्णमुल्परे तु वा जागुश्च ॥ ६ ॥

णौ परे घटादीनां कमादिवर्जितस्यामन्तस्य चोप-धाया ह्रस्वः स्यात्। चिण्णमुल्परे णौ तु जागुश्च वा स्यात। णाविति णिङ्णिचोर्ग्रहणाय। घटादिः (सि० उ० ८२पृ०) ज्ञेयः। इति ह्रस्वे घटयति रण-रणयति ध्वन-ध्वनयतीत्यादि। जन-जनयति जीर्य्यतेः जरयति। जृणातेस्तु जारयति। अमन्तस्य गम-गमयति दम-दमयति। कमादेस्तु कम-णिङि कामयते श्रम श्रामयति चम-चामयति।

६ ७ ६ ७ ६ ७ ६ ७

शमो दर्शने यमो भोजने चलेः कम्पने श्नः पाके

७ ६

मारणतोषणचाक्षुषध्यानेषु ज्ञापेः ॥ ८ ॥ *

एष्वर्थेष्वेषां ह्रस्वः स्यात णौ नान्यत्रार्थे। शमयति दर्शयतीत्यर्थः अन्यत्र निशामयति श्रावयती-त्यर्थः। यमयति विप्रं भोजयतीत्यर्थः। अन्यत्र आयामयति हस्तं व्यापारयतीत्यर्थः। पाके

* चिण्णमुल्परेऽपि वेत्यनुवर्त्तनीयम् तेन चिण्परे अशमि अशामि शमं शमं एवं णमुल परेऽपि।

विक्लित्तिमात्रम् । अन्नं श्रपयति विक्लेदयतीत्यर्थः । अन्यत्र हस्तं श्रापयति स्वेदयतीत्यर्थः । चलयति शाखां कम्पयतीत्यर्थः । अन्यत्र चालयति शील-मन्यथाकरोतीत्यर्थः । ज्ञपयति मृगं मारयति तोषयति वार्थः । ज्ञपयति वेदं श्रावयतीत्यर्थः । चाक्षुषज्ञाने तु ज्ञापयति रूपं दर्शयतीत्यर्थः ।

५· ६:· ·१·

अनुपसर्गात् ज्वलह्वलग्लास्नावमनमां वा ॥८॥

अनुपसर्गादेषां ह्रस्वो वा स्यात् । तत्र ग्ला, स्ना, इत्यनयोरप्राप्ते इतरेषां प्राप्ते विकल्पः । ज्वलयति ज्वालयति । ह्वलयति ह्वालयति । ग्लपयति ग्लाप-यति । स्नपयति स्नापयति । वमयति वामयति नम-यति नामयति । उपसर्गात्तु प्रज्वलयतीत्यादौ नित्यं ह्रस्वः, प्रग्लापयति प्रस्नापयतीत्यादावह्रस्वः । भू-णिचि लुङि (१६०पृ०१७सू०)चङि ह्रस्वादौ प्राप्ते (१७२पृ०१४सू०) अजादेशात् प्राक् भू इत्यस्य द्वित्वे अभ्यासकार्य्ये जश्त्वे मूलधातोर्वृद्धौ भावादेशे

७· ७· ६· १· ६:·

चङ्परे णावुपधाया ह्रस्वोऽनग्लोपिशास्वृदितां

६· १· १·

भ्राजादेस्तु वा ॥ १० ॥

चङ् परो यस्मात् तथाभूते णौ परे उपधाया ह्रस्वः

स्यात् नतु अग्लोपिनः, शास्तेः, ऋदितश्च । भ्राजादेस्तु वा । भ्राज भास भाष जीव मील पीड कण रण वण भण श्रण लप लुप हेट भ्राजादि । इत्युपधाह्रस्वे

७· ७· ६· १· ७·
चङुत्तरणिपरे लघुन्यभ्यासस्य सन्वदनग्लोपे ॥ ११ ॥

चङुत्तरवर्त्ती णिःपरो यस्मात् तादृशे लघुवर्णे परे अभ्यासस्य सनीव कार्य्यं स्यात् नतु धातोरग्लोपे । इति सन्वद्भावे

६· ६··१· ७:· ७:· ७·
ओरभ्यासस्यात् पुयण्जेष्ववर्णोत्तरेषु सनि
६· ·१··१·
श्रुवादेस्तु वा ॥ १२ ॥

सनि परे अङ्गस्य योऽभ्यास स्तस्योकारस्य स्थाने अत् स्यात् अवर्णोत्तरपवर्गयण्जकारेषु परेषु श्रुवादेस्तु वा । श्रु स्रु द्रु प्रु प्लुच्यु इति श्रुवादि । इत्यभ्यासस्योतः स्थाने अत्वे

६· ६· ·१· ७·
अभ्यासस्यात इत् सनि ॥ १३ ॥

सनि परे अङ्गस्य योऽभ्यासस्तस्यातः स्थाने इत् स्यात् । इत्यत इत्वे

१· ६· ७·

दीर्घो लघोः सन्वद्भावे ॥ १४ ॥

सन्वद्भावविषये अभ्यासस्य लघोः स्थाने दीर्घः स्यात्। इति दीर्घे

६· १· ७· ७·

णेर्लोपोऽनिडामित्वाल्विष्णावार्धधातुके ॥१५॥

इट्, आम्, इत्नु, आलु, इष्णु-भिन्ने आर्धधातुके परे णेर्लोपः स्यात्। इति णिलोपे अबीभवत्। पु-अपीपवत् यु-अयीयवत् रु-अरीरवत् लु-अलीलवत् जु-अजीजवत्। प्वादिषु किम् अनूनवत् असूषवदित्यादौ सन्वद्भावे दीर्घ एव। स्रुवादेस्तु असुस्रुवत् अभिस्रुवदित्यादि। अन्लोपिनः—अदादिधोरत्। ग्रास-अजग्रासत् ऋदित्-अचकाशत्।

६·१· ६: ७· ७·

अभ्यासस्यात् स्मृदृत्वरस्तृप्रथां चङ्परे णौ चेष्टि-

६: ·१· ·१· ६:·१··१··१·

वेष्ट्योस्तु वा गणकथयोरीच्च ॥ १६ ॥

चङ्परे णौ परे स्मादीनामभ्यासस्यादन्तादेशः स्यात् चेष्टिवेष्ट्योस्तु वा गणकथयोरीच्च। स्मृ—असस्मरत् दृ—अददरत् त्वर—अतत्वरत् स्तृ-अतस्तरत् प्रथ-अपप्रथत्। चेष्ट—अचचेष्टत् अचिचेष्टत्। वेष्ट-अववेष्टत् अविवेष्टत्। गण-

अजीगणत् अजगणत्। कथ-अचीकथत् अचकथत्।

६· ·१· ·१· ७· ७·

इणोगा वा सन्चङ्परे णौ ॥ १७ ॥

इणो गादेशो वा स्यात् सन्परे चङ्परे च णौ परे। इति गादेशे अध्यजीगपत् पक्षे अध्यापिपत्।

५· १·१· ·१··१·

ऋदुपधाश्चङ्परो णिर्ङिद्वा ॥ १८ ॥

ऋदुपधाद्धातोः परश्चङ्परो णि र्वा ङित् स्यात् इति ङित्त्वे वृत-अवीवृतत् पक्षे गुणे लघुपरत्वाभावात् सन्वद्भावाभावेन अववर्त्तत्। लिटि तु अनेकाच्त्वेन आमनुप्रयोगे भू-भावयाञ्चकार भावयाञ्चक्रे। भावयाम्बभूव भावयामास। लुटि भावयिता। आशीर्लिङि णेर्लोपे भाव्यात्। लृटि भावयिष्यति। लृङि अभावयिष्यत्।

इति णिच्प्रकरणम्।

सनन्तप्रकरणम्।

५· ५· ५· ७· ·१· ·१·

इष्यमाणाद्धातोः समानकर्त्तृकादिच्छायां सन् वा ॥१॥

इष्यमाणात् इषिणैककर्त्तृकाद्धातोः सन् वा स्या-

दिच्छायैं। नद्दृत्। भवितुमिच्छतीति वाक्ये सनि सनन्ततया (१५१पृ०२सू०) धातुसंज्ञायां भू भू इति द्वित्वे अभ्यासकार्य्यें इटि प्राप्ते

५० ६००१००१०

उग्रहगुहः सनो नेट्॥ २॥

उवर्णान्तात् ग्रहेर्गुहश्च परस्य सनः स्थाने इट् न स्यात्। इतीटो निषेधे (११८पृ०१२सू०) किस्वे गुणाभावे कर्त्तृलकारे अपि पररूपे बुभूषति। ग्रहेस्तु इटो निषेधे

६:० १० ७०

ग्रहस्वपप्रच्छां संप्रसारणं सनि॥ ३॥

एषां संप्रसारणं स्यात् सनि। इति संप्रसारणे पूर्व्वरूपे किस्वेन गुणाभावे हस्य ढत्वे भषि चरि षत्वे षत्व इत्यस्य धातुसंज्ञायां द्वित्वे आदिहलग्रे-णादावभ्यासकार्य्ये (१८४पृ०१२सू०) इत्वे जिघृक्षति गुह- जुघुक्षति। स्वप-सुषुप्सति षोपदेशतया (५५पृ० १६सू०) षत्वम्। प्रच्छेस्तु-संप्रसारणे

५:० ५:० ६० ०१०

किरादिभ्यः षड्भ्यः सन इट्॥ ४॥

कॄ गॄ दृ धृ प्रच्छ एभ्यः परस्य सनः स्थाने इट् स्यात्। इतीटि ऋकारस्य द्वित्वे तत्पूर्व्वस्य ऋत उपधाभूत-

लघुत्वाभावेन गुणाभावे द्वित्वादौ पिपृच्छिषति कृ-चिकरिषति धृ-दिधरिषति। (११८पृ०११सू०) किस्वे भिद्-बिभित्सति रुज्-रुरुक्षति। इगुपधत्वा-भावेन किस्वाभावात् न संप्रसारणम् यज-यियक्षति वच-विवक्षति। इणस्तु

६० ६००।०।० ७०

अबोधार्थेण: इङश्च गमि: सनि— ॥ ५ ॥

अबोधनार्थस्येण: इङश्च स्थाने गमि: स्यात्। इति गम्यादेशे इण्स्थानिकस्य परस्मैपदितया (१८१पृ० २सू०) इटि जिगमिषति। बोधे गम्यादेशाभावे अजादितया इकारं विहाय यस्य द्वित्वे इत्वे प्रतीषिषति। कर्म्मणि भावे च वाच्ये गम्यादेशे आत्मनेपदितया इडभावे

६०० १० ७० ६० ०१०

आदिष्टगमिहनचां दीर्घोऽनिटि तनोतेर्वा ॥ ६॥*

आदिष्टगमेर्हन्तेरजन्तस्य च दीर्घ: स्यात् अनिटि सनि परे तनोतेस्तु वा। इति दीर्घे जिगांस्यते। इङो गमेरात्मनेपदितया इडभावे अधिजिगांसते। हन: (१७२पृ०१६सू०) घत्वे जिघांसति अत्र इगुप-धत्वाभावेन किस्वाभावान्न नलोप:।

* लक्षण-प्रतिपदोक्तयोर्मध्ये प्रतिपदोक्तस्यैव ग्रहणमिति न्यायेनानादिष्टस्यैव ग्रहणे प्राप्ते आदिष्टेति विशेषणम्।

अजन्तस्य नुनूषति कृ—दीर्घे इरि इको दीर्घे चिकीर्षति।

५०

इवन्तर्धभ्रस्जदन्भस्वृयूर्णुभरज्ञपिसनस्तनपत-

५०१० ६० ०१०१०

दरिद्रातिभ्य सनो वेट् ॥ ७ ॥

इवन्तस्य ऋधादेस्तनादेश्च परस्य सनः स्थाने इट् वा स्यात्। इतीटि दिव-दिदेविषति सिव-सिसेविषति (१२० पृ० २१सू०) वान्तत्वात् कित्वा-भावेन गुणः। पक्षे

६: ६: ७० ७० ०१०

छ्वयोः शूठावनुनासिके झलि च क्ङिति

७० ०१०

क्वौ च ॥ ८ ॥

छकारस्य शः, वकारस्य च ऊठ्, स्यात् किति ङिति अनुनासिकादौ झलादौ क्विपि च परे। इति वस्य ऊठि यणि द्वित्वे हलादिशेषादौ दुद्यूषति सुस्यूषति। भ्रस्ज—वा भर्जादेशे बिभर्जिषति बिभ्रक्षति। स्वृ-सिस्वरिषति सुस्वूर्षति। अस्य संयोगादितया (१६२पृ० २९सू०) वेटि प्राप्ते अन्यसंयोगादेर्नियमार्थम् तेन स्वृ-सुस्वूर्षतीत्येव। यौत्यादेस्तु (१९७पृ० २सू०) उवर्णान्ततया इड्निषेधे विभाषयेट्

अभ्यासस्योतोऽत्त्वे यु-यियविषति युयूषति । ऊर्णु-अजादितया जर्भागं विहाय द्वित्वे वा ङित्त्वे च ऊर्णुनविषति ऊर्णुनुविषति इडभावे ऊर्णूनूषति । तन-तितनिषति वा दीर्घे तितांसति तितंसति । पत-पिपतिषति पचे

६:० ६० १० ७०

मीमाघुरभलभशकपतपदामच-इस्ँ रनिट्सन्य-

१० ०१०

भ्यासलोपश्च ॥ ९ ॥

एषामच इस्ँः स्यात् अनिट्सनि परे अभ्यासलोपश्च । उकारइत् । इतोसि (१६५पृ० २६सू०) सस्य त्वे चरि अभ्यासलोपे पित्सति । मा-मित्सति । दा-दित्सति धा-धित्सति संयोगादिसलोपे रभ-रिप्सते लभ-लिप्सते शक-शिक्षति ।

६: ०१०

ज्ञाप्यापोरीत् ॥ १० ॥

ज्ञपेरापश्चाचः स्थाने ईत्स्यादनिट्सनि अभ्यास-लोपश्च । ज्ञापि-जिज्ञपिषति ज्ञीप्सति ।

६० ६० १००१०

मुचोऽकर्म्मकस्य मोचो वा ॥ ११ ॥

अकर्म्मकस्य मुचः स्थाने मोचः स्यादनिट्सनि परे अभ्यासलोपश्च । मोक्षते मुमुक्षते । अकर्म्मकस्य किं

वत्सं मुमुचति (१८१पृ० ३सू०) इडभावे वृत-विवृत्सति तङि तु विवर्त्तिषते । (१८१पृ० ४सू०) वेटि निनर्त्तिषति निनृत्सति (१६२पृ०२९.,३०सू०) वेटि वा दीर्घं च वृ-विवरीषति विवरिषति वुवूर्षति । तॄ-तितरीषति तितरिषति तितीर्षति । स्तृस्तु संचिस्तीर्षति ।

५: ६· ·१·

स्मिङ्पुङृञ्ज्वर्त्तिभ्यः सनः इट् ॥ १२ ॥

एभ्यः परस्य सनः स्थाने इट् स्यात् । इतीटि सिस्मयिषते (१८४पृ०१२सू०) ऊतोऽत्त्वे पिपविषते अशिशिषते अञ्जिजिषति । ऋ-इटि ऋकारं विहाय इषभागस्य द्वित्वे प्राप्ते "कार्य्यमनुभवन् हि कार्य्यी निमित्ततया नाश्रीयते" इति न्यायात् इषभागस्याजादित्वेऽपि द्वित्वनिमित्तत्वाभावेन द्वित्वात् प्राक् (१७२पृ० १४सू०) न अजादेशनिषेधस्तेन गुणे अभागं विहाय रिषभागस्य द्वित्वे अरिरिषति इङो णिचि सनि गाङादेशे अधिजिगापयिषते पु-णिचि-ऊतोऽत्त्वे पिपावयिषति यु-यियावयिषति । अन्यत्र तु नु-नुनावयिषति ।

६: ·१· ७· ५· ६· ·१·

स्तौतिण्योरेव षण्यभ्यासात् ॥ १३ ॥

अभ्यासस्थेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः

स्यात् षभूते सनि परे नान्यस्य। तुष्टूषति (१७२पृ० १२सू०) संप्रसारणे सुष्वापयिषति। सिषाधयिषति एतयोः किं सिसेधिषति। उपसर्गात्तु भवत्येव इण् कोरित्यस्यैव नियमर्थत्वादस्य तेन परिषिषेविषते परिषिषिक्षति। षणि किम् तिष्ठासति। अभ्यासेण इत्युक्तेर्नेह इण्धातोः प्रतीषिषति।

१· ६:·
न स्विदिसदिसहीनाम् ॥ १४ ॥

एषान्तानामेषां प्रागुक्तं षत्वं न स्यात्। सिस्वेदयिषति सिसादयिषति सिसाहयिषति। "समानार्थसनन्तात्तु न सन् तुल्यार्थकः पुन" रित्युक्तेः इच्छार्थकसनन्तान्न पुनरिच्छार्थकः सन् स्वार्थसनन्तात्तु स्यादेव।

इति सनन्तप्रकरणम्।

यङन्तप्रकरणम्।

५· ५· ५·
धातोरेकाचो हलादेः सूचिसूत्रमूत्राट्यर्त्य-
५:··१· ७· ७··।· ७· ५··१·
र्णोतिभ्यश्च पौनःपुन्ये भृशार्थे च यङ् शुभरुचस्तु
७·
भृशार्थे ॥ १ ॥

पौनःपुन्ये भृशार्थे च एकाचो हलादेर्धातोः सूचा-

रेव यङ् स्यात् शुभरुचस्तु अग्राह्यौं । ङित्त्वा-दात्मनेपदम् (१५२पृ० १सू०) द्वित्वे अभ्यासकार्य्यं

६· १· ७:
अभ्यासस्य गुणो यङ्लुकोः ॥ २ ॥

यङि परे तल्लुकि च सति अभ्यासस्येको गुणः स्यात् । इति गुणे धातुसंज्ञायां कर्त्तृलकारे शबादौ, बोभूयते । बोभूयेत । बोभूयताम् । अबोभूयत । अबोभूयिष्ट । अनेकाच्त्वात् आमि क्राद्यनुप्रयोगे बोभूयाञ्चक्रे बोभयाम्बभूव बोभूयामास । बोभूयिता । बोभूयिषीष्ट । बोभूयिष्यते । अबोभूयिष्यत । एकाचः किं जागृदरिद्रादेर्न । हलादेः किम् अजादेर्न । सूचादेरनेकाच्त्वादप्राप्तौ पृथग्ग्रहणम् । सोसूच्यते सोसूत्र्यते इत्यादि एकाचएव षोपदेशविधानात् स्वरान्तसादित्वेऽपि अनेकाच्त्वेन षोपदेशाभावात् सूत्र्यादेर्न षत्वम् ।

५· ६· १· ७·
हलो यस्य लोप आर्द्धधातुके ॥ ३ ॥

आर्द्धधातुके परे हलः परस्य यस्य लोपः स्यात् । यस्येत्यरकारयुक्तस्य ग्रहणम् । यलोपे सोसूचाञ्चक्रे सोसूचितेत्यादि ।

६· ६· १· ७· ०· ·१·

अकितोऽभ्यासस्य दीर्घो यङि तलुकि च ॥ ४॥
ककारेदन्यस्याभ्यासस्य दीर्घः स्यात् यङि परे तलुकि च। इति दीर्घे अटाट्यते। ऋ—(१७२पृ०११सू०) गुणे अर्थे इत्यस्य अजादितया अकारं विहाय (१७५पृ०१८सू०) अये अत्युक्तेःरसहितस्य र्थ्यभागस्य द्वित्वे हलादिशेषे दीर्घे अरार्थ्यते। दीर्घे जर्घू-न्यते। बेभिद्यते। यलोपस्य स्थानिवत्त्वेन न गुणः बेभिदिता।

५ः· ०· ·।·

गत्यर्थेभ्यः कौटिल्ये यङ् ॥ ५ ॥
गत्यर्थेभ्यः कौटिल्येऽर्थे यङ् स्यात्। कुटिलं व्रजति वाव्रज्यते

५ः·

लुपसदचरजपजभदहदन्शगृभ्यो भाव

७·

गर्हायाम् ॥ ६ ॥
एभ्यः क्रियानिन्दायामर्थे यङ् स्यात्। गर्हितं लुम्पति लोलुप्यते। एवं सासद्यते

६· ६·

चर फल जप जभ दह दन्श सन्जामभ्यासस्य

·।· १· ·१· ७· ०· ·।·

नुक् पदान्तवच्च यङि तलुकि च॥ ७॥
यङि परे तलुकि च सति एषामभ्यासस्य नुँगागमः

स्यात्। उकावितौ। इति लुकि पदान्तवद्भावाद् अनुस्वारे पक्षे परसवर्णे च

६: ५· ६·६· ·१·

चरफलोरभ्यासात् परस्यात उत् ॥ ८ ॥

अनयोरभ्यासात् परस्यातः स्थाने उत् स्यात् यङि तल्लुकि च सति। इति उत्वे चंचूर्य्यते चञ्चूर्य्यते। पंफुल्यते पम्फुल्यते। गर्हितं गिरति (१४५पृ० ४सू०) लत्वे जेगिल्यते (१७२पृ० ११सू०) गुणे सास्मर्य्यते।

६· ६· ·१· ·१·

अदुपधस्याऽनुनासिकान्तस्य नुँक् पदान्तवच्च ।९॥

अदुपधस्यानुनासिकान्तस्याभ्यासस्य नुगागमः पदान्तवच्च स्यात् यङि परे तल्लुकि च सति। यंयम्यते। (१४१पृ०१२सू०) ङाभावे जाजायते पक्षे जंजन्यते।

६:· ६· ·१·

वञ्चुस्रन्सुध्वन्सुकसपतपदस्कन्दामभ्यासस्यनीक् ॥१०॥

एषामभ्यासस्य नीगागमः स्यात् यङि परे तल्लुकि च सति। क इत्। इति नीकि अकितइत्युक्तेर्न दीर्घः वनीवच्यते सनीस्रस्यते पनीपत्यते।

७· ६·१· ७·

हिंसायां हनो घ्नीर्यङि ॥ ११ ॥

यङि परे हिंसायां हन्तेः घ्नीः स्यात्। जेघ्नीयते। हिंसाया अन्यत्र आजंघन्यते।

६॰ ॰१॰ ६॰ ७ः

ऋत्वतो रीगभ्यासस्य यङ्यङ्लुकोः ॥ १२ ॥

ऋकारवतो धातोरभ्यासस्य रीगागमः स्यात् यङि तल्लुकि च। क इत्। नरीनृत्यते जरीगृह्यते वरीवृत्यते परीस्पृश्यते।

६॰ १॰ ७॰

स्वपिवेञोः संप्रसारणं यङि ॥ १३ ॥

अनयोः संप्रसारणं स्याद् यङि। सोषुप्यते वेवीयते।

६॰ ॰१॰०॰ ७॰

घ्रौङोऽयंङ् यि क्ङिति ॥ १४ ॥

किति ङिति च यकारे परे घ्रौङोऽयंङ् स्यात् अङावितौ। घ्राघ्यते। सिचस्तु सेसिच्यते (१८८ पृ० ४५०) न षत्वम्

६॰ ॰१॰७॰ ७॰॰१॰ ७॰

ऋतो रीङ्यि च्वौ चाकृत्सार्व्वधातुके ॥ १४ ॥

यादौ प्रत्यये च्वौ च परे ऋकारान्तस्य रीङ् स्यात् नतु कृति सार्व्वधातुके च। ङ इत्।

इति रीङि चेक्रीयते।

इति यङन्तप्रकरणम्।

यङ्लुगन्तप्रकरणम्।

५॰ ५॰ ६॰ ॰१॰ ॰१॰ ७॰ ॰१॰ १॰

अनुतो धातोर्यङोलुग्वाऽच्प्रत्यये तु नित्यम् ॥१॥ उदन्तभिन्नाद्धातोः परस्य यङो लुग्वा स्यादच्प्रत्यये परे तु नित्यम्।

७॰ ॰१॰ ७॰ १॰ ॰१॰ ॰१॰

यङ्लुकि द्वित्वादि कर्त्तरि परस्मैपदमदादिवच ॥२॥ यङो लुकि सति यङन्तनिमित्तकद्वित्वादिकार्य्यं तदन्तात् कर्त्तरि परस्मैपदमदादिवत् शप् तलुग्रूपकार्य्यञ्च स्यात्। भुवो-यङोलुकि द्वित्वाभ्यासकार्य्यादौ बोभू इति धातुसंज्ञायाम् कर्त्तरि, परस्मैपदे अपि तलुकि च पक्षे तिपः (१२५पृ०२८सू०) ईटि गुणे बोभवीति रुस्वोरेवापितोऽपि यङ्लुकस्तु पित एव वेट् इति सिद्धान्तात् तसादेर्नेट् बोभूतः बोभुवति। बोभूयात् बोभवीतु बोभोतु। अबोभवीत् अबोभोत्। लुङि सिचो लुकि अबोभूत्।

७॰ ७॰ ॰१॰ ॰१॰ १ः ७॰

यङ्लुकि क्यङ्लोपे च न गुणवृद्धी आर्द्धधातुके ॥३॥* आर्द्धधातुके परे यङ्लुकि क्यङ्लोपे च न गुणवृद्धी स्याताम्। इति गुणनिषेधे उवङि बोभुवाञ्चकार। बोभुविता। बोभूयात्। बोभुविष्यति।

---

* आर्द्धधातुके इति निमित्तसप्तमी आर्द्धधातुके निमित्त इति क्यङ्लोप एवान्वेति यङ्लुकोऽनिमित्तत्वात् तेन तत्रार्द्धधातुके परेऽपि गुणवृद्धी स्त इति सिद्धान्तकौमुद्यां स्थितम् भाष्ये तु वेभिदिता मर्मरं जितेत्युदाहृत्य तदसत्त्व इह यङ्लुकि गुण वृद्धि निषेधोऽभिहितः।

अधोभुविषत् (२०४पृ०४सू०) दीर्घं नद-नानदीति नानत्ति। तुकि उत्वे च चर-चञ्चुरीति चञ्चूर्त्ति। फल-पंफुलीति पंफुल्ति। गम जंगमीति जंगन्ति। जंगतः। जंग्मति। जन-जंजनीति जंजन्ति। जाजातः। जंज्ञति। खन-चंखनीति चंखन्ति। चाखातः। नीकि-वनीवञ्चीति वनीवङ्क्ति।

६० ६० १।०।० ७०

ऋत्वतोऽभ्यासस्य रुग्रिकौ च यङ्लुकि॥ ४॥

यङो लुकि सति ऋकारवतो धातोरभ्यासस्य स्थाने रुग्रिकौ चकारात् पूर्व्वप्राप्तो रीङ् पर्य्यायेणैते स्युः। चरीकरीति चरिकरीति चर्करीति। ईडभाव पक्षे चरीकर्त्तीत्यादि। एवम् (१४०पृ०११सू०) गुण निषेध इत—वरीवृतीति वरिवृतीति वर्वृतीति पक्षे वरीवर्त्तीत्यादि

श्तिपा शपानुबन्धेन निर्द्दिष्टं यद्गणेन च।

यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि।

इत्युक्तकार्य्यपञ्चकं विहाय सर्व्वं मूलधातोरिव कार्य्यम् तेन ग्रहादेर्ङितीति संप्रसारणम् जागृढः। पापृछः। स्वपादेः कित्येव संप्रसारणं सासुप्यात्। अप्रसिद्धत्वाद्धिङ्मात्रमुदाहृतम्।

इति यङ्लुगन्तप्रकरणम्।

नामधातुप्रकरणम् ।

आत्मनः पुत्रमिच्छतीति वाक्ये

५· ५· ५· ·१· ·१·
इच्छासंबन्धिन इष्यमाणात्—सुपः क्यच् वा
·१· ५: ·१· ·१· ५: ·१·
न मान्ताव्ययेभ्यः काम्यच् तु तेभ्योऽपि ॥ १ ॥

इच्छाकर्त्तृसम्बन्धिन इष्यमाणार्थकात् सुबन्तात् क्यच् वा स्यात् न तु मान्तादव्ययाच्च। काम्यच् तु तेभ्योऽपि। क्यचः कचावितौ काम्यचस्तु चइत्। इति क्यचि सनाद्यन्ततया धातुत्वे

६· ६· ·१·
धातुप्रातिपदिकावयवस्य सुपो लुक् ॥२॥

धातोः, प्रातिपदिकस्य, चावयवस्य सुपो लुकस्यात्। इति सुपो लुकि

·१· ६· ७· ७· ·१· ७: ·१· १·
ईदस्य क्यचि च्वौ च क्यङ्क्यषोस्तु दीर्घः ॥ ३ ॥

क्यचि च्वौ च परे अवर्णस्य ईत् स्यात् क्यङ्क्यषोस्तु दीर्घः। इत्यस्येत्वे कर्त्तरि लकारशबादौ पररूपे पुत्रीयति। मित्रीयति धनीयति। गाम्-(२२पृ० ६सू० अवादेशे गव्यति। नावम्-आवादेशे नाव्यति। क्यचि क्यङि च नान्तस्यैव पदत्वस्वीकारो नान्यस्येति

(२२पृ० २सू०)न वलोपः। राजानम्--पदत्वात् नस्यलुपि तस्य (४८पृ० २सू०)असिद्धत्वाभावेनास्येत्वे राजीयति। कर्त्तारम् (२०६पृ०१४सू०)रीङि कर्त्त्रीयति। मातरम् मात्रीयति। वाचम् पदत्वाभावात् न कुत्वम् वाच्यति। समिधम् समिध्यति।

५· ६: ६: १· ·१· ७·

हलः परयोः क्यच्क्यङोर्लोपो वार्द्धधातुके॥४॥

आर्द्धधातुके परे हलः परयोः क्यच्क्यङोर्लोपो वा स्यात्। लुटि क्यलोपे (२०७पृ०२सू०) न गुणः। समिधिता समिध्यिता। धनम्-धनःकाम्यति। किम्-किंकाम्यति स्वर्-स्वःकाम्यति

१:· ७:·

अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु॥५॥

एतेष्वर्थेष्वेते क्यजन्ता निपात्यन्ते। अशनं बुभुक्षते अशनायति। उदकं पातुमिच्छति उदन्यति। धनमतितृष्णयेच्छति धनायति।

६: ७· ·१· ७·

अश्वदृषभयोर्मैथुनेच्छायां सुँक् क्यचि॥६॥

एतयोरेतदर्थे सुँगागमः स्यात् क्यचि परे। उकावितौ। अश्वं-यभ्तुमिच्छति अश्वस्यति। दृषम्-दृषस्यति गौः।

सर्व्वप्रातिपदिकानां सुँगसुँकौ लालसायां न षत्वञ्च ॥ ७ ॥*

लालसायां सर्व्वप्रातिपदिकानां सुँगसुँकौ स्तः । सति निमित्ते तत्सस्य न षत्वम् । दधि-दधिस्यति दध्यस्यति । मधु-मधुस्यति मध्वस्यति ।

उपमानात्-कर्म्मण आधाराच्चाचारे क्यच् ॥८॥

उपमानात् कर्म्मण आधाराच्च सुबन्तादाचारेऽर्थे क्यच् स्यात् । आचारश्च पोषणसम्माननादिरूपो व्यवहारः । पुत्रमिवाचरति भृत्यम् पुत्रीयति पोषयतीत्यर्थः । नृपमिवाचरति सचिवं नृपीयति संमानयतीत्यर्थः । मित्रमिवाचरति प्रभुं मित्रीयति पश्यतीत्यर्थः । शिवमिवाचरति द्विजं शिवीयति । विष्णुमिवाचरति शिवम् (१७८पृ० १सू०) दीर्घं विष्णूयति । प्रासादे इवाचरति कुट्यां प्रासादीयति ।

कर्त्तुः क्यङ्क्विपौ सलोपश्च न पदान्तकार्य्यम् ॥९॥

उपमानात् कर्त्तुः सुबन्तात् क्यङ्क्विपौ स्यातां सान्तस्यान्त्यलोपश्च तत्र न पदान्तकार्य्यम् ।

ओजसोऽप्सरसोर्नित्यमन्यस्य तु विभाषया ॥

---

* क्यचीत्यनुवर्त्तनीयं तेन क्यचि परे सुगसुकौ स्त इति व्याख्येयम् ।

* सर्व्वेषां नित्यसलोपे प्राप्ते व्यवस्थामाह ओजस इत्यादि ।

क्यङः कङाविती ङित्त्वादात्मनेपदम्। क्विपस्तु सर्व्वं इतः। (२०८पृ० ३सू०) दीर्घं हंस इवाचरति हंसायते काकः। ओजः-ओजायते। अप्सरः-अप्सरायते। पयः-पयायते पयस्यते। यशः-यशायते यशस्यते। हरितवर्णा स्त्री हरिणी वक्ष्यमाणेन पुंवद्भावे हरितायते। श्येनी श्येतायते। कुमारी-कुमारायते गुर्वी गुरूयते। कोपधादेर्निषेधात् पाचिकायते इत्यादि। क्विपि तु कृष्ण इव आचरति कृष्णति। कविरिवाचरति कवयति। श्रीरिवाचरति श्रयति। अस्यानेकाच्त्वाभावात् लिटि न आम्; तेन शिश्राय।

५ः ७ ७ १ ६

भृशादिभ्योऽभूततद्भावे भवार्थे क्यङ् हलो

१ १

लोपश्च ॥ १० ॥

अभूततद्भावे भवत्यर्थे भृशादिभ्यः क्यङ् स्यात् तस्मिन् परे च हलो लोपः। भृश शीघ्र चपल, मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् शश्वत् ओजस् सुरजस् इत्यादि भृशादि। अभृशो भृशो भवति भृशायते सुमनसः सलोपे सुमनायते। भवत्यर्थे किम् अभृशं भृशं करोतीत्यादौ न।

५: १० १० ।०

लोहितादिडाज्भ्यः क्यष् उभयपदञ्च ॥ ११ ॥

लोहितादिभ्यः डाजन्ताच्च क्यष् स्यात्। तदन्तोचो-भयपदम्। कषावितौ। लोहित चरित नील फेन मन्द्र हरित दास लोहितादि। दीर्घ लोहितायति लोहितायति। डाचः पटपटायते।

५: ७० १०

कष्टकृच्छ्राभ्यां क्रमणे क्यङ् ॥ १२ ॥

आभ्यां क्रमणे क्यङ् स्यात्। कष्टाय क्रमते कष्टायते पापं कर्त्तुमुत्सहत इत्यर्थः। एवं कृच्छ्रायते।

५० ५० ७० ५० ७०

कर्मणोरोमन्थादावर्त्तने तपसश्चरणे ॥ १३ ॥

उद्गीर्य चर्व्वणं रोमन्थः आवर्त्तनमभ्यासः। आवर्त्त-नेऽर्थे रोमन्थात् कर्म्मणः, चरणेऽर्थे तपसश्च कर्मणः, क्यङ् स्यात्। रोमन्थमावर्त्तयति रोमन्थायते। तपश्चरति तपस्यति।

५: ५: ७०

कर्म्मभ्यां वाष्पफेनाभ्यामुद्वमने ॥ १४ ॥

आभ्यां कर्म्मभ्यामुद्वमनेऽर्थे क्यङ् स्यात्। वाष्पमु-द्वमति वाष्पायते। फेनं फेनायते।

५ः ७॰
शब्दवैरकलहेभ्यः करणे ॥ १५ ॥
एभ्यः कर्म्मभ्यः करणेऽर्थे क्यङ् स्यात्। शब्दं करोति शब्दायते। वैरं—वैरायते कलहं-कलहायते।

५ः ७॰
सुखादिभ्योऽनुभवे ॥ १६ ॥
सुखादिभ्यः कर्म्मभ्योऽनुभवेऽर्थे क्यङ् स्यात्। सुख दुःख तप्त कच्छ्र अलीक प्रतीप करुण कुशल सुखादि। सुखमनुभवति सुखायते। दुःखम्-दुःखायते।

५॰ ७॰ ५॰ ७॰ ॰१॰
पुच्छादुदसने भाण्डात् समाचयने णिङ्—॥१७॥*
आभ्यां कर्म्मभ्यां क्रमेणैतयोरर्थयोर्णिङ् स्यात्। णङावितौ। ङित्त्वादात्मनेपदम्। पुच्छमुदस्यति उत्पुच्छयते। भाण्डानि समाचिनोति संभाण्डयते।

५ः ७॰ ५॰ ७॰ ७॰ ॰१॰
मुण्डादिभ्यः कृतौ व्रताद्भोजने तन्निवृत्तौ च
५॰ ७॰
वस्त्रात् समाच्छादने ॥ १८ ॥
मुण्डादि व्रतादिभ्य एष्वर्थेषु णिङ् स्यात्। मुण्ड मिश्र श्लक्ष्ण लवण मुण्डादि। मुण्डं करोति मुण्डयते। पयो व्रतयति भुङ्क्ते इत्यर्थः। शूद्रान्नं व्रतयति परिहरति। वस्त्रं समाच्छादयति संवस्त्रयति।

---

* उदसनसमाचयनयोराद्यावुपसर्गावुक्तौ विङन्तेऽपि प्रयोज्याविल्युदाहरणेन ज्ञापितम्।

५: ७० ०१० १०‌०१०

कलिहलिभ्यां कृतौ णिजन्त्यलोपश्च ॥ १९ ॥*

आभ्यां कृतौ णिच् स्यादन्त्यलोपश्च । णचावितौ । कलनं कलिः मह्वलं हलिः । कलयति हलयति अग्लोपित्वात् न सन्वद्भावः । अचकलत् । अचहलत् ।

५:० ०१००१० ७०

सत्यार्थवेदेकाजदन्तेभ्यः आपुक् च कृतौ ॥ २० ॥

सत्यादिभ्यः करणार्थे णिच् स्यात तस्मिंश्चापुक् । उकावितौ । सत्यं करोति सत्यापयति । अर्थम्—अर्थापयति । वेदम्-वेदापयति । स्वम्-स्वापयति ।

५:० ७०

पाशादिभ्योऽर्थविशेषे ॥ २१ ॥

अर्थविशेषे पाशादिभ्यो णिच् स्यात् । पाशं विमुञ्चति विपाशयति । रूपं पश्यति रूपयति । वीणयोपगायत्युपवीणयति । श्लोकैरुपस्तौति उपश्लोकयति । सेनया अभियाति अभिषेणयति । लोमान्यनुमार्ष्टि अनुलोमयति । त्वचं गृह्णाति त्वचयति । वर्म्मणा संनह्यति संवर्म्मयति । वर्णं गृह्णाति वर्णयति । स्थूलादिभ्योऽपि करणार्थे णिच् तत्र स्थूलादीनां स्थवाद्यादेशाः । यथा ।

स्थूलः स्थवः स्थिरः स्थः स्याद् दूरो दव उरुर्वरः ।

---

* अन्त्यलोपस्येत्युक्तिः स्पष्टार्था णिचो टिलोपस्याग्रे वक्ष्यमाणत्वात् तेनैवास्य लोपसिद्धेः ।

पृथुः प्रथः प्रियः प्रः स्यात् क्षिप्रः क्षेपो मृदुर्म्म्रदः॥
कृशः क्रशो बहुर्भूः स्याद्वाढः साधो गुरुर्गरः।
अन्तिकस्य भवन्नेदो दीर्घो द्राघो दृढो द्रढः॥
भृशो भ्रशो युवाल्पौ वा कन् स्यात् पक्षे युवा यवः।
क्षुद्रः क्षोदः प्रशस्यः श्रो ज्यो वृद्धस्य ज्य इतीष्यते॥
बहुलस्य भवेद्बंहो वृद्धो वर्षस्तथा भवेत्।
णिचीमनीष्ठे आदेशा इयसौ च क्रमादिमे॥
एषु डिद्वदनेकाचष्टिलोपः स्यात्ततो भवेत्।
विनो मतोश्च लुक् तेषु प्रकृतेः पूर्व्वरूपता॥*

स्थूलं करोति—स्थवयति। स्थिरम्—एकाजदन्तत्वादापुकि स्थापयति। दूरम्-दवयतीत्यादि। तनुम्-डिद्वद्भावे टिलोपे तनयति लघुम्—लघयति। आख्यानार्थेऽपि सर्व्वनामभ्यो णिच्। तत्र विनो मतुपश्च लुकि प्रकृतेः पूर्व्वरूपता। स्रग्विणमाचष्टे स्रजयति। ईयसन्तम्-ईयसयति। श्रीमन्तं श्रीमतीं वाचष्टे श्राययति।

५:· ७· ·१·

कण्ड्वादिभ्यः स्वार्थे यक्॥ २२॥

कण्डूप्रभृतिभ्यो धातुनामरूपेभ्यः स्वार्थे यक् स्यात् कद्वत् कण्ड्वादि। (सि० उ० २३७ पृ०) कण्डूयते

---

* पूर्व्वरूपतेति पूर्व्वरूपकारकतया व्यपुपचर्य्यं तेन शीताहरणमाचष्टे इत्यत्र शीतां ह्लारयतीत्यादिप्रयोगः तत्र मतोर्लोपे प्रकृतिवत् कर्म्मकारकत्वम् प्रपञ्चितश्चैतत् शब्दार्थरत्नेऽस्माभिः।

महीयते चिह्नीयते क्लीबीयते। ईर्ष्यति ईर्ष्यते।

इति नामधातुप्रकरणम्।

आत्मनेपदप्रकरणम्।

५· १· ७·

ङित आत्मनेपदं-कर्त्तरि— ॥ १ ॥

कविकल्पद्रुमगणपाठे ङकारेतो धातोरात्मनेपदं स्यात् कर्त्तरि। एधङ्-एधते। शीङ् शेते। आसङ् आस्ते। वसङ् वस्ते।

७· ५·

कर्म्मव्यतिहारेऽहृगतिहिंसार्थहसजल्पान्येभ्यः ॥ २ ॥

हृभिन्नगत्यर्थहिंसार्थहसजल्पान्येभ्यः सर्व्वेभ्यो धातुभ्यः कर्म्मव्यतिहारे कर्त्तरि आत्मनेपदं स्यात्। एकजातीयक्रियाकरणं कर्म्मव्यतिहारः। लुव्यतिलुनीते अन्यकर्तृकलवनजातीयं लवनं करोतीत्यर्थः। अस—व्यतिस्ते (१८८ पृ० ११सू०) षस्वे व्यतिषाते व्यतिषते व्यतिषे (१५५पृ० ६सू०) सलोपे व्यतिह्वे।

६· १· ७·

अस्ते र्हएति ॥ ३ ॥

एकारादौ परे अस्ते र्हः स्यात्। इति हादेशे

अस्ते रलोपे पररूपे व्यतिषे। गत्यर्थादौ तु व्यतिगच्छन्ति व्यतिखादन्ति। व्यतिहसन्ति व्यतिजल्पन्ति। हरतेस्तु भवत्येव व्यतिहरते।

विपराभ्यां परस्यात्र जयते (१) रात्मनेपदम्।
परिव्यवेभ्यः क्रीणाते(२) स्तङ्स्यात् कर्त्तरि नेर्विशः३
आङो दो ४ ऽमुखविस्तारे शपथे शपते ५ र्भवेत्।
पर्य्यन्ववाङः क्रीड़ः ६ स्यात्कूजार्थात्तु ७ तङ्समः।
आङो नीतेः ८ पृच्छते ९ स्व चमायामागमे१० र्भवेत्।
नाथते११ राशिषि भवेत् जिज्ञासायान्तु शिचतेः १२
हर्षात् भचाय वासाय लेखनार्थात् किरस्तु१३ तङ्।
अपात्कर्त्तरि सुट् तस्य चतुष्पादेऽथ पक्षिणि।
प्रतिज्ञायां, निर्णयार्थमाश्रये, ऽभीष्टबोधने।
वर्त्तमानात्तिष्ठतेस्त १४ ङ् तथा कर्मविवर्ज्जितात्१५।
देवपूजासंगमयोर्मैत्रां मार्गगतौ तथा।
उपात्तङ् १६ तिष्ठतेश्चैव मन्त्रसाधनकाच १७ तङ्।
तथा संप्रपरिभ्यस्य १८ उद १९ श्चानूर्द्ध्वकर्म्मणि।
स्वाङ्गकर्म्माकर्म्मकात् २० तङुद्भ्यां तपते २१ र्भवेत्।

विजयते पराजयते।१। परिक्रीणीते एवं वेः अवाच। तङ् आत्मनेपदम्।२। निविशते।३। आदत्ते मुखविस्तारे तु मुखं व्याददाति।४। कृष्णाय

शपते गोपी । ५ । परिक्रीड़ते अवक्रीड़ते । ६ । संक्रीड़ते कूजने तु संक्रीड़ति चक्रम्। ७ । आहुते । ८ । आपृच्छते । ९ । कालमागमयते सहते न त्वरते इत्यर्थः । १० । मोक्षं नाथते मोक्षो मे भूयादिति प्रार्थयते इत्यर्थः ११ । घ्रात्वं घ्रिच्चते घ्रातुमिच्छतीत्यर्थः । १२ । हर्षेण भक्षार्थी वासार्थी वा वृषः श्वा कुक्कुटो वा अपस्किरते। अन्यत्र अपकिरति ।१३। शब्दं नित्यमातिष्ठते प्रतिजानीते इत्यर्थः। संशय्य कर्णादिषु तिष्ठते यः कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः। रामाय तिष्ठते सीता स्वाभिप्रायं प्रकाशयतीत्यर्थः ।१४। तिष्ठते १५। विष्णुमुपतिष्ठते पूजयतीत्यर्थः। गङ्गायमुनामुपतिष्ठते तयासंगच्छते इत्यर्थः। साधुमुपतिष्ठते मैत्रीकरोतीत्यर्थः। पन्थाः काशीमुपतिष्ठते प्राप्नोतीत्यर्थः । १६ । गायत्र्या सूर्य्यमुपतिष्ठते। १७ । संतिष्ठते प्रतिष्ठते परितिष्ठते । १८ । ग्रामादुत्तिष्ठते उत्पद्यते इत्यर्थः। ऊर्द्धकर्म्मणि तु आसनादुत्तिष्ठति । १९ । उत्तपते वितपते श्रीषम् ।२०। उत्तपते वितपतेवा२१। हनो ।२२। यम । २३। स्तथाभूतादाङः कर्त्तरि तङ् भवेत्। समः कर्म्माविवक्षायां गम्य । २४ । स्तिं।२५।

स्तु। २६। दृश्यो। २७। भवेत्।
उपसर्गादस्यते२८स्तङ्ह्यते२९ स विभाषया।
निसंव्युपेभ्यो ह्वयतेः३० स्पर्द्धायामाङ३१ एव तङ्।
सूचने, भर्त्सने, दृष्टे सहसैव प्रवर्त्तने,।
सतो गुणान्तराधाने, सेवायां विनियोजने,।
कथने च कृञ३२स्तङ् स्यादधेस्तु ३३ सहने तथा।
वेः शब्दकर्म्मणस्तस्मात्३४कर्म्मणा रहिताच्च३५ तङ्।
शास्त्रार्थवेदनेनैव सम्माने तत्त्वनिश्चये।
उत्क्षेपणे प्रार्थने च ऋणनिर्यातने तथा।
अन्तिकप्रापणे भृत्या व्यये चापनये तथा।
अमूर्त्ते कर्त्तृगे कर्मण्येषु तङ् नयते३६ भवेत्।

जर आहते पादमायच्छते आहते आयच्छते वा। २२ ।२३। संगच्छते।२४। समृच्छते। २५। संशृणुते।२६। संपश्यते।२७। निरस्यते निरस्यति। २८। समुहते समुहति ।२९। निह्वयते संह्वयते ३०। कृष्णः कंसमाह्वयते। अन्यत्राह्वयति। ३१ उत्कुरुते हिंसाद्यनिष्टरूपमपकारं सूचयतीत्यर्थः। शत्रूनपकुरुते भर्त्सयतीत्यर्थः। परदारान् प्रकुरुते सहसैव तेषु प्रवर्त्तते इत्यर्थः। स्वर्णस्योपस्कुरुते कुण्डलादिरूपान्तरं प्रापयतीत्यर्थः अत्र

कर्म्मणि षष्ठी। साधूनुपकुरुते सेवते इत्यर्थः। शतं* प्रकुरुते विनियुङ्क्ते इत्यर्थः। गाथाः प्रकुरुते कथयतीत्यर्थः।३२। शत्रूनधिकुरुते सहते इत्यर्थः। ३३। अर्द्धं विकुरुते। ३४। छात्रा विकुर्व्वन्ति विकारं लभन्ते।३५। गुरुमुपनयते शास्त्रज्ञान-लाभेन सम्मानयति। शास्त्रमुपनयते तत्त्वेन निश्चिनोतीत्यर्थः। दण्डमुन्नयते उत्क्षिपति। राजा-नमुन्नयते प्रार्थयते। राजकरमुन्नयति विगणय्य शोधयतीत्यर्थः। भृत्यानुन्नयते भृतिदानेनान्तिकं प्रापयतीत्यर्थः। धनमुन्नयते व्ययितं करोतीत्यर्थः। शिष्यमुपनयते उपनयनसंस्कारेणान्तिकस्थं करोतीत्यर्थः। क्रोधं विनयते शमयतीत्यर्थः। कर्त्तृगे किम् गुरोः क्रोधं विनयति। अमूर्त्ते किम् ऋणं विनयति। ३६।

उत्साहे चाप्रतिहतौ वृद्धौ च क्रमतेस्तु३७तङ्।
परोपाभ्याञ्चेतरार्थे ३८ तङाङो ३९ ज्योतिरुद्गमे।
प्रोपाभ्यां तङ्४० समारम्भे वेः पादचलनार्थकात्४१।
विभाषया क्रमेस्तङ्स्यादुपसर्गविवर्ज्जितात्४२।
निह्नवे ज्ञो४३ऽकर्म्मकाच्च४४ संप्रतिभ्यामचिन्तने४५।
यत्ने च ज्ञानपूर्व्वोक्तौ विमतावुपसान्त्वने।

* कर्म्मणि षष्ठी नञ्समासेन तत्रः प्रति [illegible] इति २३७पृ० ५७सूत्रे च।

प्रार्थने च वदे४६र्व्यक्तौ संभूयोच्चारणे४७तङ्।
अनोरकर्म्मका४८द्युक्तौ सहोक्तौ विमतौ तु वा ४९।
अवाङ्गिरः५० कर्त्तरि तङ् प्रतिज्ञायां सम५१स्तथा।
उदश्चरः५२कर्म्मयुक्तात् समो५३युक्तात् तृतीयया।
तृतीया चेच्चतुर्थ्यर्थे दाणः संपूर्व्वकात्तु५४ तङ्।
उपपूर्व्वाद्विवाहार्थे यम५५स्तङ् कर्त्तरीष्यते।*

अध्ययनाय क्रमते उत्सहते इत्यर्थः। शास्त्रे बुद्धिः क्रमते न प्रतिहन्यते इत्यर्थः। शास्त्राणि क्रमन्ते हृदा नीत्यर्थः। ३७। एवं पराक्रमते उपक्रमते अर्थस्तु तद्वत्। ३८। सूर्य्य आक्रमते। ३९। प्रक्रमते उपक्रमते आरभते इत्यर्थः। ४०। विक्रमते वाहः पद्भ्यां चलतीत्यर्थः। ४१। क्रमते क्रामति ४२। शतमपजानीते अपलपतीत्यर्थः। ४३। सर्पिषा जानीते प्रवर्त्तते इत्यर्थः। ४४। संजानीते प्रतिजानीते चिन्तने तु संजानाति स्मरतीत्यर्थः। ४५। सेत्रे वदते यतते इत्यर्थः। शास्त्रे वदते ज्ञानपूर्व्वं वदति। विमतौ, सेत्रे विवदन्ते। भृत्यानुपवदते सान्त्वयतीत्यर्थः। नृपमुपवदते प्रार्थयते इत्यर्थः। ४६। संप्रवदन्ते विप्राः सम्भूय व्यक्तं वदन्तीत्यर्थः। ४७। अनुवदते ४८। विप्रवदन्ते विप्रवदन्ति वा वैद्या

* तृतीया चेदिति अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीयेति २,१,२२ सूत्रस्थवार्त्तिकेनेति शेषः।

विप्रा वा व्यक्तं सम्भूय विरुद्धं वदन्तीत्यर्थः। ४९। अवगिरते। ५०। संगिरते प्रतिजानीते इत्यर्थः। ५१। धर्ममुच्चरते उल्लङ्घ्य गच्छति। अन्यत्र उच्चरति उपरिष्टाद्गच्छतीत्यर्थः। ५२। पादेन सञ्चरते। ५३। वेश्यया संयच्छतेऽभीष्टम् वेश्यायै ददातीत्यर्थः। ५४। भार्य्यामुपयच्छते ५५।

तङ् ज्ञा,५६श्रु५७स्मृ५८ पश्यते५९श्च सनन्तात्कर्त्तरी-
ष्यते। अनोर्जिज्ञासतेर्नैव प्रत्याङ्भ्याञ्च तथा श्रुवः।
स्वराद्यन्तोपसर्गात्तङ् युजे६०र्न यज्ञपात्रके।*
अपालने भुजे६१स्तङ् स्यात् त्नुवः६२संपूर्व्वकात्तु
तङ् अस्मृत्यर्थस्य धातोर्यत् कर्म्मण्यन्तस्य चेद्भवेत्।
ण्यन्तस्य कर्त्ता स,तदा तस्मात् ण्यन्तात्६३भवेत्तु तङ्।
णिजन्ताच्च गृधे६४र्वञ्चेः६५प्रतारार्थे तु तङ् भवेत्।
कविकल्पद्रुमग्रन्थे ञित्त्वेन पठितास्तु ये।
णिजन्ताश्चोभयपदास्तेभ्यस्तङ्६६ कर्तृगे फले(उद्देश्ये)।
अपाद्वदो६७ यमो६८ऽयन्थे समुदाङ्भ्यस्तथैव तङ्।
उपसर्गाद्दृते ज्ञ६९श्च तथा तङ् कर्त्तृगे फले (उद्देश्ये)
समीपस्थपदेनैव कर्तृगस्य फलस्य (उद्देश्यस्य) चेत्।
द्योतनं स्यात्तदा तत्र तङ् कर्त्तरि७० विभाषया।
जिज्ञासते५६। शुश्रूषते५७। सुस्मर्षते५८। दिदृक्षते

* स्वरादेः स्वरान्ताच्चोपसर्गात्तेन इनिश्चां न।

।५९। अनीक्षंस्तु अनुजिज्ञासति। तथा प्रतिशुश्रूषति आशुश्रूषति स्वराद्युपसर्गात् उद्युङ्क्ते। स्वरान्तोपसर्गात् प्रयुङ्क्ते नियुङ्क्ते। यज्ञपात्रकर्मकात्तु न। ६०। अन्नं भुङ्क्ते सुखं भुङ्क्ते अपालने किं भूमिं भुनक्ति ६१। संक्ष्णुते शस्त्रम्। ६२। दर्शयते नृपः सेवकान् अणिकर्मं चेत् ख्यन्तस्य कर्त्ता तदा तु भृत्यान् दर्शयति नृपं सचिवः ६३। वञ्चयते ६४ गर्द्धयते ६५ मलुं प्रतारयतीत्यर्थः। यजति यजते। अत्र क्रियायाः फले (उद्देश्ये) कर्तृगामिनि यजते इत्येव ।६६। एवं नयते हरते कुरुते इत्यादि। न्यायमपवदते ६७। व्रीहीन् संयच्छते भारमुद्यच्छते। वस्त्रमायच्छते अन्ये तु वेदमुद्यच्छति ६८। जानीते ज्ञातुं यतते इत्यर्थः ६९। स्वं यज्ञं यजति यजते वा। स्वर्गकामो यजति यजते ७० वा।

इत्यात्मनेपदप्रकरणम्।

परस्मैपदप्रकरणम्।

५· १· ७·

ञित उभयपदं कर्त्तरि॥ १ ॥*

ञकारेतो धातोरुभयपदं स्यादसति विशेषे। नयति नयते।

---

* ञित इति विभक्त्याद्युपलक्षणम् २२१पृ० १५का० विभक्त्य उभयपद विधानात्।

५: ५· १·

जिद्‌ङिद्‌भ्यामन्यस्मात् परस्मैपदम् ॥२॥

जितो ङितश्चान्यस्माद्धातोः परस्मैपदं स्यात् कर्त्तरि वाच्ये । भू-भवति । चित-चेतति ।

परानुभ्यां करोतेः १ स्यादतिप्रत्यभितः क्षिपः २ ।
परेर्मृषः ३ प्राद्वहः ४ श्च व्याङ्परिभ्यो रमे५स्तथा ।
उपाद्रमे ६ विकल्पेन परस्मैपदमिष्यते ।
बुधे, युधे, नशेर्ण्यन्तात् प्रवतेर्द्रवतेरिङः ।
स्रवतेश्च जनेश्चैव परस्मैपदमन्यथात् । ७,—१४
अदिं विना भोजनार्थात्१५ चलनार्थाच्च१६ पण्डिताः ।
अणावकर्मकात्प्राणिकर्तृकाच्च णिजन्ततः ।
परस्मैपदमिच्छन्ति कर्तृगेऽपि क्रियाफले १७ ।
पिबतिं नृत्यतिं हित्वा दमिमायमभायसम् ।
वचिं परिमुहिं मुक्त्वा वदतिं वसतिं तथा ॥

परा करोति अनुकरोति ।१। अतिक्षिपति प्रतिक्षिपति अभिक्षिपति ।२। परिमृषति ।३। प्रवहति ।४। विरमति आरमति ।५। उपरमति उपरमते वा ६। बोधयति ।७। योधयति ।८। नाशयति ।९। प्रावयति १०। द्रावयति ।११। अध्यापयति ।१२। स्रावयति ।१३। जनयति ।१४। भोजयति ।१५। चलयति ।१६।

घ्रायति बालं माता।१७। प्राणिकर्तृकात् किम् शोषयते धान्यं कालः। अदेस्तु आदयति। एवं पाययते नर्त्तयते दमयते आयामयते आयासयते। वाचयते परिमोहयते वादयते वासयते। अत्र चलनार्थतया भोजनार्थतया अकर्मकतया वा फलस्य कर्तृगत्वेन प्राप्तस्यापवादः।*

इतिपरस्मैपदप्रक्रिया।

भावकर्म्मप्रकरणम्।

५· ·१· ७:

धातोस्तङ् भावकर्म्मणोः—॥१॥

भावे कर्म्मणि च वाच्ये धातोस्तङ् स्यात्।

७· ·१·

सार्व्वधातुके यक् ॥२॥

भावकर्म्मणोः सार्व्वधातुके परे धातोर्यक्स्यात्। क इत्।

७· ६· १·

भावे तङ आद्यवचनम् ॥३॥

भावे वाच्ये तङ आद्यवचनमेव प्रयुज्यते। भावो-धात्वर्थः स च धातुना बोधितोऽपि तङानूद्यते

---

* प्राप्तेः परस्मैपद प्राप्तो अपवाद, विभवा भुदाय:।

एकोद्वावित्यादौ प्रथमाया इवानुवादकत्वेऽपि पद-साधुत्वार्थमेव तस्य प्रयोगः। तत्कर्तुश्च प्रत्ययेना-भिहितत्वाभावेन तद्वाचकात् तृतीया। त्वया मया-ऽन्यैश्च भूयते। भूयेत। भूयताम्। अभूयत। लुङि तु अड़ागमे

·१· ७: ७·
चिण् भावकर्मणोस्तनि ॥४॥

भावकर्मवाचिनि तनि परे धातोश्चिण् स्यात्। चणावितौ। इति चिणि वृद्धावावादेशे च (१६२पृ० २७सू०) तनो लुपि अभावि। लिटि बभूवे। लुटि तु

७· ५:· ६:· ·१·
उपदेशेऽज्हनग्रहदृशिभ्यः स्यसिजाशीर्लिङ्लुटामिट्
·१· ·१··१· ७:
वा चिण्वच्च भावकर्मणोः ॥५॥

उपदेशेऽजन्तात् हनादिभ्यश्च भावकर्मणोर्गम्य-मानयोः स्यादीनां स्थाने इट् वा स्यात् स च चिण्वत्। इतीटि चिण्वद्भावात् वृद्धौ भाविता। पक्षे वलादिनिमित्ते इटि भविता। आशीर्लिङि भाविषीष्ट भविषीष्ट। लृटि भाविष्यते भविष्यते। लृङि अभाविष्यत अभविष्यत। अनुभवतेश्च सकर्म-कत्वात् (१२०पृ०२सू०) कर्मणि लकारस्तेन तिङो-

क्तत्वात् कर्मणि प्रथमा कर्तुश्चानुक्तत्वात् तृतीया अनुभूयते आनन्दो जनेन त्वया मया वा। अनुभूयेते सुखदुःखे। अनुभूयन्ते विषयाः। अन्वभावि। अन्वभाविषाताम् अन्वभविषाताम्। अन्वभाविषत अन्वभविषत। भावेस्तु णिलोपे भाव्यते। अभावि। चिण्वत्पक्षे णिलोपे अभाविषाताम् (१८५पृ०१५सू० इटि णिलोपाभावे अभावयिषाताम्। भावयाञ्चक्रे भावयाम्बभूवे भावयामासे इत्यादि। भाविता भावयिता। भावयिषीष्ट भाविषीष्ट। भावयिष्यते भाविष्यते। सनन्तात्तु बुभूष्यते। यङन्तात् बोभूय्यते। यङ्लुगन्तात् बोभूयते। स्तु-स्तूयते अस्तावि अस्ताविषाताम् अस्तोषाताम्। ऋ—(१७२पृ०११सू०) गुणे अर्य्यते। आरि आरिता। अर्त्ता। स्मृ—स्मर्य्यते स्मारिता स्मर्त्ता। कृञ्(१४४पृ० २सू०) रिङि क्रियते अकारि कारिता कर्त्ता। सृ-स्त्रियते असारि सारिता सर्त्ता। हन्यते अघानि अवधि। अघानिषाताम् अवधिषाताम् अहसाताम्। घानिता हन्ता। संप्रसारणे गृह्यते अग्राहि ग्राहिता ग्रहीता दृश्यते अदर्शि। अदर्शिषाताम् अदृक्षाताम्। दर्शिता द्रष्टा।

(१४२पृ० ३सू०) नलोपे मन्थ-मथ्यते । इदितस्तु न वदि-वन्द्यते । यज-इज्यते वच-उच्यते स्वप-सुप्यते शीङः (२०६पृ०१४सू०) अयङि शय्यते । जनः(१४१पृ० १२सू०) वा ङा जायते जन्यते खायते खन्यते । तनोतेरपि वा ङामिच्छन्ति । तायते तन्यते । (१६७ पृ०४०सू०) ईत्वे दा-दीयते धा-धीयते मा-मीयते स्था-स्थीयते गा-गीयते पा-पीयते । लुङि तु

६· ·१· ०· ०· ०· ०··१·

आतो युँक् चिणि कृति ञिति णिति च ॥ ६॥

आदन्तानां युँगागमः स्यात् चिणि, कृति ञिति णिति च परे । उकावितौ । इति युकि अदायि । अदायिषाताम् (१६५पृ०३८सू०) इत्वे अदिषाताम् अधायि अधायिषाताम् अधिषातामित्यादि । शमेर्णिचि णिलोपे शम्यते लुङि (१९२पृ०७सू०) वा वृद्धौ अशामि अशमि । शामिता शमिता शमयिता । ण्यन्तत्वाभावे शम्यते (१६२पृ०२८सू०) वृद्धि निषेधे अशमि । नमेस्तु अनिट्कत्वात् वृद्धौ अनामि । कामादेस्तु अकामि अचामि अवामि ।

६· ०· १··१·

भन्जेश्चिणि नलोपो वा ॥ ७ ॥

चिणि परे भन्जेर्नलोपो वा स्यात् । अभाजि अभञ्जि*

* नलुप इत्यत्र लोपस्यापि पूर्वं सिद्धत्वोक्त्या अभावोऽत्र उपधाकारस्य वृद्धिः पक्षे तु विकल्पे नकारस्योपधात्वात् तस्याभावान्न वृद्धिः ।

६· ·१· १:·१· ५· ·१· २·

लभेर्नुम् चिण्णमुलोर्वोपसर्गात्तु नित्यम् ॥८॥

चिणि णमुलि च परे लभेर्नु मागमो वा स्यात्। उपसर्गात्तु नित्यम्। अलाभि अलम्भि। प्रालम्भि उपालम्भि। द्विकर्म्मकाणान्तु

गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्म्मणाञ्च निजेच्छया।
प्रयोज्यकर्म्मण्यन्येषां ण्यन्तानां लादयो मताः।

दुह्यादयः कारके वक्ष्यन्ते। गौर्दुह्यते पयांसि। राजा अर्थं याच्यते। बालो ग्रामं नीयते ह्रियते कृष्यते उह्यते वा। भोज्यते विप्रमोदनः ओदनं विप्रो वा। बोध्यते बालं धर्म्मः धर्मं वा बालः। अन्येषान्तु बालो घटं दर्श्यते कार्य्यते इत्यादि। अकर्म्मकाणामपि कालदेशादिकर्म्मणां कर्म्मणि भावे च लकार इष्यते मासो मासं वा स्वीयते जनेन।

इति भावकर्माथतिङ्प्रकरणम्।

उत्पत्तिमात्रे कर्तृत्वं सर्व्वत्रैवास्ति कारके इत्युक्तदिशा कर्म्मणो यत्र कर्तृत्वविवक्षा तत्र कार्य्य-भेदमाह

कर्म्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्म्मवत् नत्र पचदुहसकर्म्मकेभ्यः ॥ १ ॥

कर्म्मस्थया क्रियया समानाधिकरणव्यापारः कर्त्ता कर्म्मवत्कारकरूपं कार्य्यं लभते। पचदुहभिन्नसकर्म्मकेभ्यस्तु न। धातोरर्थः क्रिया सा च फलं व्यापारश्च तत्र फलस्य कर्म्मस्थत्वं व्यापारस्य कर्त्तृस्थत्वम्। तथाच कर्म्मस्थफलेन समानाधिकरणो व्यापारो यत्र धात्वर्थो विवक्ष्यते तत्र कर्म्मकर्त्तृव्यवहारः। तत्र धातुविशेषव्यवस्था

कर्म्मस्थः पचतेर्भावः कर्म्मस्थाश्च भिदादयः।
कर्त्तृस्थो बुध्यतेर्भावः कर्त्तृस्थाश्च गमादयः।

कार्य्यञ्च यक् चिण् चिण्वदिट् तङ् चेति। तत्र कर्म्मस्थभावके पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। कर्त्तृस्थभावके तु गच्छति ग्रामः। जानाति वेद इत्यादौ कर्त्तृवत् कार्य्यमिति भेदः।

न दुहस्नुनमां यक्चिणौ कर्म्मकर्त्तरि रधस्तु न चिण्—॥२॥

कर्म्मकर्त्तरि वाच्ये एभ्यो यक्चिणौ न स्तः रधस्तु न चिण्। इति यको निषेधे दुहः अपि तस्तुकि च

गौः पयो दुग्धे। अदुग्ध। प्रस्नुते गौः। नमते दण्डः।

५॰ ५॰॰१॰ ७॰॰१॰ ॰१॰ ७॰

अचो दुहश्च कर्म्मकर्त्तरि वा चिण् तनि॥ ३॥

कर्म्मकर्त्तरि वाच्ये तनि परे अजन्तात् दुहश्च चिण् वा स्यात्। दुहेः पूर्व्वेण निषेधे विकल्पः। अकारि अकृत। अदोहि अदुग्ध।

५ः॰ ५॰ १॰॰१॰

भूषाकर्म्मकिरादिसनन्तेभ्य आत्मनेपदादन्यत्र॥४॥

भूषावाचिनः किरादिभ्यः सनन्तेभ्यश्चात्मनेपदादन्यत्र भवति। अलं कुरुते कन्या अलमकुरुत। अवकिरते हस्ती। किरादि (सि॰उ॰१५४पृ॰) द्रष्टव्यः। चिकीर्षते घटः। इच्छायाः कर्त्तृस्थत्वेऽपि उत्पादनार्थककरोतेरुत्पत्तिरूपफलेनैव कर्म्मस्थत्वात्तदुत्तरसनोऽपि तदनुसारेणैव पदव्यवस्थावत् कर्म्मस्थत्वमिति।

इति कर्म्मकर्त्तृप्रकरणम्।

लकारार्थप्रकरणम्।

६॰ १ः॰ १ः॰ १ः॰

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः॥१॥

लडादीनां त्रीणि त्रीणि क्रमेण प्रथममध्यमोत्तमसंज्ञानि स्युः।

७· ·।· ७· ७·

अप्रयुज्यमानेऽपि तिङर्थकारकाभिन्ने युष्मदि-

।· ७· ।· ७· ·१· ।·

मध्यमोऽस्मदि उत्तमः शेषे तु प्रथमः तत्संख्याभेदे-

१· ·१·

नैकवचनादि ॥ २ ॥*

तिङ्वाच्यकारकाभिन्ने अप्रयुज्यमानेऽपि युष्मदि मध्यमः, अस्मदि उत्तमः युष्मदस्मद्भिन्ने तु प्रथमः स्यात् । तिङर्थकर्त्रभिन्नयुष्मदादिसंख्यानुसारेण एकवचनद्विवचनबहुवचनप्रयोगः । त्वं भवसि युवां भवथः यूयं भवथ । अहं भवामि आवां भवावः वयं भवामः । स भवति तौ भवतः ते भवन्तु । एवं तिङर्थकर्माभिन्नयुष्मदादिसंख्याभेदेन त्वं दृश्यसे युवां दृश्येथे यूयं दृश्यध्वे । अहं दृश्ये आवां दृश्यावहे वयं दृश्यामहे । स दृश्यते तौ दृश्येते ते दृश्यन्ते । एवं विधिलिङादावपि

७· ·।·

वर्त्तमाने लट्— ॥३॥

वर्त्तमानक्रियावाचिधातोर्लट् स्यात् । वर्त्तमानस्तु आरब्धापरिसमाप्तः कालः । स च प्रयोगसमान कालएव । भवति ।

* शेषप्रतियोगिनोऽनभिधाने शेषे इति वक्तुमशक्यतया व्युत्क्रमेणापि मध्यमादेः प्रथमसक्तिः ।

७· २: ७·

भविष्यति यावत्पुराभ्यां योगे ॥४॥

यावत्पुराशब्दाभ्यां योगे भविष्यति लट् स्यात्। यावत् पुरा वा भवति भविष्यतीत्यर्थः ।

७· ५· ·१· ५·

अनद्यतनभूते धातोर्लट् स्मेन ॥५॥

स्मशब्दयोगे अनद्यतनातीतार्थे धातोर्लट् स्यात्। हन्ति स्म रावणं रामः जघानेत्यर्थः। रावण-हननमनद्यतनातीतम्। गतरात्रिशेषार्द्धयुक्तवर्त्त-मानदिनमद्यतनम्।

२· ७· १: ·१· ·१··१· २·

पुराशब्देनातीते लुङ्लटौ वा न तु स्मेन ॥६॥

पुरायोगे अतीते काले लुङ्लटौ वा स्याताम्, न तु स्मशब्दप्रयोगे। पक्षे यथाप्राप्तम्। वसन्तीह पुरा छात्राः अवात्सुर्वा पक्षे अवसन् ऊषुर्वा।

२· ७· ·१· ·१·

कदाकर्हिभ्यां भविष्यति—वा—लट् ॥७॥

आभ्यां योगे भविष्यति लट् स्यात्। कदा कर्हि वा भुङ्क्ते। पक्षे भोक्ष्यते भोक्ता वा।

७·

प्रैष्यादिलक्षणे ॥८॥

प्रैष्यादिर्लक्ष्यते येन तस्मिन्नर्थे वर्त्तमानाद्धातोर्भवि-

ष्यति लट् वा स्यात् । कृष्णश्चेद्भुङ्क्ते त्वं गाश्चारय चारयिष्यसि वा । भावि कृष्णभोजनं गोचारण-प्रवर्त्तकम् ।

वर्त्तमानसामीप्ये भूते भविष्यति—च ॥९॥

वर्त्तमानकालासन्ने भूते भविष्यति च लट् वा स्यात् । कदागतोऽसि अयमागच्छामि अयमागमं वा । कदा गमिष्यसि एष गच्छामि गमिष्यामि वा ।

आशंसायां भूतवत् वर्त्तमानवच्च ॥१०॥

भविष्यति काले भूतवत् वर्त्तमानवच्च प्रत्यया वा स्यु-राशंसायाम् । देवश्चेदवर्षीत् वर्षति वा पक्षे वर्षिष्यति । धान्यमभवत् भवति वा पक्षे भविष्यति ।

आशंसावचने उपपदे लिङ् ॥११॥

आशंसावाचिन्युपपदे भविष्यति लिङ् स्यात् । पूर्व्वसूत्रापवादः । गुरुश्चेदायादाशंसेऽधीयीय ।

जात्वपिभ्यां सर्व्वकाले—लट् गर्हायाम् ॥१२॥

आभ्यां योगे सर्व्वस्मिन् काले लट् स्यात् गर्हायाम् । जातुवेश्यां गच्छसि अपि जायां त्यजसि गर्हितमेतत् ।

कथमा विधिलिङ्लटौ वा ॥१३॥

कथम्शब्दयोगे सर्व्वस्मिन् काले विधिलिङ्लटौ वा स्तो गर्हायाम्। कथं धर्मं त्यजेस्त्यजसि वा पक्षे कालत्रयलकाराः।

किंकतरकतमैर्विधिलिङ्लृटौ—॥१४॥

एभिर्योगे सदा विधिलिङ्लटौ स्तो गर्हायाम्। कः कतरो कतमो वा हरिं निन्देत् निन्दिष्यति वा।

असम्भावनामर्षयोः—शब्दमात्रेण ॥१५॥

शब्दमात्रयोगे सदा विधिलिङ्लटौ स्तः असम्भावनायामक्षमायाञ्च। न सम्भावयामि न मर्षये वा। भवान् हरिं निन्देत् निन्दिष्यति वा।

जातुयदायद्यत्रयच्चयदिभिर्विधिलिङ्—॥१६॥

एभिर्योगे सदा विधिलिङ् स्यादसम्भावनामर्षयोः। जातु, यदा, यद्, यत्र, यच्च, यदि, वा तादृशो हरिं निन्देत् न सम्भावयामि न मर्षये वा।

यच्चयत्राभ्यां गर्हायां चित्रीकरणे च ॥१७॥

आभ्यां योगे गर्हायां चित्रीकरणे च सदा विधि-

लिङ् स्यात् । यच्च यत्र वा त्वं शूद्रं याजयेः गर्हितमेतत् आश्चर्य्यमेतदिति वा ।

७० ०१००१०

कामप्रवेदने लोट् च ॥१८॥

प्रयोक्तृकामवेदनार्थकशब्दयोगे सदा लोट्, चात् विधिलिङ् स्यात् । इच्छामि भुञ्जीत भुङ्क्तां वा भवान् । कामप्रवेदने किम् इच्छन् भुङ्क्ते इत्यादौ न ।

१:० ०१०

समानकर्त्तृकेच्छार्थैर्विधिलिङ्—॥ १९ ॥

समानकर्त्तृकेच्छार्थैर्योगे सदा धातोर्विधिलिङ् स्यात् । भुञ्जीयेतीच्छति ।

५:० ७००१०

इच्छार्थेभ्यो वर्त्तमाने वा ॥ २० ॥

इच्छार्थकधातुभ्यो वर्त्तमाने विधिलिङ् स्यात् । य इच्छेत् इच्छति वा ।

७:० १:

प्रवर्त्तनसंप्रश्नप्रार्थनेषु विधिलिङ्लोटौ ॥ २१ ॥

एष्वर्थेषु धातोर्विधिलिङ् लोट् च स्यात् । भृत्यादेर्निकृष्टस्य प्रवर्त्तनं प्रेरणम् । आवश्यके श्राद्धभोजनादौ प्रवर्त्तनम् निमन्त्रणम् । कामचारानुज्ञा आमन्त्रणम् । सत्कारपूर्व्वकप्रवर्त्तनम् अध्येषणम् ।

एतच्चतुर्विधं प्रवर्त्तनम्। यथा यजेत। इहभुञ्जीत भवान्। इहासीत भवान्। पुत्रमध्यापयेद्भवान्। संप्रश्ने किं भो वेदमधीयीय। प्रार्थने भो भोजनं लभेय। एवं लोट्

७· ७· ·१· ·१·

कार्य्यकारणभावे भविष्यति लिङ् वा ॥ २२ ॥

धात्वर्थयोर्द्वयोः कार्य्यकारणभावे गम्यमाने धातुभ्यां विधिलिङ् स्यात्। विद्यामभ्यस्येच्चेत् सुखं यायात्। पक्षे भविष्यत्कालप्रयोगः।

७· ·१· ७·

संभावने लिङ् सामर्थ्ये ॥ २३ ॥

सामर्थ्ये द्योत्ये सम्भावने विधिलिङ् स्यात्। अपि गिरिं शिरसा भिन्द्यात्।

७· ७· ·१·

अर्हे शक्तौ च ॥ २४ ॥

अर्हे शक्तौ च धातोर्विधिलिङ् स्यात्। कन्यां वहेः। भारं वहेः।

७· ७· ·१·

अनद्यतने भूते लङ् ॥२५॥

अनद्यतनभूतार्थे धातोर्लङ् स्यात्। अभवत्। अपचत्। परोक्षे लोकविज्ञाते प्रयोक्तुर्दर्शनयोग्ये

एवायमिष्यते इति भाष्यम् तदुदाहरणञ्च तत्रैव दर्शितम् यवनाः साकेतमरुन्धन्। तद्वीत्याद्य इंलण्डीयाः पञ्चनददेशानजयन् इत्युदाहरणम्।

२· ७· १ः

माम्मे न सर्व्वकाले लङ्लुङौ ॥२६॥

माम्मशब्दयोगे धातोः सर्व्वकाले लङ्लुङौ स्तः। माम्म भवद्दुःखम् माम्म भूच्छोकः।

७· ·१·

भूतमात्रे लुङ् ॥२७॥

भूतसामान्ये धातो र्लुङ् स्यात्। अभूत्।

२· ७·

माङा सर्व्वकाले ॥२८॥

माङ्शब्दयोगे सर्व्वकाले लुङ् स्यात्। माभूत् दुःखम्।

७· ·१·

परोक्षानद्यतने लिट् ॥२९॥

प्रयोक्तुरपरोक्षेऽनद्यतने भूते धातोर्लिट् स्यात्। स जगाद। त्वं जगदिथ। मत्ततादिना स्वव्यापारा प्रत्यक्षे एव अहं जगामेत्यादिप्रयोगः। सुप्ताहं विललाप किमित्यादि।

७· ७· ·१·

भविष्यत्यनद्यतने लुट् ॥३०॥

अनद्यतने भविष्यति धातोर्लुट् स्यात्। श्वो भविता।

·१·　७·
आशीर्लिङाशिषि ॥ २१ ॥

आशिषर्थे धातोराशीर्लिङ्स्यात्। सुखं ते भूयात्।

७·　·१·
भविष्यत्सामान्ये लृट् ॥ २२ ॥

भविष्यत्सामान्ये धातोर्लृट् स्यात्। अद्य श्वो वा भाविनि वस्तुनि भविष्यतीत्येव प्रयोगः।

३:·　७·　·१·
स्मरणार्थैरतीते लृट् ॥२३॥

स्मरणार्थवाचशब्दयोगेऽतीते लृट् स्यात्। स्मरसि शास्त्रमध्येष्यसि।

६:　७·　७·　·१·
क्रिययोरनिष्पत्तौ कार्य्यकारणभावे लृङ् ॥२४

क्रिययोरनिष्पत्तौ हेतुहेतुमद्भावे गम्ये धातोर्लृङ् स्यात्। स्नानं चेदभविष्यत् सुखमभविष्यत्। स्नानानिष्पत्तौ सुखानिष्पत्तिरत्र गम्यते।

६:　·१·　७·
तुह्योस्तातङाशिषि ॥२५॥

अनयोः स्थाने तातङ् स्यात्। ङइत् ङित्त्वेन सर्व्वादेशः। सुखं ते भवतात् भवतु वा।

पौनःपुन्ये भृशार्थे च लोटो हिस्वौ तध्वमौ वा ॥२६॥

पौनःपुन्ये भृशार्थे च द्योत्ये सर्व्वलकारस्थाने लोटो हिस्वौ तध्वमौ च वा स्तः। पुनःपुनर्भृशं वा पचति पचतः पचन्तीत्याद्यर्थे सर्व्वत्र पच पचस्व पचत पचध्वम्। पक्षे यथाप्राप्तं लकाराः।

इति लकारार्थनिरूपणम्।

कृदन्तप्रकरणम्।

धातोर्विहितोऽतिङ् प्रत्ययः कृत् ॥ १ ॥

धातोर्विहितस्तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्।

तव्यानीययण्यत्क्यप्केलिमाः कृत्याः ॥ २ ॥

तव्यादयः कृत्यसंज्ञाः स्युः।

क्तक्तवतू निष्ठा ॥ ३ ॥

क्तः क्तवतुश्च निष्ठासंज्ञः स्यात्।

१· १· ·१· ६· १·

अस्त्रीविहित: सरूप: कृत् सरूपस्य बाधक: ॥ ४ ॥

स्त्रीविहितप्रत्ययं विना समानरूप: कृत्प्रत्यय: समानरूपकृतो बाधक: स्यात् नान्यस्य।

७· ·१· ·२· ·१·

कर्त्तरि कृत् विशेषोक्तिं विना ॥ ५ ॥

विशेषार्थानुक्तौ सर्व्वएव कृत् कर्त्तरि वाच्ये स्यात्।

१·: १·

कृत्यादयो बहुलम् ॥ ६ ॥

कृत्यादय: कृतोयत्नार्थे विहितास्ततोऽन्यत्रार्थेऽपि स्यु:

१· १··।· १·

कृत्तद्धितान्तं समासश्च प्रातिपदिकम् ॥ ७ ॥

कृदाद्यन्तं समासश्च प्रातिपदिकसंज्ञं स्यात्। तत: सुप्।

७: ५· १:·

भावकर्म्मणोर्धातो: कृत्यक्तखलर्था: ॥ ८ ॥

कृत्यादय: धातुमात्रात् भावे कर्म्मणि चार्थे स्यु:।

७:· १:·

शक्यार्हप्रैषानुज्ञाप्राप्तकालेषु कृत्या: ॥ ९ ॥

कृत्यसंज्ञका: प्रत्यया: शक्याद्यर्थेषु स्यु:।

कृत्यमध्ये धातुभेदे प्रत्ययभेदमाह

५·: १:

सर्व्वधातुभ्यस्तव्यानीयौ ॥ १० ॥

सर्व्वेभ्यो धातुभ्यस्तव्यानीयौ स्याताम्। तत्र भावे

भू-तव्ये इटि गुणे भवितव्यम् भवनीयम् कृ-कर्त्तव्यम् करणीयम्। कर्म्मणि तु अनुभवितव्यः अनुभवनीय आनन्दः। द्रष्टव्यो दर्शनीयो घटः।

५ः ०१० ५० ०१० ७०

ऋहलभ्यां ण्यदोस्त्वावश्यके ॥११॥

ऋवर्णान्तात् हलन्ताच्च धातोर्ण्यत् स्यात् उवर्णान्तु आवश्यकेऽर्थे ण्यत् स्यात्। ण्ताविती। कृ-कार्य्यम्। तृ-तार्य्यम्। दह-दाह्यम् मन-मान्यम्।

५० १०

अचो यः ॥ १२ ॥

अजन्ताद्धातोर्यः स्यात्। वि-वेयम् भू-गुणे (२३पृ० ७ सू०) अवादेशे भव्यम् आवश्यके तु पूर्व्वेण ण्यति हृद्धौ भू-भाव्यम् सु-साव्यम्।

६० ०१०७०

आत एवे ॥ १३ ॥

आतः स्थाने एत् स्यात् ये परे। दा-देयम्

५० ५००१० १० ५०

पोः सहशकशसच योऽचमवपरपलपत्रपदभः ॥१४॥

चमःदिवर्ज्जात् पवर्गान्तात् सहादेश यः स्यात्। ण्यतोऽपवादः। पोः शप-शप्यम् लभ-लभ्यम् सह-सह्यम् शक-शक्यम्। चमादेस्तु चाम्यम् वाप्यम्।

५· ·१·७·

आलभेनुम् ये ॥ १५ ॥

यादौ प्रत्यये आलभेर्नुम् स्यात् । उमाविती आलभ्योऽश्वः ।

५··१· ५·

गदमदचरयमश्चानुपसर्गात् ॥ १६ ॥

अनुपसर्गात् गदादेर्यः स्यात् । गद्यं मद्यम् चर्य्यम् यम्यम् । उपसर्गात्तु प्रगाद्यम् प्रमाद्यम् प्रचार्य्यम् आयाम्यम् ।

१·: ७·

अवद्यपण्याचार्य्या गर्ह्यव्यवहार्य्यगुरुषु । १७ ॥

गर्ह्याद्यर्थेषु एते यान्ता निपात्यन्ते । न उद्यते इत्यवद्यं गर्ह्यम् । गर्ह्यं किम् अनुद्यं गुरुनाम । पण्या गौः व्यवहार्य्येत्यर्थः अन्यत् पाण्यं स्तुत्यर्हम् । आचार्य्यो गुरुः अन्यत्र चर्य्यो देशः ।

यान्तं वह्यं भवेद्याने स्यादर्य्यः स्वामिवैश्ययोः ।
उपसर्य्या गर्भयोग्या सङ्गतेऽजर्य्यमिष्यते ॥

७· ५· १: ७·

सुपि — वदः क्यब्यौ भावे — ॥ १८ ॥

भावे वाच्ये सुबन्ते उपपदे वदेः क्यप् यश्च स्यात् । ण्यतोऽपवादः । कपाविती । ब्रह्मोद्यम् ब्रह्मवद्यम् । ब्रह्म वेदस्तस्य वदनमित्यर्थः ।

* क्यब्यौ कर्म्मण्यपीष्येते तेन अनुद्यं गुरुनामेत्याद्युदाहृतम् ।

५: ·१· ६· ·१· ·१·

भूहनिभ्यां क्यप्—हनस्तङ् च ॥१८॥

भावे वाच्ये सुबन्ते उपपदे भूहनिभ्यां क्यप् स्यात् हनश्च तङ्। ण्यतोऽपवादः। ब्रह्मभूयम् ब्रह्महत्या। देवभूयम् विप्रभूयम् विप्रहत्या।

५: ७:

स्तु, शासिभ्यां कर्म्मभावयोः ॥२०॥

आभ्यां कर्म्मभावयोर्वाच्ययोः क्यप् स्यात्। यण्ण्यतोरपवादः।

६· ·१· ७· ७·

ह्रस्वस्य तुक् पिति कृति ॥२१॥

हस्वान्तस्य पिति परे ह्रस्वस्य तुक् स्यात्। उकावितौ। किस्वादन्तावयवः। स्तु-स्तुत्यः शास—(१२४पृ०२५सू०) इत्वे शिष्यः।

५: ·१· ·१·

शंसिगुहिभ्यां वा क्यप् ॥२२

आभ्यां वा क्यप् स्यात्। पक्षे ण्यत्। शस्यम्।* शंस्यम्। गुह्यम् गोह्यम्।

५· ५·

ऋदुपधाद्क्लृपिचृतः ॥२३॥

क्लृपिचृतिवर्ज्जाद् ऋदुपधात् क्यप् स्यात्। नृत- नृत्यं वृध-वृध्यम्। क्लृपेस्तु ये कल्प्यम्।

---

* कुसेदवक्ष्यमः क्त्वे इत्यादिना ४०८पृ०११प० वक्ष्यमाणेना-व क्ष्यमो नलोपः।

५॰ ॰१॰॰१॰

खनः इश्च ॥२४॥

खनः क्यप् स्यात् इश्चान्तादेशः। खेयम्।

५॰ ७॰ ५॰ ॰१॰ ॰१॰

भृञोऽसंज्ञायां समस्तु वा ॥२५॥

असंज्ञायां भृञः क्यप् स्यात् संपूर्व्वकात्तु वा स्यात्। ण्यतोऽपवादः। भृत्या भर्त्तव्याः कर्म्मकराः। संज्ञायां भार्य्या नाम क्षत्रियाः। समस्तु संभृत्यः संभार्य्यः।

५॰ ॰१॰

मृजेर्वा ॥२६॥

मृजेः क्यप् वा स्यात्। पक्षे ण्यत्। मृज्यम् पक्षे ण्यति

७॰ ६॰ ६॰ १॰ ७ः

निष्ठायामनिटश्चजोः कुर्घिण्ण्यतोः ॥२७॥

घिति ण्यति च परे निष्ठायामनिटो धातोश्चजोः स्थाने कुः स्यात्। इति जस्य गत्वे (१२४पृ॰२७सू॰) हृद्धौ मार्ग्यम्।

॰१॰ ७॰ ७॰ ६॰ ॰१॰

न ण्य आवश्यके यजत्यजयाचप्रवचश्च ॥२८॥

आवश्यकार्थे ण्ये परे यजादेश्च चजोः स्थाने कुर्न स्यात्। अवश्यपाच्यम्। अन्यत्र पाक्यम्। याज्यम् त्याज्यम्

६।   ७।   ६।   ७। ६।१।

वचोऽशब्दसंज्ञायां निप्रयुजो शक्यार्थे भुजेश्च

७।

भक्ष्ये ॥२९॥

एष्वर्थेषु एतेषां चजोः स्थाने कुर्नस्यात्। वाच्यम्। शब्दसंज्ञायान्तु वाक्यं पदसमुदायः। प्रयोक्तुं शक्यो भृत्यः प्रयोज्यः। एवं नियोज्यः। अर्हार्थे तु नियोक्तुमर्हतीति नियोग्यः प्रभुः। भोज्यं भक्ष्यम् अन्यत्र भोग्या पृथिवी।

६। ६।१।   ७।   १। ७।

भिदेरुज्झेश्च क्यपि भिद्योद्ध्यौ नदे ॥३०॥

एताभ्यां क्यपि नदेऽर्थे कर्त्तरि एतौ निपात्यौ। कूलं भिनत्तीति भिद्यो नदः। वारि उज्झतीति उद्ध्यो नदः निपातनाद्धत्वम्।

१।३

राजसूयसूर्य्यमृषोद्यकुप्यकृष्टपच्याः ॥३१॥

एते क्यबन्ता निपात्यन्ते। राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः राजसूयः। सरतीति सूर्य्यः कर्त्तरि क्यप उत्वञ्च निपात्यते। मृषा उद्यते इति मृषोद्यम् नित्यार्थं निपातनम्। गुपेरादेः कुत्वं क्यप् च निपात्यते सुवर्णरजतभिन्नं धनम् कुप्यम्। कृष्टे चेति स्वयमेव पच्यते कृष्टपच्यः कर्म्मकर्त्तरि क्यप्

१॰: ७॰ ७॰

सिध्यतिष्यपुष्याणि नक्षत्रे कर्त्तरि ॥३२॥

कर्त्तरि वाच्ये नक्षत्रेऽर्थे एतानि क्यबन्तानि निपात्यन्ते। साधयतीति सिध्यम् पुष्णातीति पुष्यम् तिष्यञ्च।

७: ५॰ ॰१॰

परतन्त्र, बाह्य, पक्षेषु ग्रहेः क्यप् ॥३३॥

एष्वर्थेषु क्यबन्तेन द्योत्येषु ग्रहेः क्यप् स्यात्। गृह्याः शुकाः पञ्जरबन्धादिना परतन्त्रीकृताः। ग्राम गृह्या ग्रामबाह्या सेना। आर्य्यगृह्यः आर्य्यपक्ष्यः।

५: ॰१॰

कृवृधिभ्यां वा ॥३४॥

आभ्यां क्यप् वा स्यात्। पक्षे ण्यत्। कृत्यम् कार्य्यम् वृष्यं वर्ष्यम्।

युग्यं याने ण्यति युजेः सहार्थामापदाद्वसेः।

अमावस्याप्यमावस्या कुह्वां ण्यति निपात्यते॥

अमा सह वसतोऽर्कौन्दू यत्र सा सा अमावास्या अमावस्या कुहूः।

५॰ ॰१॰

आस, यु, वपि, लपि, चमो ण्यत् ॥ ३५॥

एभ्यो ण्यत् स्यात्। अनावश्यकेऽपि। आसु-आसाव्यम्। वप-वाप्यम् लप-लाप्यमित्यादि।

१·　७·　१·　७·

सान्नाय्यं हविषि निकाय्यो निवासे ॥२६॥

एष्वर्थेषु एते ण्यदन्ता निपात्यन्ते । संनीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविः । निचीयतेऽस्मिन् धान्यादिकं निकाय्योनिवासः अन्यत्र निचेयः ।

१·३

भव्यगेयप्रवचनीयपस्थानीयजन्याप्लाव्यापात्याः

१·३ ·१· ७·

ह्यत्यन्ता वा कर्त्तरि ॥२७॥

एते ह्यत्प्रत्ययान्ता वा कर्त्तरि निपात्यन्ते । पक्षे कर्म्मभावयोर्यथाप्राप्तम् । भवतीति भव्यम् गायतीति गेयः पक्षे भव्यमनेन गेयं सामानेनेत्यादि ।

५·　१·　७·

धातोः केलिमः कर्मकर्त्तरि ॥२८॥

कर्मकर्त्तरि वाच्ये धातोः केलिमः स्यात् । कादृत् । पचेलिमास्तण्डुलाः । भिदेलिमा माषाः ।

कृदन्ते णत्वप्रकरणम् ।

·१·५·　६·　६·१·६·　१·

प्राग्वदचः कृतो निर्विसस्य च नो णः ॥२९॥

प्रपरानिर्परिभ्योऽन्तःशब्दाच्च परस्याचः परं विहितस्य कृतो, निर्विसस्य च नस्य णत्वं स्यात्

आङादिव्यवधानेऽपि। प्रयाणीयम् प्रमाणीयम्। निर्विण्णमित्यत्र परस्य णत्वे पूर्वस्य टुत्वम्। अतः किं प्रमग्न इत्यादौ न।

५· ५··१· ५··।· ५· ५··१· २·

णेर्हलश्चेजुपधाद्वा सनुमद्वादेस्तु नित्यम् ॥४०॥

प्रादिभ्यः परस्य ण्यन्तधातोः, इजुपधाद्धलन्ताच्च धातोः परं विहितस्य कृतो नस्य णत्वं वा स्यात् नुम्सहितादिजादेस्तु नित्यम्। प्रयापणीयम् प्रयापनीयम्। एवं प्रयाप्यमाणं प्रयाप्यमानमित्यादि। प्रकोपणीयम् प्रकोपनीयम्। सनुमस्तु प्रेङ्खणीयम्।

·।· ५ः

न भा भू पू कमि गमि प्यायी वेपिभ्यः ॥४१॥

एभ्योविहितस्य कृतोनस्य णत्वं न स्यात्। प्रभानीयम् प्रभवनीयमित्यादि।

·।· ·१· ६ः· ७·

प्राग्वत् वा निंसनिक्षनिन्दां कृति ॥४२॥

प्रादिभ्यः परस्य एषां नस्य णः स्याद्वा कृति परे। प्रणिन्दितव्यम् प्रनिन्दितव्यमित्यादि।

इति कृत्यप्रकरणम्।

कर्तृकृत्प्रकरणम् ।

५० १: ७०

धातोर्ण्वुल्तृचौ कर्त्तरि ॥ १ ॥

कर्त्तरि वाच्ये धातो र्ण्वुल् तृच प्रत्ययः स्यात् । ण्वुलो णलावितौ तृचस्य चइत् । असति विशेषे सर्व्वत्र कर्त्तरीत्यनुवर्त्त्यम् । इति ण्वुलि

६: ६: १:

प्रत्ययाद्योर्युव्वोरनाकौ ॥ २ ॥

प्रत्ययाद्यस्य योः, स्थानेऽनः, वोः स्थाने चाकः स्यात् । इति वोरके णित्वात् वृद्धौ नी-नायकः भू-भावकः कृ-कारकः । हनः (१८०पृ०२सू०) तङि घत्वे घातकः दा- (२२८पृ०६सू०) युकि दायकः । (१६२पृ०२८सू०) अवृद्धौ शमकः । जनकः । भू-तृचि इटि भविता । कृ-कर्त्ता विज-(११७पृ०७सू०) इटः ङित्त्वे । विजिता नश--नशिता इडभावपक्षे (१७७पृ० २ सू०) नुमि षत्वे षत्वे । नंष्धा नंष्टा । इष- (१७७पृ० १सू०) इटि एषिता पक्षे एष्टा । सह-सहिता पक्षे (१६५पृ० २५सू०) ओत्वे सोढ़ा ।

५० ५० ६० ०१००१०

क्रमेर्नित्यात्मनेपदविषयात् क्तौ नेट् ॥ ३ ॥

नित्यात्मनेपदविषयात् क्रमेः परस्य क्तः स्थाने इट्

न स्यात्। प्रक्रान्ता। (२२१पृ०१६प०) प्रोपाभ्या-मिति नित्यात्मनेपदयोग्यताऽस्य। अन्यत्र क्रमिता।

५: १ ५: १ ५: १
नन्द्यादिभ्योल्युर्ग्रहादिभ्योणिनिः पचादिभ्योऽच् ॥४॥

एतेभ्यः क्रमेणैते प्रत्ययाः स्युः। ल्योर्लिङ्वत्। णिनेरिणावितौ अचस्तु चङ्वत्। ल्योर्युस्थाने अनः नन्दनः मधुसूदनः विचक्षणः विभीषणः। नन्द्यादि-गणे निपातनात् रसैवाच्ये णत्वे लवणः। ग्रही-णिनौ ग्राही युक्ति स्थायी। अत्र गणे विश्रयी विषयीति ह्रस्वपाठात् ह्रडग्रभावो निपात्यते। पचतीहति पच नदः देवः इत्यादि। नन्द्यादिगणत्रयन्तु (सि० कौ० २१७पृ०) द्रष्टव्यम्।

६: १ १ १ १ १ ६
चरिचलिहनीनां वाचि द्वित्वमाक् चाभ्यासस्य

६ १ १
हन्तेर्घत्वञ्च ॥५॥

अचि परे एषां द्वित्वं वा स्यात् अभ्यासस्याक च स्यात् हन्तेर्घत्वञ्च। चराचरः चलाचलः घनाघनः पक्षे चरः चल इत्यादावच्। पचादिराकृतिगणः अचि यङो लुको निषेधज्ञापकात्।

५ १
इगुपधज्ञाप्रीकिरः कः ॥ ६ ॥

एभ्यः कः स्यात्। कङ्वत्। क्षिपः। लिखः। बुधः।

मुदः । कृशः । ज्ञः प्रियः । किरः । असरूपत्वात् ण्वुल्तृचौ न बाधस्तेन क्षेपकः क्षेप्तेत्यादि ।

५· ५·

उपसर्गादातः ॥ ७ ॥ *

उपसर्गपूर्व्वकादादन्तात् कः स्यात् । आतः श्याव्य-धेत्यादि वक्ष्यमाणस्य णस्य बाधकः । प्रज्ञः । प्रदः विधः प्रज्ञः । विज्ञः अभिज्ञः प्रस्थः पक्षे निष्ठः । वक्ष्यमाणसूत्रेणाग्रगामिन्यर्थे पक्षे प्रष्ठः ।

५· १·५· ·१· ७·

पाध्माद्दृशधेटः शो घ्रस्त्वसंज्ञायाम् ॥ ८ ॥

एभ्यः शः स्यात् जिघ्रतेस्त्वसंज्ञायाम् । शइत् । शित्त्वात् शबादि । पिबः धमः पश्यः धयः । धया कन्या शान्तस्यैव स्त्रियामीबन्ततेति सिद्धान्तः । घ्रा-जिघ्रः संज्ञायान्तु व्याघ्र इत्यादौ कएव ।

५·

अनुपसर्गे—लिम्पविन्दधारिपारिवेद्युदेजि-

५·

चेतिभ्यः ॥ ९ ॥

अनुपसर्गे उपपदे एतेभ्यः शः स्यात् । लिम्पः विन्दः अनुपसर्गे इत्युक्तेः गोविन्दः अरविन्दः इत्यादौ अन्यस्मिन्नुपपदेऽप्यादेश । एवं धारयः पारयः ।

---

* प्रादिसमासे उपपदसमासे च रूपाभेदात् उपसर्गे इत्यनुक्त्वा उपसर्गादित्युक्तम् ।

५: १००१०

ज्वलादिभ्यो णो-वा ॥१०॥

अनुपसर्गे उपपदे ज्वलादिगणेभ्यो णो वा स्यात्। पक्षे पचाद्यच्। ज्वालः ज्वलः। चालः चलः। ज्वलादिगणस्तु (सि० उ० ८८-९०पृ०) द्रष्टव्यः। उपसर्गे तु उज्ज्वलः प्रज्वल इत्येव।

५०

आतः श्याव्यधाङ्संस्रवतीणवसावहृ लिहश्लिष

५००१० २०

श्वसश्च नित्यम् ॥११॥

आदन्तात् श्यादेश्च नित्यं णः स्यात्। श्यैङोऽवश्यतेरादन्तत्वेऽपि पुनर्ग्रहणम् उपसर्गात्परतया प्राप्तस्य कस्य बाधनार्थम्। दायः मायः। अवश्यायः। प्रतिश्यायः। व्याधः। आस्रावः संस्रावः। अत्यायः। अवसायः। अवहारः। लेहः श्लेषः श्वासः।

५० ५:

अनुपसर्गाद्दुनोतिनीभ्याम् ॥ १२ ॥

अनुपसर्गादाभ्यां णः स्यात्। दावः दवतेस्तु पचाद्यचि दवः। नायः उपसर्गात्तु प्रणयः।

५० ७० १० ७००१०

ग्रहेर्जलचरे णो ज्योतिष्यच् ॥१३॥

अनयोरर्थयोर्ग्रहेरेतौ स्तः। ग्राहो जलचरः। ग्रहो ज्योतिः।

५॰ ७॰ १॰ ७॰ १॰

भवतेः पदार्थे णो हरसंसारयोश्च् ॥१५॥

भवतेः पदार्थेऽर्थे णः, शिवसंसारयोरर्थयोस्त्वच् स्यात् । भावः पदार्थः । भवः शिवः संसारश्च ।

५॰ १॰ ७॰

ग्रहेः को गेहदारेषु ॥१५॥

गेहे दारेष्वर्थेषु च ग्रहेः कः स्यात् । कद्वत् । गृह्णातीति गृहं गेहम् । गृहा दाराः ।

५॰ ७॰ ७॰ १॰

नृतिखनिरञ्जिभ्यः शिल्पिनि-कर्त्तरि-षकः ॥१६॥

एभ्यः क्रियाकौशलवति कर्त्तरि षकः स्यात् । षद्वत् । षित्त्वात् स्त्रियामीष् नर्त्तकी । खनकः (१२७पृ॰ १८सू॰) नलोपे रजकः स्त्रियां रजकी ।

५॰ १॰

गायतेर्ल्युट्थकनौ ॥१७॥

गायतेः शिल्पिनि कर्त्तरि ल्युट् थकन् च स्यात् । ल्युटो लटावितौ । थकनो नद्वत् । इति ल्युटि । आतो युक्ति योरनादेशे गायनः टित्त्वादीप् गायनी । गाथकः ।

५॰ १॰ ७॰

जहाते ल्युट् व्रीहिकालयोः ॥१८॥

व्रीहौ काले च कर्त्तरि जहातेर्ल्युट् स्यात् । जहा-

ल्युट्कमिति हायनो ब्रीहिः। जहाति भावानिति हायनो वत्सरः।

७० ५० ०१०

आशिषि धातोर्वुन् ॥१८॥

आशीर्वादेऽर्थे धातो र्वुन् स्यात्। जीवतात् जीवकः। नन्दतात् नन्दकः।

७० १०

कर्म्मण्यण् ॥२०॥

कर्म्मणि उपपदे धातोरण् स्यात्। ण्इत्। वक्ष्यमाण उपपदसमासः। कुम्भं करोतीत्यणि कुम्भकारः। स्वर्णकारः लौहकारः। गङ्गाधरभूधरादयस्तु धरतीति पचाद्यचि गङ्गादीनां सम्बन्धत्वे व विवक्षया षष्ठीसमाससाध्याः। अग्रे सर्व्वत्राविशेषे कर्म्मणीत्यनुवर्त्त्यम्।

५ ५० ५० ०१०

अवामाभ्यामातोऽनुपसर्गात् कः ॥२१॥

अनुपसर्गात् वयतिमातिवर्ज्जादादन्ताद्धातोः कर्म्मण्युपपदे कः स्यात्। अणोऽपवादः। इति के (१६०पृ०१८सू०) आतो लोपे धनदः पादत्रम्। अनुपसर्गात् किं गोसंप्रदायः। गोप्रदस्तु गवां प्रद इति कप्रत्ययान्तेन षष्ठीसमाससाध्यः। वयतेर्मा-

तेषु कर्मण्युपपदे पूर्वेणाणेव । तन्तुवायः धान्यमायः

७· ५· ·१·

सुप्यादन्तात् कः ॥२२॥

सुबन्ते उपपदे आदन्तात् कः स्यात् । अकर्मकेऽपीदम् । तेन द्वाभ्यां पिबतीति द्विपः । समेन तिष्ठतीति समस्थः एवं विषमस्थः । गावस्तिष्ठन्तीत्यस्मिन्नाधारे (२४२पृ०६सू०) बाहुलकात् के अम्बाम्बादित्वात् वक्ष्यमाणेन षत्वे गोष्ठम् ।

५· ५··१· १··१· ७:· ·१·

धरतेः छादेश्च ह्रस्वश्च क्विब्विच्मनिन्सु च ॥२३॥

कर्मण्युपपदे धरतेः, छादेश्च कः तस्मिन् परे क्वादिषु च छादेर्ह्रस्वश्च स्यात् । अणोऽपवादः । महीध्रः उरश्छदः दन्तच्छदः तनुच्छदः ।

१:·

मलुघ्नादयः ॥ २४ ॥

एते कान्ता निपात्यन्ते । मलुघ्नः प्रलम्बघ्नः हस्तिघ्नो ना कपाटघ्नश्चोरः आकृतिगणः ।

५· ५· ७: ·१· ५·

अनुपसर्गात् गायतेः सुराशीध्वोश्च पिबतेः

·१·

टक् ॥२५॥

कर्मण्युपपदे अनुपसर्गात् गायतेः, सुराशीधूपपदे च पिबतेः टक् स्यात् । टकावितौ । सामगः स्त्रियां

टिवादीपि सामगी। सुरापः सुरापी। शीधुपः। अन्यत्र क्षीरपः क्षीरपा स्त्री। उपसर्गात्तु अणेव सामसंगायः। सुरासंपायः।

५· ७· ७· ·१· ·१·
हरतेरनुद्यमने वयसि चाच् ॥२६॥

कर्म्मण्युपपदे हरतेरदनुद्यमनेऽर्थे वयसि च गम्येऽर्थे अच् स्यात्। अंशहरः भागहरः। उद्यमने तु भारहारः। वयसि कवचहरः वर्म्महरः युवा।

५· ·१·
अर्हतेश्च ॥२७॥

कर्म्मण्युपपदे अर्हतेरच् स्यात्। पूजार्हः पूजार्हा ब्राह्मणी। अणि तु ईप् स्यात्।

७: ५: ७:
स्तम्बकर्णयोः रमिजपिभ्यां हस्तिसूचकयोः ॥२८॥

स्तम्बोपपदे रमतेः, हस्तिन्यर्थे, कर्णोपपदे च जपतेः सूचकेऽर्थे अच् स्यात्। स्तम्बे रमते इति स्तम्बेरमो हस्ती। कर्णे जपतीति कर्णेजपः सूचकः। उभयत्रालुक्समासः।*

७· ५· ७·: ·१·
अधिकरणे शेतेः पार्श्वादिषु च ॥२०॥

शेतेरधिकरणे उपपदे पार्श्वादिष्वनधिकरणेष्व-

* हलदन्तात् सप्तम्या इति २९८पृ० १० सूत्रेण अलुक् समासः कर्णे जपस्तम्बेरमयो संज्ञावत्त्वात्।

ष्वपरेषु चाच् स्यात्। भूमिशयः। पार्श्वाभ्यां शेते पार्श्वशयः। उदरेण शेते उदरशयः। उत्तानः सन् शेते उत्तानशयः। अवनतशयः।

७. १.
गिरौ डः—॥ २० ॥

गिरावधिकरणे उपपदे शेतेर्डः स्यात्। गिरिशमुपचचार प्रत्यहं सा सुकेशी।

७. ५. १.
सुपि गमेश्च ॥ २१ ॥

सुबन्ते उपपदे गमेर्डः स्यात्। अन्तगः अत्यन्तगः अध्वगः दूरगः सर्व्वगः सर्व्वत्रगः पन्नं पतितं गच्छतीति पन्नगः। एवं ग्रामगभुजगादयः साध्याः।

५. ७: ५.
अपात् क्लेशतमसोर्हन्तेः ॥ २२ ॥

अपपूर्वाद्धन्तेरेतयोरुपपदयोः डः स्यात्। क्लेशापहः पुत्रः तमोपहः सूर्य्यः।

७: १.
कुमारशीर्षयोर्णिनिः— ॥ २३ ॥

एतयोरुपपदयोर्हन्तेर्णिनिः स्यात्। इणाविती। कुमारघाती शीर्षघाती। असरूपस्याप्यणो बाधकः।

७· ·१· ·१·

कर्म्मणि टक् च ॥ ३४ ॥*

कर्म्मण्युपपदे हन्तेष्टक् स्यात्। टकावितौ। इति टकि (१२८पृ०५सू०) उपधातोलोपे (८७पृ०२४सू०) घ्नादेशे जायाघ्नः पुमान् पतिघ्नी स्त्री। जायाघ्न स्तिलकालकः पतिघ्नी पाणिरेखा विषघ्नमौषधम् पित्तघ्नं घृतमित्यादि।

७·५· १· ७: ·१·

अधिकरणे चरेष्टः—सहसेनयोश्च ॥ ३५ ॥

अधिकरणे उपपदे चरतेष्टः स्यात् सहसेनयोश्चानधिकरणयोरप्युपपदयोः। टइत्। कुरुषु चरतीति कुरुचरः टित्वात् स्त्रियामीपि कुरुचरी। निशाचरः निशाचरी। सहचरः सहचरी। एवं सेनाचरः।

७:· ५· ७· ·१· ७·

पुरोऽग्रतोऽग्रेषु सरतेः पूर्व्वे च कर्त्तरि ॥ ३६ ॥

एषूपपदेषु कर्त्तृरूपे पूर्व्वे चोपपदे सरतेः टः स्यात्। पुरस्सरः अग्रतस्सरः पूर्व्वः सन् सरतीति पूर्व्वसरः। कर्त्तरि किं पूर्व्वं सरतीत्यत्राणेव पूर्व्वसारः।

५· ७:· ७·

कृञो—हेतुताच्छील्यानुलोम्येषु कर्म्मणि ॥३७॥

एष्वर्थेषु द्योत्येषु कर्म्मण्युपपदे करोतेष्टः स्यात्।

* टक्चेति चकारेण णिनिरनुकृष्यते तेन मल्लघातीत्यादिसिद्धिः पूर्व्वसूत्रे कुमारादिग्रहणं तु टकोबाधनार्थम्।

तत्र हेतौ यशस्करी विद्या। श्राद्धकरः सततंतत्-करणशीलः। वचनकरः वशंवदतारूपानुलोम्यकरः।

७: ·१·

दिवाविभाप्रभानिशाहन्भासन्तानन्तबहुकिंलिपिलिबिभक्तिचित्रसंख्याधनुररुष्षु च ॥ ३८ ॥

एषूपपदेषु कृञष्टः स्यात्। अहेत्वादावपि। दिवाकरः निशाकरः। अहस्करः धनुष्करः अरुष्करः।

७· ७·

कर्मणि भृतौ— ॥ ३९ ॥

कर्मण्युपपदे कृञष्टः स्यात् भृतौ। कर्मकरः भृतौ किम् कर्मकारोऽन्यः।

·।· ७·

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु॥४०॥

एषूपपदेषु कृञः टो न स्यात्। हेत्वादिप्राप्तस्य निषेधः। अतस्तत्राणेव। शब्दकारः श्लोककारः चाटुकारः मन्त्रकारः पदकारः।*

७: ७: ·१·

स्तम्बशकृतोर्व्रीहिवत्सयोरिन् ॥ ४१ ॥

स्तम्बे उपपदे व्रीह्यर्थे, शकृत्युपपदे च वत्सेऽर्थे कृञ इन् स्यात्। नदृत्। स्तम्बकरिर्व्रीहिः शकृत्करिर्वत्सः। अन्यत्र स्तम्बकार इत्यादि।

---

* वेदार्थसंहितायां सन्ध्यादिना पदानामवयवपरिच्छिन्नानि च सन्ध्यादि कार्य्यमपहाय पदानि पृथग्भूतानि करोतीति पदकारः।

६॰ ॰१॰ ५॰ ॰१॰ ॰१॰

एजेः खश् अजादेश्च यथाशिष्टम् ॥४२॥

एजन्तेजतेः खश् स्यात् अजादेस्तु उपपदविशेषे यथाप्रयोगं खशादि स्यात्। खशावितौ शित्त्वात् शबादि। इति खशि।

६॰ ॰१॰ ७॰ ६॰ ॰१॰ ॰१॰

अरुर्द्विषदजन्तस्य मुँम् खिति एकाजिचस्त्वम् ॥४३॥

खिदन्ते धातौ परे अरुषोद्विषतोऽजन्तस्य च मुँमागमः स्यात्। एकाजिजन्तस्य अम् (द्वितीयैकवचनम्) स्यात्। उमावितौ। इति मुँमि जनमेजयः।

अजादेश्च यथाशिष्टं खशि वातमजो मृगे।
पुष्पन्धयो मधुकरे ज्ञेयो बाले स्तनन्धयः।
नाडिन्धमः स्वर्णकारे पशौ तद्वत् वहंलिहः।
अभ्रं लिहस्तथात्युच्चे राहावर्थे विधुन्तुदः।
अरुन्तुदो दुःखदे स्यात् मेघज्योतिरिरम्मदः।
ललाटन्तप उग्रांशावसूर्य्यंपश्य आहृते।
वशंवदस्तथायत्ते प्रियोक्तौ च प्रियंवदः।
प्लवन् सन् गच्छतीत्यर्थे प्लवगस्य प्लवङ्गमः।
पतन् सन् गच्छतीत्यर्थे पतङ्गस्य पतङ्गमः।

पतगोऽपि भवेदत्र भुजङ्गोऽहौ भुजङ्गमः ।
उरसा गच्छतीत्यर्थे उरगश्चाप्युरङ्गमः ।
तुरेण (वेगेन) गच्छतीत्यर्थे तुरगश्च तुरङ्गमः ।
विहायसा गच्छतीति विहङ्गश्च विहङ्गमः ।
विहगोऽपि भवेदत्र निपात्यन्ते खगादिभिः ।
सर्व्वंसहः समर्थे स्यात् रोगभेदे भगन्दरः ।
पुरन्दरः सहस्राक्षे पर्व्वते च युगन्धरः ।
पतिंवरा कन्यकायां शत्रुघातिन्यरिन्दमः ।
अभ्रङ्कषो वायुभेदे भयहेतौ भयङ्करः ।
सर्व्वंकषः सर्व्वहिंस्रे नदे कूलङ्कषो मतः ।
क्षेमङ्करक्षेमकारौ प्रियकारप्रियङ्करौ ।
प्रियकारिणि तद्वत् स्यात् विकल्पेन मताविमौ ।
विश्वम्भरा धरण्याञ्च सामभेदे रथन्तरम् ।
शत्रुन्तपः शक्तियुक्ते तस्मिन्नर्थेऽप्यरिन्दमः ।
वाचंयमो मौनिनि स्यात हस्तिनि स्यात् मितङ्गमः
कूलमुद्रुजतीत्यर्थे नदे स्यात् कूलमुद्रुजः ।
कूलमुद्वहते यस्तु नदोऽसौ कूलमुद्वहः ।
आत्मम्भरिस्तथा कुक्षिम्भरिः स्यादुदरम्भरिः ।
एते नयोनिपात्यन्ते स्वोदरस्यैव पूरके ।

७:· ७:· ७·
आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ
५· ७· ·१·
कृञः करणे ख्युन् ॥४४॥

अभूततद्भावार्थेषु अच्व्यन्तेषु कर्म्मसूपपदेष्वेषु करणे वाच्ये कृञः ख्युन् स्यात् । खनावितौ । इति ख्युनि योरनादेशे मुमि च अनाढ्यमाढ्यं कुर्व्वन्त्यनेनेति* आढ्यङ्करणं सुभगङ्करणमित्यादि ।

५· ७· १:
भुवः—कर्त्तरि खिष्णुखुकञौ ॥४५॥

कर्म्मणीति निवृत्तम् भवतेस्तद्यर्थे एतौ स्तः कर्त्तरि वाच्ये । खञावितौ । अनाढ्य आढ्यो भवतीति आढ्यम्भविष्णुः आढ्यम्भावुक इत्यादि । प्रियम्भविष्णुः ।

५· ७· ·१·
स्पृशोऽनुदके क्विँन् ॥४६॥

उदकभिन्ने उपपदे स्पृशेः क्विँन् स्यात् । क्विना-वितौ । इति क्विनि

५· १·
वमात्रस्य लोपः ॥४७॥

वमात्रप्रत्ययस्य लोपः स्यात् । इति वलोपे कुत्वे घृतस्पृक् मन्त्रेण स्पृशतीति मन्त्रस्पृक् ।

* आढ्यादिषूपपदेष्वित्येव वाच्यं ततश्च पूर्व्वसूत्रात् आढ्यादि-ष्वित्यनुवर्त्तनीयम् ।

१:

ऋत्विग्दधृक्स्रग्दिग्दृगुष्णिगस्रक्क्रुञ्चः ॥ ४८ ॥

एते क्विनन्ता निपात्यन्ते । ऋतौ यजते इति ऋत्विक् धृष्णातीति दधृक् सृज्यते इति स्रक् दिश्यते इति दिक् दृश्यते इति दृक् उर्द्धं स्निह्यति इति उष्णिक् न सृज्यते इत्यस्रक् क्रुञ्चते इति क्रुङ् ।

७: ७: ५·

समानान्यत्यदादिषूपमानेषु कर्म्मसु दृशेः सक् टक्कौ च कर्म्मणि ॥ ४९ ॥

१: ·१· ७·

समानादिषूपमानेषु कर्म्मसूपपदेषु कर्म्मणि वाच्ये दृशेः सक् टक् क्विन् च स्यात् । टकावितौ । समान-इव दृश्यते इति वाक्ये सकि वक्ष्यमाणेन समानस्य सादेशे यस्य षत्वे तस्य कत्वे षत्वे च सदृक्षः । टकि सदृशः स्त्रियां टित्वादीपि सदृशी । क्विनि कुत्वे सदृक् । अन्यदिव दृश्यते इति सकि

६· ७:·

सर्व्वनाम्न आदृदृक्षदृशदृक्षु ॥ ५० ॥

एषु परेषु सर्व्वनाम्न आदन्तादेशः स्यात् । इत्यात्वे अन्यादृक्षः अन्यादृशः अन्यादृक् । तादृक्षः तादृशः तादृक् । एवं यादृक्षादयः ।

समानस्य स आदेशः किमः कीः स्यात् सगादिषु।
ईर्भवेदिदमस्तेषु तथामूरदसो भवेत्।
किम्--कीदृक्षः इदम्--ईदृक्षः। अदस्--अमूदृक्षः।

५·
सत्सुद्विषद्रुहदुहयुजविदच्छिदजिनीराज उपस-
७· ७· ·१·
र्गेऽपि सुपि—क्विप्॥ ५१॥

एभ्यः क्विप् स्यादुपसर्गे सत्यसति वा सुबन्ते उपपदे क्विपावितौ। नाकसद् सभासद् संसद्। प्रसूः पितृद्विट्। मित्रध्रुक् गोधुक् कामधुक् अश्वयुक् वेदवित्।

५ः ६· ६·१·
अग्रग्रामाभ्यां नयतेर्नो णः॥ ५२॥

आभ्यां परस्य नयतेर्नस्य णः स्यात्। अग्रणीः ग्रामणीः। स्वराट्।

७· ५· १·
सुपि भजोर्ण्वः॥ ५३॥

सुबन्ते उपपदे भजतेर्ण्वः स्यात्। ण्वावितौ। वलोपे। सुखभाक् दुःखभाक्।

५· ७· ·१·
अदोऽनन्नेविट्॥ ५४॥

अन्नभिन्ने उपपदे अत्तेर्विट् स्यात्। इटावितौ

अस्यमत्तीति अस्यात् क्रव्यात्। अत्ति तु अत्ताद:।

३।२

असुसिस्मनिँक्वनिँब्वनिँप्क्विँप:॥ ५५॥

एते प्रत्यया: उपपदाभावेऽपि धातुसामान्यात् स्यु:। एषु विच्क्विपो: सर्वाभाव: अन्येषामिकनपा इत:। रज्यते इति असि (१२७पृ० १८सू०)नलोपे रज:। मनुते इति मन:। चष्टे इत्युसि ख्यादेशा-भावे चक्षु:। हूयते इति बाहुलकात् कर्म्मणि वाच्ये इसि हवि:। छादयतीति छादेर्ह्रस्वे छदि:।

६। ६।६।१। ६।१।१।

वशादेस्तस्य तेय क्ततो नेट्—॥ ५६॥

वश्प्रत्याहारादेस्तस्य तेय क्तत: इट् न स्यात् इतोऽभावे शर्म्म सुशर्म्मा वर्म्म छादयत्यान्तरमिति ह्रस्वे छद्म। क्वनिपि तुकि सुत्वा त्वभिषवे क्तते। प्रातरित्वा। सहयुध्वा पारदृश्वा। वनिपि अर्वा। क्विपि गी: पू: (१९९पृ० ८सू०) ऊठि। अच्छधू: (१३४पृ० २५सू०) इत्त्वे पुनर्गी: आशी:।

६।३   १। ७

गमाद्यनिटामन्तलोप: क्वौ—॥ ५७॥

क्विपि परे गमादीनाममनिटामन्तलोप: स्यात्। संगत् संयत्। “उपसर्गस्य दीर्घ: स्यात् क्विब् घञादौ क्वचिद्भवे” इत्युक्ते: दीर्घे परीतत्।

६· ६· ६· १·
अनुनासिकान्तस्योपधायास्तासिसेटोर्दीर्घः ॥५८॥

तासि सेटोऽनुनासिकान्तस्य धातोरुपधायाः दीर्घः स्यात् क्विपि (८४पृ० १३सू०) मस्य नत्वे शम-प्रशान् तम-प्रतान्।

७· ७· १·
सुप्यजातौ णिनि—स्ताच्छील्ये ॥ ५९ ॥

अजात्यर्थे सुबन्ते उपपदे धातोर्णिनिः स्यात्ताच्छील्यर्थे। उष्णाविती। उष्णभोजी शीतभोजी। उप जीवी अजातौ किं ब्राह्मणानामामन्त्रयिता।

७: ५·
साधुब्रह्मणोर्वदेः ॥ ६० ॥

एतयोरुपपदयोर्वदेर्णिनिः स्यादताच्छील्येऽपि। साधुवादी ब्रह्मवादी।

७· ७·
कर्त्तर्य्युपमाने— ॥ ६१ ॥

कर्त्तर्य्युपमाने उपपदे णिनिः स्यात्। सिंहइव विक्रमते सिंहविक्रमी। सुधास्यन्दी।

७· ५·
व्रते सर्व्वस्मात् ॥ ६२ ॥

व्रते गम्ये सर्व्वस्मात् धातोर्णिनिः स्यात्। स्थण्डिल शायी चीरपायी शिरःस्नायी।

७० ५० ७० ।१० ।१०

सुपि मन्यतेरात्ममाने खश् च ॥ ६३ ॥

सुबन्त उपपदे मन्यतेः खश् चात् णिनिः स्यात् आत्मकर्म्मकमाने। आत्मानं पण्डितं मन्यते इति वाक्ये खशि खित्त्वेन मुमि पण्डितम्मन्यः। गव्युपपदे द्वितीयैकवचनरूपेऽमि (६७पृ० ४६सू०) आत्वे गाम्मन्यः इयङि स्त्रियम्मन्या। उवङि सुभुवम्मन्या। पण्डितमानी गोमानी।

७० ५० १०

सुपि जनेर्डः ॥ ६४ ॥

सुबन्ते उपपदे जनेर्डः स्यात्। अजः अग्रजः द्विजः। सरसिजः मनसिजः। वक्ष्यमाणेनालुक् समासः पङ्कजः संस्कारजः पुण्यजः प्रजा।

५० ।१०

जीर्य्यतेरतृन् ॥ ६५ ॥

जीर्य्यतेरतृन् स्यात्। ऋणावितौ। जरन् जरती। शतरि तु जीर्य्यन् जीर्य्यन्तीति स्यात्।

७० ५० १० ७०

करणे यजेर्णिनिर्भूते— ॥ ६६ ॥

करणे उपपदे धातोरतीतेऽर्थे णिनिः स्यात्। सोमेने-ष्टवान् सोमयाजी राजसूययाजी।

७· ५·

कर्म्मणि हन्तेः— ॥ ६७ ॥

कर्म्मण्युपपदे भूते हन्तेर्णिनिः स्यात्। शत्रुघाती।

७:· ·।·

ब्रह्मभ्रूणवृत्रेषु क्विप्— ॥ ६८ ॥

एषु कर्म्मसूपपदेषु हन्तेर्भूते क्विप् स्यात्। इकपाइतः। ब्रह्महा भ्रूणहा वृत्रहा। सामान्यतः क्विपि प्राप्तेऽपि ब्रह्मादिष्वेव क्विबेवेति नियमार्थमिदम्।

७:· ५·

सुकर्म्मपापपुण्यमन्त्रेषु कृञः ॥ ६९ ॥

एषु कर्म्मसूपपदेषु कृञो भूते क्विप् स्यात्। सुकृत् कर्म्मकृत् पापकृत् पुण्यकृत् मन्त्रकृत्। अत्र स्वादिष्वेवेति नियमाभावात् भाष्यकृत् शास्त्रकृदित्यादौ सामान्यतः क्विप् स्यादेव। भूतार्थमेव तु सूत्रम्।

७· ५· ७··१· ५·

सोमे सुञोऽग्नौ च चिनोतेः ॥ ७० ॥

सोमे कर्म्मणि, सुञः, अग्नौ च कर्म्मणि, उपपदे चिनोतेर्भूते क्विप् स्यात्। सोमसुत् अग्निचित्।

७· ५· ।· ७·

कर्म्मणि विक्रिय इनिः कुत्सिते ॥ ७१ ॥

कर्म्मण्युपपदे विपूर्व्वात् क्रीणातेरिनिः स्यात् भूते कुत्सितेऽर्थे गम्ये। सोमविक्रयी मद्यविक्रयी।

५॰ ॰१॰　　　　　७ः॰

धातोस्तृन् तच्छीलतद्धर्मतत्साधुकारिषु—॥७२॥

एष्वर्थेषु धातोस्तृन् स्यात् । नद्धृत् । कटं कर्त्ता । तृनः शीलार्थकतया न कर्मणि षष्ठी ।* एते चार्था उत्तरत्र सर्व्वत्रानुवर्त्याः ।

अलंनिराकृञ्प्रजनोत्पतोन्मदरुचपचनपवृतवृध

५ः॰　!॰

सहचरिभ्य इष्णुः ॥७३॥

प्रागुक्तेष्वर्थेषु एतेभ्यः इष्णुः स्यात् । अलङ्करिष्णुः । निराकरिष्णुः । प्रजनिष्णुरित्यादि ।

५ः॰ ॰१॰　६॰॰१॰ ॰!॰॰१॰

ग्लाभूस्थाजिभ्यः स्नुक् स्यस्तु नेत् ॥७४॥

एभ्यः स्नुक् स्यात् तिष्ठतेस्तु ईत्त्वं न । कद्धृत् । ग्लास्नुः । भुवः स्नुकि वलादिनिमित्ते इटि प्राप्ते

५॰　६॰　　६॰॰१॰॰१॰

श्र्युकः क्तः किती नेट् ॥७५॥†

श्रिञ उगन्ताच्च परस्य कित्संज्ञस्य क्तः स्थाने इट् न स्यात् । भूष्णुः । ग्लास्नुः । जिष्णुः ।

---

* न लोकाव्ययखलर्थतृनामिति २।३।६९ सू० पाणिनिनाऽप्यस्य निर्द्देशेन तृनुप्रत्याहारस्य ग्रहणस्य सूचनाय तन्मध्ये शीलार्थतृनः सत्वात् तदनुरोधेन शीलार्थतृनि न षष्ठीति वक्तव्यत्वलेन षष्ठीनिषेधः॥

† श्रिञाद्यर्थात् एकाच एव ग्रहणं तेन जागर्त्तेर्न निषेधः ततश्च इटि निपातनात् गुणे जागरितमिति ———

५॰ १॰

त्रसिगृधिधृषिक्षिपः क्नुः ॥७६॥

पूर्व्वार्थेषु एभ्यः क्नुः स्यात् । कइत् त्रस्नुः गृध्नुः* धृष्णुः क्षिप्णुः ।

संपृच् संसृज युज विविच त्यज रुज भुज भजि-
५ः ॰१॰
भ्यो घिनुँण् ॥७७॥

एभ्यो घिनुँण् स्यात् । उघणादृतः । घित्वात् चजोः कुत्वम् । संपर्की संसर्गी योगी विवेकी त्यागी रोगी भोगी भागी ।

५ः॰ १॰

जु क्रमु सृ ज्वल शुच क्रुध मण्डनार्थेभ्यो युः ॥७८॥

ज्वादेः भूषणार्थाच्च युः स्यात् । योरनादेशे जवनः संक्रमणः । सरणः । ज्वलनः । शोचनः । क्रोधनः । कोपनः । मण्डनः ।

५ः ॰१॰

लषपतपदस्थाभूवृषहनकमगमिभ्य उकञ् ॥७९॥

एभ्य उकञ् स्यात् । अइत् लाषुकः पातुकः पादुकः स्थायुकः वर्षुकः घातुक इत्यादि ।

५ः १॰

प्रजुजिदृक्षिविश्रिपरिभूप्रसुभ्य इनिः ॥८०॥

एभ्यः इनिः स्यात् इकारइत् । प्रजवी । जयी । दरी क्षयी । विश्रयी । परिभवी । प्रसवी ।

५ः १॰

स्पृहिगृहिपतिदयिनिद्रातन्द्रिभ्य आलुः ॥८१॥

एभ्य आलुः स्यात् । स्पृहयालुः दयालुः निद्रालुः ।

---

* त्रस गृध धृषां सेट्कत्वेऽपि वक्ष्यमाणेन क्ग्राद्रेरित्यनेन सूत्रेण इड् निषेधः ।

सृघस्यदः क्मरः ॥ ८२ ॥

एभ्यः क्मरः स्यात् । कद्वत् सृमरः । घस्मरः । अद्मरः ।

५॰ १॰ ५॰॰१॰ ७॰

भासभिदो घुरो भन्जेस्तु कर्मकर्त्तरि ।८३॥

प्रागर्थेषु आभ्यां घुरः स्यात् भन्जेस्तु कर्मकर्त्तरि । घद्वत् । भासुरः भेदुरः । घित्वाद् जस्य गत्वे भङ्गुरः ।

५॰ १॰ ७॰

विदिभिदिच्छिदेः कुरः कर्त्तरि ॥८४॥

एभ्यः कर्त्तरि वाच्ये प्रागर्थेषु कुरः स्यात् । कद्वत् । विदुरः । भिदुरः । छिदुरः ।

५॰ ॰१॰

इण्नशजिगमिभ्यः क्वरप् ॥८५॥

इणादिभ्यः क्वरप् स्यात् । पकपा इतः । पित्वात्तुकि षित्वात् स्त्रियामीपि इत्वरी । नश्वरः जित्वरः अन्त्यलोपे तुकि गत्वरः ।

५॰ १॰

जागृयङन्तयजजपदंशि ऊकः ॥६६॥

प्रागर्थेषु एभ्यः ऊकः स्यात् । जागरूकः । यायजूकः । जंजपूकः । दंदशूकः ।

५०१०
नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥८७॥

प्रागुक्तार्थेषु एभ्यो रः स्यात्। नम्रः कम्प्रः स्मेरः नञ्पूर्व्वो जसिः क्रियासातत्ये अजस्रः। कम्रः हिंस्रः दीप्रः।

५०१०
सनन्ताशंसभिक्ष उः ॥८८॥

एभ्यः उः स्यात्। चिकीर्षुः। जिगमिषुः। आशंसुः भिक्षुः।

१०
विन्दूच्छू ॥ ८९ ॥

एतौ उप्रत्ययान्तौ निपात्यौ।

७:० ५० १०
शंविप्रेषु भुवो डुः ॥ ९० ॥

एषूपपदेषु भुवो डुः स्यात्। डइत्। शम्भुः। विभुः प्रभुः।

५० १:०
भियः क्रु क्रुक क्लुकाः ॥ ९१ ॥

बिभेतेरेते स्युः। कइत्। भीरुः। भीरुकः। भीलुकः

५० १०
स्थेशभासो वरः ॥ ९२ ॥

एभ्यो वरः स्यात्। स्थावरः ईश्वरः। भास्वरः।

इति कर्त्तृकृदन्तप्रकरणम्।

निष्ठाकृदन्तप्रकरणम् ।

५· १· ७·

धातोर्निष्ठा भूते ॥ १ ॥

भूते काले धातोर्निष्ठा (क्तक्तवतू) स्यात् । उकावितौ । तत्र भावकर्मणोरेवेत्युक्तेः भावकर्मणोः क्तः । क्तवतुस्तु कर्त्तर्य्येव कर्त्तरि कृदित्युक्तेः । तत्र भावक्तान्तस्य नपुंसकता । विद्-भावे क्ते इटि विदितम् कर्मणि विदितः क्तवतौ विदितवान् (२७१पृ०७५सू०) इड्-निषेधे श्रि-श्रितः । यु-युतः । रु-रुतः । भू-भूतः । हृ-हृतः । ज्ञा—ज्ञातः । गॄ—इरि ।

५· ६·१· ६··१·६·· ६·

रदाभ्यां निष्ठातो-नः-पूर्व्वस्य च दोऽमदेः ॥२॥

रेफदकाराभ्यां परस्य निष्ठातकारस्य स्थाने नः स्यात् निष्ठातः पूर्व्वस्य धातोर्दस्य च नः स्यात् । इति रपरतया नत्वे दीर्घे गीर्णः । गॄ—गीर्णः ।

५· ५· ५· ५· ५··१·

संयोगादेरातो धातोर्यण्वतः ल्वादिभ्यश्च ॥३॥

संयोगादेर्यण्वत आदन्ताद्धातोः, ल्वादिभ्यश्च परस्य निष्ठातस्य नः स्यात् । ध्यानः द्राणः । ग्लानः । ल्वादयस्तु (सि०उ०२६५पृ०) द्रष्टव्याः । लूनः दूनः ।

५॰ ५॰॰१॰ ५॰

ओदितः क्तियश्च दीर्घात्—॥४॥

धातुपाठे ओकारेतो धातोः (डीभुजप्रभृतेः) दीर्घान्तात क्तियश्च परस्य प्रागुक्तं स्यात् । ओडी—उड्डीनः भुजो-जस्य गत्वे भुग्नः । संयोगाद्यसलोपे मस्ज—मग्नः । दीर्घादित्युक्तेः क्षियः दीर्घोऽपि क्षीणः ।

५॰ ६॰

दिवोऽजिगीषायाम् ॥५॥

अजिगीषावृत्तेर्दिवः परस्य प्रागुक्तं स्यात् । इतिनिष्ठा तस्य नत्वे ऊठि-आद्यूनः औदरिकः । अन्यत्र द्यूतम् ।

५ः॰ ॰१॰ ५॰ ॰१॰ ७ः

नुदत्राघ्राक्षीभ्यो वा विदस्तु धनप्रतीतयोः ॥६॥

नुदादेः परस्य प्रागुक्तं वा स्यात् विदस्तु धनविख्यातयोः । नुन्नः नुत्तः । त्राणः त्रातः । घ्राणः घ्रातः । क्षीणः क्षीतः । वित्तं धनं वित्तः ख्यातः । अन्यत्र विन्नः ।

१॰ ७॰ १॰ ७॰

भित्तं शकले ऋणमाधमर्ण्ये ॥ ७ ॥

एतयोरर्थयोरेतौ निपात्यौ अन्यत्र भिन्नम् । ऋतम् ।

५॰ १॰ ५॰१॰ ५॰॰१॰१॰

शुषः कः पचोवः क्षायश्च मः ॥८ ॥

शुषः परस्य निष्ठातस्य कः, पचः परस्य वः, क्षायः

परस्य च मः स्यात्। शुष्कः पक्वः क्षामः।

५· १:·

अनुपसर्गात् फुल्लोत्फुल्लसंफुल्लक्षीवकृशाः निर्वा-

१··१· ७·

णोऽवाते ॥९॥

अनुपसर्गात् एते निपात्यन्ते। क्तवत्वेकदेशतकारस्यापीदम्। फुल्लः फुल्लवान्। क्षीवो मत्तः। कृशस्तनुः। निर्वाणो दीपः। वाते तु निर्वातः। उपसर्गे तु ञि फला विशरणे इत्यस्य आकारेत्वात्

५· ६··१··१· ७:·१··१·

आदितो निष्ठाया नेट् भावादिक्रिययोस्तु वा ॥१०॥

आकारेतः परस्य निष्ठायाः स्थाने इट् न स्यात् भावारम्भक्रियार्थयोस्तु वा। इतीड्निषेधे

६: ६· ·१·७· ७·

चरफलोरत इत् ति किति ॥११॥

चरफलोरकारस्य इत् स्यात् तादौ किति परे। इति उकारे प्रफुल्तः प्रफलितः फलितुमारब्धवान्। भावे तु प्रफुल्तम् प्रफलितम्।* प्रफुल्तराजीवमिवाक्षमध्ये इत्यत्र तकारमध्य एव पाठः। लोध्रद्रुमं सानुमतः प्रफुल्लमित्यत्र तु फुल्ल विकाशे इत्यस्य पचाद्यचि रूपम्। उदादेस्तु विशेषात् उत्फुल्लः संफुल्ल इति।

---

* प्रफुल्तराजीवमित्यत्र कर्त्तरि निष्ठायाम् आदित इत्यादिना इड्निषेधः।

५॰ ६॰ ॰१॰ ॰१॰

श्वयतीदितो निष्ठाया नेट् — ॥१२॥

श्वयतेरीकारेतश्च परस्या निष्ठाया इट् न स्यात्। श्वि-क्ते संप्रसारणे ओकारेत्त्वात्तस्य नत्वे शूनः मदी-मत्तः।

५॰ ५॰

विकल्पितेट्कादपतिदरिद्रानिष्कुषः ॥१३॥

पत्यादिवर्ज्जात् विकल्पितेट्कात् धातोः परस्या निष्ठाया इट् न स्यात्। हृतू हृत्तः। क्लृपू क्लृप्तः। पत्यादेस्तु पतितः। दरिद्रितः। निष्कुषितः।

५ः ६ः ॰१॰ ५॰ ॰१॰ ७॰

वसतिक्षुधिभ्यां क्त्वानिष्ठयोरिट्—लुभस्तु मोहने ॥१४॥

आभ्यां परयोः क्त्वानिष्ठयोरिट् स्यात् लुभस्तु विमोहनेऽर्थे। वस-उषितः। क्षुध-क्षुधितः। लुभ-लुभितः गार्द्ध्ये तु लुब्धः।

५ः ॰१॰

पूक्लिशिभ्यां वा ॥१५॥

आभ्यां परयोः क्त्वानिष्ठयोर्वा इट् स्यात्। पूञः (११८पृ॰ १८सू॰) कित्त्वाभावे पवितः पक्षे पूतः। क्लिशितः क्लिष्टः। (११८पृ॰ १७सू॰) अकित्त्वे शयितः श्वेदितः। धर्षितः। मृष-मर्षितः क्षान्तौ अन्यत्रापमृषितम्।

७० ७०.०१.१०
आरम्भक्रियायां कर्त्तरि च क्तः ॥१६॥

आरम्भार्थक्रियावृत्तिधातोः कर्त्तरि चात् भावकर्म्मणोः क्तः स्यात् । ञिक्ष्विदा-क्ष्वेदितः क्ष्विण्णः । ञिमिदा-मेदितः मिन्नः मेदितुमारब्धवानित्यर्थः । (११८पृ० १८सू०) पक्षे कित्त्वाभावे द्योतितम् द्युतितम् । तत्र यवृवत इत्युक्तेः रुदितम् । विदितम् ।

६० १० ७०
णेर्लोपो निष्ठायाम् ॥१७॥

निष्ठायां परतः णेर्लोपः स्यात् । भावितः ।
क्षुब्धो मन्थे हृदि स्वान्तं ध्वान्तं तमसि साध्यते ।
लग्नं सक्ते भृशे वाढं क्लिष्टमस्पष्टवाचकम् ।
धृष्टो ऽलज्जे विशस्तः स्यात् पक्षे विशसितो भवेत् ।
दृढः स्थूले बलवति प्रभौ परिवृढो मतः ।
कष्टं कृच्छ्रे ऽतिगहने समीपे ऽभ्यर्णमिष्यते ।
वर्त्तवृत्तमध्ययने श्रृतं पक्के निपात्यते ।
णिजन्तस्य दमादेस्तु दान्तशान्तौ विभाषया ।
पूर्णं स्पष्टं तथा च्छन्नं ज्ञप्तं पक्षे यथायथम् ।
प्यायः पीनं तु निष्ठायां स्फायः स्फीतं तथा भवेत् ।
हृषेर्लोमनि हृष्टं स्याद् स्वन्ते तु हृषितं मतम् ।

त्वरितं तु त्वरे स्तूर्णं रुष्टं च रुषितं रुषेः।
निष्णातश्च नदीष्णातः स्नातिः स्यात् कुशलार्थके।

६:··१·७· ७·६··१··१·
द्यतिस्यतिमास्थामित्ति-किति-शस्तु वा ॥१८॥

तादौ किति परे एषामाकारोऽन्तादेशः स्यात् श्यतेस्तु वा। दो-दितः। सो-सितः। मा-मितः स्था-स्थितः। शो-शितः शातः।

६· १·
दधातेर्हिः ॥१९॥

तादौ किति परे दधातेर्हिः स्यात्। हितः।

६· १· ५··१· १· ६··१· १·
दोदद्‌पसर्गाचस्तु तुँश् इकस्तु दीर्घः ॥२०॥

तादौ किति परे दा इत्यस्य दद् स्यात् उपसर्गाचः परस्य तु तुँ श् स्यात् तस्मिन् सति च इगन्तस्योपसर्गस्य दीर्घः स्यात्। उशावितौ। शित्त्वात्। सर्व्वादेशः। दत्तम्। प्रत्तम् आत्तम्। नीत्तम् वीत्तम्।

अवदत्तं विदत्तञ्च प्रदत्तञ्चादिकर्म्मणि।
सुदत्तमनुदत्तञ्च निदत्तं वा निपात्यते॥

६· १· ७··१· ७·
अदोजग्धिँ ल्यपि चानोदने ॥२१॥*

ओदनभिन्नेऽर्थे तादौ किति ल्यपि च परे अदो

* अनोदन इति निशाविषयं क्तिल्यपोस्तद्वाचकत्वाभावात्।

जग्धिः स्यात् । इकारद्दत् । जग्धम् । ओदने तु अन्नम् ।

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्य-
५:·   ७· ·१· १·
तिभ्यः कर्त्तरि च क्तः ॥ २२ ॥

एभ्यः कर्त्तरि भावकर्म्मणोश्च क्तः स्यात् । अकर्म्मकत्वेन प्राप्तेऽपि आधारस्य कर्म्मसंज्ञया सकर्म्मकत्वेनाप्राप्तौ शीङादीनां पृथग्ग्रहणम् । ग्रामं गतः । गत्यर्थग्रहणे प्राप्त्यर्थस्यापि ग्रहणमिति प्राप्तः । ग्लानः । भूतः । श्रियमाश्लिष्टः । शय्यामधिशयितः । आसनमधिष्ठितः । नृपमुपासितः । रजनीमुपोषितः । अग्रजमनुजातः । अश्वमारूढः । देहमनुजीर्णः । भावकर्म्मणोस्तु यथायथमूह्यम् ।

५:· १·   ७· ·१·
स्थैर्य्यगतिभोजनार्थेभ्यः क्तोऽधिकरणे च ॥ २३ ॥

स्थैर्य्याद्यर्थेभ्यो धातुभ्यः अधिकरणे, यथाप्राप्तं कर्म्मभावयोः, कर्त्तरि च क्तः स्यात् ।

गुरोः स्थितमिदं तस्य यातमासनमन्तिके ।

भुक्तं भाजनमस्येदं मनसा तं सदा भज ।

यथाप्राप्तमपि भावादौ ।

५॰ ५:॰ १॰ ७॰ १॰

ञीत इच्छाबुद्धिपूजार्थेभ्यश्च वर्त्तमाने क्तः ॥२४॥

गणे ञिकारेतो धातोरभिलाषाद्यर्थेभ्यश्च वर्त्तमाने क्तः स्यात्। भूते इत्यस्यापवादः। ञि इन्धी इद्धः अत्राकर्म्मकत्वात् कर्त्तरि क्तः। सतामिष्टः-मतः बुद्धः विदितः इष्यमाण इत्याद्यर्थः। अत्र कर्म्मणि क्तः। कर्त्तरि तु नेष्यते।

शिलितो रक्षितः क्षान्त आक्रुष्टो जुष्टइत्यपि।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि।
हृष्टतुष्टौ तथा क्लान्तस्तथोभौ संयतोद्यतौ।
वर्त्तमानेऽपि कालेऽमी यथाप्राप्ते ऽप्यनेहसि।

इति निष्ठाकृदन्तप्रकरणम्।

कर्म्मादिकृदन्तप्रकरणम्।

५॰ ७॰ १॰

धः कर्म्मणि ष्ट्रः— ॥ १ ॥

कर्म्मणि वाच्ये धेटो धाञश्च ष्ट्रः स्यात्। षड्त। षित्वात् स्त्रियामीपि धात्री।

दो नी शस यु युज स्तु तुद सिह पत दन्श-
५ः ७॰
नहिभ्यः करणे— ॥ २ ॥

करणे वाच्ये एभ्यः ष्ट्रन् स्यात्। दात्रम् नेत्रम् शस्त्रम् योत्रम् योक्त्रम् स्तोत्रम् तोत्त्रम् सेढ्रम् पत्त्रम् दंष्ट्रा अजाजादित्वाट्टाप्। नद्ध्री।

७॰ १॰
हलशूकरमुखे पोत्रम् ॥ ३ ॥

हलस्य शूकरस्य च मुखेऽर्थे पोत्रं निपात्यते।

५ः १॰
अर्त्तिपूलूधूखनिचरिभ्य इत्रः ॥ ४ ॥

एभ्यः करणे इत्रः स्यात्। अरित्रम् पवित्रम्। लवित्रम्। धवित्रम्। खनित्रम्। चरित्रम्।

३॰ ७॰
लटः शतृँ शानौ—अप्रथमान्तार्थाभेदे ॥ ५ ॥

अप्रथमान्तार्थेनाभेदान्वये सति लटः शतृँशानौ स्याताम्। तत्र परस्मैपदस्थाने शता आत्मनेपदस्थाने च शानः। ऋग्याविती। तेन शबादि। पचन्तं पश्य। पचता दृश्यते। गच्छते ददाति। चलतः पतति। अर्ज्जयतो धनम्। गच्छति जने चेष्टा।

६॰ ७॰ ॰१॰

अत आने मुँक् ॥ ६ ॥

अदन्तस्याङ्गस्य मुँक् स्यादाने परे। पचमानं पश्य।

१ः॰ ७॰ ॰१॰

सदादयः प्रथमान्तार्थाभेदेऽपि—॥ ७ ॥

सन् ब्राह्मणः विद्वन् विप्रः।

७॰ ॰१॰

सम्बोधने च ॥ ८ ॥

सम्बोधनार्थकप्रथमान्तार्थाभेदेऽपि शतृशानौ स्तः।*
हे पचन् हे गच्छन् हे पचमान।

७ः ६॰

लक्षणहेत्वोः क्रियायाः ॥ ९ ॥

क्रियायाः परिचायके हेतौ चार्थे प्रथमान्तार्था भेदेऽपि तौ स्तः। शयाना यवना भुञ्जते। पठन् छात्रो याति। अर्जयन् वसति। ईश्वरं ध्यायन् मुच्यते। कृतो नस्य णत्वे प्रयीयमाण इत्यादि।

५॰ ६॰ ॰१॰

आस आनस्येत् ॥ १० ॥

आसःपरस्य आन इत्यस्यादेरीत् स्यात्। आसीनः।

---

* अत इति अङ्गस्य विशेषणं तेन ४४पृ०१७सू० प्रकृतेरिव विकरणस्याप्यङ्गसंज्ञाविधानात् पचमानमित्यत्र शविकरणयुक्त पचोऽङ्गत्वात् तस्मादन्तात् परस्य मुक्।

५॰ ६॰ १॰॰१॰
विदेः शतुर्वसुँर्वा ॥ ११ ॥

विदेः परस्य शतुः स्थाने वसुँर्वा स्यात् । उद्दित् । विद्वान् विदन् ।

७ः॰ ५॰॰१॰ १॰
ताच्छील्यवयोवचनशक्तिषु पूङ्यजय शानः ॥१२॥

एष्वर्थेषु धातुमात्रात्, पूङ्यजिभ्याञ्चान्यार्थेऽपि शानः स्यात् । शत्रपवादः । भोग्यं भुञ्जानः । कवचं बिभ्राणः । शत्रुं निघ्नानः । पवमानः । यजमानः । अर्हन् पूज्ये द्विषन् शत्रौ सुन्वन् यज्ञक्रियावति ।

६॰ १ः ७॰ ७॰॰१॰
लृटः स्यतृँ स्यमानौ क्वचित्तुमर्थे च ॥ १३ ॥

लृटः स्थाने स्यतृँस्यमानौ स्तः क्वचित्तुमर्थे च । ऋकार इत् । करिष्यन् करिष्यमाणः । पश्यन् याति द्रष्टुं यातीत्यर्थः ।

६॰ १ः
लिटः क्वँसुकानौ ॥ १४ ॥

लिटः स्थाने क्वसुकानौ स्याताम् । उकावितौ । लिट्स्थानिकत्वेनामुं विहाय सर्वं द्वित्वादि कार्यम् । बुभूवान् तुष्टुवान् ॥

६॰ ५ः॰ ॰१॰ ५॰ ॰१॰ ॰१॰

वसोरेकाजाद्घसिभ्य इट् गमहनविदृशस्तु वा ॥१५॥

एभ्यः परस्य वसोः स्थाने इट् स्यात् गमादेस्तु वा। वशादिकृत्तया इटो निषेधेऽनेन प्रतिप्रसवः। एकाचः आरिवान्। पेचिवान् पेतिवान्। आतः ददिवान्। घस--जक्षिवान्। गम--जग्मिवान् जगन्वान्। हन-जघ्निवान् जघन्वान्। विद--विविदिवान् विविद्वान्। दृश-ददृशिवान् ददृश्वान्।

१ः॰ ७॰

गमिगास्यादयो भविष्यति ॥ १६ ॥

गमिप्रभृतयो भविष्यति स्युः। गमी गामी भावी

१ः॰ ७॰

भीमादयोऽपादाने ॥ १७ ॥

बिभेत्यस्मात् भीमः भीषयतेऽस्मात् भीष्मः प्रस्कन्दनः। रक्ष्यते यस्मात् रक्षः।

१ः ७॰ ७॰ ७॰

तुमुँन्वुणौ क्रियार्थायां क्रियायां भावे समान

७॰

कर्त्तृकत्वे ॥ १८ ॥

भावे वाच्ये समानकर्त्तृकत्वे द्योत्ये क्रियार्थक्रियावृत्तिधातोः तुमुँन्वुणौ स्याताम्। उनणाद्वतः।

अन्नं भोक्तुं पचति भोजनार्थकः पाक एककर्तृक इत्यर्थः । एवं नृपं सेवितुं याति । चोरकादेशे देवं दर्शको याति । अन्यकर्तृके तु न ।

७।३ ७।३ १।१

इच्छार्थेषु समानकर्तृकेषु तुमुन् ॥ १९ ॥

इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुँन् स्यात् । अक्रियार्थोयमारम्भः । इच्छति भोक्तुम् वाञ्छति भोक्तुम् ।

७।३

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु ॥२०॥

एषूपपदेषु धातोस्तुमुँन् स्यात् । शक्नोति भोक्तुम् । धृष्णोति जानाति ग्लायति घटते रभते लभते क्रमते सहते अर्हति अस्ति विद्यते वा भोक्तुम् ।

७।३ ७।३ १।१

पर्याप्तिवचनेष्वलमर्थेषु च ॥ २१ ॥

पर्याप्तिः पूर्णता तदर्थेषु सामर्थ्यवचनेषु चोपपदेषु धातोस्तुमुँन् स्यात् । अक्रियार्थोऽयमारम्भः । पर्याप्तः प्रवीणः कुशलः पटुर्वा भोक्तुम् । अलं भोक्तुम् ।

७।३ १।१

कालसमयवेलासु च ॥ २२ ॥

एषूपपदेषु धातोस्तुमुँन् स्यात् । कालोभोक्तुं समयो-* भोक्तुं वेला भोक्तुम् ।

* कालादीनामुपपदत्वेऽपि तुमुनोऽमन्तत्वाभावाच्च समासः अमन्ताव्ययस्यैवोपपद समासस्याग्रे——वक्ष्यमाणत्वात् ।

१:· ७· ७· ७·

घञादयो भविष्यति क्रियार्थायां क्रियायाम्।२३॥

वक्ष्यमाणा घञादयो भविष्यति काले क्रियार्थं क्रिया-वृत्तिधातोः स्युः। यागाय याति यष्टुं यातीत्यर्थः। यजनाय याति यष्टुं यातीत्यर्थः।

५· ·१· ७·

पदरुजदिशस्पृशोघञ्—कर्त्तरि—॥ २४ ॥

एभ्यः कर्त्तरि वाच्ये घञ् स्यात्। घञावितौ। पद्यते इति पादः। रुजतीति रोगः। विशतीति वेशः। स्पृशतीति स्पर्शः।

५· ७· ७:· ·१·

सरतेः स्थिरे व्याधिमत्स्यबलेषु च॥ २५ ॥

स्थिरे कर्त्तरि व्याध्या दिष्वर्थेषु च सरतेर्घञ् स्यात्। सरति कालान्तरमिति सारः। व्याधौ अतीसारः। विसारो मत्स्यः। सारो बलम्।

७· १· ·१· ७· १:·

भावे-ऽकर्त्तरि-च कारके-घञादयः॥ २६ ॥

भावे कर्त्तृभिन्नकारके च वाच्ये घञादयः स्युः। पाकः। त्यागः। रज्यतेऽनेनेति रागः प्रास्यते इति प्रासः। लभ्यते इति लाभः लभ्यमित्यर्थः। शमी-ऽस्वे शमः। कामादेस्तु कामः आचामः वामः।

५० ०१० ७० ५००१०

धातोर्घञ् उपसर्गे रुवश्च ॥ २७ ॥

धातुमात्रात्, उपसर्गे उपपदे रौतेश्च घञ् स्यात्। घञावितौ। रौतेरपोऽपवादः। ह्रासः। सन्तानः। दायः। संप्रदायः। संरावः विरावः आरावः।

७० ५० १००।० ७० ७ः

अनुपसर्गे श्रिनीभुवो नियश्चाङि उत्प्रयोः

५ः ०।०

श्रिभूभ्यां वा ॥ २८ ॥

उपसर्गोपपदाभावे एभ्यः, आङि नियश्च घञ् स्यात् उदि तु श्रियः, प्रे च भुवो वा स्यात् पक्षे यथाप्राप्तमजपौ। श्रायः। नायः। भावः। उपसर्गे तु विभवः संभवः। विनयः प्रणयः उपनयः। आङि तु आनायः। उदि तु श्रियः—उच्छ्रायः उच्छ्रयः। प्रे तु भुवः— प्रभावः प्रभवः।

७० ५ः ५००१० ७०

प्रे स्रुस्तुभ्यां स्तृणातेश्च छन्दोभेदगणनायाम् ॥२९॥

प्रे उपसर्गे उपपदे आभ्यां, स्तृणातेश्च छन्दोभेदगणनायाम् घञ् स्यात्। प्रस्तावः प्रस्रावः। प्रस्तारः छन्दोभेदगणना। प्रे किम् संस्तवः। संस्रवः।प्रस्तरः।

७ः ५ः ७०

उन्न्योः कृगृभ्यामसमूहे ॥ ३० ॥

उदि नौ चोपपदे आभ्यां घञ् स्यात्। उत्कारः

निकारः परिभवः। उद्गारः निगारः। अनयोः किम् करः गरः समूहे तु उत्करः निकरः।

५। ०१।

एरच्॥ ३१॥

इवर्णान्तादच् स्यात् भावेऽकर्त्तरि च कारके। पद्धत्। घञोऽपवादः। अत्ययः अन्वयः जयः क्षयः चयः। भयम् नपुंसकता लोकात्। अत्रायं विशेषः।

इणो निपूर्व्वात् न्यायः स्यात् पर्य्यायस्तु परेर्मतः।
अन्यत्राचात्यय स्तस्मादन्वयप्रत्ययव्ययाः।
उपादिङोऽप्युपाध्यायो गुरौ वाच्ये घञा भवेत्।
ग्रन्थैकदेशेऽप्यध्याय स्तदन्यत्राज्विधिर्भवेत्।
आयो लाभे घञि भवेज्जाले आनाय इष्यते।

५। ०१।

ऋदुवर्णान्ताभ्यामप्॥ ३२॥

ऋदन्तादुवर्णान्ताच्च भावेऽकर्त्तरि च कारकेऽप् स्यात्। पद्धत्। घञोऽपवादः। कृ—करः गृ-गरः स्तृ-गरः। यु-यव। स्तु-स्तवः। रु-रवः। भू-भवः।

५।०

ग्रहवृदृनिश्चिगमवशरणिभ्यः॥ ३३॥

एभ्योऽपि अप् स्यात्। ग्रह—ग्रहः। वृ-वरः।

दृ-दरः। नि-गम-निगमः। वश-वशः। रण-रणः।

५ः ७॰
व्यधजपिभ्यामनुपसर्गे ॥ २४ ॥

उपसर्गोपपदाभावे आभ्यामप् स्यात्। व्यधः जपः। उपसर्गे तु विव्याधः उपजापः।

१ः॰
गोचरप्रकरव्रजापणाः ॥ २५ ॥

गोचरो विषये साध्यः संचार्थे प्रकरोमतः। अपातव्रजो गोष्ठे हट्टे साध्यस्त्वापणः। अन्यत्र संचार प्रकारः।

५॰ ॰१॰ ७॰॰१॰
हलो घञ् संज्ञायाञ्च ॥ २६ ॥

हलन्तात् घञ् संज्ञायां स्यात्। रमन्तेऽस्मिन् योगिन इति रामः। अपमृज्यतेऽनेनेत्यपामार्गः उपसर्गस्य दीर्घत्वम्।

अथ घञजपां विषयप्रदर्शनम्।

वेः स्तृणाते शब्दभिन्नसंघेऽर्थे घञ् भवेत् ततः।
विस्तारः शब्दसंघे तु विस्तरो विष्टरो द्रुमो॥
निवासार्थे निकायस्ते निपूर्व्वाचस्य के सति।
संघार्थेऽपि तथा, देहे काय इत्यत्र घञ्विधिः।
अवग्राहोऽभिभवने निग्राहो बाधनार्थके।
अवपूर्व्वात् हस्तिबाधेऽवग्राहावग्रहो ग्रहेः॥

निङ्घणातेस्तु नीवारो धान्यभेदे घञिष्यते।
उदः श्रिञो घञचौ स्त उच्छ्रायश्च तथोच्छ्रयः॥
आङः प्लुवो घञपौ स्त आप्लावश्च तथाप्लवः।
परिभावः परिभवः प्रग्राहः प्रग्रहस्तथा॥
नियामो नियमो वा तूपयामोपयमौ तथा।
निगादो निगदो ज्ञेयो निनादो निनदस्तथा॥
निस्वानो निस्वनस्तद्वत् घञपा च विकल्पनात्।
क्वणः क्वाणश्च वीणाजे रवे निक्वाणनिक्वणौ॥
प्रक्वाणादिस्तथैवात्र परशब्दे क्वणादयः।
संमदप्रमदौ हर्षे प्रमादोऽनवधानके॥
उन्मादो रोगभेदे तु परत्रोन्मद इष्यते।
मदो हर्षे तथा गर्व्वे मत्तत्वे माद इष्यते॥
आह्वावस्तु निपाने स्यात् युद्धे आहवमिष्यते।
आङि ह्वञो निपात्येते घञपा च क्रमात्तु तौ॥
ताभ्यां घातो वधौ हन्तेर्मूर्त्तौ तु घन इष्यते।
अगारस्यैकदेशे च प्रघाणप्रघणौ मतौ॥
उद्घनः काष्ठभेदेऽस्त्रेऽपघनो देहवाचकः।
द्रुघणो मुद्गरार्थे च करणार्थे त्वयोघनः॥
स्तम्भघ्नः स्यात् स्तम्भघनः परिघश्चास्त्रभेदके।
उपघ्न आश्रयार्थे स्यात् संघोद्घौ गणप्रशस्तयोः॥

कान्ता घान्ता घञन्ताश्च हन्तेरेते निपातिताः।
स्फारः स्फुरेर्घञि भवेत् स्फुलेः स्फालस्तथा भवेत्।
स्यदः स्यन्देर्जवे वाच्ये एध इन्धेश्च दारुणि।

५। ।१। ७। ७।।१। ७।

धातोर्ल्युड् भावेऽकर्त्तरि च — कारके ॥ ३७ ॥

भावेऽकर्त्तरि च कारके धातोर्ल्युट् स्यात्। लटावितौ। योरनादेशे भवनम् करणम् जननम्।

१ः। १ः।

किरणलेखन्युपोषणादयो निपात्याः ॥ ३८ ॥

एते ल्युडन्ता निपात्यन्ते। कीर्य्यते इति किरणः लिख्यतेऽनया लेखनी उपोष्यते उपोषणम्।

५। ७। १। ५। ७। १।।१।

ड्वितो भावे क्त्रिस्ततोनिर्वृत्ते मश्च ॥ ३९ ॥

गणपाठे ड्वकारेतो धातोर्भावे क्त्रिः स्यात् तदन्ताच्च निर्वृत्तेऽर्थे मः स्यात्। कइत्। डुपचा पक्त्रिमः पाकनिर्वृत्तइत्यर्थः। एवं डुदा दत्रिमः दाननिर्वृत्तः। डुकृ कृत्रिमः।

७। १। ७।

ट्वितोऽथुर्भावे — ॥ ४० ॥

भावे वाच्ये गणपाठे ट्वकारेतो धातोरथुः स्यात्। टुवेप-वेपथुः। टुवम-वमथुः।

५:० १००१० १० ०१०

यजयाचयतप्रच्छस्वपिभ्यो नङ्न संप्रसारणञ्च ॥४१॥

एभ्यो भावे नङ् स्यात् तस्मिंश्च न संप्रसारणम्। ङद्दत्। यज-यज्ञः याच्ञा यत्नः (१९९पृ० ८सू०) छस्य शत्वे प्रश्नः ङित्त्वेऽपि न संप्रसारणम्। स्वप्नः।

७० ७००१०५० १०

उपसर्गेऽन्तरि च घोः—किः—॥ ४२ ॥

भावे वाच्ये उपसर्गे अन्तरि चोपपदे घुसंज्ञकाद्धातोः किः स्यात्। कद्दत्। आधिः व्याधिः। सन्धिः। उपाधिः अन्तर्द्धिः।

७० ७०

कर्म्मण्यधिकरणे ॥ ४३ ॥

अधिकरणे वाच्ये कर्म्मणि उपपदे घोः किः स्यात्। जलानि धीयन्तेऽस्मिन् जलधिः। सलिलधिः।

७० ७० ७००१० ७० १०

स्त्रियां—भावेऽकर्त्तरि च कारके क्तिः—॥४४॥*

भावेऽकर्त्तरि च कारके वाच्ये धातोः क्तिः स्यात्। तदन्तस्य स्त्रियाम्। कद्दत्। कृतिः स्मृतिः मतिः बुद्धिः। श्रूयतेऽनयेति श्रुतिः। स्तूयतेऽनयेति स्तुतिः इज्यतेऽनयेति इष्टिः। पाणिनीये तु क्तिन् पठितः।

---

* क्तिनिति पाणिनीयं नित्प्रयोजनं लौकिके नास्तीतीह परित्यक्तम् एवं यदनीयरादिषु तकाररकारादयोऽपि।

५: ६ ६ १

ऋल्वादिभ्यः क्तिस्तस्य नः ॥ ४५ ॥

ऋदन्तात् ल्वादिभ्यश्च परस्य क्तिस्तस्य नत्वं स्यात् । कॄ--कीर्णिः । लू--लूनिः (सि० उ० १६ ५प्र०) ल्वादि ।

५: १

ग्रहादिभ्य इट् ॥ ४६ ॥

एभ्यः क्तेरिट् स्यात् । वशादेरित्यादेः प्रतिप्रसवः । निगृहीतिः पठितिः भणितिरित्यादि ।

५ ७

स्थागापचो भावे—॥ ४७ ॥

एभ्यो भावे क्तिः स्यात् । तदन्तश्च स्त्रियाम् । वक्ष्यमाणस्यासरूपस्याप्यङोऽपवादः । प्रस्थितिः । उपगीतिः । सङ्गीतिः । पक्तिः । आस्था व्यवस्था संस्था तु बाहुलकादिति सिद्धान्तः ।

५: १ ७ १

यजव्रजिभ्यां क्यप् संज्ञायान्तु समजनिषदनिपत मनविदसुञ्शीङ् भृञश्च ॥ ४८ ॥

आभ्यां भावे, संज्ञायान्तु समजादिभ्यः, क्यप् स्यात् तदन्तश्च स्त्रियाम् । कपाविती । असरूपोऽपि क्यप् क्तेरपवादकः । इज्या व्रज्या । समज्या सभा निषद्या आपणः । निपत्या पिच्छिला भूमिः । मन्या

ग्रीवा। विद्या। सुत्या अभिषवः। शय्या। भृत्या।

५० १०।१०

कृञः श च ॥ ४९ ॥

कृञः शः, चात् क्यप्, क्तिश्च स्यात् भावे तदन्तश्च स्त्रियाम्। शदृत्। क्रिया कृत्या कृतिः।

१ः

इच्छापरिचर्य्यापरिसर्य्यामृगयाः ॥ ५० ॥

एते निपात्यन्ते।

१० ५०

अः प्रत्ययान्तात् ॥ ५१ ॥

प्रत्ययान्ताद्धातोर्भावे स्त्रियामः स्यात्। क्तेरपवादः। चिकीर्षा। जिगमिषा। रुरुदिषा। पुत्रकाम्या।

५० ५० ७० ५०

गुरुमतो हलो निष्ठायां सेटः ॥ ५२ ॥

निष्ठायां सेटकात् गुरुमतो हलन्ताद्धातोरः स्यात् स्त्रियां भावे। ईहा चेष्टा। सेटः किम् दीप्तिः। गुरुमतः किम् वित्तिः। हलः किं नीतिः।*

५० ५ः ०१०।१०

षितो भिदादिभ्य श्चाङ्— ॥ ५३ ॥†

---

* नीतिरिति प्रत्युदाहरणं कौमुदीग्रन्थदर्शनादुक्तं वस्तुतः नीधातोर्निष्ठायामनिट्कत्वादङःप्राप्तिरेव नास्ति किन्तु दीधितिरित्येव प्रत्युदाहरणम् दीधीधातोर्निष्ठायां सेट्कत्वेन यङादित्वादिटि दीधीवेव्योर्लोपो यिवर्णयोरिति सूत्रव्यक्तत्वेण ईकारलोपे तद्रूपसिद्धिस्तस्य च गुरुस्वरयुक्तत्वात् निष्ठायां सेट्कत्वाच्च अङः प्राप्तौ हल्पदेन व्युदासः।

† षित्त्वेनैव त्वरत्यन्ता घटादयो गृहीता अतो न पृथगुक्ता अतएव पाणिनिना अथ त्वरत्यन्तास्त्रयोदश घटादयः षित इत्युक्तं ते च (सि०उ०८।सू०) द्रष्टव्याः। अत्र भिदा द्वैधीभावे एवान्यत्र तु भित्तिः एवं छिदा छेदने अन्यत्र विच्छित्तिः व्यथा त्वरेत्युदाहरणं षित्त्वेन प्रथमोपस्थितत्वात् पूर्वमेव ज्ञेयम्।

गणपाठे षकारेतो भिदादिभ्यश्च स्त्रियां भावेऽङ् स्यात्। ङद्रूत्। भिदादयः (सि० उ०स०४५२पृ०) द्रष्टव्याः। क्तेरपवादः त्रपूष-त्रपा लज्जा। भिदा छिदा व्यथा त्वरा।

५:··१·

चिन्ति पूजि कथि चर्चिभ्यश्च ॥ ५४ ॥

एभ्योऽपि स्त्रियां भावेऽङ् स्यात्। क्तेर्वक्ष्यमाणस्य युचश्चापवादः। चिन्ता पूजा कथा चर्चा।

५· ७· ७:·१·

आत उपसर्गेऽन्तर् श्रदोश्च ॥ ५५ ॥

उपसर्गे, अन्तर् शब्दे, श्रद् शब्दे, च उपपदे आदन्तात् भावे स्त्रियामङ्स्यात्। क्तेरपवादः। प्रभा प्रज्ञा संज्ञा उपदा। प्रमा उपमा। अन्तर्धा श्रद्धा।

५· ५:··१·१·

णेरासवन्दिग्रन्थिभ्यश्च युः ॥ ५६ ॥

ण्यन्तात् आसवन्दिग्रन्थिभ्यश्च युः स्यात्। क्त्याद्यपवादः। योरनादेशे वेदना ज्ञापना। आसना वन्दना। ग्रन्थना।

१:··१· ७· ७· ·१· ·१·

सम्पदादयश्च क्विपि क्तौ च वा ॥५७॥

एते भावे स्त्रियां क्विपि क्तौ च वा निपात्यन्ते संपत् संपत्तिः। विपत् विपत्तिः। आपत् आपत्तिः।

७· १:·

रोगाख्यायां प्रच्छर्दिकादयः ॥ ५८ ॥

एतेऽकान्ताः स्त्रियां निपात्यन्ते रोगसंज्ञायाम्।

प्रच्छर्दिका प्रवाहिका विचर्चिका। स्त्रियामिति निवृत्तम्।

१:॰ ७॰
गच्छतिपच्यादयो धातुनिर्द्देशे ॥५६॥

धातुनिर्द्देशे एते श्तिबन्ता इकारान्ताश्च निपात्याः। गच्छतिः पचतिः पचिः गमिः इत्यादयः।

७:॰ ७: ॰१॰
ईषद्दुःसुषु—कृच्छ्राकृच्छ्रयोः—खल्॥ ६०॥

दुःखे सुखे चार्थे गम्ये ईषद्दुःसुषूपपदेषु धातोः खल् स्यात्। खलावितौ। भावकर्म्मणोरित्युक्तेः भावे कर्म्मणि च खल्। ईषत्करः। दुष्करः। खित्त्वेन मुमि प्राप्ते।

६॰ ॰१॰ ॰१॰ ७॰
अव्ययस्य न मुम् खिति॥ ६१॥

खिति परे अव्ययस्य मुम् न स्यात्। इति मुम्-निषेधे सुकरः।

५॰ ६॰ ॰१॰ ७:॰१॰॰१॰ ५:
उपसर्गात् लभे र्मुम् खल्घञोर्न तु सुदुर्भ्याम्॥६२॥

उपसर्गात् परस्य लभेर्मुम् स्यात् खल्घञोः परयोर्न तु केवलाभ्यां सुदुर्भ्याम्। दुःप्रलम्भः सुप्रलम्भः। घञि तु उपालम्भः। उपसर्गात् किम् ईषल्लभम् लाभः। सुदुर्भ्यान्तु दुर्लभं सुलभम्।

५॰ १॰
आतो युः ॥ ६३ ॥

ईषद्दुःसुषूपपदेषु आदन्तात् युः स्यात् तयोरर्थयोः । खलोऽपवादः । ईषत्पानः सुपानः ।

५ः॰ १॰
शासि युधि दृशि धृषिभ्यो वा ॥ ६४ ॥

एभ्यो युर्वा स्यात् । पक्षे खल् । दुःशासनः दुःशासः । दुर्योधनः दुर्योधः । सुयोधनः सुयोधः । सुदर्शनः सुदर्शः । दुर्धर्षणः दुर्धर्षः ।

७ः ७ः १॰
अलंखल्वोः प्रतिषेधार्थयोः क्त्वा—।६५॥

निषेधार्थयोरेतयोरुपपदयोर्धातोः क्त्वा स्यात् । क्त्व इत् । अलंभुक्त्वा खलुगत्वा । भोजगमने निषिद्धे इत्यर्थः ।

७ः ७॰ ७॰
समानकर्तृकयोः पूर्वकाले भावे ॥ ६६ ॥

समानकर्तृकयोर्धात्वोर्मध्ये पूर्वकालवृत्तिधातोः क्त्वा स्यात् भावे । भुक्त्वा व्रजति । स्नात्वा भुङ्क्ते । पक्त्वा भुङ्क्ते । भुक्त्वा शेते । द्विवचनमविवक्षितं तेन स्नात्वा भुक्त्वा व्रजति । (१२८पृ॰ ४सू॰) यमरमवर्णलोपे देवं नत्वा स्तौति (२७१पृ॰७५सू॰) इड्निषेध सुखी भूत्वा

स्थित: (११९पृ०१७सू०) कित्त्वाभावे ग्रथित्वा (११८ पृ०११सू०) कित्त्वप्रतिप्रसवे लिखित्वा। उदित्वा। उषित्वा(११८पृ०१२सू०) कित्त्वे रुदित्वा। विदित्वा। मुषित्वा। गृहीत्वा। सुप्त्वा (११९पृ०२०सू०) वा कित्त्वे ग्रन्थित्वा ग्रथित्वा। गुम्फित्वा गुफित्वा। तृषित्वा तर्षित्वा (११९पृ०१८सू०)वा कित्त्वे द्योतित्वा द्युतित्वा

५० ०१० ६० ०१०

उदितो वा क्त्व इट् ॥६७॥

गणपाठे उकारेतो धातोः परस्य क्त्वाप्रत्ययस्य स्थाने इट् वा स्यात्। क्रमु क्रमित्वा पक्षे

६० ६० १० ७०

अनुनासिकान्तस्य तासिसेट उपधादीर्घोऽगुणे

७०

ति ॥६८॥

तासिसेट्कस्य अनुनासिकान्तस्य धातोरुपधाया दीर्घः स्यात् अगुणे तादौ परे। अनुनासिकलोपापवादः। उपधादीर्घे क्रान्त्वा। भ्रमु—भ्रमित्वा भ्रान्त्वा। एवं क्रान्तः क्रान्तिः। भ्रान्तः भ्रान्तिः(२७८ पृ०१५सू०) वा इटि कित्त्वाभावे च पवित्वा पूत्वा।

६:० १० ०१० ७०

झलादिजान्तनशासुपधानलोपो वा क्त्वि ॥६९॥

क्त्वाप्रत्यये परे झलादेः जान्तस्य नशेश्चोपधाभूतस्य

लोपः स्याद्वा । भन्ज-भक्त्वा भङ्क्त्वा सन्ज-सक्त्वा सङ्क्त्वा । नश-नशित्वा इडभावपक्षे (१७७पृ०२सू०) नुमि नंष्ट्वा नष्ट्वा नङ्ग्ध्वा नग्ध्वा । झलादेः किम् अञ्जित्वा अङ्क्त्वा । (१४१पृ० १२सू०) आत्वे खन-खात्वा खनित्वा । (२८०पृ०१८सू०) इत्वे दो-दित्वा स्था-स्थित्वा (२८०पृ०१९सू०) धाञो हौ हित्वा दा-ददि दत्त्वा । (२८०पृ०२१सू०) अद-जग्ध्वा ।

५० १० ७०
जहातेर्हिः क्त्वि ॥ ७० ॥

क्त्वाप्रत्यये परे जहातेर्हिः स्यात् । हित्वा ।

७० ७० ६० ०१०
अनञव्ययोपपदे समासे क्त्वो ल्यप् ॥ ७१ ॥

नञ्भिन्नाव्ययोपपदे क्त्वास्थाने ल्यप् स्यात् । लपावितौ । इति ल्यपि पित्त्वात्तुकि उपपदसमासे च *प्रकृत्य प्रस्तुत्य । अनञ् किम् अकृत्वा । अव्ययेति किम् परमकृत्वा । अधीत्य प्रेत्येत्यादौ सन्धिकार्य्यदीर्घं गुणयोरसिद्धत्वाश्रयणात् तुक् ।

६० १० ०१० ७०
मान्तानिटामन्त्यलोपो वा ल्यपि ॥ ७२ ॥

ल्यपि परे मान्तानिटां गम्यादीनामन्त्यलोपः स्या-

* प्रकृत्येत्यादौ प्रादिसमासत्वेन समस्ताभावेऽपि न क्षतिः ।

वा । आगत्य आगम्य प्रणत्य प्रणम्य । अनिटां किम् प्रक्रम्य । (१२८पृ० ४सू०) अन्त्यलोपे प्रमत्य वितत्य विधाय प्रदाय । अत्र स्थानिवत्त्वाभावान्न हिददा-देशौ । एवं प्रस्थायेत्यादौ न इत्त्वम् (१६७पृ० ४०सू०) ल्यब्वर्ज्जनात् न ईत्त्वं प्रमाय प्रगाय ।

६· ६· १· ६··१··१·

लघुपूर्व्वस्य णेरय: प्रापेस्तु वा ॥ ७३ ॥

ल्यपि परे लघुपूर्व्वस्य णेरय: स्यात् प्रापेस्तु वा । लोपापवाद: । विगणय्य संगमय्य । लघुपूर्व्वस्य किं प्रधार्य्य । प्रापेस्तु प्रापय्य प्राप्य । मुखं व्यादाय स्वपिति नेत्रे निमील्य शेते इत्यादौ तुपूर्व्वाग्रका-लकलाया अभेदारोपात् ल्यप्प्रयोगो द्रष्टव्य: ।

७· ·१··१·

आभीक्ष्ण्ये णमुँल् च ॥ ७४ ॥

पौन:पुन्ये द्योत्ये समानकर्त्तृकयो: पूर्व्वकालवृत्ति-धातोर्णमुँल् चात् क्त्वाल्यपौ यथाप्राप्तम् स्याताम् उणला इत: । इति णमुलि

६· १· ७:

सर्व्वस्य द्वित्वं व्याप्त्याभीक्ष्ण्ययो: ॥ ७५ ॥

व्याप्त्याभीक्ष्ण्ययोर्द्योत्ययो: प्रकृतिप्रत्ययसमुदायस्य

द्वित्वं स्यात्। इति द्वित्वे स्मारंस्मारम् स्मृत्वा स्मृत्वा। प्रपायंप्रपायम् प्रपाय प्रपाय। (१८-२पृ० ७सू०) वा क्त्वे गामंगामम् गमंगमम् पक्षे गत्वागत्वा।

७:० १:

अग्रेप्रथमपूर्व्वेषु क्त्वाणमुलौ ॥ ७६ ॥

एषूपपदेषु समानकर्त्तृकयोः पूर्व्वकालस्त्रिधातोः क्त्वाणमुलौ स्याताम्। अनाभीक्ष्ण्यार्थमारम्भः। अग्रे भोजं अग्रेभुक्त्वा व्रजति। एवं प्रथमभोजं* पूर्व्वं भोजं वा याति पक्षे क्त्वा।

७:० ७०१० ५० ०१०

अन्यथैवंकथमित्थंसु स्वादुमि च कृञो णमुल्॥७७॥

एषूपपदेषु स्वादुमि च कृञो णमुल् स्यात्। क्त्वाल्यपोरपवादः। अन्यथाकारम् एवंकारम् कथङ्कारम् इत्थंकारम्। स्वादोर्मान्तत्वस्थानेन निपात्यते स्वादुंकारम्।

७० ५: ७०

कर्म्मणि दृशिविदिभ्यां साकल्ये ॥ ७८ ॥

साकल्ये गम्ये कर्म्मण्युपपदे दृशिविदिभ्यां णमुल् स्यात्। कन्यादर्शम् वरयति सर्व्वाः कन्या इत्यर्थः। विप्रदर्शं भोजयति सर्व्वान् विप्रान् भोजयतीत्यर्थः।

---

* प्रथमभोजमित्यत्रैव प्रथमशब्देनोपपदसमासः अव्ययाभ्यां त्वितिवक्ष्यमाणसूत्रेण अमन्तेन तत् सहविधानप्रत्ययान्तेन च समासस्य वक्तव्यत्वात्।

७· ५·
उदरे पूरेः ॥ ७९ ॥

उदरे कर्म्मणि उपपदे पूरेर्णमुँल् स्यात्। उदर पूरं भुङ्क्ते

७· ६·
शुष्कचूर्णरुक्षेषु पिषः ॥ ८० ॥

एषु कर्म्मस्पपदेषु पिषेर्णमुँल् स्यात्। पिषादिषु च पूर्व्वकालवृत्तिधातोरेवानुप्रयोग इति सिद्धान्तः। शुष्कपेषं चूर्णपेषं रुक्षपेषं वा पिनष्टि शुष्कादिकं पिनष्टीत्यर्थः।

७· ५· ७·१· ५·
समूले हन्तेर्जीवे च ग्रहेः ॥ ८१ ॥

समूले कर्म्मण्युपपदे हन्तेः, जीवे च तथाभूते ग्रहेर्णमुँल् स्यात्। समूलघातं हन्ति समूलं हन्तीत्यर्थः जीवग्राहं गृह्णाति।

७· ५·
करणे—हनः ॥ ८२ ॥

करणे उपपदे हन्तेर्णमुँल् स्यात्। पादघातं हन्ति पादेन हन्तीत्यर्थः।

७· ५· ७· ५· ७·२· ५·
उदकादौ पिषो हस्ते ग्रहः स्वे च पुषः ॥ ८३ ॥

उदकादौ करणे उपपदे पिषेः, हस्ते तथाभूते, ग्रहेः

स्वे च पुषो, णमुल् स्यात्। उदकपेषं पिनष्टि उदकेन पिनष्टीत्यर्थः। हस्तग्राहं गृह्णाति हस्तेन गृह्णातीत्यर्थः। स्वपोषं पुष्णाति स्वेन पुष्णाति

७॰ ७॰ ५:

ऊर्द्धे कर्त्तरि शुषिपूरिभ्याम्॥ ८४॥

ऊर्द्धे कर्त्तर्य्युपपदे शुषिपूरिभ्यां णमुल् स्यात्। ऊर्द्धशोषं शुष्यति वृक्षादिरूर्द्ध एव तिष्ठन् शुष्यति। ऊर्द्धपूरं पूर्य्यते ऊर्द्धमुख एव घटादिर्वर्षादिना पूर्य्यते इत्यर्थः। अनुप्रयोग इति निवृत्तम्।

७: ५॰ ५॰॰१॰

तृतीयासप्तम्योरुपपीडकषरुधो ग्रहेश्च॥ ८५॥

तृतीयान्ते सप्तम्यन्ते चोपपदे उपपूर्व्वपीडादिभ्यो ग्रहेश्च णमुल् स्यात्। पार्श्वोपपीडं शेते पार्श्वाभ्यां पार्श्वेन वोपपीड्य शेते इत्यर्थः। व्रजोपरोधं गाः स्थापयति। हस्तोपकर्षं गृह्णाति। केशग्राहं गृह्णाति केशेषु गृह्णातीत्यर्थः। हस्तग्राहं गृह्णाति हस्तेन गृह्णातीत्यर्थः।

७॰ ७॰

अपादाने त्वरायाम्॥ ८६॥

अपादाने उपपदे त्वरायां गम्यायां धातोर्णमुल्

स्यात्। शय्योत्थायं धावति शय्यातः शीघ्रमुत्थाय।

७· ७· ७·

स्वाङ्गे परिक्लिश्यमाने कर्म्मणि—॥८७॥

स्वाङ्गे कर्म्मण्युपपदे परिक्लिश्यमानेऽर्थे गम्ये धातो र्णमुल् स्यात्। उरोविदारं प्रतिचस्करे नखैः।

५:· ७:

विशिपतिपदिस्कन्दिभ्यो व्याप्यासेवायोः॥८८॥

कर्म्मण्युपपदे एभ्यो णमुल् स्यात् व्याप्तौ क्रियायाः पौनःपुन्ये चार्थे। पीठवेशमास्ते सर्व्वं पीठं आप्यास्ते लतापातं पुष्पं चिनोति। नद्यवस्कन्दं स्नाति।

७· ५·

नाम्नि ग्रहेः॥८९॥

नामरूपे कर्म्मण्युपपदे ग्रहेर्णमुल स्यात्। नाम ग्राहमाह्वयति।

७· ५· १: ·।·

अव्यये कृञो ल्यब्णमुलौ—वा॥९०॥*

अव्यये उपपदे कृञो ल्यप् णमुल् च स्यात्। उच्चैः कृत्य उच्चैःकारं वा अप्रियमाचष्टे पक्षे उच्चैः कृत्वेति† वाक्यमपि।

---

* निपातोपसर्गभिन्ने स्वरादिगणपठिते अव्यये इति वक्तव्यं तेन प्रादिषूपसर्गेषु नञि च न।

† उच्चैःकृत्येत्यत्र ल्यपोऽनन्ते न बहुविधानात् समासः।

३· ५·

तूष्णीमि भुवः ॥८१॥

अस्मिन्नुपपदे भुवो ल्यब्णमुँलौ वा स्याताम् । तूष्णींभावम् तूष्णींभूय तूष्णीं भूत्वेत्यर्थः ।

इति कर्म्मादिकृदन्तप्रकरणम् ।

स्त्रीप्रत्ययप्रकरणम् ।

५· ५·॰१· ७· ॰१·

अजादेरतश्च स्त्रियामाप्—॥ १ ॥

स्त्रियां वर्त्तमानादजादेरकारान्ताच्चाप् स्यात् । पइत् । स्त्रियामिति सर्व्वत्रानुवर्त्त्यम् । अजा अश्वा मूषिका कोकिला चटका अमूला । एषु जाति निमित्त ईप् न । बाला वत्सा मन्दा । एषु वयो निमित्त ईप् न । शूद्रा जातौ महत्पूर्व्वा तु महा-शूद्री । पुंयोगे त्वीवेव शूद्री शूद्रभार्य्या । मध्यमा कनिष्ठा ज्येष्ठा अत्र पुंयोगलक्षण ईप् न । अजादि स्वाकृतिगणः तेन दंष्ट्रादयः । अतः, शुभा दत्ता ।

५· ५·॰१·

कतिपयाद्धलः वा—॥ २ ॥

कतिपयाद्धलन्तादाप् स्याद्वा । वाचा वाक् दिशा दिक्

५· ·१·

मनो डाप्—॥ ३ ॥

मनन्तात् डाप् स्याद्वा। डपावितौ। डित्त्वाट्टिलोपे सीमे सीमानौ पामे पामानौ।

५· ५··१· ५··१··१··१··१·

अनो बहुव्रीहेर्थोपधालोपिनस्त्वीप् च वा ॥४॥

अनन्ताद्बहुव्रीहेर्डाप् वा स्यात् उपधालोपयोग्यात् (मान्तवान्तसंयोगान्यपूर्व्वकात्) अनस्तु ईप् च वा स्यात् पक्षे डाप्तदभावौ। पद्वत्। बहुयज्वे बहुयज्वानौ सभे। उपधालोपिनस्तु भस्यानोऽल्लोपे* बहुराज्ञ्यौ बहुराजे बहुराजानौ॥

५· ६·६· ·१··७· ६·

प्रत्ययस्थकात् पूर्व्वस्यात इदाप्यध्रुवकादेरनुक्त

६··१··१·

पुंस्कस्य तु वा॥ ५॥

आपि परे प्रत्ययस्थककारात् पूर्व्वस्यातः स्थाने इत् स्यात् न तु ध्रुवकादेरनुक्तपुंस्कस्य तु वा। नायिका कारिका पाचिका सर्व्विका शुभ्रिका। अनुक्तपुंस्कस्य तु गङ्गिका गङ्गका। अत्र गङ्गाकेत्यपीच्छन्ति। ध्रुवकादयस्तु ध्रुवका चटका कन्यका उपत्यका अधित्यका तारका नक्षत्रे अष्टका श्राद्धे।

* उपधालोपिनः मान्तवान्तसंयोगान्यपूर्व्वस्यानस्तथाभूतानन्तस्येत्यर्थः।

६: ०१०

पुत्रिकादीनां वा ॥ ६ ॥

एषां प्रागुक्तं वा स्यात् । पुत्रिका पुत्रका सूतिका सूतका ज्ञिका ज्ञका ।

५: ७० ०१०

टित्षिदुगिद्भ्यो मुख्यत्वे ङीप् ॥ ७ ॥

टकारेतः, षकारेतः, उक्प्रत्याहारेतश्च मुख्यत्वे ङीप् स्यात् । यद्वत् । तत्र टित ङीपि

६० ६० ६०० १० ९०

भस्येवर्णस्यावर्णस्य च लोपः ॥ ८ ॥

भसंज्ञकस्य इवर्णस्यावर्णस्य च लोपः स्यात् । इत्यवर्णलोपे निशाचरी किङ्करी (नद्ट्) नदी (धेट्) स्तनन्धयी करणी द्वयी त्रितयी चतुष्टयी जलदघ्नी गजमात्री गजपतिद्वयसी तादृशी । षितः, रजकी नर्तकी ईश्वरी । उदितः गतवती विदुषी । श्रीमती धनवती यावती । ऋदितः यान्ती

५० ०१० ०१० ७:

स्यतुर्नुँम् वा शीपोः ॥ ९ ॥

शीङीपि च परे स्यन्तात् नुँम् स्याद्वा । उभावितौ इति नुमि करिष्यन्ती पक्षे करिष्यती अध्याक्षेपो भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम् ।

मुख्यत्वे किं विदितप्रमाणा अधिगतज्ञानेत्यादावमुख्ये न ।

५: ५· ५: ५··१·

अण्ढान्ताभ्यामनोऽमन्संख्याभ्यामृदन्ताच्चास्व-
५·
स्रादेः ॥ १० ॥*

अण्प्रत्ययान्तात् ढप्रत्ययान्तात् मन्-संख्यावाचकवर्ज्जादनन्तात् स्वस्रादिवर्ज्जादृदन्ताच्च मुख्यत्वे ईप् स्यात् । अणन्तात्, प्रतिहारी† कुम्भकारी । वैष्णवी ऐन्द्री । ढान्तात्, आत्रेयी माहेयी सौरभेयी । अनः, राज्ञी शुनी मघोनी । मनन्तात् न, सीमा पामा । संख्यायाश्च न, पञ्च दश वा स्त्रियः । ऋदन्तात्, दात्री भोक्त्री कर्त्री । स्वस्रादेस्तु स्वसा माता दुहिता ननन्दा याता इत्यादौ न ।

५: ५··१·

अञ्चुवाहन्ताभ्यां गौरादेश्च ॥ ११ ॥‡

अञ्चन्तात् वाह् इत्यन्तात् गौरादेश्च मुख्यत्वे ईप् स्यात् । गौरादिः (सि० उ० २२७पृ०) द्रष्टव्यः । अञ्चन्तात्, प्राची उदीची । वाहन्तात् भारौही ।

*पाणिनिनाऽगृहीतोऽपि ब्रह्मशब्दः "आयाता ब्रह्मणः पतिः ब्रह्माणी साभिधीयते" इत्यादिभूरि प्रयोगदर्शनात् गृहीतः ।

† प्रतिशब्दस्य प्रत्येकपरतया प्रत्येकस्य च कर्म्मत्वात् कर्म्मवाचित्वेन अणि प्रत्येकं हरतीति प्रतिहारी ।

‡ अञ्चोरुदित्त्वेनैव २०८पृ०७सूत्रेण ईपि प्राप्ते पुनर्यद्ग्रहणं धातोश्चेत् उगित्कार्य्यं तर्हि अञ्चोरेव नान्यस्येति ज्ञापयति तेन स्रनूस् स्रत् ध्वनूस् ध्वत् इत्यादौ उदित्त्वेऽपि न ईप् ।

गौरादेः, गौरी। मत्स्यमनुष्यगवयादीनां जाति-
वाचकत्वेऽपि योपधत्वेनेपोऽप्राप्तौ अत्र गणे पाठः।
तत्र मत्स्यशब्दादीपि

६· ७· ६: ७· ·१· ६:·१·

मत्स्यस्येपि सूर्य्यागस्त्ययोश्छे च तिष्यपुष्ययोश्च

७· १·

नक्षत्राणि यलोपः॥ १२॥

ईपि परे मत्स्यस्य, सूर्य्यागस्त्ययोरीपि छे च परे, नक्षत्रार्थकेऽणि परे च तिष्यपुष्ययोर्यलोपः स्यात्। इति यलोपे मत्सी।

५· ५· ५· ·१· ५· ·१·

अपात्राद्यन्ताद् द्विगो—रत ईप् पुरुषान्तात्तु

·१·

वा॥ १३॥

स्त्रियां पात्राद्यन्तवर्ज्जादन्ताद् द्विगोरीप् स्यात् पुरुषान्तात्तु वा स्यात्। वक्ष्यमाणेन स्त्रीत्वे त्रिलोकी त्रिस्थली सप्तशती दशाढ़की। पात्रादेस्तु द्विपात्रं त्रिभुवनम्। पुरुषान्तात्तु द्विपुरुषी द्विपुरुषा

५· ५· ·१· ·१·

अनन्ताद् दावन्ताच्च वा॥ १४॥

अनन्ताद् दावन्ताच्च द्विगोरीप् वा स्यात्। वक्ष्यमाणेन डप्रत्यये डित्त्वात् टिलोपे वा स्त्रीत्वे पञ्चकर्म्मी पञ्चकर्म्मम्। पञ्चखट्वी पञ्चखट्वम्।

५· ५· ·१· ·१· ·१·

ऊधोऽन्ताद्बहुव्रीहेरीबनँङ् च॥ १५॥

ऊधोऽन्ताद्बहुव्रीहेरीप् स्यात् स्त्रियां तदन्तस्या नँङ् च। अङ्गाविती। इति ईपि अनङादेशे च मस्यानोऽल्लोपे पीनोघ्नी कुण्डोघ्नी।

५० ५० ५००१०

संख्यादेर्दामान्ताद्वयोवाचिहायनान्ताच्च ॥१६॥

संख्यादेर्दामान्ताद् वयोवाचिहायनान्ताच्चेप् स्यात् स्त्रियाम्। इति ईपि अनोऽल्लोपे द्विदाम्नी त्रिदाम्नी रज्जुः। एकहायनी द्विहायनी वत्सा।

७० ७० ५०

वयस्यचरमेऽतः ॥ १७ ॥

अचरमे वयसि वर्त्तमानं यत्प्रातिपदिकं तस्मादन्तात् स्त्रियामीप् स्यात्। कुमारी किशोरी तरुणी। अतः किम् शिशुः। अचरमे किं वृद्धा

अन्तर्वत्नी तु गर्भिण्यां पतिवत्नी सभर्त्तृका।
पत्नी पत्युर्यज्ञफलसम्बन्धार्थे निपात्यते॥
बहुव्रीहावेकपत्नी वीरपत्नी च साध्यते।
सपत्नी चैकपतिका भद्रपत्नी तथेष्यते॥

५० ७० ५०

अतो भार्य्यायामपालकान्तात् ॥ १८ ॥

अदन्तात् भर्य्यायामर्थे स्त्रियामीप् स्यात् न तु पालकान्तात्। गोपस्य भार्य्या गोपी। दासस्य भार्य्या दासी। सूर्य्यागस्त्ययोस्त्वीपि (२११पृ०१२सू०) यलोपे सूरी अगस्ती। पालकान्तात्तु गोपालिका

५:० ०१० ०१०

पूतक्रतुवृषाकप्यग्निभ्य ऐच ॥ १८ ॥

एभ्यो भार्य्यार्थे ङीप् स्यादैचान्तादेशः। पूतक्रतोरिन्द्रस्य भार्य्या पूतक्रतायी शची। हरविष्णू वृषाकपी तयोर्भार्य्या वृषाकपायी गौरी श्रीश्च। अग्नेर्भार्य्या अग्नायी स्वाहा।

५:० ०१० ०१०

ब्रह्मेन्द्रवरुणभवशर्व्वरुद्रमृडेभ्य आनुँक्—चाचार्य्यादणत्वञ्च ॥ २० ॥

५० ०१० ०१०

एभ्यो भार्य्यायामीप् स्यात् आनुँक्चान्तादेशः आचार्य्यात्स्त्रीत्वानुक्तौ अणत्वञ्च। उकावितौ। ब्रह्माणी इन्द्राणी वरुणानी भवानी आचार्य्यानी

५: ०१०

मातुलोपाध्यायाभ्यां वा ॥ २१ ॥

भार्य्यार्थे आभ्यामीप् आनुँक् च वा स्यात्। मातुलानी मातुली मातुला। उपाध्यायानी उपाध्यायी उपाध्याया।

५: ०१० ७:

अर्य्यक्षत्रियाभ्यां वा स्वार्थे ॥ २२ ॥

आभ्यां स्वार्थे एव ङीप् वा स्यात् तत्सन्नियोगे आनुँक् च। अर्य्याणी अर्य्या स्वयं स्वामिनीत्यर्थः। क्षत्रियाणी क्षत्रिया। स्वार्थे इत्युक्तेः भार्य्यायान्तु

अर्थी क्षत्रियीत्यादौ ईवेव नतु आनुक्।

५· ५· ५· ५· ·१· ·१·

स्वाङ्गादमुख्यादसंयोगोपधादत ईब्—वा ॥२३॥

असंयोगोपधममुख्यं यत् स्वाङ्गवाचकं तदन्तादीप् वा स्यात् स्त्रियाम्। सुकेशी सुकेशा। अतिकेशी अतिकेशा। असंयोगेति किम् चन्द्रवक्त्रा। स्वाङ्गन्तु त्रिविधम्

अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्।

अद्रवमित्युक्तेः सुस्वेदा, मूर्त्तिमदित्युक्तेः सुज्ञाना, प्राणिस्थमित्युक्तेः सुमुखा शाला, अविकारजमित्युक्तेश्च सुव्रणेत्यादौ न ईप्।

अप्राणिस्थं तत्र दृष्टम्—

तत्र प्राणिनि यथा पूर्व्वोक्तं स्वाङ्गं दृष्टं तथा तत् अप्राणिस्थमपि स्वाङ्गं स्यात्। सुकेशी सुकेशा रथ्या।

—तेन तुल्ये तथा स्थितम्॥

प्राणितुल्ये वस्तुनि प्राणिनि यथा स्थितं स्वाङ्गं तथैव यत् स्थितं तदपि स्वाङ्गम्। सुमुखी सुमुखा प्रतिमा।

·१· ५·

न—क्रोड़ादिबह्वचः ॥ २४ ॥

क्रोडादिभ्यः बह्वच्काच्च परं प्रागुक्तं न स्यात् सुक्रोडा सुवदना।

५· ·१·

सहनञ्विद्यमानपूर्व्वाच्च ॥ २५ ॥

एतत्पूर्व्वकादपि स्वाङ्गात् प्रागुक्तं न। सकेशा। अकेशा विद्यमानकेशा।

५· २·

दिक्पूर्व्वपदाद् नित्यमीप्— ॥ २६ ॥

दिग्वाचकपूर्व्वपदात् स्वाङ्गादीप् नित्यं स्यात्। प्राङ्मुखी।

५: ७·

नखमुखाभ्यां न संज्ञायाम् ॥ २७ ॥

आभ्यां संज्ञायामीप् नित्यं न स्यात्। शूर्पणखा वक्ष्यमाणेन णत्वम्। गौरमुखा।

५:· ·१·

नासिकोदरोष्ठजङ्घादन्तकर्णाङ्गशृङ्गपुच्छेभ्यो वा ॥२८॥

एतेभ्यः स्वाङ्गेभ्य ईप् न स्याद्वा। प्रागुक्तनिषेधापवादः। तुङ्गनासिकी तुङ्गनासिका। कृशोदरी कृशोदरा। कृशाङ्गी कृशाङ्गा।

५· ५: ५· ५·

जातेरतोऽस्त्रीविषयाद्योपधात् ॥ २९ ॥

अस्त्रीविषयात् जातिवाचिनोऽदन्तात् स्त्रियामीप् स्यात्। मृगजातिः स्त्री मृगी हंसी। अतः किम् धेनुः। योपधात्तु क्षत्रिया वैश्या। अस्त्रीविषयात् किं बलाका मक्षिका। जातिवाचिनस्तु

समानैकाकृतियुता जातिमन्तस्तु कीर्त्तिताः ।
विप्रत्वत्वादिवर्णा ये तेऽप्यत्र जातयो मताः ।
पौत्राद्यपत्यवर्गस्य गोत्रं तज्जातिरीरिता ।
जातिवाचिन आख्याता स्तद्विशिष्टस्य वाचकाः ।
ब्राह्मणी । वृषली । गार्गी वात्सी ।*

·१·५· ५· ५·
वोतो गुणवाचिनोऽसंयोगोपधात् ॥ २० ॥

संयोगोपधभिन्नात् गुणवाचिन उकारान्तादीप् वा स्यात् स्त्रियाम् । तन्वी तनुः । मृद्वी मृदुः । पट्वी पटुः । उतः किम् श्वेता, शुचिः । असंयोगेति किं पाण्डुः । गुणवाचिनस्तु

सिद्धरूपा वस्तुधर्म्मा जातिभिन्ना गुणा मताः ।
गुणवाचिन आख्यातास्तद्विशिष्टस्य वाचकाः ।

५· ५··१·
इकारादक्तौ वा ॥ २१ ॥

क्तिभिन्नेकारान्तादीप् वा स्यात् स्त्रियाम् । राजी राजिः । मणीः मणिः । क्तौ तु मतिः बुद्धिः ।

हृत्तो जानपदी ख्याता कुण्डी पात्रे निपात्यते ।
अकृत्रिमायां भूमौ च स्थलीयं तु मता सताम् ।
काली तद्वर्णयुक्तायां नीली स्यादोषधी मता ।
कवरी केशवेशे च हिमानी हिमसंहतौ ।

---

* गार्गी वात्सीत्यादौ गोत्रार्थे (४६० पृ० ७१ सू०) यञि तदन्तस्य प्रातिपदिक संज्ञायां स्त्रियामीपि तत्परे च गार्ग्य वात्स्य शब्दयोर्भत्वे न (४४४पृ० २०सू०) हल् परस्य यस्य लोपे गतृसिद्धिः ।

अरण्यानी महारण्ये यवनानी तु तल्लिपी।
अग्निष्ठी शिशुना हीना सखी सहचरी मता।
असिक्नी स्यादवृद्धायां पलिक्नी तु जरायुता।
इत्यादयो निपात्यन्ते तरुण्यां युवतिस्तथा।

·१· ५· ५·

ऊ-ङुतो-मनुष्यजातेरयोपधात् ॥ ३२ ॥

अयोपधात् मनुष्यजातिवाचिन उकारान्तात् स्त्रियामूङ्स्यात्। कुरूः। कुरूः। योपधात्तु न अध्वर्युः।

५· ·१· ५·

अप्राणिजातेश्चारज्ज्वादेः ॥ ३३ ॥

रज्ज्वादिभिन्नादप्राणिजातिवाचिन उदन्तादूङ्स्यात्। अलाबूः कर्कन्धूः। प्राणिजातेस्तु आखुः। रज्ज्वादेस्तु रज्जुः हनुः।

५· ·१·

तन्वादेर्व्वा ॥ ३४ ॥

तनूः तनुः। चञ्चूः चञ्चुः। इति प्रक्रियाकौमुदी।

५· ५· ·१·

वामोपमानपूर्व्वपदादूरूत्तरपदाच्च ॥ ३५ ॥

वामादेरुपमानादेश्च ऊरुपदान्तादूङ् स्यात्। वामोरूः। रम्भोरूः। करभोरूः।

इति स्त्रीप्रत्ययप्रकरणम्।

कारकप्रकरणम्।

प्रातिपदिकार्थमात्रे उक्तार्थे संबोधने च प्रथमा ॥ १ ॥

यस्य नाम्नः श्रवणे यस्यार्थस्य (जातिगुणक्रियादेः) नियतोपस्थितिः स तन्नामार्थस्तदर्थमात्रे, प्रत्ययादिना उक्तार्थाभिन्नार्थे, संबोधने च प्रथमा स्यात्। घटः, शुक्लः, चलः, इत्यादौ घटत्वादिजाति-शुक्लादिगुण--चलनादिक्रिया-विशिष्टानां बोधात् तदर्थमात्रे प्रथमा। तदीयकर्म्माद्याधिक्ये तु द्वितीयादीनां प्रवृत्तिः। बालः शेते, जनेन ग्रामो गम्यत इत्यादौ शयनकर्त्तृगमनकर्म्मणश्च तिङोक्तत्वात्तदभिन्नार्थे बालादौ प्रथमा। एवं जीव्यतेऽनेनेति जीवनं जलम्। दीयतेऽस्मै दानीयो विप्रः। प्रभवत्यस्मात् प्रभवो जनकः। शय्यतेऽस्यामिति शय्या खट्वा इत्यादौ ल्युडादिना करणाद्यर्थानामुक्तत्वात्तदर्थाभिन्नार्थेऽपि प्रथमा। एवं आरूढो वानरो यम् स आरूढवानरो वृक्षः। कृतः कटो येन स कृतकटः शिल्पी। दत्तं धनं यस्मै स दत्तधनो विप्रः। पतितं पत्रं यस्मात् स पतितपत्रो वृक्षः। बहवो भृत्या यस्य

स बहुभृत्यो भूपतिः । अनेके लोका यत्र तदनेकलोकं नगरमित्यादौ कर्म्माद्यर्थकसमासेनोक्तार्थाभिधानेऽपि प्रथमा । संबोधने हे नर हे साधो । उक्तार्थे प्रथमाविधानात् परिशेषादनुक्तार्थे एव कर्म्मादौ द्वितीयादिप्रवृत्तिः ।

१· १· १·

क्रियोपयोगि क्रियान्वयि कारकम् — ॥ २ ॥

क्रियान्वयि क्रियाप्रयोजकं (अपादानादिषट्कम्) कारकसंज्ञं स्यात् ।

६· १· ·१·

कर्त्तुरीप्सिततमं कर्म्म — ॥ ३ ॥

कर्त्रा क्रियाफलेनाप्तुमिष्टतमं कारकं कर्म्मसंज्ञं स्यात् । तत्र च द्वितीया वक्ष्यते । ग्रामं गच्छति ।

६ः ६· ·१· १· ६·

अधिशीङ्स्थासामन्वध्याङ्वसश्चाधारः क्रियाया

१· ·१·

अभेदविशेषणञ्च ॥ ४ ॥*

एषामाधारः क्रियाया विशेषणञ्च कर्म्मसंज्ञं स्यात् । शय्यामधिशेते अधितिष्ठति अध्यास्ते । अनुवसति अधिवसति आवसति वा ग्रामम् । स्तोकं पचति मृदु

* क्रियाविशेषणं पाणिनीय सूत्रेष्वगृहीतमपि व्यपदेशिवद्भाव परिभाषया सिद्धतया इह गृहीतं तेन गतिकारक पूर्व्वकतया स्तोकम्पो इत्यादौ ष इति बोध्यम् ।

गच्छति। अभेदेति किं अतिशयेन गच्छतीत्यादौ भेदविशेषणे तृतीयैव।

२· १· ·१· १·
तथा युक्तञ्चानीप्सितम् ॥ ५ ॥

अनीप्सितमपि तथैव ईप्सिततममिव क्रियाफलेन युक्तं सत् कर्म्मसंज्ञं स्यात्। अनीप्सितञ्च अनुद्दिष्टं द्विष्टञ्च। तत्राद्यं, ग्रामं गच्छन् तृणं स्पृशति। द्वितीयम् अन्नं भुञ्जानो विषं भुङ्क्ते।

१· ·१·
अकथितञ्च ॥ ६ ॥

अपादानादिसंज्ञान्तरैरकथितं कारकं कर्म्मसंज्ञं स्यात्। तत्र च धातुविशेषा एव नियामकाः। यथा

दुहियाच्यत्रुवर्थौ च पचतिश्चि, जि, दण्डयः।
रुधिः प्रच्छिर्मन्थतिश्च मुषिः शासिर्दुहादयः।
न्यादयो नयतिः प्रोक्ताः कर्षतिर्हरतिर्वहिः।
एतेषां यदकथितं कर्म्मयुक्तं तु कर्म्म तत्।

दुहादीनां द्वादशानां न्यादीनाञ्च चतुर्णां प्रधान-कर्म्मोपयोगि अकथितं कारकं कर्म्मसंज्ञं स्यादित्यर्थः। गां पयो दोग्धि। नृपं धनं याचते अर्थयते वा। पुत्रं नीतिं ब्रूते वदति वा। अन्नमोदनं पचति। वृक्षं पुष्पाणि चिनोति। शत्रुं राज्यं जयति। दुष्टान् शतं दण्डयति राजा। बालं गृहं रुणद्धि। गुरु-

धर्म्मं पृच्छति । दुग्धं नवनीतं मथ्नाति । साधून् धनं मुष्णाति चौरः । शिष्यं धर्म्मं शास्ति । ग्राममजां नयति कर्षति हरति वहति वा । अत्र मुख्यकर्म्मणो दुग्धादेरुपयोगिनो गवादेरपादानादिसंज्ञाविशेषैरकथिततयाऽनेन गौणकर्म्मत्वम् । गणभेदेन पाठस्तु गौणमुख्यकर्म्मणोस्तिङादिविधानार्थः ।

३ः ७ः १ः
अकर्म्मकधातुभिर्योगे देशाध्वकालरूपाधारो
१
वा ॥ ७ ॥

अकर्म्मकैर्धातुभिर्योगे देशाध्वकालरूपाधारः कर्म्मसंज्ञः स्याद्वा । वङ्गान् स्वपिति । क्रोशमास्ते । मासं वसति । पक्षे सप्तमी ।

गतिबुद्धिभोजनार्थग्रहिदृशिशब्दकर्म्माकर्म्म-
६ः ६ः १ ६ः १
काणामण्यन्तानां कर्त्ता ण्यन्तानां कर्म्म ॥ ८ ॥

अण्यन्तानां गत्यर्थादीनां कर्त्ता ण्यन्तानां तेषां कर्म्मसंज्ञः स्यात् । भृत्यं ग्रामं गमयति प्रापयति वा । शिष्यं शास्त्रं बोधयति ज्ञापयति वा । बालमोदनं भोजयति आशयति वा । विप्रं धनं ग्राहयति । पुत्रं चन्द्रं दर्शयति । शिष्यं वेदं पाठयति ।

* ग्रहिदृशिग्रहणमपाणिनीयमपि दैवदेवम् ऋषिः सूतं ग्राहयितं यथाकेत्यादि प्रयोगानुरोधात् कृतम् ।

घटं स्थापयति। एषां किम् सूदेनान्नं पाचयति अत्रानुक्तकर्त्तरि वक्ष्यमाणा तृतीया। अत्र दृशेः पृथग्ग्रहणात् ज्ञानविशेषार्थानां न, तेन स्मारयति शास्त्रं शिष्येणेत्येव।

ई: ई॰ ॰१॰ ॰।॰

हृक्रोरात्मनेपदिदृश्यभिवाद्योश्च वा ॥८॥

हरतेः करोतेरात्मनेपदविषययोर्दृश्यभिवाद्योश्च प्रागुक्तं वा स्यात्। हारयति धनं भृत्यं भृत्येन वा। कारयति कर्म्म दासं दासेन वा। दर्शयते नृपः सेवकं सेवकेन वा। पिता गुरुमभिवादयते पुत्रं पुत्रेण वा।

॰।॰ ई:॰ ई॰

न खादादनीशब्दायायानामसारथिकर्त्तृकस्य

ई॰ ई॰ ई॰ ॰।॰

वहेरहिंसार्थस्य भक्षेश्च ॥ १० ॥

खादादीनां असारथिकर्त्तृकस्य वहेरहिंसार्थस्य भक्षेश्च प्रागुक्तं न स्यात्। इति कर्म्मसंज्ञाभावेऽनुक्तकर्त्तरि तृतीया। खादयति आदयति वान्नं बालेन। भृत्येन ग्रामं नाययति आययति वा। शब्दायते भृत्येन। वाहयति भारं भृत्येन। सारथिकर्त्तृकस्य तु वाहयति वाहान् सूतः। भक्षयत्यन्नं

विशेष। हिंसार्थस्य तु भक्षयति वृषभं शस्यम्। शस्य-भक्षणेन शस्यस्वामिनो हिंसाऽत्र गम्यते।

७· १·

कर्मणि द्वितीया॥ ११॥

उक्तसूत्रजातेन कर्मसंज्ञां प्राप्ते कारकेऽर्थे द्वितीया स्यात्। अनभिहिते इत्येव उक्तार्थे प्रथमाविधानात्। ग्रामं गच्छति। मृदु स्तोकं, वा पचति।

६: ७· ७··१· ·१·

कालाध्वनोर्व्याप्तौ समाप्तौ तु तृतीया॥ १२॥

साकल्येन संबन्धो व्याप्तिः। कालाध्वनोस्तस्यां गम्यायां द्वितीया स्यात् फलप्राप्तौ तु तृतीया। मासमधीते। एवं नित्यमास्ते पूर्व्वं शेते इत्यादि। द्रव्यगुणादेरपि व्याप्ताविदमिष्यते तेन मासं पिष्टकम् मासं मृदु, मासं शीत इत्यादि। क्रोशमास्ते क्रोशं कुटिला क्रोशं नदीत्यादि। फलप्राप्तौ तु वर्षेणाधीतं व्याकरणम्। क्रोशेनाधीतो ग्रन्थाध्यायः।

२:· ७·

अन्वादिभिर्योगे॥ १३॥

एभिर्योगे द्वितीया स्यात्। अनु प्रति परि अभि उप, एतेऽन्वादयः। तेषाञ्चार्थविशेषे एव द्वितीया-तदर्थाश्च यथा।

इत्थंभावे लक्षणे च व्याप्तौ चाभिरिहेष्यते।
तेष्वर्थेषु च भागे च ज्ञेयावत्र परिप्रती।
एष्वर्थेषु सभागेषु सहार्थे हीनयोरनुः।
उपो हीने वर्त्तमानो द्वितीयायाः प्रयोजकः।

नृपम् अनु,प्रति,परि,अभि, वा वर्त्तते सेवकः इत्थंभूतो वर्त्तते इत्यर्थः। यज्ञम् अनु, परि, प्रति, अभि, वा विद्या यत्र रूपकारणलक्षिता विद्येत्यर्थः। वृक्षंवृक्षम् अनु, परि, प्रति, अभि, वा सिञ्चति सर्व्वान् वृक्षान् सिञ्चतीत्यर्थः। अत्र द्वित्वेनैव व्याप्तिर्बोध्यते अन्वादयस्तु तद्द्योतका इति न तेषामप्रयोगप्रसङ्गः। पुत्रम् अनु, परि, प्रति, वा पितृद्रव्यम् पुत्रस्य भागे इत्यर्थः। नदीमनु युता सेना नद्या सह संबद्धेत्यर्थः। नृपम् अनु, उप, वा जनाः नृपाद्धीना इत्यर्थः।

समयादियोगे च ॥ १४ ॥

समयादिशब्दयोगे च द्वितीया स्यात्। समया निकषा हा धिक् अभितः परितः उभयतः सर्व्वतः अन्तरा अन्तरेण यावत् उपर्य्युपरि अध्यधि अधोऽधः इति समयादि। नृपं समया निकषा वा सेना तस्य समीपे इत्यर्थः। अधार्म्मिकं हा तस्य

शोचनीयतेत्यर्थः । पापिनं धिक् तस्य निन्देत्यर्थः । नृपम् अभितः परितः, उभयतः, सर्व्वतो, वा सेवकाः समन्तात् वर्त्तन्ते इत्यर्थः । विन्ध्यं हिमाद्रिञ्च अन्तरा गङ्गा तयोर्मध्ये इत्यर्थः । यत्नमन्तरेण न विद्या यत्नाभावासाध्येत्यर्थः । मासं यावदधीते मासं व्याप्येत्यर्थः । नदीं यावद्वनम् नदीपर्य्यन्तमित्यर्थः । लोकान् उपर्य्युपरि अध्यधि अधोऽधो वा वायुर्वर्त्तते सर्व्वत्र वर्त्तते इत्यर्थः ।

ऋतेयोगे पञ्चमी—च—॥ १५ ॥

ऋते इति शब्दयोगे पञ्चमी, चात् द्वितीया स्यात् । यत्नात् यत्नं वा ऋते न विद्या ।

पृथग्विनानानाभिस्तृतीया च ॥ १६ ॥

एभिर्योगे तृतीया, चात् पञ्चमी द्वितीये स्याताम् । विद्यया, विद्यायाः, विद्यां, वा पृथक्, विना, नाना, वा न सुखं विद्याभावसाध्यं सुखमिति तात्पर्य्यार्थः ।

इति द्वितीया ।

स्वतन्त्रः कर्त्ता तत्प्रयोजकश्च ॥ १७ ॥

क्रियायां स्वतन्त्रः (इतरव्यापारानधीनव्यापारवान्)

तत्प्रयोजकश्च कर्त्तृसंज्ञः स्यात्। सूदः पचतीत्यादौ पाकक्रियायां सूदस्य व्यापारो नापरव्यापाराधीन इति तस्य कर्त्तृत्वम्। राजा सूदेन पाचयतीत्यादौ राजादेः सूदव्यापारप्रयोजकतयैव कर्त्तृत्वं न तु पाके स्वातन्त्र्यमस्तीति पृथक्संज्ञा कृता।

१· १·

साधकतमं करणम्॥ १८॥

कर्त्तुः क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।

विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतमिति

स्मृत्युक्तेः विवक्षया तस्य कर्त्तृत्वाद्यपि स्यात् तेन स्थाली स्थाल्यां वा पचतीत्यादि स्यात्। करणस्य व्यापारविशिष्टं क्रियानियतत्वं हेतुश्च द्रव्यादिसाधारणो निर्व्यापारश्चेति तयोर्भेदः।

६· १· ·१··१·

दिवः करणं कर्म्म वा॥ १९॥

दिवधातोः करणं कर्म्मसंज्ञं वा स्यात्। अक्षैः, अक्षान् वा दीव्यति।

७ः ·१·

कर्त्तृकरणयोस्तृतीया—॥ २०॥

अनभिहितयोरेव अनयोस्तृतीया स्यात्। शिशुना सुप्यते। सूदेनौदनः पच्यते।

७· ७· ७· ७··१·

सहयुक्तेऽप्रधाने तदर्थे गम्येऽपि ॥ २१ ॥

सहशब्दयोगे अप्रधाने (सहार्थाप्रधानीभूतक्रियायामन्विते) सहशब्दाप्रयोगे तदर्थे च गम्येऽपि तृतीया स्यात् । सहशब्देन समभिव्याहृतक्रियासमानकालिकक्रिया बोध्यते । तस्याश्चाद्यक्रियायामन्वितमप्रधानमुच्यते । पुत्रेण सह पुत्रेण वागतः पिता । व्यञ्जनेन सह व्यञ्जनेन वान्नं भुङ्क्ते ।

७· ७··१·

इत्थंभूतलक्षणे वारणार्थयोगे च ॥ २२ ॥*

इत्थंभूतस्य (कञ्चित्प्रकारं प्राप्तस्य) लक्षणे (ज्ञापके चिह्ने) द्योत्ये वारणार्थकशब्दयोगे च तृतीया स्यात् । जटाभिस्तापसः जटारूपज्ञापकचिह्न ज्ञाप्यतापसत्ववानित्यर्थः । श्रमेणालं श्रमसाध्यं नास्तीत्यर्थः । आयासेन कृतं आयाससाध्यं नास्ति ।

६· ५·

अङ्गिनोविकारकारकाङ्गात् ॥ २३ ॥

अङ्गिनो विकारकारकाङ्गवाचकात् तृतीया स्यात् । चक्षुषा काणः । श्रोत्रेण बधिरः । पादेन खञ्जः ।

५:· १·

प्रकृत्यादिभ्यो यथाप्रयोगम् ॥ २४ ॥

प्रकृत्यादिभ्यस्तृतीया स्यात् तेषञ्च यथा शिष्टैः

* इत्थंभूतलक्षणे विशेषणे इत्यर्थः जटाभिस्तापसः जटावान् तापस इत्यर्थः ।

प्रयोगः कृतस्तथैव ग्रहणम्। प्रकृत्या चारुः। नाम्ना दशरथः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। अतिशयेन याति।

७· ·१· ·१·

हेतौ पञ्चमी च॥ २५॥

हेतावर्थे पञ्चमी चात् तृतीया स्यात्। धनेन धानाद्वा सुखम्। पापेन पापाद्वा दुःखम्। दुष्कर्म्मणा दुष्कर्म्मणो वा तप्यते।

इति तृतीया।

३· २· ८· १· १·

दानकर्म्मणा यमभिप्रैति स सम्प्रदानम्॥२६॥

दानकर्म्मण उद्देश्यभूतं कारकं सम्प्रदानसंज्ञं स्यात्। संप्रदाने च चतुर्थी वक्ष्यते। दरिद्राय धनं ददाति। शिष्याय विद्यां ददाति।

६:· १· ६:· ·१·

रुच्यर्थानां प्रीयमाणः श्लाघह्नु स्थाशपाञ्च ज्ञी-

१·

प्स्यमानः॥ २७॥

अन्यकर्तृकोऽभिलाषो रुचिः। तदर्थकानां धातूनां प्रयोगे प्रीयमाणः (प्रीत्याश्रयः) श्लाघादीनाञ्च प्रयोगे ज्ञापयितुमिष्यमाणः संप्रदानसंज्ञः स्यात्। बालाय रोचते मोदकः मोदको बालरुचिविषय-

इत्यर्थः । कान्ताय श्लाघते नारी कान्तमुद्दिश्य आत्मगुणानाविष्करोतीत्यर्थः । एवं ह्नुते तिष्ठते शपते वा कान्तमनुलक्षीकृत्य स्वाभिप्रायप्रकाशनार्थं निह्नवादिकं करोतीत्यर्थः ।

६:·२· १· १·
क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ २८ ॥

क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्याऽक्षमा । असूया गुणेषु दोषारोपः । एतदर्थकानां प्रयोगे यं प्रति कोपः स सम्प्रदानसंज्ञः स्यात् । क्रोधादयश्च सर्व्वेऽपि कोपप्रभवा इत्युक्तं यं प्रति कोप इति । शत्रवे क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा ।

६· १·
धारेरुत्तमर्णः ॥ २९ ॥

धारयतेः प्रयोगे उत्तमर्णः (यस्मै ऋणमवश्यं देयम्) स सम्प्रदानसंज्ञः स्यात् । नृपाय करं धारयति ।

५: ६· १·
प्रत्याङ्भ्यां श्रुवः प्रार्थयिता ॥ ३० ॥

आभ्यां परस्य श्रुवः प्रयोगे प्रार्थयिता सम्प्रदानसंज्ञः स्यात् । प्रतिश्रुवः आश्रुवश्च अभ्यर्थनाप्रयोज्याङ्गीकारोऽर्थः । विप्राय धनं प्रतिशृणोति आशृणोति वा तदभ्यर्थितस्तस्मै दातुमङ्गीकरोतीत्यर्थः ।

६• •१• १• •१•

स्पृहेः कर्म्म सम्प्रदानं वा ॥ ३१ ॥

स्पृहयतेः प्रयोगे कर्म्म सम्प्रदानं वा स्यात्। पुष्पाय पुष्पं वा स्पृहयति।

५• ६: •१• •१•

उपसर्गात् क्रुधद्रुहोः कर्म्म वा ॥ ३२ ॥

उपसर्गात् परयोरनयोः प्रयोगे सम्प्रदानं कर्म्म वा स्यात्। भृत्याय भृत्यं वाऽभिक्रुध्यति अभिद्रुह्यति वा।

७• १•

सम्प्रदाने चतुर्थी ॥३३॥

अनुक्तार्थे सम्प्रदाने चतुर्थी स्यात्। विप्राय गां ददातीत्यादि।

६• •१• •१• ७• •१•

तुमन्तस्य वा लोपस्तत्कर्म्मणि च ॥ ३४ ॥

तुमन्तस्य वा लोपः स्यात् तल्लोपे च तस्य कर्म्मणि चतुर्थी स्यात्। काष्ठमाहर्त्तुं याति काष्ठाय याति। फलेभ्यो याति फलान्याहर्त्तुं वा। मसकाय धूमं ददाति मसकं निवर्त्तयितुमिति वा। तस्मै प्रशंस प्रणिपत्य नन्दीत्यस्य तं ज्ञापयितुमित्यर्थः। एवं ब्राह्मणेभ्यो नमस्कृत्येत्यादावपि ताननुकूलयितुमित्याद्यर्थस्तेन उपपदविभक्तेः कारकविभक्तिर्गरीयसीत्युक्तेर्न द्वितीयाप्रसङ्गः। नमःशब्दयोगे चतुर्थी

तु ब्राह्मणाय नम इत्यादौ क्रियारहिते चरितार्था ।

७· ६· ७· ·१· ·१· ७·

चेष्टायां गत्यर्थस्य कर्मणि चतुर्थी चानध्वनि ॥२५॥

अध्वभिन्ने चेष्टार्थकगत्यर्थस्य कर्मणि चतुर्थी, चात् द्वितीया स्यात् । ग्रामाय ग्रामं वा याति । चेष्टायां किम् मनसा काशीं याति । अध्वनि तु पन्थानं यातीत्येव ।

७· ·१· ७· ७·

मन्यकर्मणि चानादरेऽकाकशुकशृगाले ॥२६॥

काकादिवर्ज्जं यद्विषयकत्वेन मन्यतेरनादरपरता तस्मिन् (विषये) मन्यतेः कर्मणि चतुर्थी चात् द्वितीया स्यात् । त्वां तृणाय तृणं वा मन्ये । काकादौ तु त्वां काकं मन्ये इत्याद्येव ।

७· ·१·

तादर्थ्ये चतुर्थी ॥ २७ ॥

निमित्तार्थे चतुर्थी स्यात् । यागाय याति यागनिमित्तं यातीत्यर्थः । सुखाय धनं सुखनिमित्तं धनम् । धनाय विद्या धननिमित्तं विद्येत्यर्थः ।

३ः· ३ः· ·१· ७·

नम आदिभिर्हितादिभिश्च योगे ॥२८॥

नमःप्रभृतिशब्दयोगे चतुर्थी स्यात् । नमः स्वस्ति स्वधा स्वाहा वषट् वौषट् हुं फट् (पूर्णतार्थक)

अलम्, नम आदि। हित सुख वलि निपुण हितादि। विप्राय नमः देवाय नमः धात्रे स्वस्ति एवं स्वाहादि। विप्राय हितः सुखः वलिः निपुणो वा।

७· ·१· १·

प्रभ्वादियोगे षष्ठी च ॥ ३८ ॥

एभिर्योगे षष्ठी चाचतुर्थी स्यात्। विद्यायै विद्याया वा प्रभवति यत्नः। प्रभुर्बुभूषुर्भुवनत्रयस्य य इति।

इति चतुर्थी।

१· ७· १·

ध्रुवमपायेऽपादानम् ॥ ४० ॥

अपाये (विभागजनकक्रियायाम्) यद् ध्रुवम् (उदासीनं विभागजनकक्रियाया अनाश्रयः) तदपादानसंज्ञं स्यात्। अपादाने पञ्चमी वक्ष्यति वृक्षात् पत्रं पतति धावतोऽश्वात् पतति।

५··१·

यतश्च जुगुप्सा विरामप्रमादार्थाः ॥४१॥

यदपेक्षया जुगुप्सादयस्तदप्यपादानसंज्ञं स्यात्। पापाज्जुगुप्सते विरमति वा। स्वकृत्यात् प्रमाद्यति।

६:· १·

वारणार्थानामीप्सितः ॥४२॥

प्रवृत्तिविघातो वारणम्। तदर्थकानां प्रयोगे ईप्सित

उक्तसंज्ञः स्यात् । धान्येभ्यो गां वारयति । ईप्सितः किं धान्येभ्यो गां वारयति क्षेत्रे ।

७· १· २· ८·

व्यवधाने येनादर्शनमिच्छति ॥४३॥

व्यवधाने सति यत्कर्त्तृकात्मदर्शनाभावमिच्छति तदुक्तसंज्ञं स्यात् । चौरात् निलीयते अन्तर्धत्ते वा । इच्छतीत्युक्तेर्दैवादर्शनेऽपि स्यादेव ।

१· ७·

आख्यातोपदेशादिग्रहणे ॥४४॥

उपदेशादिग्रहणे उपदेशादिकथयितोक्तसंज्ञः स्यात् । आचार्य्यादिदं शृणोति । गुरोः शास्त्रमधीते । उपदेशेति किं नटस्य गीतिं शृणोति ।

६· १· ६··१· १·

जायमानस्य प्रकृतिर्भवतस्याद्यप्रकाशस्थानम् ॥४५॥

जायमानस्य प्रकृतिः (उपादानकारणम्) भवतस्याद्यप्रकाशस्थानमुक्तसंज्ञं स्यात् । मृदो घटो जायते उत्पद्यते वा । सुवर्णात् कुण्डलं जायते उत्पद्यते वा । हिमवतो गङ्गा प्रभवति तत्रैव पूर्व्वं प्रकाशते

६··१· १· ६· ·१· १··१·

ल्यबन्तस्य वा लोपस्तस्य कर्माधिकरणञ्च ॥४६॥

ल्यबन्तक्रियावाचकशब्दस्य लोपो वा स्यात्तत्क्रिया-

याः कर्म्म अधिकरणञ्चोक्तसंज्ञं स्यात्। प्रासादादी-क्षते प्रासादमारुह्येत्यर्थः। श्वशुराज्जिह्रेति श्वशुरं वीक्ष्येत्यर्थः। आसनादीक्षते आसने उपविश्येत्यर्थः। गम्यमानापि क्रिया विभक्तेः प्रयोजिकेत्युक्तेः कुतो भवान्, नद्या इत्यादौ गम्यमानागमनक्रियापेक्षया ऽपादानत्वम्।

७॰ १॰
अपादाने पञ्चमी ॥४७॥

अनुक्तार्थे अपादानसंज्ञके कारके पञ्चमी स्यात्। ग्रामादायाति।

१॰
अन्यारभ्यार्थाराद्दिक्शब्दाञ्चूत्ताजाहिवहिभिः ॥४८॥

एभिर्योगे पञ्चमी स्यात्। घटात्, अन्य इतरः परो भिन्नो वा पटः। नञादियोगे तु नेष्यते। किन्तु घटः पटो नेत्यादौ प्रथमैव। श्रावणादारभ्य प्रभृति वा मेघो वर्षति। ग्रामादाराद्वनम्। दिशि दृष्टः शब्दो दिक्शब्दस्तेन प्रयोगकाले देशकालवृत्ति-त्वेऽपि तद्योगे पञ्चमी स्यादेव। ग्रामात् पूर्व्वं परं वा सरः। चैत्रात् पूर्व्वः फाल्गुनः, परो वैशाखः। दिक्शब्दत्वेनैवाञ्चूत्तस्य प्राप्तौ पृथग्ग्रहणं अत-सर्थान्ततया प्राप्तायाः षष्ठ्या बाधनार्थम्। चैत्रात्

प्राक् फाल्गुनः। ग्रामादुदक् सरः। प्राच् ग्रामात्* दक्षिणा सरः। आहि—ग्रामादुत्तराहि वनम्। ग्रामाद्दक्षिणैवनम्।

६॰ ६॰॰१॰ ७॰ ७॰

निर्द्धार्य्यमाणस्य तदवधेरात्यन्तभेदेऽवधौ ॥४८॥

जातिगुणसंज्ञाभिरेकतरस्य पृथक्करणं निर्द्धारणम्। (निर्द्धार्य्यमाणस्य पृथक्क्रियामाणस्य) तदवधेश्च यत्र सर्व्वांशे भेदः प्रतीयते तत्रावधौ पञ्चमी स्यात् नतु वक्ष्यमाणे षष्ठीसप्तम्यौ। माथुराः पाटलिपुत्रेभ्य आढ्यतराः। अत्र माथुरपाटलिपुत्रयोर्भेद एव न तु नरक्षत्रिययोरिवांशेऽभिन्नतापि।

७॰ २ः ७ः २॰

वर्ज्जनेऽपपरिभ्यां व्याप्तिमर्य्यादयोराङा ॥५०॥

क्रमादेतदर्थेषु वर्त्तमानैरेभिर्योगे पञ्चमी स्यात्। मताद् अप, परि, वा विवेकः तं वर्ज्जयित्वेत्यर्थः। आनद्याः ग्रामः नदीपर्य्यन्त इत्यर्थः। आ सकलात् ब्रह्म सर्व्वं व्याप्य स्थितमित्यर्थः।

५ः ५ः ७॰ ॰१॰

स्तोकाल्पकृच्छ्रेभ्योऽद्रव्यवाचिभ्यः करणे वा ॥५१॥

अद्रव्यवाचिभ्यः स्तोकादिभ्यः करणे पञ्चमी वा स्यात्। स्तोकात् स्तोकेन वा मुक्तः। एवमल्पात्

* प्राचि काले इत्यर्थे (४८९पृ०५सू०) अस्ताति कृतेऽस्य च लुकि प्रागिति सिद्धम्। एवञ्च एतस्य अतसर्थान्तत्वात् (२२६पृ०५४सू०) षष्ठीप्राप्तौ पञ्चमीपक्षेण तदुदाहारः।

अल्पेन, कृच्छ्रात् कृच्छ्रेण। द्रव्यपरत्वे तु स्तोकेन विषेण हत इत्यादौ तृतीयैव।

५: १:
दूरान्तिकार्थेभ्यो द्वितीयातृतीयापञ्चमीसप्तम्यः ॥५२॥

अद्रव्यवाचिभ्यो दूरान्तिकार्थेभ्यो द्वितीयादयः स्युः ग्रामस्य दूरं दूरेण दूरात् दूरे वास्ते एवम् अन्तिकमन्तिकेनान्तिकादन्तिके वा।

इति पञ्चमी।

अथ षष्ठी।

७· ७· ·१·
कारकप्रातिपदिकार्थभिन्ने सम्बन्धे षष्ठी ॥५३॥

कारकार्थप्रातिपदिकार्थभिन्ने सम्बन्धमात्रे षष्ठी स्यात्। राज्ञो धनम् घटस्य रूपम्। पृथिव्या गन्धः।

७·
अतसर्थयोगे ॥५४॥

अतसर्थकप्रत्ययान्तयोगे षष्ठी स्यात्। दिक्शब्दतया प्राप्तायाः पञ्चम्या अपवादः। ग्रामस्य दक्षिणतः पुरः, पुरस्तात्, उपरिष्टाद्वा गगनम्।

२· ·१· ·१·
एनपा द्वितीया च ॥ ५५ ॥

एनबन्तयोगे द्वितीया चात् षष्ठी स्यात्। दक्षिणेन

पुष्पवाटिकाम् पुष्पवाटिकाया वा। तत्रागारं धन प्रतिग्रहानुत्तरेणेनास्मदीयम्।

६:॰ ७॰ २॰ ७॰

स्मरणार्थदयेशां कर्म्मणि सम्बन्धत्वेन विवक्षिते-॥५६॥

सम्बन्धत्वेन विवक्षिते एषां कर्म्मणि षष्ठी स्यात्। अस्याश्च षष्ठ्या न समास इत्यग्रे वक्ष्यते*। मातुः स्मरति मातुः स्मरणम्। सम्बन्धत्वेनाविवक्षायान्तु मातरं स्मरति। तद्विषये एव हरिस्मृतिः सर्व्व-विपद्विनाशिनीति तद्योगे षष्ठ्याः समासः। पुत्रस्य पुत्रं वा दयते ईष्टे वा। पुत्रस्य दया पुत्रस्येशा वा।

६॰ ७॰

कृञः प्रतियत्ने ॥ ५७ ॥

प्रतियत्ने (सतो गुणान्तराधानरूपे) अर्थे, वर्त्तमानस्य तस्य कृञः कर्म्मणि तथाभूते षष्ठी स्यात्। सुवर्णस्य विवक्षया सुवर्णं वा उपस्कुरुते। सुवर्णस्य उपस्कारः

७॰ ६॰

आशिषि नाथतेः ॥ ५८ ॥

आशीर्व्वादेऽर्थे नाथतेः कर्म्मणि तथाभूते षष्ठी स्यात्। धनस्य धनं वा नाथते धनस्य नाथनम्।

६:॰ ७॰

जासिनिप्रहणनाटपिषां हिंसायाम् ॥५९॥

हिंसार्थानामेषां कर्म्मणि तथाभूते षष्ठी स्यात्।

* वक्ष्यते इत्यस्य २।१पृ० १७सूत्रेणेति शेषः।

चौरस्य चौरं वा उज्जासयिता। निप्रौ संहतौ विपर्य्यस्तौ व्यस्तौ वा। चौरस्य चौरं वा निप्रहन्ति प्रणिहन्ति निहन्ति प्रहन्ति वा। एवम् उन्नाटयति, पिनष्टि हिनस्तीत्यर्थः। एवं चौरस्य उज्जासनं निहननमित्यादि।

६॰ ७॰
दिवोऽसुतौ ॥ ६० ॥

असुतौ दिवः कर्म्मणि तथाभूते षष्ठी स्यात्। शतस्य शतं वा दीव्यति सुतौ तु विप्रं दीव्यति स्तौतीत्यर्थः।

७॰ ७॰ ७॰
कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥ ६१ ॥

कृत्वोऽर्थकप्रत्ययान्तयोगे कालरूपाधिकरणे तथा भूते षष्ठी स्यात्। द्विरह्नो भुङ्क्ते पञ्चकृत्वोदिवसस्य पचति। सम्बन्धाविवक्षायान्तु द्विरहनि भुङ्क्ते।

७॰ ७॰ ७॰।॰॰।॰
कर्त्तृकर्मणोः कृति गौणकर्मणि तु वा ॥ ६२ ॥

कृदन्तशब्दयोगे कर्त्तरि कर्मणि चानुक्ते एव षष्ठी स्यात् गौणकर्म्मणि तु वा स्यात्। सूदस्य पाकः अन्नस्य पाचकः। बालस्य ग्रामस्य, ग्रामं, वा नेता। दुग्धस्य गो, गां, वा दोग्धा।

७॰ ७॰ ॰१॰ ७॰ ॰१॰ ७॰

उभयप्राप्तौ कर्मण्येव स्त्रीविहितकृति तु कर्त्तरि

॰१॰ ७॰ ॰१॰ ७ः

वा अकारस्वरूपस्त्रीप्रत्यये तूभयोः ॥६३॥

कर्त्तृकर्मणोरुभयोः षष्ठीप्राप्तिसंभावनायां कर्मण्येव षष्ठी न तु कर्त्तरि। स्त्रीविहितप्रत्ययान्तयोगे तु कर्त्तरि [वा स्यात्। अकाररूपस्त्रीप्रत्यये तु उभयोरेव। गोपेन गवां दोहः। सूदेनान्नस्य पाकः। कुलालस्य, कुलालेन, वा घटस्य कृतिः। अकारस्वरूपस्त्रीप्रत्यये तु छात्रस्य शास्त्रस्य पिपठिषा। राज्ञो ग्रामस्य जिगमिषा।

६ः॰ ६॰ ॰१॰ ७॰ ७॰ ॰१॰

कृत्यानां भावक्तस्य च योगे कर्त्तरि वा ॥६४॥

कृत्यान्तानां भावक्तान्तस्य योगे कर्त्तरि षष्ठी वा स्यात्। छात्रेण छात्रस्य वा पाठ्यो वेदः। बालस्य बालेन वा पानीयं पयः। सतां सद्भिर्वा स्नातम्। भावक्तस्य योगे शेषत्वेन विवक्षया षष्ठी, कर्त्तृत्वेन तु तृतीयैवेति व्यवस्थितो विकल्प इति प्रक्रियाकौमुदी।

७॰ ७॰ ७॰

वर्त्तमानाधिकरणवाचिनि क्ते कर्त्तरि ॥ ६५ ॥

वर्त्तमानार्थकस्याधिकरणार्थकस्य च क्तस्य योगे

कर्त्तरि षष्ठी स्यात्। राज्ञां मतः पूजितो वा विप्रः। गुरोरासितमुषितं वा पीठम्।

न तिङादेशोऽव्ययनिष्ठाखलर्थानामुकस्य चाकामुकस्य ॥६६॥

तिङादेशाः शत्रादयः। तिङादेशादिकानां कामुकवर्ज्जितस्य उकस्य च योगे षष्ठी न स्यात्। तत्र तिङादेशानाम्, सुरं द्विषन्। घटम्, कुर्व्वन् कुर्व्वाणः चकृवान् चक्राणः करिष्यन् करिष्यमाणो वा। उतः— ओदनं बुभुक्षुः अन्नं पिपक्षुः। बालमलङ्करिष्णुः। अव्ययस्य घटं कर्त्तुं कृत्वा प्रकृत्य कारं कारं वा। निष्ठायाः, कुलालेन घटः कृतः। घटं कृतवान् कुलालः। खलर्थस्य, पटुना सुकरो विद्याभ्यासः। रुग्णेन दुष्पानं निम्बम्। उकस्य शत्रुं घातुकः। कामुकशब्दयोगे स्यादेव विद्यायाः कामुकः।

तुल्यार्थैस्तृतीया च तुलोपमाभ्यां तु षष्ठ्येव ॥६७॥

तुल्यार्थशब्दयोगे तृतीया चात् षष्ठी। तुलोपमाभ्यां योगे तु षष्ठ्येव स्यात्। तुल्यः समो वा सिंहेन सिंहस्य वा राजा। विद्यायास्तुला उपमा नास्ति।

* अव्ययपदं कृदन्ताव्ययपरं कर्त्तृकर्म्मणोः कृतोऽक्तुमुपक्रान्ताया एव निषेधार्थकत्वात् तेन तस्योपरीत्यादौ षष्ठी स्यादेव।

चतुर्थी चाशिष्यायुष्यभद्रसुखकुशलार्थहितैः ॥६८॥

आशीर्व्वादेऽर्थे आयुष्याद्यर्थकशब्दयोगे हितशब्दयोगे च चतुर्थी चात् षष्ठी स्यात्। पुत्रस्य पुत्राय वा आयुष्यम्, चिरजीवनम् भद्रम् कुशलम् मङ्गलम् सुखम् शर्म्म हितम् वा भूयात्।

दूरान्तिकार्थैः पञ्चमी च ॥६९॥

दूरान्तिकार्थशब्दयोगे पञ्चमी चात् षष्ठी स्यात्। ग्रामात् ग्रामस्य वा दूरम् अन्तिकं निकटं समीपं वा।

हेतुयोगे हेतौ षष्ठी सर्व्वनाम्नस्तु तृतीया च ॥७०॥

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् सर्व्वनाम्नस्तु तृतीया चात् षष्ठी स्यात्। धनस्य हेतोर्वसति। सर्व्वनाम्नस्तु केन हेतुना कस्य हेतोर्वा वसति।

निमित्तार्थकयोगे प्रायः सर्व्वाः ॥७१॥

निमित्तार्थकशब्दयोगे प्रायः सर्व्वा विभक्तयः स्युः। किं निमित्तं केन निमित्तेन कस्मै निमित्ताय कस्मात् निमित्तात् कस्य निमित्तस्य कस्मिन् निमित्ते वा वसति एवं किं कारणं किं प्रयोजनमि-

त्यादि। प्रायइत्युक्तेरसर्व्वनाम्न प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेनेत्यादि।

इति षष्ठी।

अथ सप्तमी।

२· १· १·

कर्त्तृकर्म्मद्वारा क्रियाधारोऽधिकरणम् ॥ ७२ ॥

कर्त्तृद्वारा कर्म्मद्वारा च क्रियाश्रयः कारकमधिकरणसंज्ञः स्यात्। आधारश्च, सामीप्याश्लेषविषयैर्व्याप्तया चायं चतुर्विध इत्युक्तेश्चतुर्विधः।

७· ·१:

अधिकरणे सप्तमी— ॥ ७३ ॥

अनुक्तार्थके अधिकरणे सप्तमी स्यात्। गङ्गायां घोषः गङ्गासमीपे इत्यर्थः। गृहे आस्ते गृहैकदेशे आस्ते इदञ्च कर्त्तृद्वारा क्रियोपकारकम्। स्थाल्यामोदनं पचति स्थाल्येकदेशे पचति इदन्तु कर्म्मद्वारा क्रियोपकारकम्। विद्यायामिच्छा तद्विषये इच्छेत्यर्थः। तिलेषु तैलमस्ति तिलान् व्याप्यास्तीत्यर्थः।

५· ७·

फलात् कर्म्मसंबन्धे ॥ ७४ ॥

फलवाचकात् कर्म्मणा सह संबन्धे (संयोगेऽवयवावयविसम्बन्धे वा) सप्तमी स्यात्।

चर्म्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति मांसेषु हरिणो हतः ॥

संबन्धविशेषे किं वेतनेन धान्यं लुनातीत्यादौ न ।

६॰ २॰ ।॰ ५॰॰।॰

यस्य क्रियया क्रियान्तरपरिच्छेदस्ततश्च ॥ ७५ ॥

यस्य कारकस्य (कर्त्तुः कर्म्मणो वा) क्रियया (व्यापारेण फलेन वा) क्रियान्तरस्य परिच्छेदस्तद्वाचकात् चात् विशेषणवाचकादपि सप्तमी स्यात् । पठित्सु छात्रेषु-गोषु दुह्यमानासु--आगतः अत्र पठनदोहनयोराग-मनकालपरिच्छेदकता ।

७॰ ७॰ ॰१॰ ॰१॰

अनादरे तत्कर्म्मणि षष्ठी—च ॥ ७६ ॥

अनादरे गम्ये अनादरस्य कर्म्मणि षष्ठी चात् सप्तमी स्यात् । रुदतो बालस्य, रुदति वा बाले, वहिर्गता माता रुदन्तं पुत्रमनादृत्येत्यर्थः ।

स्वामीश्वराधिपतिदायादसाक्षि प्रतिभूकुशला-

२॰:

युक्तैः ॥ ७७ ॥

एभिर्योगे षष्ठीसप्तम्यौ स्याताम् । गवाम्, गोषु, वा स्वामी, ईश्वरः अधिपतिर्वेत्त इत्यादि ।

२: ५. ५. ६.

जातिगुणक्रियासंज्ञाभिर्यतः समुदायादेकदेशस्य

७.

पृथक्करणंतत्र ॥७८॥

जात्यादिभिर्यतः समुदायादेकदेशस्य पृथक्करणं तस्मिन्नर्थे षष्ठीसप्तम्यौ स्तः। नृणाम्, नृषु, वा विप्रो गरिष्ठः अत्र जात्या, गवाम्, गोषु, वा कृष्णा बहुक्षीरा अत्र गुणेन, गच्छताम्, गच्छत्सु, वा धावन् शीघ्रः अत्र क्रियया, छात्राणाम्, छात्रेषु, वा मैत्रः पटुतरः अत्र संज्ञाद्वारा, समुदायादेकदेशस्य विप्रादेः गरिष्ठत्वादिना पृथक्करणम्।

७. ·।·।·

साधुना चतुर्थी च ॥ ७९ ॥

साधुशब्दयोगे चतुर्थी चात् सप्तमी स्यात्। यज्ञाय यज्ञे वा साधुः।

२. २. ·१. ·।··।·

उत्सुकप्रसिताभ्यां निपुणार्थकेन च तृतीया-च॥८०॥

आभ्यां निपुणार्थकेन च योगे तृतीया चात् सप्तमी स्यात्। प्रियेण, प्रिये, वा उत्सुका, प्रसिता, (आसक्ता) वा कान्ता। कर्म्मणि, कर्म्मणा, वा निपुणः, दक्षः, पटुर्वा।

५·०१·

कालार्थे नक्षत्रवाचिनश्च ॥ ८१ ॥

कालार्थे नक्षत्रवाचिशब्दादपि ते स्तः । मूलेनावाहयेद्देवीं श्रवणेन विसर्ज्जयेत् । पक्षे मूले श्रवणे वा तत्तन्नक्षत्रयुक्तकाले इत्यर्थः ।

७· ५: ·१·०·१·

कारकमध्ये कालाध्वभ्यां पञ्चमी च ॥ ८२ ॥

कारकयोर्मध्ये व्यावर्त्तककालाध्ववाचकाभ्यां पञ्चमी चात् सप्तमी स्यात् । अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भुङ्क्ते अत्र कर्त्तृद्वयमध्यवर्त्ती कालः । इहस्थः क्रोशात् क्रोशे वा ग्रामं पश्यति । अत्र कर्त्तृकर्म्मणोर्मध्यवर्त्ती पन्थाः ।

२·

अधिकशब्देन ॥ ८३ ॥

एतद्योगे पञ्चमीसप्तम्यौ स्याताम् । धनात् धने वाधिका विद्या ।

२· २· २·०१· ·१·

अधिकार्थोपेन स्वाम्यर्थेनाधिना च सप्तमी ॥ ८॥

अधिकार्थकेनोपशब्देन स्वाम्यर्थेनाधिशब्देन च योगे सप्तमी स्यात् । विद्या शते गुणेषूप अधिकेत्यर्थः । अधि नृपे भूमिः भूमिर्नृपस्वामिकेत्यर्थः । अधि भुवि वा नृपः । नृपो भूमिस्वामीत्यर्थः ।

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
कारकत्वं भवेत्तत्र प्रधानापेक्षया स्थितिरित्युक्तेः प्रधानक्रियापेक्षयैव कारकव्यवस्था तेन स्थित्वाऽखेन गच्छति। प्रविश्य गृहान्निःसरतीत्यादिरेव प्रयोगः।

इति सप्तमी।

इति कारकप्रकरणम्।

समासप्रकरणम्।

१॰ १॰ ॰।॰ ॰।॰
पदविधिरेकार्थः सङ्गतार्थश्च ॥ १ ॥

पदनिमित्तको विधीयमानः समासतद्धितादिरेकार्थः (समुदायेनैकार्थस्य बोधकः) सङ्गतार्थश्च (परस्परमन्वितार्थकः) स्यात्। तत्र समासो द्विपदनिमित्तको बहुपदनिमित्तको वा तद्धितस्त्वेकपदनिमित्तक इति विशेषः। तथाच परस्परं सङ्गतार्थकैकार्थीभावापन्नार्थबोधकंपदद्वयं तादृशपदत्रयं वा समास इति फलितम्। समासश्च चतुर्विधः अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वभेदात्। द्विगुकर्म्मधारयौ तु तत्पुरुषस्यैवावान्तरभेदौ। ते च

तत्तत्प्रकरणे वक्ष्यन्ते। समासतया (२४२पृ० ७ सू०) प्रातिपदिकसंज्ञायाम् (२०८पृ० २सू०) तदवयवस्य सुपो लुकि पुनः समुदायात् सुप्। तत्र च पूर्व्वभागस्येव अन्तभागस्यापि सुबन्तत्वेन पदत्वप्रसङ्गे

६· १· ·१· ·१· ७· ७· ·१·
समासस्यान्तो न पदं याजादौ तद्धिते च तान्त-
१: ·१· ७· ·१·
सान्तौ तु अस्त्यर्थे च ॥२॥

समासस्यान्तः, याजादौ तद्धिते परे पूर्व्वश्च न पदसंज्ञः स्यात् तान्तसान्तौ तु अस्त्यर्थे प्रत्ययमात्रे परे। इति पदत्वनिषेधः। तेन अधिवाचीत्यत्र न कुत्वम्।

३· ३· १· ८·
सङ्गतार्थेन सुबन्तेन सङ्गतार्थः समस्यते ॥३॥

सङ्गतार्थेन सुबन्तेन सह सङ्गतार्थकः शब्दः समस्यते पूर्व्वं भूतः। भूतपूर्व्वः॥ अत्र पूर्व्वशब्दस्य परनिपातो निपातनात् एवं दृष्टपूर्व्वः श्रुतपूर्व्वः।

१· ७· १· ·१·
अमुख्यं समासविधौ प्रथमानिर्द्दिष्टं, चोपस-
१· ७· ६· ७· १·
र्ज्जनं तत्र प्रथमानिर्द्दिष्टस्य प्राक् प्रयोगः ॥४॥

इतरस्य विशेषणं, समासविधायकशास्त्रे प्रथमानिर्द्दिष्टं, चोपसर्ज्जनसंज्ञं स्यात् तयोर्मध्ये प्रथमान्त

पदस्य पूर्व्वप्रयोगः। यथा अव्ययं विभक्त्यर्थेत्यादौ अव्ययादिपदं प्रथमान्ततया निर्द्दिष्टं तस्यैव समासावस्थायां प्राक्प्रयोगः। एवमन्यत्रापि।

अव्ययीभावप्रकरणम्।

१· ७ः ·१· ·१· १·

अव्ययं विभक्त्यर्थादिषु बहुलम् सोऽव्ययीभावः ॥१॥

विभक्त्यर्थादिषु वर्त्तमानमव्ययं सङ्गतार्थेन सुबन्तेन सह बहुलं समस्यते सोऽव्ययीभावः। स चाग्रेऽप्यनुवर्त्त्यः। बहुलग्रहणात् क्वचिन्नित्यं क्वचिद्वा स्यात् क्वचिच्च नेति ज्ञाप्यते। तत्र नित्यसमासे समाससमानार्थकमेव वाक्यं न तु नित्यसमासान्तःपाति सकलपदयुक्तं किन्तु तत्समानार्थकपदान्तरयुक्तमेव यथा अधिदेहमित्यादौ देहे इत्येव वाक्यम् उपग्राममित्यादौ च ग्रामस्य समीपे इत्येव वाक्यमित्यादि। तत्र विभक्त्यर्थादयो नित्यविकल्पनिषेधविषयाश्च यथा।

विभक्त्यर्थेषु सामीप्ये मध्यार्थे चानतिक्रमे।
अभावे च तथा नाशे साकल्यार्थेऽप्यनुक्रमे।
सदृशार्थे यथाशब्दं विना सादृश्यके तथा।

योग्यतायां सदृार्थे च समर्थेन सुपाऽव्ययम्।
पश्चाच्छब्दं विना पश्चादर्थे नित्यं समस्यते।
व्याप्तौ प्रत्यादयो वा तु समस्यन्ते सुपा सह।
सीमायाश्चाङभिव्याप्तौ सुपा वा च समस्यते।
अभिप्रती चाभिमुख्ये पर्य्यपौ वा च वर्ज्जने।
बहिःप्रागादयस्तद्वत् समस्यन्ते विभाषया।

तत्र विभक्त्यर्थेषु देहे इति समम्यर्थस्य द्योतकोऽधिशब्दस्तस्य च प्रथमान्तनिर्दिष्टतया पूर्वनिपाते अधिदेहे इतिस्थिते तत् समुदायस्य प्रातिपदिकसंज्ञया तदंशसुपो लोपे पुनः सुपः प्रसङ्गे अव्ययीभावसमासस्याव्ययतया विभक्तिलोपप्रसङ्गे च

५· ५· ·१· ६· ·१· ·१· ·१·
अव्ययीभावाददतो न सुपो लुक् अम् त्वपञ्च-
६· ६ः ·१·
म्यास्तृतीयासप्तम्योर्वा ॥ २ ॥

अदन्तादव्ययीभावात् सुपो न लुक् स्यात् किन्तु तत्स्थाने अम् स्यात् न तु पञ्चम्याः, तृतीयासप्तम्योस्तु अम् वा स्यात्। पक्षे तयोरलोपे यथायथं प्रयोगः। इति सुपोऽलोपेऽमि च अधिदेहम्।

१· ·१·
अव्ययीभावो नपुंसकवत् ॥ ३ ॥

अव्ययीभावसमाससाध्यं नपुंसकवत् कार्य्यं लभते।

तेन अको ह्रस्वादि गङ्गायामित्यर्थे अधिगङ्गम्, गौर्य्यामित्यर्थे अधिगौरि वध्वामित्यर्थे अधिवधु, इत्यादौ ह्रस्वे अम्, सुब्लोपो वा। प्रथमार्थे तु नाव्ययीभावस्तत्र विभक्तिविशेषार्थाभावात् प्रथमया प्रातिपदिकार्थमात्रस्यैव द्योतनात्। सामीप्ये, ग्रामस्य समीपमुपग्रामम्। उपग्रामेण, उपग्रामं, वा युक्तः। उपग्रामादागतः। उपग्रामम्, उपग्रामे वा स्थितः। मध्यार्थे, दिशयोर्म्मध्ये अपदिशम् क्लीबतया ह्रस्वेऽम्भावः। मध्यशब्दस्य तु विभाषाये वक्ष्यते। अनतिक्रमे, शक्तिमनतिक्रम्य यथाशक्ति यथामति यथासाध्यमित्यादि। अभावे, पापस्याभाव इति वाक्येऽभावार्थकनञा समासे पूर्व्वनिपाते

७· ६·१· ७· ७··१··१·

अनखादौ नञोऽश् हलि अचि त्वन् ॥४॥ *

नखादिभिन्नविषये हलादौ परे नञः स्थाने अश् स्यात् अजादौ तु अन् स्यात्। शदृत्। शित्त्वात् बहुवर्णत्वाच्च सर्व्वादेशः। नख, नाक नपुंसक नकुल नमुचि नक्षत्र नासत्य नग † इति नखादि। नखादिराकृतिगणः। इत्यशादेशे अपापम्।

---

* नञो नित्त्वं न प्रयोजनाभावात्। वृत्तौ शित्त्वादिति अश्विधिपरं बहुवर्णत्वादिति अन्विधिपरम्।

† नग इति अप्राणिविषयः प्राणिविषये तु अगः वृक्षः इत्येव। अप्राणिविषयेऽपि शैलवृक्षयोरपि वा अश्भाव तेन शैल-वृक्षौ नगावगावित्यमरोक्तिः।

अनि आमयाभावः अनामयम्। भावकृदन्तैस्तु नञोऽव्ययीभावो नेष्यते किन्तु तत्र नञ्तत्पुरुष एव यथा अभावः अनुच्छेदः असंदेहः अनुपालम्भ इत्यादि। नाशे, हिमस्य नाशः निर्हिमम् निर्मक्षिकम् अत्र निरो नाशार्थकता। सहार्थे, साकल्ये च, तृणेन सहितमिति वाक्ये तृणमप्यपरित्यज्येति वाक्ये वा साकल्यद्योतकसहशब्दस्य समासस्तस्य च पूर्वनिपाते

६. १. ०. ०. १. १. ०.

सहस्य सोऽव्ययीभावे बहुव्रीहौ तु वाऽकाले॥५॥

कालार्थकशब्दभिन्ने परे अव्ययीभावे सहशब्दस्य स्थाने सः स्यात् बहुव्रीहौ तु वा। इति सादेशे सतृणम् सकलं तृणमत्तीत्यर्थः। कालार्थके तु सह पूर्वाह्णमित्येव तत्र च सहार्थे अव्ययीभावः। एवं सधनम् धनसहितमित्यर्थः। अनुक्रमे, ज्येष्ठस्यानुक्रमः अनुज्येष्ठम् यथावृद्धम्। सादृश्ये, बुद्धेः सादृश्यं सबुद्धि। सादृश्यार्थकयथाशब्दस्य तु न यथा हरिस्तथा हरः। योग्यतायाम्, रूपस्य योग्यमनुरूपम् कुलस्य योग्यं यथाकुलमिति। पश्चादर्थे, वृद्धस्य * पश्चात् अनुवृद्धम् अनुज्येष्ठम् अनुपूर्व्वम्। पश्चाच्छब्दस्य तु न, तत्र देहस्य पश्चादिति वाक्यमेव।

व्याप्तौ, वृक्षं वृक्षम् प्रति, अनु, अभि, परि, वा इति वाक्यं प्रतिवृक्षम् अनुवृक्षं अभिवृक्षं परिवृक्षमिति समासो वा। अत्र समासेनैव द्वित्वस्य बोधनात् उक्तार्थानामप्रयोगइत्युक्तेर्न व्याप्तौ द्वित्वम्। सीमायाम् आ ग्रामात् आग्रामं वा वनम्। अभिव्याप्तौ आ बाल्यात् आबाल्यं वा विद्यायां यत्नः कार्य्यः बाल्यमभिव्याप्येत्यर्थः। आभिमुख्ये, अग्निम् अभि, प्रति, वा अभ्यग्नि प्रत्यग्नि वा शलभाः पतन्ति। वर्ज्जने परि धीरात् परिधीरं वा अप धीरात् अपधीरं वा मोहः धीरं वर्ज्जयित्वा मोह इत्यर्थः। वहिर्वनात् वहिर्वनं वा ग्रामः। प्राग्वनात् प्राग्वनं वा ग्रामः इत्यादि।

१ः   २··१·

पारेमध्येशब्दौ षष्ठ्या वा ॥६॥

एतौ षष्ठ्यन्तेन वा समस्येते। तयोश्च एदन्तत्वं निपात्यते। पाक्षिकवक्ष्यमाणषष्ठीसमासापवादः। समुद्रस्य मध्यम् मध्येसमुद्रं पक्षे षष्ठीसमासे समुद्रमध्यम् पक्षे वाक्यमपि समुद्रस्य मध्यम्। एवं पारेसमुद्रं समुद्रपारं समुद्रस्य पारम्।

७·   ५:··१·

अव्ययीभावे—शरत्प्रभृतिभ्योऽः ॥ ७ ॥

शरदादिभ्यः अः स्यादव्ययीभावे। शरत् अनस्

मनस् चतुर् उपानह् दिव् हिमवत् अनुडुह् दिश् दृश्। इति शरदादि। उपशरदम् उपदिशम् अनुदृशमित्यादि।

६· १· ·१·

जराया जरस् च ॥ ८ ॥

जराशब्दात् अः स्यात् तत् सहयोगे च जरास्थाने जरस् इत्यादेशः स्यादव्ययीभावे। उपजरसम्।

५·: ५·

प्रतिपरःसमनुभ्यो ऽक्ष्णः ॥ ९ ॥

एभ्योऽक्षिशब्दात् अः स्यादव्ययीभावे। परशब्द-समानार्थकः परःशब्दोऽप्यस्ति परःशताद्यास्ते येषा-मित्यादिप्रयोगात्। इति अप्रत्यये (३०९पृ०८सू०) इवर्णलोपे प्रत्यक्षम् परोक्षम् समक्षम् अन्वक्षम्।

५· ५··२··१·

अनः क्लीबात्तु वा ॥ १० ॥

अनन्तात् अः स्यादव्ययीभावे क्लीवलिङ्गानन्तात्तु वा। इति अप्रत्यये

६· ६· ६· १· ७·

नान्तस्य भस्य टेर्लोपः समासान्ते ॥११॥ *

समासान्तप्रत्यये परे भसंज्ञस्य नान्तस्य टेर्लोपः स्यात्। अनोऽल्लोपापवादः। इति टिलोपे आत्मनि अध्यात्मम्। राजनि अधिराजम्। क्लीवा

* टिलोपकरणं स्पष्टार्थं नकारलोपेऽपि उपधा भूतावर्णैवर्ण-योर्लोपसम्भवात् अवर्णैवर्णोपधभिन्नस्य नान्तस्याप्रसिद्धत्वात् अतएव तद्धिते नवोपमात्मम् विधास्यते।

नन्तात्तु चर्म्मणः समीपे उपचर्म्मम् उपचर्म्म वा ।

५॰ ५ः॰ ०१॰

झयन्ताद्गिरिनदीपौर्णमासीभ्यो वा ॥ १२ ॥

झयन्ताद्गिर्थ्यादिभ्यश्च अः स्याद्वाव्ययीभावे । उपसमिधम् उपसमित् वा । उपदृषदम् उपदृषत् वा अनुगिरम् अनुगिरि वा उपनदम् उपनदि वा

इत्यव्ययीभावः ।

तत्पुरुषप्रकरणम् ।

१॰ ३ः॰ ०१॰

द्वितीया—श्रितातीतगतप्राप्तापन्नादिभिर्वा-स-

८॰ १॰ १॰

मस्यते स तत्पुरुषः ॥ १ ॥

श्रितादिभिः सह द्वितीयान्तं पदं वा समस्यते स तत्पुरुषसंज्ञः स्यात् । तत्पुरुष इति पदमाप्रकरणसमाप्ति सर्व्वत्रानुवर्त्त्यम् । कष्टं श्रितः कष्टश्रितः । कालमतीतः कालातीतः । ग्रामंगतः ग्रामगतः । सुखं प्राप्तः सुखप्राप्तः । मरणमापन्नः मरणापन्नः । आदिना गमिगम्यादयो गृह्यन्ते । ग्रामं गमी ग्रामगमी ग्रामं गामी ग्रामगामी । अन्नं बुभुक्षुः अन्नबुभुक्षुरित्यादि । अत्र द्वितीयेतिपदं विभज्यते

तेन द्वितीयान्तं समर्थेन क्वचिदसमर्थेन च समस्यते । तेन वृक्षमारूढ़ः वृक्षारूढ़ इत्यादौ समर्थेन, अत्यन्तं वल्लभः, नितान्तं दीर्घं इत्यादिश्वापेक्षितया भवतीत्यादिक्रियया सह सापेक्षतया वल्लभादिनाऽसमर्थेनापि अश्राद्धभोजीत्यादौ भोजनान्वयि नञेव समास: श्रितादिग्रहणं प्रपञ्चार्थम् ।

·१· ·७· ९·

खट्वा क्षेपे क्तेन—। २ ॥

क्षेप गम्ये द्वितीयान्तं खट्वापदं क्तान्तेन सह समस्यते स तत्पुरुष इति सर्व्वत्र वाक्यशेषः । खट्वामारूढ़ः खट्वारूढ़ः मूर्खः ।

१· ·१·

सामि—क्रियाविशेषणम् ॥ ३ ॥

क्रियाविशेषणं द्वितीयान्तं सामि (अर्द्धवाचि) क्तान्तेन सह वा समस्यते । सामिकृतम् अर्द्धं यथा स्यात्तथा कृतमित्यर्थः । पूर्व्वं गाधिसुतेन सामिघटिता मुक्तार्द्धमन्दाकिनीति नैषधः ।

१·:

कालाः—॥ ४ ॥

द्वितीयान्ताः कालवाचकाः शब्दाः क्तान्तेन सह वा समस्यन्ते । अनत्यन्तसंबन्धार्थमारम्भः । मासं प्रमितः प्रतिपच्चन्द्रः मासं परिच्छेत्तुमारब्धवान् ।

१. २.

अत्यन्तसंबन्धे—समर्थेन ॥ ५ ॥

अत्यन्तसंबन्धे या द्वितीया तदन्तं समर्थेन वा समस्यते । क्षणं सुखं क्षणसुखं मुहूर्त्तं दुःखं मुहूर्त्तदुःखम्

१. १. १. १.

कर्त्तृकरणयो—स्तृतीया—कृता बहुलम् ॥ ६ ॥

कर्त्तरि करणे च या तृतीया तदन्तं पदं कृदन्तेन सह बहुलं समस्यते । राज्ञा पालितः राजपालितः । अस्त्रैर्विदारितः अस्त्रविदारितः । अनयोः किं विद्यया स्थित इत्यादौ हेतुतृतीया न । बहुलग्रहणात् दात्रेण लूनवान् अश्वेन गतवानित्यादौ न । कृतेत्युक्तेस्तद्धितेन न, काष्ठैः पचतिकल्पम् ।

१. २.

अर्थवादवचने कृत्यैः ॥ ७ ॥

अर्थवादस्य (निन्दायाः स्तुतेर्वाधिक्यस्य) वचने कर्त्तरि करणे च या तृतीया तदन्तं कृत्यान्तैः सह समस्यते । वातच्छेद्यं तृणं सुखच्छेद्यमित्यर्थः अत्र निन्दार्थवादः काकपेया नदी । अत्र पूर्णजलत्वेन स्तुत्यर्थवादः ।

१. १. २. १. १.

अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणञ्च ॥ ८ ॥

अन्नेन सह व्यञ्जनं (संस्कारद्रव्यम्) तृतीयान्तम् भक्ष्यं

कठिनं विविक्तावयवं यत् द्रव्यं तेन सह मिश्रीकरणवाचि तृतीयान्तञ्च वा समस्यते । दध्ना ओदनः दध्योदनः घृतोदनः । दृष्टान्तभूतोपसेचनद्वारा सापेक्षता । गुड़ेन धानाः गुड़धानाः मिश्रीकरणद्वारा सापेक्षता ।

३· १·

स्वयं क्तेन ॥ ९ ॥

स्वयमिति तृतीयान्तमव्ययम् । तच्च क्तान्तेन सह वा समस्यते । स्वयंकृतम् स्वयंभुक्तम् । समासे सति स्वायंकृतिरिति समुदायात्तद्धिते आद्यचो वृद्धिः ।

२·

पूर्व्वसदृशसमानोनार्थकलहनिपुणमिश्रार्थैः ॥१०॥

तृतीयान्तं पूर्व्वादिभिर्वा समस्यते । अप्राप्तौ वचनम् । मासपूर्व्वः मातृसदृशः पितृसमः । ऊनार्थे माषोनं माषविकलं कार्षापणम् । वाक्कलहः । आचारनिपुणः । गुड़मिश्रः । धान्येनार्थः धान्यार्थः ।

·१· २·

चतुर्थी बलिहितार्थसुखरक्षितैः ॥ ११ ॥

चतुर्थ्यन्तं बलिहितादिभिर्वा समस्यते । भूतबलिः । गोहितः । विप्रसुखम् गोरक्षितम् ।

७· २· ·१·

तादर्थ्ये प्रकृतिवाचिनैव ॥ १२ ॥

तादर्थ्ये या चतुर्थी तदन्तं तदर्थप्रकृतिवाचिपदेनैव

वा समस्यते। यूपाय दारु यूपदारु। प्रकृतिवाचिनेत्युक्तेः रन्धनाय स्थालीत्यादौ न।

·१· २·:

पञ्चमी—भीत्यादिभिः ॥ १३ ॥

पञ्चम्यन्तं भीत्यादिभिर्वा समस्यते। चौराद्भीतिः चौरभीतिः ग्रामनिर्गतः धर्म्मप्रमादः अधर्म्मविरत इत्यादि।

२·:

अपेतापोढ़मुक्तपतितैः ॥ १४ ॥

एभिः सह पञ्चम्यन्तं वा समस्यते। दुःखादपेतः दुःखापेतः। कल्पनापोढ़ः। रोगमुक्तः।

·१· २·: ·१·

षष्ठी याजकादिभिश्च ॥ १५ ॥

षष्ठ्यन्तं समर्थेन याजकादिभिश्च सह वा समस्यते। तृजकाभ्यां कर्त्तरीति निषेधे याजकादि ग्रहणम्। राज्ञः पुरुषः राजपुरुषः। याजक, पूजक, परिचारक, परिवेषक, अध्यापक, उत्पादक, उद्वर्त्तक, होतृ, भर्त्तृ एते याजकादयः। शूद्रयाजकः देवपूजकः ग्रामभर्त्ता

·१· ७·

न निर्द्धारणे— ॥ १६ ॥

निर्द्धारणार्थे या षष्ठी तदन्तं न समस्यते नृणां द्विजः श्रेष्ठः।

२।२।१०

प्रतिपदं विहिता च ॥ १७॥

प्रतिपदं सर्व्वस्मिन् पदे स्मरणार्थदयेशामित्यादिसूत्र समूहेन या षष्ठी विहिता सा न समस्यते। पुत्रस्य दया। मातुः स्मरणम्। सुवर्णस्योपस्कार इत्यादि।

२।२।११

पूरणगुणवर्त्तमानार्थकाव्ययैश्च ॥ १८ ॥

पूरणाद्यर्थैः वर्त्तमानार्थकशत्रादिभिः अव्ययेन च सह षष्ठी न समस्यते। तत्र पूरणे, सतां तृतीयः। गुणे दन्तस्य शुक्लः। ये शब्दा गुणवाचका एव गुणिनि वर्त्तन्ते तएव शब्दा यदि गुणपरास्तदा तैः सह न समास इति सिद्धान्तः। तेन अर्थलाघवं बुद्धिमान्द्यमित्यादि स्यादेव। वर्त्तमानार्थकेन, द्विजस्य कुर्व्वन् कुर्व्वाणो वा किङ्कर इत्यर्थः। अव्ययेन, द्विजस्य कृत्वा कर्त्तुं वा।*

२।२।१२

वर्त्तमानाधारार्थक्तैश्च ॥ १९ ॥

षष्ठ्यन्तं वर्त्तमानाद्यर्थक्तान्तेन सह न समस्यते। राज्ञो मतः पूजितो वा। इदमेषामासितं गतं भुक्तं वा।

* द्विजस्येति षष्ठी सम्बन्धविवक्षया कृद्योगविवक्षया तु न तद्-योगे तन्निषेधात्।

उभयप्राप्तौ कर्म्मणि ॥ २० ॥

उभयप्राप्तिविषये कर्म्मण्येव या षष्ठी सा समर्थेन सह न समस्यते । आचार्य्येण शब्दानामनुशासनम् *

तृजकाभ्यां कर्त्तरि ॥ २१ ॥

कर्त्रर्थतृजकान्ताभ्यां सह षष्ठी न समस्यते । काव्यानां रचयिता । शिशोर्भर्त्ता पत्यर्थकभर्त्तृशब्दस्य तु याजकादित्वात् समासः । कर्म्मषष्ठ्या समासनिषेधार्थमिदम् । संबन्धषष्ठ्या तु समास इष्यते एव तेन त्रिभुवनविधातुश्च कलह इत्यादि सिद्धम् ।

पूर्व्वापरावरोत्तरा अवयविनैकद्रव्येण ॥२२॥ †

पूर्व्वादयः एकदेशा अवयविना सह समस्यन्ते अवयवी चेदेकत्वविशिष्टः । षष्ठीसमासापवादः । पूर्व्वादीनां पूर्व्वनिपातार्थमिदम् । अवयवावयविसम्बन्धे षष्ठी । पूर्व्वं कायस्य पूर्व्वकायः । अपरकायः । एकद्रव्येणेति किं पूर्व्वश्छात्राणामित्यादौ बहुत्वे न ।

सर्व्वोऽप्येकदेशः कालवाचिना ॥ २३ ॥

सर्व्वोऽप्येकदेशवाचकशब्दः कालरूपैकदेशिवाचिना

---

* अथ शब्दानुशासनमिति भाष्यप्रयोगस्तु आचार्य्यपदानुपादानात् सति तु आचार्य्यरूपकर्त्रादिशब्दप्रयोगे ऽसमास एव ।

† अनुवृत्तं षष्ठीपदं विपरिणामेन तृतीयान्तं प्रकल्प्य अवयविनेत्यन्वयितव्यम् तथा च षष्ठ्यन्तेन अवयविना सहावयवाः पूर्व्वादयः समस्यन्त इत्यर्थलाभः ।

सह वा समस्यते । मध्यरात्रः । उपारताः पश्चिम-रात्रगोचरादिति । अत्र वक्ष्यमाणेन अप्रत्ययः ।

१॰ १॰

अर्द्धं नपुंसकम् ॥२४॥

नपुंसकलिङ्गः (तुल्यार्थवाची) योऽर्द्धशब्दः स एकदे-* शिना सह वा समस्यते । अर्द्धं पिप्पल्या इत्यर्द्धपिप्पली । अर्द्धनदी इह । गौणत्वेऽपि

१॰ ७॰ १॰ ७॰ १॰ १॰

षष्ठ्यन्तमेकदेशिसमासे गौणमन्ते न ह्रस्वम् ॥२५॥

एकदेशिसमासे षष्ठ्यन्तपदं गौणमन्ते स्थितं न ह्रस्वं† स्यादिति । षष्ठ्यन्तप्रकृतिकतया वक्ष्यमाणेन ह्रस्वनिषेधः ।

१॰ २॰ २॰ १॰

सप्तमी समर्थेन शौण्डादिभिश्च ॥२६॥

सप्तम्यन्तं समर्थेन शौण्डादिभिश्च सह वा समस्यते । शौण्ड, धूर्त्त, कितव, प्रवीण, पण्डित, निपुण पटु, कुशल, चपल, इति शौण्डादि । पुरुषेषूत्तमः पुरुषोत्तमः । अक्षशौण्डः अक्षधूर्त्तः । शौण्डादिग्रहणं प्रपञ्चार्थम् । पक्षे वाक्यम् ।

१॰ २॰

कुगतिप्रादयो नित्यम् ॥२७॥

---

* तुल्यार्थेत्युक्तेरसमानवाचिनोऽर्द्धशब्दस्य षष्ठीसमास एव तेन क्रोशार्द्धं क्षितिमितरथेन गत्वेति रघुः ।

† गौणत्वमितरार्थे विशेषणत्वं भवति च निष्कौशाम्बिरित्यादौ कौशाम्ब्या निष्क्रमणार्थे विशेषणत्वमिति ।

कुशब्दो गतिसंज्ञकाः प्रादयश्च समर्थेन सह नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः। गतिसंज्ञकास्तु उर्य्यादयः, च्व्यन्ताः, डाजन्ताः, अनुकरणम् (पटत् झनत् प्रभृति) हस्ते, पाणौ, सत्, अलम्, पुरस्, अस्तम्, तिरस्, साक्षात्प्रभृतयः इत्यादयः। एते च प्रायः क्त्वि परे एव। तत्रापि तिरस्साक्षात्-प्रभृतयः क्त्वि वा गतिसंज्ञाः। तत्र उर्य्यादिषु, एतेषां गतिसंज्ञया समासेऽव्ययपूर्व्वकत्वात् क्त्वा-स्थाने ल्यपि उरीकृत्य ऊररीकृत्य सजूःकृत्य वषट्-कृत्य स्वधाकृत्य स्वाहाकृत्य प्रादुष्कृत्य आविष्कृत्य। च्व्यन्ते, शुक्लीकृत्य। प्राय इत्युक्तेर्यथासंभवं भवतावपि शुक्लीभूय। डाजन्ते, पटपटाकृत्य। अनुकरणे, झनत्कृत्य। हस्तेकृत्य पाणौकृत्य सत्कृत्य अलङ्कृत्य पुरस्कृत्य अस्तंकृत्य तिरस्कृत्य तिरस्कृत्वा वा। साक्षात्कृत्य साक्षात् कृत्वा वा नमस्कृत्य नमस्कृत्वा वा। उपसर्गाणां गतित्वेऽपि अक्रियायोगार्थं प्रादीनां पृथग्ग्रहणम्। तेन प्रकृत्य प्रहृत्येत्यादिवत् प्रकृष्टं बलं प्रबलम् सुष्ठु पुरुषः, सुपुरुष इत्यादि सिद्धम्। प्रादिसमासे त्वयं विशेषः।

१ ७ २

अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥२८॥

क्रान्ताद्यर्थे वर्त्तमाना अत्यादयः शब्दा द्वितीयान्तेन सह नित्यं समस्यन्ते। अतिक्रान्तो नृपमतिनृपः।

अतिक्रान्तो गामिति वाक्ये वक्ष्यमाणेन अप्रत्यये

गोस्त्रीप्रत्ययान्तयोर्ह्रस्वोऽन्ते गौणत्वे न त्वीयसः॥२९॥

गौणत्वे सति अन्तस्थितस्य गोशब्दस्य स्त्रीप्रत्ययान्तस्य (आबीबूङन्तस्य) च ह्रस्वः स्यात् न तु ईयसः परस्त्रीप्रत्ययान्तस्य। इति ह्रस्वे

ओर्भस्य गुणस्तद्धिते समासान्ते च॥३०॥

भसंज्ञकस्य उवर्णस्य गुणः स्यात् तद्धिते समासान्ते च परे। इति गुणे अतिगवः। आपः—अतिमर्य्यादः। ईपः—अतिनदिः। ऊङः—अतिवामोरुरित्यादि। स्त्रीप्रत्ययान्तत्वाभावात् अतिलक्ष्मीः, अतिश्रीः, अतिभ्रूः, अतिचमूरित्यादौ न ह्रस्वः। ईयसस्तु अतिश्रेयसीत्येव। अत्र पुंस्यपि ईबन्तत्वात् सुलोपः। एवमुद्गतो वेलामुद्वेलः अभिगतो मुखमभिमुखः। प्रतिगतोऽक्षि प्रत्यक्षः। सङ्गतोऽक्षि समक्षः।

निरादयो निष्क्रान्ताद्यर्थे पञ्चम्या॥३१॥

निष्क्रान्ताद्यर्थे वर्त्तमाना निरादयः पञ्चम्यन्ते न सह प्राग्वत्। निष्क्रान्तो ग्रामात् निर्ग्रामः। निर्गतो द्वन्द्वात् निर्द्वन्द्वः। निर्गतः नद्या निर्नदिः।

१॰ ७॰ २॰ ३ः १॰

उपपदमतिङ्समर्थेन नित्यमव्ययाभ्यां त्वम-

२ः ॰१॰

न्ततत्सहितविहिताभ्यामेव ॥२२॥ *

तिङ्भिन्नमुपपदम् (प्रत्ययादिविधायकसूत्रे सप्तम्यन्तपदोपस्थाप्यम्) समर्थेन सह नित्यं समस्यते स तत्पुरुषः अव्ययेन तु अमन्तेन तत्सहविहितेनैव ल्यप्क्वादिना। पुनर्नित्यग्रहणात् नित्याधिकारो निवृत्तः। यथा कर्म्मण्यणित्यादौ कर्म्मणीति सप्तम्यन्तपदोपस्थाप्यं कुम्भ इत्यादिपदं तस्य अण्प्रत्ययान्तेन सहाग्रे समासः पश्चात् प्रातिपदिकसंज्ञया ततः सुप् गतिकारकोपपदानां कृद्भिः समासः प्राक् सुबुत्पत्तेरित्युक्तेः। अन्यथा व्याजिघ्रति या सेति वाक्ये अदन्तत्वात् प्रथममाबेव स्यात् ततश्च अदन्तत्वाभावात् जातिलक्षण ईप् न।

१॰ २॰

नञ् समर्थेन ॥२३॥†

नञ्पदं समर्थेन सह समस्यते स तत्पुरुषः। न विप्रः अविप्रः। अयञ्च नञ् सर्व्वत्र भेदबोधकः। भावकृदन्तयोगे त्वभावबोधकः। तेन अघट इत्यादौ घटभेदस्य, अनुपालम्भ इत्यादौ उपालम्भाभावस्य

* कुगतीत्यादिसूत्राभ्यां नित्यानुवृत्तावपि पुनर्नित्यग्रहणं सुत्तरत्रानन्नुवृत्त्यर्थम्।

† नित्याधिकारनिवृत्तौ विभाषाधिकारे अनपवाधकतया पुनः प्रवृत्ते न नित्यसमासत्वेन न घट इत्यादि वाक्यमपि।

च बोधः । निषेधार्थकनकारेण सुप् सुपेति समासे नैकधेत्यादौ न अनुभाव इति प्रक्रियाकौमुदीकारमल्लिनाथादयः ।

समानाधिकरणस्तत्पुरुषः कर्मधारयः संख्यापूर्व्वस्तु द्विगुरसंज्ञायाम् ॥ २४ ॥

अभेदेनान्वितार्थकः शब्दः समानाधिकरणः । तादृशपदयुक्तस्तत्पुरुषः कर्मधारयसंज्ञः स्यात् तादृशश्चेत् संख्यापूर्व्वस्तदा द्विगुसंज्ञः स्यात् न तु संज्ञायाम् । नीलमुत्पलम् नीलोत्पलम् । तत्पुरुषः किम् अन्यपदार्थे बहुव्रीहौ नीलाम्बर इत्यादौ मा भूत् । द्वयोः पात्रयोः समाहारः, समाहृते द्वे पात्रे वा, त्रयाणां लोकानां नाथः, तिसृणां मातॄणामपत्यमित्यादौ समाहारोत्तरपदतद्धितार्थद्विगूनामपि समा-* नाधिकरणपदयुक्तत्वेऽपि संख्यापूर्व्वकत्वेन विशेषेण द्विगुत्वम् । संज्ञायां तु संख्यापूर्व्वकस्यापि सप्तर्षयः, पञ्चाम्राः इत्यादेर्न द्विगुत्वम् किन्तु कर्मधारयत्वम् । तत्र पूर्व्वनिपातादिनियमो यथाप्रयोगम् ।

विशेषणं विशेष्येण बहुलम् ॥ २५ ॥

सत्यप्यभेदे विशेषणपदमेव विशेष्येण सह समस्यते

---

* इत्यादौ इत्येवंविधपदवाक्ये स्थितानां क्रमेण द्विपात्रं त्रिलोकनाथः द्वैमातुर इत्यादीनां समाहारादीनामित्यर्थः ।

स कर्म्मधारयः। एवञ्च तस्य प्रथमान्ततया निर्द्दे-शात् पूर्व्वनिपातः। नीलोत्पलं शुभ्रवस्त्रम् पाचक-चैत्र इत्यादि। एवं विशेषणयोरप्येकस्य विशेष्यता-विवक्षया समासः। तत्र सुन्दरपाचकः पाचकसु-न्दर इत्यादौ विवक्षयैव भेदः। एवं नीललोहित इत्यादि। तत्रायं नियमः वहुलग्रहणात् क्वचि-न्नित्यं समस्यते यथा कृष्णसर्पः, क्वचिन्न, यथा पाण्डरः शङ्खः रामो जामदग्न्य इत्यादि।

पूर्व्वकालिकं[१] उत्तरकालिकेन[२] ॥ २६ ॥

पूर्व्वकालिकपदार्थबोधकशब्दः उत्तरकालवृत्ति पदार्थबोधकेन सह वा समस्यते। तत्र पूर्व्वकालि-कस्य प्रथमान्ततया निर्द्देशात् पूर्व्वनिपातः। पूर्व्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। पक्वभुक्तम्।

ईषद्[१] गुणवचनेन[२] ॥ २७ ॥

ईषत्पिङ्गलः ईषच्छुभ्रः ईषदुष्णः।

एकसर्व्वजरत्पुराणनवकेवलाः[१] समर्थेन[२] ॥ २८ ॥

एकादयः समर्थेन सुबन्तेन विशेष्यतया विवक्षितेन सह वा समस्यन्ते। तत्र च एकादीनामेव प्राक् प्रयोगः। एकनाथः एकसुन्दरः सर्व्वश्वेतः। जरन्नैयायिकः। पुराणमीमांसकः। नवपाठकः। केवलतार्किक इत्यादि।

१॰ २॰

उपमानानि सामान्यधर्म्मवाचकैः ॥ ३९ ॥

उपमानार्थकाः शब्दा उपमानोपमेययोः सामान्य धर्म्मवाचकशब्दैः सह वा समस्यन्ते स कर्म्मधारयः। पूर्व्वनिपातार्थं सूत्रम्। घन इव श्यामः घनश्यामः समुद्रइव गम्भीरः समुद्रगम्भीरः। इह घनादि शब्दा एव तत्तत्सदृशे लाक्षणिका इत्येव सूचयितुं विग्रहवाक्ये इवशब्दप्रयोगः। अतएव समासकाले न तस्य प्रयोगः।

१॰ २॰ ७॰

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ ४० ॥

उपमेयवाचकः शब्दः व्याघ्रादिभिः उपमानैः सह वा समस्यते उपमानोपमेययोः सामान्यधर्म्मस्या-प्रयोगे। पुरुषो व्याघ्र इव पुरुषव्याघ्रः। ना सोम इव नृसोमः। व्याघ्रादिराकृतिगणः। अत्र व्याघ्रादि शब्द एव व्याघ्रादिसदृशे लाक्षणिकस्तेन तस्य पुरु-षादेर्विशेषणत्वेऽपि एतत् सूत्रात् परनिपातः। सामान्याप्रयोगे किं पुरुषोव्याघ्रइव शूर इत्यादौ न।

१॰ २॰

सन्महत्परमाः समर्थेन ॥ ४१ ॥

सदादयः समर्थेन वा समस्यन्ते। सद्वैद्यः

महापुरुषः। वक्ष्यमाणेन महतस्तकारस्य आकारः। परमकारुणिकः।

१· २:· १:·

प्रशस्यमानं वृन्दारकनागकुञ्जरैः पूज्यार्थैः ॥४२॥

पूज्यार्थैः वृन्दारकनागकुञ्जरशब्दैः सह प्रशस्यमानं समस्यते। सामान्यप्रयोगार्थं सूत्रम्। गोवृन्दारकः। राजनागः। नरकुञ्जरः।*

१:·

पूर्व्वापरप्रथमचरमजघन्यसमानमध्यमवीराः ॥४३॥

पूर्व्वादयः समर्थेन सह वा समस्यन्ते। पूर्व्वनिपातार्थमिदम्। पूर्व्ववैयाकरणः अपराध्यापकः।†

६· ७· १·

अपरस्यार्द्धे पश्चादेशः ॥ ४४ ॥

अपरशब्दस्यार्द्धे शब्दे परे पश्चादेशःस्यात्। पश्चार्द्धम्।

१:·

मयूरव्यंसकादयः ॥ ४४ ॥

एते निपात्यन्ते। मयूर एव व्यंसकः (धूर्त्तः) मयूरव्यंसकः। कुमारब्रह्मचारी। परनिपातार्थमिदम्। अन्यो राजा राजान्तरम्। उदक् चावाक् च उच्चावचम्। अकिञ्चनः अकुतोभयः। चिदेव चिन्मात्रम्। इत्यादयः (सि० २६६पृ०) द्रष्टव्याः।

---

* राजा नाग इव प्रशस्य इत्यर्थः समासलभ्यः।

† विशेषणयोर्मध्ये एकस्य विशेष्यताविवक्षयापि समासेष्टतया विवक्षया उभयस्यापि विशेष्यत्वप्राप्तौ पूर्व्वादेरेव विशेषणत्वविवक्षेति नियमार्थं सूत्रम्।

६:    १॰

शाकप्रियादीनामुत्तरपदलोप: ॥ ४६ ॥

शाकप्रिय: पार्थिव: शाकपार्थिव:। देवपूजक: ब्राह्मण: देवब्राह्मण इत्यादि। आकृतिगण:।

१:॰ ७॰   २:॰

श्रेण्यादयश्चार्थे कृतादिभि: ॥ ४७ ॥

च्विप्रत्ययार्थे (अभूततद्भावार्थे) श्रेण्यादय: कृतादिभि: सह वा समस्यन्ते। श्रेण्यादयश्च (सि॰पृ॰२६॰पृ॰) द्रष्टव्या:। श्रेणिकृत:। राशिकृत:। पुञ्जकृत:। पक्षे श्रेणीकृत इत्यादि।

३॰   ३॰   १॰

क्तेन नञ्विशिष्टेनानञ्क्तान्त: ॥ ४८ ॥

अनञ्क्तान्त: नञ्विशिष्टेन क्तान्तेन सह वा समस्यते। कृतश्चाकृतश्च कृताकृतम्। ज्ञाताज्ञातम्।

७॰   ७॰   ७॰ ॰१॰   १॰

समाहारे उत्तरपदे तद्धितार्थे च द्विगु: ॥४९॥

संख्यापूर्व्व: समानाधिकरणपदयुक्तस्तत्पुरुषो द्विगुरित्युक्तम्। तस्य त्रिधा भेद: समाहारेऽर्थे, तद्धितार्थे विषये, उत्तरपदे च परे।

७॰   १॰ १॰॰१॰   १॰

समाहारे द्विगुर्द्वन्द्वश्चैकवचन: ॥ ५० ॥

समाहारार्थे द्विगुर्द्वन्द्वश्चैकवचन: स्यात्। तत्र पात्राद्यन्तभिन्नादन्तानाम् स्त्रीत्वम् अनन्तानामावन्ता-

नान्तु वा, तदन्येषां च क्लीवत्वमग्रे वक्ष्यति। तत्र समाहारे, त्रयाणां भुवनानां समाहारः समाहृतानि वा त्रीणि भुवनानि त्रिभुवनम्। त्रयाणां लोकानां समाहारः त्रिलोकी (२११पृ॰ १२सू॰) ङीप्। उत्तरपदे, पञ्च गावो धनं यस्य स पञ्चगवधन इत्यादौ धन इत्युत्तरपदे परे पञ्चगवेत्यस्य द्विगुत्वं तेन वक्ष्यमाणेन ततः समासान्तः टप्रत्ययः। तद्धितार्थे, द्वयोर्मात्रोरपत्यं द्वैमातुरः षाण्मातुरः।

अथ तत्पुरुषीयसमासान्तप्रकरणम्।

५: ५॰ ५॰१॰

संख्याव्ययाभ्यामङ्गुलेस्तत्पुरुषादः ॥१॥

संख्यादेरव्ययादेश्च अङ्गुल्यन्तात् तत्पुरुषात् अः स्यात्। इति अप्रत्यये इवर्णलोपे समाहृताः पञ्च अङ्गुलयः इति पञ्चाङ्गुलम्। द्वे अङ्गुली प्रमाणमस्येति वाक्ये प्रमाणार्थकमात्रादितद्धितप्रत्यये

५॰ ६॰ ६॰ १॰

द्विगोः प्रमाणार्थकस्य तद्धितस्य लोपः ॥२॥

द्विगुसमासात् परस्य प्रमाणार्थकतद्धितप्रत्ययस्य लोपः स्यात्। इति तल्लोपे अप्रत्यये इवर्णलोपे

द्व्यङ्गुलम्। अव्ययादेः, निर्गतमङ्गुलीभ्यः निरङ्गुलम्। एवं प्रकृष्टा अङ्गुलयः प्राङ्गुलाः।

५ः४१ ५
सर्व्वैकदेशसंख्यातपुण्येभ्यश्च रात्रेः॥ ३॥

सर्व्वादिभ्यश्चात् संख्याव्ययाभ्यां परस्मात् रात्र्यन्तात्तत्पुरुषात् अः स्यात्। सर्व्वरात्रः। अपररात्रः संख्यातरात्रः पुण्यरात्रः। संख्याव्ययादेस्तु द्विरात्रम् अतिरात्रः। रात्राह्नाहान्ताः पुंसि संख्यापूर्व्वंरात्रान्तं तु नपुंसकमित्यग्रे वक्ष्यते।

५ः १
राजाहःसखिभ्यष्टः॥ ४॥

राजाद्यन्तेभ्यस्तत्पुरुषेभ्यः टः स्यात्। टइत्। टित्वात् स्त्रियामिप् अतिराजी। परमराजः। समाहृताः पञ्च राजानः पञ्चराजी। शरणागतसखः। परमसखः अतिसखः। पञ्चसखम्। अहन्नन्तात् अप्रत्यये (२५२पृ०११सू०) टिलोपे उत्तमाहः परमाहः

६ १ ७ ७११
भस्याह्नोऽह्नस्तद्धिते टे तु सर्व्वैकदेशसंख्यातसं-

६ ७ ७ ५
ख्याव्ययादेरसमाहारे ऽह्वे ऽनेकात्॥ ५॥

भसंज्ञकस्याहन्शब्दस्य स्थाने अह्न इत्यादेशः स्यात् तद्धिते परे, टे परे तु सर्व्वैकदेशादेर्न तु समाहारे

न च स्वविषये नाप्येकशब्दात्। इत्यह्नादेशे पूर्वाह्णः अपराह्णः वक्ष्यमाणेन णत्वम्। संख्यताह्नः। एभ्यः किं पुण्याहः। संख्यादेः, द्वयोरह्नोर्भव इत्यादौ

६·१· ६ः ६· ६·

द्विगोर्लुगनपत्यार्थस्वयोरजादेस्तद्धितस्य ॥ ६ ॥

द्विगुसमासात् परस्याजादेस्तद्धितस्यापत्यार्थस्वाभ्यां भिन्नस्य लुक् स्यात्। इति तद्धितस्य ठस्थानिकस्येकस्य लुकि टे तत्परेऽह्नादेशे च द्व्यह्नः। स्वविषये तु अह्नादेशाभावे टिलोपे द्वाभ्यामहोभ्यां साध्यः द्व्यहीनः क्रतुः। एकशब्दात् एकाहः। अव्ययादेः, अत्यह्नः। समाहारे तु द्व्यहः। पञ्चाहः। टे किम् स्वहः पूजनार्थतया सोः परस्मात् समासान्तनिषेधोऽग्रे वक्ष्यते। परागतमहर्यस्मादिति बहुव्रीहौ च समासान्ताभावान्न, तन्न पराहा।

५ः ७·

गोरतद्धितलुकि ॥ ७ ॥

गोशब्दान्तात्तत्पुरुषात् टः स्यान्नतु तद्धितलुकि। परमगवः स्त्रियां परमगवी। अतिगवः। समाहृतौ द्वौ गावौ द्विगवम्। द्वौ गावौ धनमस्य द्विगवधनः। तद्धितलुकि तु द्वाभ्यां गोभ्यां क्रीत इत्यर्थे तद्धितस्याणो लुकि ह्रस्वे च द्विगुः।

५:      ५०।०

द्वित्रिभ्यामञ्जलेर्वा ॥८॥

आभ्यां परस्मादञ्जलेः टःस्याद्वा न तु तद्धितलुकि । समाहृतौ द्वौ अञ्जली द्व्यञ्जलं द्व्यञ्जलि वा । तद्धितलुकि तु द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिः ।

५०   ५०   ५०।१०

नावोऽर्धात् द्विगोश्च ॥९॥

अर्धशब्दात् परस्मात् नौशब्दात् तदन्तात् द्विगोश्च टः स्यात् । अर्धं नावः अर्धनावम् । द्वयोर्नावोः समाहारः द्विनावम् । द्विगोरित्युक्तेस्तद्धितलुक्यपि द्वाभ्यां नौभ्यां क्रीतः द्विनावः ।

५:० ५० १०

जातवृद्धमहद्भ्य उक्ष्णोऽः ॥१०॥

एभ्यः उक्ष्णः अः स्यात् । जातोक्षः वृद्धोक्षः महोक्षः

५:      ५०।०

कुमहद्भ्यां ब्रह्मणो वा ॥११॥

आभ्यां ब्रह्मन्तात् तत्पुरुषात् अः स्याद्वा । कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा । महान् ब्रह्मा

०।०   ६:   ७०   ७०।०

आद्-महतः समानाधिकरणे जातीये च घास

७:०।०   ६:   ०।०   ०२०।००

करविशिष्टेषु तु महत्या अपि पुंवद्भावश्च ॥१२॥

समानाधिकरणे (अभिन्नैकार्थके) शब्दे जातीये

प्रत्यये च परे महतोऽन्तस्य तृइत्यस्य स्थाने आकारः स्यात् घासकरविशिष्टेषु तु परेषु महत्याः, अपि- कारात् महतः, तस्याकारः, महत्याः पुंवद्भावश्च स्यात्। महाब्रह्मः महाजातीयः। महत्याः घासः करो वा महाघासः महाकरः। महत्या विशिष्टः महाविशिष्टः।

६ः॰ ७॰ ७ः ७॰
द्व्यष्टनोः संख्यायामनशीतिशताद्योरबहुव्रीहौ ॥१३॥

संख्यावाचकशब्दे परे द्व्यष्टनोरन्तस्य स्थाने आकारः स्यात् नत्वशीतिशताद्योः परयोः न च बहुव्रीहौ। द्विराहत्ता दश, द्व्यधिका वा दश, द्वादश शाकपा- र्थिवादित्वात् आहत्ताधिकशब्दलोपः। एवमष्टादश। अशीत्यादौ तु द्व्यशीतिः द्विशतं द्विसहस्रम्। द्वौ वा त्रयो वेति वार्थे द्वित्रा इतिबहुव्रीहौ तु न। अबहु- व्रीहावित्युक्तेः द्वौ च दश चेति द्वन्द्वेऽपि स्यात् द्वादश।

६॰ १॰
तेस्त्रयः ॥१४॥

पूर्व्वोक्तविषये त्रिशब्दस्य स्थाने त्रय इत्यादेशः स्यात् त्रयोदश। त्रयोविंशतिः।

७ः ७॰ः॰१॰
चत्वारिंशदादिषु नवत्यन्तेषु वा ॥१५॥

एषु परेषु पूर्व्वसूत्रद्वयोक्तं वा स्यात्। द्वाचत्वारिंशत्

द्विचत्वारिंशत्। त्रयःपञ्चाशत् त्रिपञ्चाशत्। अष्टाषष्टिः अष्टषष्टिः। अशीत्यादौ तु प्रागुक्तनिषेधात् न।

·१· १· ६:

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥१६॥

द्वन्द्वे तत्पुरुषे च समुदायस्य परस्य (समासोत्तरपदस्य) इव लिङ्गं स्यात्। हरिणचमर्य्यौ इमे। चमरीहरिणाविमौ।

७· ·१·

द्विगुगतिसमासे न ॥१७॥

द्विगौ गतिसमासे (निरादयः क्रान्ताद्यर्थे पञ्चम्या इत्यादौ) च प्रागुक्तं न स्यात्। पञ्चसु कपालेषु संस्कृत इति वाक्ये तत्र संस्कृत इत्यर्थे तद्धितेऽणि प्रत्यये (२७२पृ० ६सू०) तल्लुकि च कपालस्य क्लीवतया तल्लिङ्गताप्राप्तावपि विशेष्यानुयायिलिङ्गतैवेष्यते पञ्चकपालः पुरोडाशः। एवं समाहारेऽपि पञ्चपात्रम्। गतिसमासे, निर्नन्दम् निर्नन्दिः।

१·: ७· १· १··१· १·

रात्राह्नाहाः पुंसि संख्यापूर्व्वं रात्रं तु क्लीवम्॥१८॥

कृतसमासान्ताः रात्राह्नाहान्ताः पुंलिङ्गाः स्युः संख्यापूर्व्वस्तु रात्रान्तः क्लीवं स्यात्। परवल्लिङ्ग-

तापवादः। पूर्व्वरात्रः सर्व्वरात्रः। पूर्व्वाह्नः। उत्तमाह्नः। संख्यादेस्तु समाहृताः पञ्च रात्रयः पञ्चरात्रम्। गणरात्रम् बहुरात्रमित्यादि।

७० १० ०१००१० १० १०

समाहारे द्विगुद्वन्द्वस्य क्लीवम्—अपात्राद्यदन्तः

०१० १००१००१० ७०१००१०

स्त्री अनाबन्तस्तु वा क्लीवत्वे डश्च ॥१८॥

समाहारार्थको द्विगुर्द्वन्द्वश्च क्लीवलिङ्गः स्यात्। पञ्चपात्रम् पाणिपादम्। पात्रादिभिन्नादन्तद्विगोस्तु स्त्रीत्वं तेन (३११पृ० १३सू०) ईपि त्रिलोकी सप्तशतीत्यादि। अनन्तद्विगोः (३११पृ० १४सू०) वा ङीपि पञ्चकर्म्मी पञ्चकर्म्मम्। आबन्तद्विगोः वा ङीपि पञ्चखट्वी पञ्चखट्वम् उभयत्रक्लीवत्वे डप्रत्ययः।

६० १० ७०

बह्वनां छाया तत्पुरुषे ॥२०॥

बहुधर्म्मिकाणां छायान्तस्तत्पुरुषः नपुंसकलिङ्गः स्यात्। इक्षूणां छाया इक्षुच्छायम्। एकवचने तु इक्षस्य छायेत्यादौ परवल्लिङ्गत्वम्।

०१० ०१०

सभा राजपर्य्यायामनुष्यपूर्व्वा ॥२१॥

राजपर्य्यायपूर्व्वा अमनुष्यपूर्व्वा (मनुष्यभिन्नमनुष्य-

सहृशराचसपिशाचादिपूर्व्वा) च या सभा तदन्तस्तत्पुरुषः क्लीवलिङ्गः स्यात्। नृपसभम् ईश्वरसभम् राचससभम् पिशाचसभम्। राजविशेषवाचिपूर्व्वंसभान्तस्तु न, चन्द्रगुप्तसभा युधिष्ठिरसभा।

सेनासुराशालासंघातार्थसभाः ॥२२॥

एतदन्तस्तत्पुरुषः प्राग्वत्। यवसेनम् यवसुरम्। गोशालम् स्त्रीसभम् स्त्रीसमूह इत्यर्थः।

इति तत्पुरुषसमासान्तप्रकरणम्।

बहुव्रीहिप्रकरणम्।

अनेकं सुबन्तमन्यपदार्थे बहुव्रीहिः ॥१॥

अनेकं सुबन्तं प्रथमान्तं क्वचिदप्रथमान्तञ्च अन्यस्य (समस्यमानपदभिन्नस्य) पदस्य अर्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः। इदञ्च प्रायिकं बहुव्रीहिप्रकरणे विधीयमानो बहुव्रीहिरित्येव लक्षणम् तेन द्वित्राः पञ्चषा इत्यादेः वार्थे बहुव्रीहेः संग्रहः। तत्र प्रथमान्तं यथा, प्राप्तो नरो यम् स प्राप्तनरो ग्रामः। जढ़ो रथो येन स जढरथो वाहः। दत्तं धनं यस्मै

स दत्तधनो विप्रः । उद्धृतमन्नं यस्मात् तत् उद्धृतान्नं पात्रम् । पीतमम्बरं यस्य स पीताम्बरो हरिः । बहवो नरा यस्मिन् स बहुनरो ग्रामः । अप्रथमान्तं यथा, दण्डः पाणौ यस्य स दण्डपाणिर्द्वाःस्थः । पङ्कात्जन्म यस्य तत् पङ्कजन्म पद्मम् । अनेकमित्युक्तेः रमणीयं नीलं वपुर्यस्य स रमणीयनीलवपुरित्यादौ त्रिपदस्यापि बहुव्रीहित्वम् । अयमव्ययपूर्व्वपदोऽपीष्यते उच्चैः शिरोऽस्य स उच्चैः शिराः एवम् अधोमुखः । उपरिदृष्टिः ।

५ः १॰ २॰ ॰१॰ ॰१॰ ६॰ १॰

प्रादिभ्यः कृदन्तः सापेक्षेण-वा च तस्य लोपः ॥२॥

प्राद्युत्तरवर्त्ती कृदन्तशब्दः सापेक्षेण सह वा समस्यते स बहुव्रीहिः तत्र च तस्य कृदन्तस्य वा लोपः स्यात् । प्रकृष्टं बलं यस्य स प्रबलः प्रकृष्टबलो वा । निर्गतं धनं यस्मात् स निर्द्धनः निर्गतधनो वा । अतिक्रान्ता मर्य्यादा येन स अतिमर्य्यादः अतिक्रान्तमर्य्यादो वा ।

५॰ १॰ ॰१॰ ॰१॰ ६॰ १॰

नञोऽस्त्यर्थको वा च तस्य लोपः ॥३॥

नञःपरः अस्त्यर्थकः शब्दः सापेक्षेण सह वा समस्यते स बहुव्रीहिः तत्र चास्त्यर्थकस्य वा लोपः । नास्ति

धनं यस्य स अधनः नास्तिधनो वा । अस्तीत्यव्ययम् । अविद्यमानः पुत्रो यस्य स अपुत्रः अविद्यमानपुत्रो वा

१०   १०·१०

सप्तम्युपमानपूर्व्वक उपमाद्योतकपदलोपश्च ॥४॥

सप्तम्यन्तपूर्व्वक उपमानपूर्व्वकश्च शब्दः सापेक्षेण सह वा समस्यते स बहुव्रीहिः तत्र चोपमानद्योतकपदस्य लोपः स्यात् । कोषे धनं यस्य स कोषधनः । व्याघ्रस्य मुखमिव मुखं यस्य स व्याघ्रमुखः ।

२०   १०   ७०   ७०

संख्ययासंख्या वार्थे संख्येये ॥५॥

संख्येयार्थया संख्यया सह संख्यावाचको वार्थे वा समस्यते स बहुव्रीहिः । द्वौ वा त्रयो वा द्वित्राः पञ्च वा षड् वा पञ्चषाः ।

१०   ७०

दिङ्नामानि मध्ये ॥ ६ ॥

मध्यरूपे अन्यपदार्थे दिङ्नामानि समस्यन्ते स बहुव्रीहिः । पूर्व्वस्या दक्षिणस्याश्च दिशो मध्या पूर्व्वदक्षिणा अत्र

६०   १०   ७०   ७०·१०

सर्व्वनाम्नः पुंवद्भावः समासे प्रत्यये च ॥ ७ ॥

समासविषये प्रत्यये च परे सर्व्वनामशब्दस्य पुंवद्रूपं स्यात् । इत्यनेन पूर्व्वाशब्दस्य पुंवद्भावे कृतता

३०　　०१०　　७०

तृतीयान्तेन सहेति तुल्ययोगे ॥८॥

तुल्ययोगे वर्त्तमानं सहेत्यव्ययं तृतीयान्तेन सह वा समस्यते स बहुव्रीहिः। सह पुत्रेण सहस्य वा सादेशे सपुत्रः सहपुत्रो वा। सह धनेन सधनः पक्षे सहधनः।

१०ः　　१०ः

केशाकेश्याद्योनिपात्याः ॥९॥

केशेषु केशेषु गृहीत्वा युध्यते इत्यर्थे केशाकेशि इत्यादयः एवं दण्डैश्च दण्डैश्च प्रहृत्य युध्यते इत्यर्थे दण्डादण्डि इत्यादयश्च निपात्यन्ते ते चाव्ययानि।

इति बहुव्रीहिप्रकरणम्।

अथ बहुव्रीहिसमासान्तप्रकरणम्।

७०　　७०　　५०　　५०　　५००१०

बहुव्रीहौ—संख्येयेऽवह्वोः संख्याया अव्ययात्तु

७०　०१०　१०

तत्पुरुषेऽपि डः ॥१॥

बहुवर्ज्जात् संख्येये वर्त्तमानात् संख्यावाचकात् डः स्यात् बहुव्रीहौ अव्ययात् परस्मात्तु तत्पुरुषेऽपि। डइत्। उपदशाः आसन्नदशाः। अतिदशः।

७· ६·६· १·

डिति विंशतेस्तेर्लोपः ॥ २ ॥

डिति परे विंशतेस्तेर्लोपः स्यात् । इति तिलोपे निर्गतस्त्रिंशतः निस्त्रिंशः ।

५ः ५ः १·

अक्षिसक्थिभ्यां स्वाङ्गाभ्यां षः—॥ ३ ॥

आभ्यां स्वाङ्गपराभ्यां षः स्यात् बहुव्रीहौ । षइत् । दीर्घे अक्षिणी यस्य दीर्घाक्षः । दीर्घसक्थः । स्त्रियान्तु षित्वाद्ङीषि पद्माक्षी । अस्वाङ्गात्तु दीर्घसक्थि शकटम् । दीर्घाक्षा वेणुयष्टिः वक्ष्यमाणेन षः ।

५ः ५·

द्वित्रिभ्यां मूर्द्ध्नः ॥ ४ ॥

आभ्यां परस्मात् मूर्द्धशब्दात् षः स्याद्बहुव्रीहौ । द्विमूर्द्धः त्रिमूर्द्धः । स्त्रियान्तु द्विमूर्द्धी त्रिमूर्द्धी ।

१ः १ः

ऊर्द्ध्वज्ञुप्रभृतयो निपात्याः ॥ ५ ॥ *

ऊर्द्ध्वज्ञुः (ऊर्द्ध्वजानुः) इत्यादयो निपात्याः ।

५ः ५·१· १·

नञ्दुःसुभ्यः सक्थ्यो वा अः ॥ ६ ॥

नञादिपूर्व्वकात् सक्थिशब्दादः स्याद्वा । अस्वाङ्गार्थमिदम् । असक्थं असक्थि वा शकटम् । एवं दुःसक्थम् दुःसक्थि वा ।

---

* विज्ञु प्रज्ञु संज्ञु सुरपथ सुरपस् अरपथ अरपस् पूर्व-काकुद् अजातकाकुद् इत्यादयः ।

५॰ ॰१॰ २॰ ५ः॰१॰ ५॰

प्रजाया अस् नित्यं मन्दाल्पाभ्याञ्च मेधायाः ॥७॥

नञादिपूर्व्वात् प्रजाशब्दात् मन्दाल्पाभ्याञ्चात् नञादिभ्यो मेधाया नित्यम् अः स्यात् । अप्रजाः सुप्रजाः । अमेधाः सुमेधाः मन्दमेधाः अल्पमेधाः ।

५॰ १॰

धर्म्मादन् ॥ ८ ॥

धर्म्मादन् स्याद्बहुव्रीहौ । बहुधर्म्मा ग्रामधर्म्मा अधर्म्मा सुधर्म्मा ।

५॰ ॰१॰

धनुषोऽनङ् ॥९॥*

धनुःशब्दादनङ् स्याद्बहुव्रीहौ । अङावितौ । पुष्पधन्वा शतधन्वा ।

५॰ ॰१॰

जायाया निँङ् ॥१०॥

जायाया अन्तस्य निङ् स्याद्बहुव्रीहौ । ङद्दत् । रमा जाया यस्येति वाक्ये निङन्तादेशे

१॰ ६ः ७॰

लोपो व्योर्वलि ॥११॥

वलादौ प्रत्यये परे धातोरधातोश्च यवयोर्लोपः स्यात् । इति यलोपे रमाजानिर्हरिः । एवं पार्व्वती जाया यस्य स पार्व्वतीजानिः शिवः ।

---

* धनुःशब्दस्यैव समासे ग्रहणमिति पुष्पधनुरित्यादि प्रयोगवारणार्थं सूत्रम् ।

५:० ५० ०१० ५०

उत्पूतिसुसुरभिभ्यो गन्धादिदागन्तुकादेकव-

५० ०१० ०१०

चनान्तात्तु वा ॥ १२ ॥

उदादिभ्यः परस्मात् गन्धशब्दादित् स्याद्बहुव्रीहौ। आगन्तुकादेकवचनान्तात्तु वा। उद्गन्धिः पूतिगन्धिः सुगन्धिः। सुष्ठु गन्धो यत्र सुगन्धि सुगन्धो वा आपणः शोभना गन्धा यत्रेति वाक्ये तु न, सुगन्धः।

५० ०१०

उपमानाद्वा ॥ १३ ॥

उपमानवाचकात् परस्मात् गन्धशब्दादित् स्याद्वा। पद्मस्य गन्धइव गन्धो यस्य पद्मगन्धिः पद्मगन्धः।

५० १० ७०

नाभेरः संज्ञायाम् ॥ १४ ॥

संज्ञायां नाभेरः स्याद्बहुव्रीहौ। पद्मनाभः।

५:० ६० १०

अहस्त्यादिभ्यः पादस्य लोपः ॥ १५ ॥

हस्त्यादिभिन्नात् परस्य पादस्यान्त्याकारस्य लोपः स्याद्बहुव्रीहौ। सुपात् द्विपात् व्याघ्रपात्। हस्त्यादिभ्यस्तु हस्तिपादः कुम्भपाद इत्यादि। ते च (सि० पू० ४२२पृ०) द्रष्टव्याः। अत्रान्त्यलोप एव समासान्तः।※

※ अन्त्यलोपएव समासान्तत्वेन ततःशेषाद्वेति न वा कप्।

१॰: १॰:

कुम्भपद्यादयो निपात्याः ॥१६॥

कुम्भपदी शतपदी द्विपदी त्रिपदी चतुष्पदी इत्यादयः। तेच (सि॰ पू॰ ४२३पृ॰) द्रष्टव्याः।

७॰ ६॰ १॰

वयसि दन्तस्य—दतृ—॥ १७ ॥

समुदायेन वयसि गम्ये दन्तस्य दतृ स्याद्बहुव्रीहौ। ऋकारइत्। द्विदन् वत्सः। चतुर्दन् उक्षा। सुदती युवतिरित्यर्थः। वयसि किं सुदन्तः करी नटो वा।

५: ॰१॰

श्यावकोरकाभ्यां वा ॥१८॥

आभ्यां परस्य दन्तस्य दतृ स्याद्वा बहुव्रीहौ। श्यावदन् श्यावदन्तः। कोरकदन् कोरकदन्तः।

५॰: ॰१॰

अग्रान्तशुद्धशुभ्रवराहाश्वमूषिकादिभ्यो वा ॥१९॥

एभ्यो दन्तस्य दतृ स्याद्वा बहुव्रीहौ। शुद्धदन्

६॰ १॰ ७॰

काकुदस्य लोपोऽवस्थायाम् ॥२०॥

समुदायेन अवस्थायां द्योत्यायां काकुदस्यान्त्याकारस्य लोपः स्यात्। पूर्णकाकुत् अजातकाकुत्। पर्व्वतभेदे त्रिककुत् तु निपातनात् सिद्धः।

१: ७:
सुहृद्दुर्हृदौ मित्रामित्रयोः ॥२१॥

एतयोरर्थयोः क्रमेणैतौ निपात्यौ। सुहृत् मित्रम् दुर्हृत् अमित्रः। अन्यत्र तु सुहृदयः दुर्हृदय इत्येव

५ः ०।०
उरः प्रभृतिभ्यः कप् ॥२२॥

एभ्यः कप् स्यात् बहुव्रीहौ। पद्दृत्। उरस् सर्पिस् उपानह् पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शालि इति उरःप्रभृतयः। एषु पुमान् इत्यादयः एकवचनान्ताः पठितास्तेन बहुवचनान्तात्तु शेषादिति वैकल्पिक एव कप्। व्यूढोरस्कः पीतसर्पिष्कः प्राप्ता लक्ष्मीर्येनेति वाक्ये

७० ६० १० ०।० ७० ६००।० ०।० ७०
केऽणो ह्रस्वो न कपि आपस्तु वा कपि ॥२३॥

कप्प्रत्ययभिन्ने के परे अणो ह्रस्वः स्यात् आबन्तस्य तु कपि वा ह्रस्वः। इत्यह्रस्वे प्राप्तलक्ष्मीकः।

५० ७०
इनः स्त्रियाम् ॥२४॥

इनन्तात् कप् स्यात् स्त्रियां बहुव्रीहौ। बहुदण्डिका पुरी।

५००१०
नद्यृतश्च ॥२५॥

नदीसंज्ञकादृदन्ताच्च कप् स्याद्बहुव्रीहौ। मधुर-

वाणीकः। प्रौढ़वधूकः। पूजितमातृकः।

५॰ ॰१॰
शेषाद्वा ॥२६॥

अनुक्तसमासान्तात् शब्दमात्रात् कप् वा स्याद्बहुव्रीहौ। महायशस्कः महायशाः। प्राप्ततेजस्कः प्राप्ततेजाः। त्यक्तमायाकः वा ह्रस्वे त्यक्तमायकः पक्षे त्यक्तमायः। अनुक्तेत्यादि किं सुपात् पूर्णकाकुदित्यादावुक्तसमासान्तान्न स्यात्।

॰१॰ ५॰
नेयसः ॥२७॥

ईयसन्तात् प्रातिपदिकात् न कप् स्याद्बहुव्रीहौ। बहवः श्रेयांसो यस्य स बहुश्रेयान्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति बह्व्यः प्रेयस्यो यस्य स बहुप्रेयसी पुरुषः। इह ईबन्तत्वात् सुलोपः।

५॰ ७॰
भ्रातुः पूजायाम् ॥२८॥

भ्रातृशब्दात् कप् न स्यात् पूजायाम्। सुष्ठु भ्राता यस्य सुष्ठुभ्राता। अन्यत्र मूर्खभ्रातृकः।

१ः १ः ५॰ः ५ः॰ ॰१॰
सप्तमीविशेषणे पूर्व्वं द्वन्द्वादिभ्यः प्रहरणार्थेभ्यश्च
१॰ १॰
सप्तमी परा ॥२९॥

सप्तम्यन्तं विशेषणपदञ्च पूर्व्वं प्रयोज्यं बहुव्रीहौ।

कण्ठे कालोऽस्य कण्ठेकालः । अतएव ज्ञापकात् व्यधिकरणबहुव्रीहिः । चित्रवस्त्रः नीलाम्बरः । इन्दुप्रभृतिभ्यः सप्तम्यन्तं तु परं प्रयोज्यम् । इन्दुर्मौलौ यस्य स इन्दुमौलिः चन्द्रशेखरः शिवः । पद्मनाभ इत्यादि । प्रहरणार्थेभ्यश्च सप्तम्यन्तं परं प्रयोज्यम् । दण्डपाणिः । चक्रपाणिः ।

•१•   ०•

निष्ठा प्राक् ॥३०॥

निष्ठान्तं प्राक् प्रयोज्यं बहुव्रीहौ । कृतकृत्यः श्रुतशास्त्र इत्यादि ।

•१•   ७•:

आहिताग्न्यादिषु ॥३१॥

आहिताग्न्यादिषु वा पूर्व्वनिपातः । अग्न्याहितः । आहिताग्निः । पुत्रजातः जातपुत्र इत्यादि ।

१:   ७•   •१••१•   १• •१•   ७•   १•

सर्व्वनामसंख्ये प्राक् मिथस्तु संख्यैव तत्राप्य-

•१•

ल्पीयसी ॥३२॥

सर्व्वनामशब्दः संख्यावाचकश्च बहुव्रीहौ प्राक् प्रयोज्यः तयोश्च मिथः समासे संख्यैव पूर्व्वा तत्राप्यल्पीयस्येव प्रथमा । सर्व्वश्वेतः विश्वशुक्लः । द्विशुक्लः द्विरक्तः । मिथस्तु द्व्यन्यः पञ्चेतरः । द्वित्राः पञ्चषाः ।

इति बहुव्रीहिसमासान्तप्रकरणम् ।

द्वन्द्वसमासप्रकरणम् ।

७· ७·१· १· २·
इतरेतरयोगे समाहारे चानेकं सापेक्षेण सम-
८ १· १·
स्यते स द्वन्द्वः ॥१॥

परस्परापेक्षयैकक्रियासम्बन्ध इतरेतरयोगः । संहतिः समाहारः । तयोरर्थयोरनेकं सुबन्तं सापेक्षेण सह वा समस्यते स द्वन्द्वः । तत्र इतरेतरयोगे गुरुविप्रौ नमति । ब्राह्मणक्षत्रवैश्यशूद्राः वर्णाः भवन्ति । अत्र प्रत्येकस्य प्राधान्यात् बहुवचनम् । समाहारे तु समाहारस्यैकतया (३६८पृ०५०सू०) एकवद्भावे क्लीवत्वात् धवखदिरपलाशं छिनत्तीत्यादावेकत्वम् । तयोस्तु सर्वत्राविशेषेण प्राप्तौ नियम्यते

६:· ६:· १·
प्राणिवाद्यसेनाङ्गानां बहूनां समाहारः ॥२॥

प्राण्यङ्गानां वाद्याङ्गानां सेनाङ्गानाञ्च बहुवचनान्तानां समाहार एव नेतरेतरयोगः । हस्तौ च पाणयश्च हस्तपादम् । श्रुती च नेत्रे च श्रुतिनेत्रम् । पणवाश्च गोमुखाश्च पणवगोमुखम् । हस्तिनश्च रथाश्च पादाताश्च हस्त्यश्वरथपादातम् ।*

* हस्तिनोऽभ्यर्हितत्वात् अजाद्यदन्तादप्यल्पच्त्वात् प्राङ्निपातः ।

६·
अप्राणिद्रव्यजातेः ॥३॥

अप्राणिद्रव्यजातीनां समाहारः स्यात्। धानापायसम्। अप्राणीति किं वैश्यशूद्रौ। द्रव्येति किम् रूपरसौ गन्धस्पर्शौ।

६:
भिन्नलिङ्गनदीदेशयोः ॥४॥

अनयोः समाहारः स्यात्। गङ्गाशोणम्। कुरु-कुरुक्षेत्रम्। भिन्नेति किं गङ्गायमुने मद्रकेकयौ इत्यादावेकलिङ्गे न।

१· ६·
आनकुलं क्षुद्रजन्तुवाचिनः ॥५॥

नकुलपर्य्यन्तक्षुद्रजन्तुवाचिनामुक्तः स्यात्। दंशमशकम्। यूकालिक्षम्।

६· ६· १· ७·
नित्यविरोधिजातिगुणवचनस्य चाद्रव्ये ॥६॥

परस्परं नित्यविरोधिजातिवाचिनः गुणवाचिनश्चाद्रव्ये प्रागुक्तः स्यात्। अहिनकुलम् काकोलूकम् शीतोष्णम्। द्रव्ये तु शीतोष्णाः।

१: १·
गवाश्वादीनि यथाप्रयोगम् ॥७॥

गवाश्वादीनि शिष्टप्रयोगानुसारेण निपात्यानि।

गवाश्वम् दासीदासम् अजाविकम्। तानि च (सि० पृ०४२७पृ०) द्रष्टव्यानि।

६:० ०१०

वृक्षमृगतृणधान्यव्यञ्जनपशुशकुनीनां वा ॥८॥

एषां समाहारो वा स्यात्। तत्र वृक्षादिषु विशेषाणामेव ग्रहणम् तत्रापि वृक्षविशेषैरेव वृक्षविशेषाणां मृगविशेषाणां मृगविशेषैरेव समाहारः। नित्ये प्राप्तौ विकल्पार्थं वचनमन्यथा समाहार एव स्यात् स नियमो मा भूत्। चूताशोकम् चूताशोकाः। कुरुचूषतम् कुरुचूषताः। व्रीहियवम् व्रीहियवाः। घृतपायसम् घृतपायसाः। गोमहिषम् गोमहिषाः। हंसकाकम् हंसकाकाः।

फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणा-

६:० ७० ०१०

नां बहुत्वे एव ॥९॥

एषां बहुप्रकृतिकानामेव समाहारः स्यान्नान्य प्रकृतिकानाम्। बहुत्वे वदरामलकम् अन्यत्र वदरामलकौ हस्त्यश्वारोहम् अन्यत्र हस्त्यश्वारोहौ।

७० १० ०१०

द्वन्द्वे घिः प्राक्—॥१०॥

द्वन्द्वे घिसञ्ज्ञकः प्राक् प्रयोज्यः। हरिहरौ अनेकेषु

तु पूर्व्वत्र नियमः शेषेष्वनियमः। हरिगुरुहराः हरिहरगुरवः।

१०

अजाद्यदन्तम् ॥ ११ ॥

अजादि यददन्तं तत् पूर्व्वं स्यात्। ईशकृष्णौ बहुष्वनियमः। अश्वरथेभाः अश्वेभरथाः। घ्यन्ताजाद्यदन्तयोस्तु मिथःसमासे विप्रतिषेधे परं कार्य्यमित्युक्त्या घ्यन्तमेव परम् इन्द्राग्नी इन्द्रवायू।

१०

अल्पाच्तरम् ॥ १२ ॥

अल्पाच्तरं पूर्व्वं स्यात्। हरकेशवौ। बहुष्वनियमः। शङ्खदुन्दुभिवीणाः। वीणाशङ्खदुन्दुभयः।

६:० ६:० १०

ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण ॥१३॥

तुल्यस्वरवर्णानामेषामानुपूर्व्येण प्राक् निपातः। शिशिरवसन्तौ। भरणीरोहिण्यौ। समाक्षराणां किं ग्रीष्मवसन्तौ।

१०

लघ्वक्षरम् ॥ १४ ॥

लघ्वक्षरयुक्तं प्राक् प्रयोज्यम्। कुशकाशम्।

१०-१०

अभ्यर्हितञ्च ॥ १५ ॥

पूजितञ्च प्राक् प्रयोज्यम्। तुल्याक्षराणामेवायं नियमः। मातापितरौ।

६॰ २॰

वर्णानामानुपूर्व्व्येण ॥ १६ ॥

सर्व्वापवादः। ब्राह्मणक्षत्रवैश्यशूद्राः।

॰१॰ ॰१॰

संख्या अल्पीयसी ॥ १७ ॥

संख्यावाचकद्वन्द्वे अल्पीयस्याः संख्यायाः प्राक् निपातः। द्वौ च दश च द्वादश। एवं त्रयोदश।

इति द्वन्द्वसमासप्रकरणम्।

अथ द्वन्द्वसमासान्तप्रकरणम्।

५॰ ५॰१॰ ७॰

द्वन्द्वाच्चुदषहान्तादः समाहारे ॥ १ ॥

समाहारार्थकद्वन्द्वात् चवर्गाद्यन्तादः स्यात्। वाक्त्वचम् त्वक्स्रजम्। शमीदृषदम्। वाक्त्विषम् छत्रोपानहम्। समाहारे किं वाक्त्वचौ।*

६॰ ६॰ ॰१॰ ७॰ ७॰ ॰१॰

विद्याजन्मसंबन्धिनामृतामाङ् ऋति पुत्रे च

७॰

द्वन्द्वे ॥ २ ॥

एकविद्यासम्बन्धे एकजन्मसंबन्धे च ऋदन्तानामाङ् स्यात् ऋदन्तशब्दे पुत्रे च परे द्वन्द्वे। होताध्येतारौ। यातानन्दारौ। पितापुत्रौ। पुत्रशब्दे तु

---

* परिगणितव्यतिरिक्तविषयत्वात्तत्रोभयविधत्वम् इति सूचयितुं वाक्त्वचावित्युक्तम्।

जन्मसम्बन्धानामेवाङ् तेन होतृपुत्रौ इत्यादौ न।

६ १ १ ७

मातुर्मातरौ वा पितरि ॥ ३ ॥

पितरि शब्दे परे मातुर्मातर आदेशः स्याद् वा द्वन्द्वे। पक्षे आङ्। मातरपितरौ मातापितरौ।

७ ७ ७

देवताद्वन्द्वे उत्तरपदे वायुशब्दाप्रयोगे ॥४॥

उत्तरपदे परे देवताद्वन्द्वे पूर्व्वस्याङ् स्यात् न तु पूर्व्वोत्तरयोः वायुशब्दप्रयोगे। सूर्य्याचन्द्रमसौ मित्रावरुणौ वायुशब्दप्रयोगे तु वाय्वग्नी अग्निवायू

१ ६ ७

ईदग्नेः सोमवरुणयोः ॥ ५ ॥

सोमशब्दे वरुणशब्दे च परे अग्निशब्दस्य ईदन्तादेशः स्यात्। आङोऽपवादः। अग्नीवरुणौ। अग्नीषोमौ वक्ष्यमाणेन षत्वम्।

६ १ १ ७

जायाया दम्जमौ वा पत्यौ ॥ ६ ॥

पतिशब्दे परे जायाशब्दस्य स्थाने दम्जमावादेशौ वा स्तः। दम्पती जम्पती जायापती।

१

स्त्रीपुंसादीनि ॥ ७ ॥

एतानि निपात्यानि। स्त्रीपुंसौ धेन्वनडुहौ।

ऋक्सामे वाङ्मनसे। अक्षिभ्रुवौ दारगवम्। नक्तंदिवम्। अहर्दिवम्। अहोरात्रम्।

इति द्वन्द्वसमासान्तप्रकरणम्।

सर्वसमासविषयसमासान्तप्रकरणम्।

५।४।७४

ऋक्पूरप्पथिभ्योऽः॥ १॥

एभ्यः समासान्तः अः स्यात्। अर्द्धम् ऋचः अर्द्धर्चम्। समाहृताः पञ्च ऋचः पञ्चर्चम्। पञ्च ऋचो यत्र सूक्ते तत् पञ्चर्चम्। विष्णोः पूः विष्णुपुरम् रम्या पूः रम्यपुरम् उभयत्राभिधानात् क्लीवत्वम्। रम्यपुरो देशः उपपुरम्। विमलापं सरः।

५ः ६।३।९७

द्व्यन्तःप्रादिभ्योऽपस्येत्॥ २॥

एभ्यः परस्य कृतसमासान्तस्य अपशब्दस्य आदेरात ईत् स्यात्। द्वीपम् अन्तरीपम् समीपम्।

५ः ५ः

प्रत्यन्ववेभ्यः सामलोमभ्याम्॥ ३॥

एभ्यः पराभ्यामाभ्याम् अः स्यात्। प्रतिसामम् प्रतिलोमम् अनुलोमम्।

५० ७०

अक्ष्णोऽदर्शने ॥ ४ ॥

अदर्शनार्थकादक्षिशब्दादच् स्यात् । गवामक्षीव गवाक्षम् । स्थूलाक्षा वेणुयष्टिः ।

५० ५०

ब्रह्महस्तिभ्यां वर्च्चसः ॥ ५ ॥

आभ्यां वर्च्चसः अः स्यात् । ब्रह्मवर्च्चसम् हस्तिवर्च्चसम्

५०: ५०

अवसमन्धेभ्यस्तमसः ॥ ६ ॥

एभ्यस्तमसः अः स्यात् । अवतमसम् सन्तमसम् अन्धतमसम् ।

५०: ५०

अन्ववतप्तेभ्यो रहसः ॥ ७ ॥

एभ्यो रहसः अः स्यात् । अनुरहसम् अवरहसम् ।

५०: ५०

प्रादिभ्योऽध्वनः ॥ ८ ॥

एभ्यः अध्वनः अः स्यात् । प्रगतोऽध्वानं प्राध्वः ।

१० ७० ५०:

न—पूजने स्वतिभ्याम् ॥ ९ ॥

पूजनेऽर्थे गम्ये स्वतिभ्यां यथायथं प्राप्तः समासान्तो न स्यात् । सुसखा अतिसखा । सुराजा अतिराजा । पूजने किम् अतिक्रान्तो राजानमतिराजः अतिसख इत्यादौ स्यादेव ।

५॰ ७॰
किमः चेपे ॥ १० ॥

निन्दायां किमः परस्मात् राजादेः समासान्तो न। किंराजा किंसखा। प्रश्नार्थे तु किंराज इत्यादि।

५॰
नञ्तत्पुरुषात्—॥ ११ ॥

नञ्तत्पुरुषात् समासान्तो न स्यात्। न राजा अराजा। तत्पुरुषात् किम्। अधुरं शकटम्। अनपं सर इत्यादौ स्यादेव।

॰ ॰१५॰
पथो वा ॥ १२ ॥

पथ्यन्तात् नञ्तत्पुरुषात् समासान्तो वा स्यात् अपथ्याः अपथः। बहुव्रीहौ तु अपथ इत्येव।

इति सर्व्वसमासविषयसमासान्तप्रकरणम्।

अलुक्समासप्रकरणम्।

५॰ ६॰ ॰१॰ ॰१॰
ओजःसहस्तमोऽञ्जसस्तृतीयाया—न लुक्—॥१॥

समासे एभ्यः परस्यास्तृतीयाया लुक् न स्यात्। ओजसाकृतः सहसाकृतः। तमसाहृतः अञ्जसाकृतः आर्ज्जवेन कृत इत्यर्थः।

आत्मनश्च पूरणे ॥ २ ॥

पूरणार्थे शब्दे परे आत्मशब्दात्तृतीयाया न लुक् । आत्मनातृतीयः । जनार्दनस्त्वात्मचतुर्थ एवेत्यादौ तु बहुव्रीहिः ।

वैयाकरणाख्यायां परस्य च चतुर्थ्याः ॥ ३ ॥

परशब्दात् चात् आत्मशब्दात् परस्याश्चतुर्थ्या न लुक् स्यात् वैयाकरणसमाख्यायाम् । परस्मैपदम् आत्मनेपदम् उभयत्र तादर्थ्ये चतुर्थी अनेनैव ज्ञापकेन समासः ।

स्तोकादिभ्यः पञ्चम्याः ॥ ४ ॥

एभ्यः पञ्चम्या न लुक् स्यात् । स्तोकान्मुक्तः । दूरादागतः । कृच्छ्रात्पतितः ।

वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु षष्ठ्याः ॥५॥

वागादिभ्यः परस्याः षष्ठ्याः क्रमेण युक्त्यादिषु परेषु लुक् न स्यात् । वाचोयुक्तिः दिशोदण्डः पश्यतोहरः ।

देवानांप्रियो मूर्खे ॥ ६ ॥

मूर्खेऽर्थे अलुक्छौकमेतन्निपात्यते ।

१· ·।· ७· ५··१· ७· .७· ७·

क्षेपे वा पुत्रे वाचस्तु पत्यौ जीवेऽर्थे ॥४॥

निन्दायां गम्यायाम् पुत्रशब्दे परे, जीवेऽर्थे तु वाक्शब्दात् परस्याः, पत्यौ शब्दे परे षष्ठ्या न लुक् वा स्यात्। दास्याः पुत्रः दासीपुत्रः। वाचस्पतिः वाक्पतिः जीवः। अन्यत्र वाक्पतिरेव व्यस्ते तु वाचःपतिः।

५· ७·

ऋतो विद्याजन्मसंबन्धे ॥ ८ ॥

विद्यासंबन्धवाचिनो जन्मसंबन्धवाचिनश्च ऋदन्तात् परस्याः षष्ठ्या न लुक् स्यात्। होतुरन्तेवासी होतुःपुत्रः। भ्रातुष्पुत्रः पितुरन्तेवासी।

७:

स्वसृपत्योः ॥९॥

ऋदन्तात् परस्याः षष्ठ्या नलुक् स्यात् स्वसृपति शब्दयोः परयोः। मातुः पतिः पितुःष्वसा पितुः स्वसा वक्ष्यमाणेन वा षत्वम्।

५· ६· ७·

हलदन्तात् सप्तम्याःसंज्ञायाम् ॥ १० ॥

संज्ञायाम् हलन्तात् अदन्ताच्च परस्याः सप्तम्या लुक् न स्यात्। कण्ठेकालः। त्वचिसारः।

५: ७· १··१·

गोयुद्भ्यां स्थिरे षत्वञ्च ॥ ११ ॥

स्थिरशब्दे परे आभ्यां परस्याः सप्तम्या न लुक् स्थिरस्यादेः सस्य षत्वञ्च । गविष्ठिरः युधिष्ठिरः ।

७· ७· १·

तत्पुरुषे कृति बहुलम् ॥ १२ ॥

कृति (कृदन्ते) शब्दे परे तत्पुरुषसमासाथे सप्तम्या बहुलं न लुक् स्यात् । सरसिजः मनसिजः । पक्षे लुकि सरोजम् मनोजम् । बहुलग्रहणात् कुरुचर इत्यादौ नित्यं लुक् ।

इत्यलुक्समासप्रकरणम् ।

अथ समासाश्रयकर्मप्रकरणम् ।

७:· ६· ६·

७· ७· ७· ७:··१·

अप्रियादिषु स्त्रिया उक्तपुंस्कायाः पुंवत् समानाधिकरणे स्त्रीलिङ्गे शब्दे तसादिषु च ॥ १ ॥

प्रियादिवर्ज्जं समानाधिकरणे स्त्रीलिङ्गे शब्दे तसादिषु च परतः उक्तपुंस्कायाः स्त्रियाः पुंवद्रूपं स्यात् । शुभ्रा तनुर्यस्य शुभ्रतनुः । सुन्दरी भार्य्या यस्य सुन्दरभार्य्यः । स्त्रीलिङ्गे किं कल्याणी प्रधानं

यस्येति वाक्ये कल्याणीप्रधान इत्यादौ न। समानाधिकरणे किम् शुभ्रायाः मातेत्यादि वाक्ये शुभ्रामातेत्यादौ न। उक्तपुंस्कायाः इत्युक्तिः गङ्गा जाया यस्येति वाक्ये गङ्गाजाय इत्यादौ न। प्रियादिषु तु रम्या प्रिया यस्य स रम्याप्रिय इत्येव। प्रिया, मनोज्ञा कल्याणी सुभगा दुर्भगा सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया प्रियादयः। भक्तिशब्दोऽप्यत्र पठ्यते दृढ़भक्तिरिति ज्येष्ठे इति, भवति विरलभक्तिरित्यादि भूरिप्रयोगाद् व्यभिचारादत्राभिन्नं पठितः। तथा तस् त्र, तर, तम, चरट् जातीय, कल्प, देशीय, रूप, पाश, त त्व था इत्येते तसादयः। तल्त्वयोस्तु जात्याख्याभिन्नयोरेवेष्यते इति सिद्धान्तः।

६: ०:

कुक्कुटादीनामण्डादिषु॥ २ ॥

एषु परेषु कुक्कुटादीनां पुंवत् रूपं स्यात् कुक्कुट्या अण्डः कुक्कुटाण्डः। छाग्या दुग्धम् छागदुग्धम् महिष्याः क्षीरं महिषक्षीरम्।

०: ०१०

क्यङ्मानिनोश्च ॥३ ॥

एतयोः परयोः प्रागुक्तं स्यात्। श्येनीवाचरति

श्वेतायते। लोहिनीवाचरति लोहितायते। दर्श-नीयां मन्यते दर्शनीयमानी पुमान्। दर्शनीयमानिनी स्त्री।

६· ·१·
ऊङो न—॥ ४ ॥

ऊङ्प्रत्ययान्तस्य प्रागुक्तं न स्यात्। वामोरू भार्य्यः। एवं। वामोरूयते। वामोरूमानिनीत्यादि।

१· २· ·१· ६·
तद्धितेन वुणा च कोपधायाः॥ ५ ॥

तद्धितप्रत्ययेन वुणा च ककारोपधायाः स्त्रियाः प्रागुक्तं न स्यात्। रसिकाभार्य्यः। पाचिकाभार्य्यः। एवं रसिकात्वं पाचिकात्वम्। रसिकामानिनीत्यादि। पाक्यां किं पाकी (अर्भकी) भार्य्या यस्येत्यादौ धातुजककारोपधायाः न निषेधस्तेन तत्र पाकभार्य्य इत्येव।

६· ७·
वृद्धिसम्पादकतद्धितस्यारक्तविकारे॥ ६ ॥

रक्तविकारार्थकभिन्न-वृद्धिसम्पादक—तद्धितान्तायाः स्त्रियाः प्रागुक्तं न स्यात्। मथुरायां भवा माथुरी सा भार्य्या यस्य माथुरीभार्य्यः माथुरीत्वम् माथुरीयते माथुरीमानिनीत्यादि। रक्तेत्यादि किम् मध्यमा

भार्य्या यस्य स मध्यमभार्य्य इत्यादावहृद्धो स्यादेव सम्पादकेत्युक्तः व्याकरणमधीते या सा वैयाकरणी सा भार्य्या यस्येति वाक्ये स्यादेव तत्र हृद्धेरभावात् किन्तु वक्ष्यमाणेन औदागमसमानम्। अरक्तेत्याद्युक्तः मञ्जिष्ठया रक्ता माञ्जिष्ठी सा शाटी यस्य स माञ्जिष्ठशाटीकः, हेम्नो विकारः हैमी सा मुद्रा यस्य स हैममुद्र इत्यादौ स्यादेव।

६· ६··१· ७·

जातेः स्वाङ्गे तसामानिनि ॥ ७ ॥

मानिन्शब्दवर्ज्जे परे जातिवाचकस्त्रीप्रत्ययमाताान्तायाः स्वाङ्गवाचकाद्विहितवन्तायाश्च प्रागुक्तं न स्यात्। शूद्रा भार्य्या यस्य शूद्राभार्य्यः ब्राह्मणी भार्य्या यस्य स ब्राह्मणीभार्य्यः। सुकेशी भार्य्या यस्य स सुकेशीभार्य्यः। ईत इत्युक्तः अकेशा सहकेशा वा भार्य्या यस्येत्यादौ स्यादेव। मानिनि परे तु तयोः प्रागुक्तं स्यात् शूद्रमानिनी सुकेशमानिनीत्यादि।

७· ७·१· ६· ·१·

कर्म्मधारये जातीयदेशीययोश्चानूङः पुंवत् ॥८॥

कर्म्मधारये समासे जातीयदेशीयप्रत्यययोः परतश्च सर्व्वेषामूङन्तभिन्नानां प्रियादिष्वपि परेषु पुंवत्

स्यात्। शुभ्रा प्रिया शुभ्रप्रिया रम्या वामा रम्य वामा। रसिकभार्य्या पाचकदुहिता माथुरजाया शूद्रजाया सुकेशजाया एवं जातीयदेशीययोः। ऊरुस्तु वामोरूभार्य्या।

६· ६· ६· १· ७:·
उक्तपुंस्कस्येवन्तस्यानेकाचो ह्रस्वस्तरतमकल्पेषु
७:· ·१· ५· ·१· ·१·
ब्रुवगोत्रमतहतेषु च उगितस्तु वा ॥९॥

तरादिप्रत्ययेषु परेषु ब्रुवादिषु चोत्तरपदेषु उक्तपुंस्कस्यानेकाच ईवन्तस्य ह्रस्वः स्यात् उगित् प्रत्ययोत्तरेवन्तस्य तु वा। ब्राह्मणितरा ब्राह्मणिब्रुवा ब्राह्मणिगोत्रा ब्राह्मणिमता। उगितस्तु विदुषितरा पक्षे पुंवद्भावे विद्वत्तरा। विदुषीतरेति भाष्यविरुद्धमिति कौमुदीकारः।

६· ६· ·१·
अन्यस्या नद्या वा ॥१०॥

अनेकाच ईवन्तादुक्तपुंस्काच्च भिन्नस्य नदीसंज्ञकशब्दस्य ह्रस्वो वा स्यात्। स्त्रीतरा स्त्रितरा। तनूतरा तनुतरा वामोरूतरा वामोरुतरा। नद्या इत्युक्तेः अनद्या न, तेन सुभ्रूतरेत्याद्येव।

६· ७· .

मालाया भारिणि ॥११॥

भारिन्शब्दे परे मालान्तस्य ह्रस्वः स्यात् । मालभारी । वकुलमालभारी ।

६ः १· ७·

आवीपोर्ह्रस्वः संज्ञायाम् ॥१२॥

आवन्तस्य ईवन्तस्य च ह्रस्वः स्यात् संज्ञायाम् । अजचीरम् वैदेहिबन्धुः । कालिदासः ।

६· ·१· ७ः·

हृदयस्य हृल्लेखयदण्लासेषु ॥१३॥

एषु परेषु हृदयस्य हृत् स्यात् । हृल्लेखः हृद्यम् हार्दम् । हृल्लासः । हृच्छब्देनैव सिद्धे हृदयलेखेत्यादिप्रयोगनिवारणार्थं सूत्रम् ।

६· १· ७ः·

पादस्य-पद आजिगात्युपहतेषु ॥१४॥

एषु पादस्य पदः स्यात् । पदाजिः पदगः पदातिः ।

·१· ७ः·

पद् हिमकाषिहतिषु ॥१५॥

एषु पादस्य पद्स्यात् । पद्धिमम् पत्काषी पद्धतिः ।

६· १· ७· ६· ·१·

उदकस्य—उद—उत्तरपदे उत्तरपदस्थस्य च

७·

संज्ञायाम् ॥१६॥

उत्तरपदे परे उत्तरपदस्थस्य च उदकस्य उदःस्यात् संज्ञायाम् । उदमेघः । चीरोदः ।

०:०

पेषंवासवाहनधिषु॥१७॥

एषु परेषु उदकस्य उदः स्यादसंज्ञायामपि। उद-पेषं पिनष्टि। उदवासः। उदधिषंटः। समुद्रे तु संज्ञाशब्दतया पूर्व्वेण सिद्धः।

७० ६: ०१०

कारे सत्यागदयोर्मुँम्—॥१८॥

कारशब्दे परे अनयोर्मुँम् स्यात्। उभावितौ। सत्यङ्कारः। अगदङ्कारः।

६: ७०

ध्याभद्रयोः करणे॥१९॥

मुँम् स्यात्। उष्णङ्करणम् भद्रङ्करणम्।

६० ०० ०९०

रात्रेः कृति वा॥२०॥

कृदन्ते परे रात्रेर्मुँम् स्याद्वा। अखिदर्थं सूत्रम्। रात्रिञ्चरः रात्रिचरः।

६० ९० ०:०

समानस्य-सो-ज्योतिरादिषु॥२१॥

एषु परेषु समानस्य सः स्यात्। ज्योतिस् जनपद, रात्रि, नाभि, रूप, नाम, गोत्र, स्थान, वर्ण, वयस्, वचन, जातीय, इति ज्योतिरादयः। तत्र रूपादिषु परेषु वेति प्रक्रियाकौमुदीकारः। तेन समानरूपः सरूपो वा।

७० ७० ७० ०१०१०

तीर्थे ये उदरे तु वा ॥२२॥

यविषये तीर्थशब्दे परे समानस्य सः स्यात् यविषये उदरशब्दे परे तु वा स्यात्। सतीर्थ्यः (एकगुरुकः)। सोदर्य्यः समानोदर्य्यः। सोदरशब्दस्तु सहशब्देन समासात् सिद्धः इति मनोरमा।

१ः० २०

पारस्करादीनि यथाप्रयोगम् ॥२३॥

एतानि ससुट्कानि शिष्टप्रयोगानुसारेण निपात्यानि। पारस्करः। प्रस्कण्वः। हरिश्चन्द्रः। एते-चर्षौ। अन्यत्र न सुट्। किष्किन्ध्या गुहा। बृहस्पतिर्जीवे अन्यत्र बृहस्पतिः। प्रायश्चित्तं तपसि अन्यत्र प्रायचित्तम्। आश्चर्य्यमद्भुते अन्यत्र आचर्य्यम्। आस्पदमास्थाने अन्यत्रापदम्। गोष्पदम् परिमाणेऽन्यत्र गोपदम्। विष्किरः पक्षिणि। अवस्करोऽन्नमलेऽन्यत्र अवकर इत्यादि।

६० ६० ०१० ७० ७०

अषष्ठीतृतीयान्तस्यान्यस्य दुँगाशीरादिष्वर्थे

०१०१०

तु वा ॥२४॥

आशीरादिषु परेषु अन्यशब्दस्य दुँक् स्यात् न तु षष्ठीतृतीयान्तस्य अर्थशब्दे परे तु वा। उकावितौ।

आशिस् आशा आस्थित आस्था उत्सुक कारक राग छप्रत्यय इत्येते आशीरादयः। तत्र कारकेति शब्दे छे च परे षष्ठ्यन्तस्यापीष्यते इति सिद्धान्तः। अन्यदाशीः अन्यदाशा अन्यदास्था अन्यदास्थितः अन्यद्रागः अन्यदुत्सुकः। अन्यत्कारकः अन्यदीयः। अषष्ठीत्यादि किम् अन्यस्यान्येन वाशीः अन्याशीरित्यादौ न,। अन्यदर्थम् अन्यार्थम्।

६· ·१· ७· ७:··१·
कोः कत्तत्पुरुषेऽचि त्रिरथवदतृणेषु च ॥२५॥

तत्पुरुषे कुशब्दस्य कत् स्यात् अजादौ त्रादिषु च परेषु। कुत्सितमन्नं कदन्नम्। कत्त्रयः कद्रथः कद्वदः कत्तृणम्। तत्पुरुषे किम् कुत्सितमन्नं यत्रेति बहुव्रीहौ न, तत्र कन्नमित्येव।

१· ७:
का पथ्यक्षयोः ॥२६॥

एतयोः परतः कोः का स्यात्तत्पुरुषे। कापथः काक्षम्

·१· ७·
वा पुरुषे ॥२७॥

पुरुषशब्दे परे कोः का स्याद्वा। कापुरुषः कुपुरुषः।

६· ७··६· ·१·
ईषदर्थस्याचापि का ॥२८॥

ईषदर्थस्य कोः स्थानेऽजादावपि का स्यात्। काम्लम् काशीतम्।

१० ०१० ७: ०१०

कवञ्चोष्णाम्न्योर्वा ॥२९॥

अनयोः परतः ईषदर्थस्य कोः स्थाने कवं चात् काः स्याद्वा पुंत्वे कद्। कवोष्णम् कोष्णम् कदुष्णम्। एवं कवाग्निः काग्निः कदग्निः।

१:० २०

पृषोदरादीनि यथोपदिष्टम् ॥३०॥

एतानि यथाशिष्टप्रयोगं निपात्यानि।

भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।
गूढ़ोत्मा वर्णविकृतेर्वर्णलोपात् पृषोदरम्।

हन्तेः पचाद्यचि सगागमे हंसः। हिनस्तेः पचाद्यचि हकारसकारयोर्वैपरीत्ये सिंहः। आत्मा आकारस्य उकारताप्राप्तेः गूढ़ोत्मा। पृषतस्तकार लोपे पृषोदरम्। आकृतिगणः। अत्रैव गणे पाठात्

लुम्पेदवश्यमः कृत्ये तुमः काममनस्यपि।
मांसस्य पाके पचने समोऽन्तो वा हिते तते॥

इत्युक्तरीत्या अवश्यमादेरन्त्यलोपः। अवश्यकार्य्यः गन्तुकामः गन्तुमनाः। मांसपाकः मांस्पाकः सहितः संहित इत्यादि।

इति सर्व्वसमासाश्रयकार्य्यप्रकरणम्।

अथ षत्वप्रकरणम्।

५· ६· ६· १·

अङ्गुलेः सङ्गस्य सः—षः—॥१॥

अङ्गुलिशब्दात् परस्य सङ्गशब्दसस्य षत्वं स्यात्। अङ्गुलिषङ्गः।

५ः ६·

भीरोः स्थानस्य ॥२॥

भीरुशब्दात् परस्य स्थानशब्दसस्य षत्वं स्यात् भीरुष्ठानम्।

५ः ६·

ज्योतिरायुर्भ्यां स्तोमस्य—॥३॥

आभ्यां स्तोमस्यसस्य षत्वं स्यात्। ज्योतिष्टोमः आयुष्टोमः।

५· ६ः·

अग्नेः स्तुत्स्तोमसोमानाम्—॥४॥

अग्नेः परेषामेषां सस्य षत्वं स्यात्। अग्निष्टुत् अग्निष्टोमः। अग्नीषोमौ।

५ः ६·

मातापितृभ्यां स्वसुः ॥५॥

आभ्यां परस्य स्वसृशब्दादेः सस्य षत्वं स्यात्। मातृष्वसा पितृष्वसा।

५:　५:　७०।०

षष्ठ्यन्ताभ्यां ताभ्यामलुक्समासे वा॥६॥

षष्ठ्यन्ताभ्यां मातृपितृशब्दाभ्यां परस्य स्वसुः सस्य षत्वं वा स्यादलुक्समासे। मातुःष्वसा मातुःस्वसा। पितुःष्वसा पितुःस्वसा।

५:　६।७० ७०।०

उपसर्गैक्प्रादुर्भ्यामस्तेर्यऽचि च॥७॥

आभ्यां परस्यास्तेः सस्य षत्वं स्याद्यादावजादौ च परे। निष्यात् निषन्ति प्रादुःष्यात् प्रादुःषन्ति। अन्यत्र निस्तः प्रादुःस्तः॥

५:　६:　०

सुविनिर्दुर्भ्यः सुपिसूतिसमानाम्॥८॥

एभ्यः परेषामेषां सस्य षत्वं स्यात्। सुषुप्तिः सुषूतिः सुषमः। विषमः।

५:　६०　७०

निनदीभ्यां स्नातेः कौशले॥९॥

कौशले गम्ये आभ्यां स्नातेः सस्य षत्वं स्यात्। निष्णातः नदीष्णातः कुशल इत्यर्थः।

१०　७०

प्रष्ठोऽग्रगामिनि॥१०॥

प्रशस्तेऽर्थे एष निपात्यते। अन्यत्र प्रस्थः परिमाणं गिरिसानु वा।

७० १०

आसने विष्टरः ॥११॥

अन्यत्र विस्तरः ।

अम्बगोभूमिसव्यद्वित्रिकुङ्गुमञ्जिपुञ्जिपरमे वर्हि-

५:० ७०

र्दिव्यग्निभ्यः स्थः ॥१२॥

एभ्यः स्थाधातुजशब्दादेः सस्य षत्वं स्यात् । स्थ इति यथाप्रयोगम् स्थ-स्थिन्-स्थणां ग्रहणम् अम्बष्ठः गोष्ठम् भूमिष्ठः । सव्यष्ठः सव्येष्ठी सव्येष्ठा । द्विष्ठः त्रिष्ठः कुष्ठः अङ्गुष्ठः । मञ्जिष्ठः पुञ्जिष्ठः । परमेष्ठी वर्हिष्ठः दिविष्ठः अग्निष्ठः ।

१:०

सुषेधादयः ॥१३॥

एते कृतषत्वा निपात्याः । सुषेधः दुःषेधः निषेधः प्रतिषेधः सुषेणः हरिषेण इत्यादयः । आकृतिगणः ।

५० ७० ७०

कृसात्तादौ तद्धिते ॥१४॥

कृससंज्ञकादिण्वर्णात् परस्य सस्य षत्वं स्यात्तादौ तद्धिते परे । सर्पिष्टमम् । हविष्टमम् । कृसात् किम् गीस्त्वमित्यादौ न ।

इति षत्वप्रकरणम् ।

अथ णत्वप्रकरणम्।

५॰ ७॰ ६॰ १॰

पूर्व्वपदात् संज्ञायां नस्य णत्वम्॥१॥

पूर्व्वपदस्थात् णत्वनिमित्तात् ऋ रषवर्णात् नस्य णत्वं स्यात् संज्ञायाम्। सूर्पणखा द्रुणसः। द्रुणाः खरणसः खरणाः। संज्ञायां किं धर्म्मनेता। त्रिनयनत्रिनेत्रादेस्तु क्षुभ्नादिषु पाठात् न णत्वम्।

५॰ ३॰ ६॰

पुरगादिभ्य एव वनस्य॥२॥

एभ्य एव परस्य वनस्य नस्य णत्वं स्यात् नान्येभ्यः संज्ञायाम्। पुरगा सिध्रका मिश्रका सारिका कोटर अग्रे इति पुरगादयः। तत्राग्रेशब्दस्यासंज्ञा शब्दतयाऽप्राप्तौ वचनम्। पुरगावणम् सारिका वणम् अग्रेवणम्। एभ्यः किम् कुबेरवनम्। इन्द्रवनम्।

५॰ ६॰ ७॰

प्रादिभ्यो वनस्यासंज्ञायाम्॥३॥

एभ्यः परस्य वनस्य नस्य णत्वं स्यादसंज्ञायामेव। प्र परा परि निर अन्तर् शर प्रक्ष आम्र खदिर पीयूक्ष प्रादयः। प्रवणम् निर्वणम् अन्तर्वणम् शरवणम् इक्षुवणम्।

५: ५: ०१०

हृचौषधिभ्यां द्विस्वराभ्यां वा ॥४॥

द्विस्वरवर्णयुक्ताभ्यां हृचौषधिवाचकाभ्यां परस्य वनस्य णत्वं वा स्यात्। शिरीषवणम् शिरीषवनम् दूर्व्वावणम् दूर्व्वावनम्। वदरीवणम् वदरीवनम् द्विरेति किम् देवदारुवनम्।

५० ६०

अदन्तादह्नस्य ॥५॥

अदन्तात् पूर्व्वपदात् परस्याह्नस्य णत्वं स्यात् पूर्व्वाह्णः सर्व्वाह्णः। अदन्तात् किं परागतमह्नः पराह्न इत्यादावातःपरस्य न।

५० ६०

आहिताद्वाहनस्य ॥६॥

आरोप्य यदुह्यते तदाहितम्। तस्मात् पूर्व्वपदात् परस्य वाहनस्य णत्वं स्यात्। शरवाहणम् इक्षुवाहणम्। आहितात् किम् इन्द्रवाहनमित्यादौ न।

६० ७०

पानस्य-देशे ॥७॥

देशेऽर्थे पूर्व्वपदनिमित्तात् परस्य पानस्य नस्य णत्वं स्यात्। चीरपाणाः प्रतीच्याः सुरापाणाः प्राच्याः।

१० ७०

वा भावकरणयोः ॥८॥

भावे करणे च वाच्ये निष्पन्नस्य पानशब्दस्य पूर्व्वपद-

स्यात् निमित्तात् परस्य नस्य णत्वं वा स्यात्। क्षीरपाणम् क्षीरपानम्। सुरापाणं सुरापानं चषकम्। (७२पृ० ८सू०) नामान्तस्य णत्वे माषवापिणौ। नुमि माषवापाणि। विभक्तिस्थस्य माषवापेण। अत्र सर्वत्र पक्षेऽणत्वम्। एकाचस्तु रम्यविना रम्यवीणि। सकवर्गस्य तु हरिकामिणौ हरिकामाणि। हरिकामेण इत्यादौ नित्यम् तत्रायं विशेषः।

·१· ६··१· ७· ·१·

न—युवादेर्न पदव्यवधाने च ॥९॥

पूर्वोक्तविधिना प्राप्तस्य युवादेः पदान्तरव्यवधाने च णत्वं न स्यात्। युवन् अहन् पक्व अग्रगामिन् इत्यादि युवादि। रम्ययुना रमणाह्ना दीर्घाह्ना रमणपक्वेन। अग्रगामिना। पदव्यवधाने माषकुम्भवापेन क्षीरकुम्भपायिना।

५· ५· ६·

पदान्तात् षात् क्नतः ॥१०॥

पदान्तस्थषकारात् परस्य क्नत्प्रत्ययस्य नस्य णत्वं न स्यात्। निष्पानम् सर्पिष्पानम् यजुष्पानम्। षात् किं निरयणम्।

७:

क्षुभ्नादिषु ॥११॥

एषु नस्य णत्वं न स्यात् । क्षुभ्नाति क्ष्नोति । ते च (सि० पू० ३८२ पृ०) द्रष्टव्याः ।

इति णत्वप्रकरणम् ।

अथैकशेषप्रकरणम् ।

६: १० ७०

सरूपाणामेकशेषः समानविभक्तौ ॥१॥

समानविभक्तौ परतः समानरूपाणां मध्ये एक एव शिष्यते अपरो लुप्यते । घटौ घटाः ।

१० ०।० १० ८० १० ०।० ।

स्त्रिया सह पुमान् शिष्यते तत्कृतश्चेद्विशेषः ॥२॥

स्त्रिया सहोक्तौ पुमानेव शिष्यते स्त्रीशब्दस्तु लुप्यते यदि स्त्रीशब्दः तत्कृतविशेषः (तस्मात् पुंवाचकादेव कृतो विशेषः स्त्रीप्रत्ययादिर्यस्य सः) स्यात् । हंसः हंसी इति स्थिते हंसौ हंसीशब्दस्य हंसशब्दादेव विशेषःकृतः । तत्कृतः किम् हंसः मयूरी इत्यत्र न ।

२० १० ०१००१००१०

अनपुंसकेन नपुंसकमेकवच्च वा ॥३॥

अनपुंसकेन सहोक्तौ नपुंसकमेवावशिष्यते तत्कृत-

से विशेषः तच्च एकवचनं वा स्यात्। क्लतः क्लता क्लतं क्लतानि क्लतं वा।

२ः १ः
स्वसृदुहितृभ्यां भ्रातृपुत्रौ ॥४॥

आभ्यां सहोक्तौ क्रमेणैतावेव शिष्येते। भ्राता स्वसा भ्रातरौ। पुत्रः दुहिता पुत्रौ।

२॰ १॰ १॰
मात्रा पिता वा—॥५॥

मात्रा सहोक्तौ पितैवावशिष्यते। माता पिता पितरौ। पक्षे मातरपितरौ मातापितरौ।

२॰ १॰
श्वश्र्वा श्वशुरः ॥६॥

एतया सहोक्तौ श्वशुरो वा शिष्यते। श्वशुरौ श्वश्रू-श्वशुरौ वा।

२ः॰ १ः॰ १॰ २॰
नामादिभिस्त्यदादीनि मिथस्तु यथोत्तरम् ॥७॥

प्रातिपदिकमात्रैः सहोक्तौ त्यदादीनि, मिथश्च तेषां सहोक्तौ यथोत्तरमवशिष्यन्ते। घटः सः तौ। सः यः यौ। सः त्वं युवाम्। स त्वं अहम् वयम्। अयञ्च न समासस्तेन पद्यानावित्यत्र न समासान्त इति सिद्धान्तः। क्लत्तद्धितसमासैकशेष-सनाद्यन्ताद्यन्तयस्तेषु क्लत्तद्धितसमासैकशेषाणां

विशिष्टैकार्थबोधकतया प्रातिपदिकसंज्ञा ततश्च तदवयवस्य (२०८पृ० २सू०) सुपो लुक्।

इत्येकशेषप्रकरणम्।

तद्धितसंज्ञा प्रकरणम्।

१ः १ः

मतुबादयस्तद्धिताः ॥१॥

वक्ष्यमाणा मतुबादयस्तद्धितसंज्ञाः स्युः। ते च प्रथमान्तादिभ्यः, तिङो, ऽव्ययात्, प्रातिपदिकमात्राच्चार्थविशेषे स्युः।

१० १० १०

विभक्त्यादेशस्तद्धितोऽसर्वविभक्तिः ॥२॥

विभक्तेः स्थाने आदिश्यमानास्तसिलादयोऽसर्वविभक्तिसंज्ञाः स्युः। असर्वविभक्तित्वादव्ययत्वम् विभक्त्यादेशेऽपि लुग्गुणदीर्घत्वैत्वौत्त्वस्माद्यादेशा न इति सिद्धान्तः।

१ः १०

तरतमौ घः ॥३॥

एतौ घसंज्ञौ स्तः।

१० ६० ६ः ६० १० १० १०

इदं यस्याचामादेर्वृद्धिस्त्यदादि च ॥४॥

यस्याचामादेर्वृद्धिस्तत्, त्यदादि च इदसंज्ञं स्यात्।

१० १० १०

पौत्रप्रभृति अपत्यं गोत्रम् ॥५॥

पौत्रप्रभृति अपत्यं गोत्रसंज्ञं स्यात् ।

७० ७० १०

जीवति वंश्ये युवा ॥६॥

वंशप्रवर्त्तके जीवति सति पौत्राद्यपत्यं युवसंज्ञं स्यात् । गोत्रसंज्ञापवादः ।

इति तद्धितसंज्ञाप्रकरणम् ।

अथ तद्धितकार्य्यप्रकरणम् ।

१० ७० १०

एको गोत्रे प्रत्ययः ॥१॥

गोत्रे एक एव प्रत्ययः स्यात् न प्रत्ययपरम्परा ।

६ः० ६ः० १ः०

प्रत्ययादीनां फढखछघानामायनेयीनीयियः ॥२॥

प्रत्ययादिस्थानां फादीनां स्थाने क्रमेणैते स्युः । यथा फस्य आयन् ढस्य एय् खस्य ईन् छस्य ईय् घस्य इय् । फादिष्वकार उच्चारणार्थः ।

६० १०

ठस्येकः ॥३॥

प्रत्ययादिस्थस्य ठकारस्य स्थाने इकः स्यात् ।

५· १·

इसुसुक्तान्तात् कः ॥४॥

इसः, उसः, उक्प्रत्याहारात्, तान्ताच ठस्य क एव स्यात् । इकापवादः । इसः, सर्पिष्कः । उसः, धनुष्कः उकः, धैनुकम् मातृकं पैतृकम् । तान्तात् उदश्वित्कः ।

६:· ६· १· ७· ७· ७·।· ७·

अचामादेर्वृद्धिर्ञिति-णिति-किति-च तद्धिते-॥५॥

ञिति णिति किति च तद्धिते परे अचां मध्ये आद्यचो वृद्धिः स्यात् ।

६:· ६· १·

केकयमित्रयुप्रलयानां यादेरित् ॥६॥

तेषु परेषु एषां यादेरित् स्यात् । कैकेयः मैत्रेयः निपातनाद्युलोपः । प्रालेयः ।

६· ९:

देविकासरय्वोर्दारवसारवौ ॥७॥

तेषु परेषु एतयोरेतौ निपात्यौ ।

१· ५: ५: १:·।· ५: ·१·

न यवाभ्यां परान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥८॥

परान्तस्थाभ्यां यवाभ्यां पर स्याचामादेर्वृद्धिर्न स्यात् ताभ्यां पूर्वौ तु ऐच् । तत्र सौसादृश्यात् यात् पूर्वं ऐः वात् पूर्वं औः । व्याकरण-वैयाकरणम् स्वश्व- सौवश्वम् । परान्तात् किं याष्टिकम् वासिष्ठम्

६:· ·१·

द्वारादीनाञ्च ॥९॥

एषामपि वृद्धिर्न ऐजागमश्च। अपदान्ततयाऽप्राप्तौ पृथग् ग्रहणम्। द्वार स्वर स्वाध्याय स्वस्ति स्वर् स्वादुमृदु श्वन् श्वस् स्वधारादि। द्वार-दौवारिकम्, स्वर-सौवरम्।

·१· ६:· ६··१·

न स्वागतादीनां श्वापदन्यङ्क्वोर्वा ॥१०॥

स्वागतादीनां वृद्धिनिषेध ऐजागमश्च न स्यात्। श्वापदन्य ङ्क्वोस्तु वा स्यात्। स्वागत स्वध्वर स्वङ्ग व्यङ्ग व्यड़ व्यवहार स्वागतादि। व्यवहार-व्यवहारिकम्। शौवापदं श्वापदम्।

५· ६· ६· १·

अवयवादृतोरुत्तरपदस्य—वृद्धिः ॥११॥

तेषु परेषु अवयववाचिनः परस्य ऋतुवाचकस्याचामादेर्वृद्धिर्न स्यात् किन्तु उत्तरपदस्यैवाचामादेर्वृद्धिः स्यात्। पूर्ववार्षिकम् चरमशारदम्।

५:· ६·

सुसर्व्वार्द्धेभ्यो जनपदस्य—॥१२॥

एभ्यः परस्य उत्तरपदस्य जनवाचिनोऽचामादेर्वृद्धिः स्यात् तेषु परेषु न तु पूर्व्वपदस्य। सुपाञ्चालकः सर्व्वमागधः अर्द्धसौराष्ट्रः।

५॰ ६॰
दिशोऽमद्रस्य ॥१३॥

दिक्शब्दात् परस्य मद्रभिन्नजनपदवाचिन उत्तरपदस्यैवाचामादेर्वृद्धिर्नैतरस्य। पूर्व्वपाञ्चालः उत्तरपाञ्चः।

५॰ ६॰
संख्यायाः संख्यासंवत्सरपरिमाणानाम् ॥१४॥

संख्यावाचकात् परेषामुत्तरपदस्थानामेषामचामादेर्वृद्धिः स्यात् तेषु नान्यस्य। द्विषाष्टिकम् चतुःसाप्ततिकम्। द्विसांवत्सरिकम् द्विप्रास्थिकम्। त्रिद्रौणिकम्।

७॰ ६॰ ०१॰
हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च ॥१५॥

तेषु परेषु हृदाद्यन्ते पदे परे पूर्व्वपदस्य चात् उत्तरपदस्य चाचामादेर्वृद्धिः स्यात्। सौहार्दम् सौभाग्यम् दौर्भागिनेयः सौसैन्धवम्।

६॰ ०१॰
अनुशतिकादीनाञ्च ॥१६॥

एषामुभयपदवृद्धिः स्यात् तेषु। अनुशतिक इहलोक परलोक सर्व्वलोक सर्व्वपुरुष सर्व्वभूमि पयस्त्री अधिभूत अधिदेव चतुर्विद्या अनुशतिकादि। आनुशातिकम्। ऐहलौकिकम् सार्व्वभौमः

७॰

देवताद्वन्द्वे ॥१७॥

देवताद्वन्द्वसाध्यानामुभयपदवृद्धिः स्यात्। आग्नी-षोमीयम् मैत्रावारुणम्।

५॰ ६॰ ६॰ ॰२॰ ॰१॰

अर्द्धात् परिमाणस्य पूर्व्वस्य तु वा ॥१८॥

अर्द्धात् परस्य परिमाणवाचिनोऽचामादेर्वृद्धिः स्यात् पूर्व्वपदस्य तु वा तेषु परेषु। अर्द्धद्रौणिकम् आर्द्ध-द्रौणिकम्।

५॰ ६ः॰

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥१९॥

नञः परेषामेषामचामादेर्वृद्धिः स्यात् पूर्व्वपदस्य तु वा। आशौचम् अशौचम्।

६॰ ६॰ १॰ ७॰ ॰१॰ १॰ ६ः

ओर्भस्य गुणो ढेतु लोपोऽकद्रुपाण्ड्वोः ॥२०॥

भसंज्ञस्य उवर्णस्य गुणः स्यात् ढे परे तु तस्य लोपः न तु कद्रूशब्दपाण्डुशब्दयोः। वाभ्रविः पाण्डवः। ढे कमण्डलु-कामण्डलेयः। काद्रवेयः पाण्डवेयः।

६॰ ६॰ १॰ ७॰

भस्य—नान्तस्य नलोपस्तद्धिते ॥२१॥

भसंज्ञस्य नान्तस्य नलोपः स्यात्तद्धिते परे। अनो-ऽल्लोपापवादः। राजकम्।

•२•६• ७•
नान्नोऽणि ॥२२॥

अणि परे अनन्तस्य भसंज्ञकस्य नलोपो न स्यात् यौवनम् । माघवनम् ।

७• •१•　　७:
ये चाभावकर्म्मणोः ॥२३॥

यादौ प्रत्यये परे अनो नलोपो न स्यात् नतु भावकर्म्मणोः । राजन्यः । भावकर्म्मणोस्तु राज्यम् ।

•१•　　६•　७•　७•
नावर्म्मणोऽपत्येऽणि ॥२४॥

अपत्यार्थेऽणि परे वर्म्मभिन्नमनन्तस्य न नलोप निषेधः । भाद्रमासः । मनःकिं सौत्वनः । अपत्ये किम् चर्म्मणा परिहतः चार्म्मणः । कर्म्मणि साधुः कार्म्मणः ।

६:　७•
अध्वात्मनोः खे ॥२५॥

खे परे अनयोर्नलोपो न स्यात् । अध्वनीनः आत्मनीनः ।

५•　६••१•
संयोगादेरिनश्च ॥२६॥

संयोगादेरिनश्च नलोपो न स्यात् । चाक्रिणम् ।

१•　　७•
ब्राह्मोऽजातौ ॥२७॥

अजातौ ब्राह्म इति निपात्यते । जातौ तु ब्राह्मणः ।

६: ७. १.

अण्हन्ष्टतराज्ञामणि-टिलोपः ॥२८॥

अणि परे एषां टिलोपः स्यात् । औक्ष्णः ताक्ष्णः पौष्णः वार्त्तघ्नम् धार्त्तराज्ञम् ।

१. ७.

औक्षमपत्ये ॥१९॥

अपत्येऽणि परे औक्षं निपात्यते । अन्यत्र औक्ष्णम् ।

६. ६. १. ६:

अव्ययस्य टेर्लोपोऽनाराच्छाश्वतोः ॥३०॥

आराच्छश्वद्भिन्नस्य भसंज्ञस्याव्ययस्य टिलोपः स्यात् । बहिस्-बाह्यः । आरातीयः शाश्वतिकः ।

५. १. ६.

ज्यादादीयसोः ॥३१॥

ज्यात् परस्य ईयसोरात् स्यात् । ज्यायान् ।

७. ७. ६. १.

संज्ञायां मत्वर्थेऽचो दीर्घः ॥३२॥

संज्ञायां मत्वर्थे परेऽचो दीर्घः स्यात् । कृषीवलः ।

इति तद्धितोपयोगिकार्य्यप्रकरणम् ।

प्रथमान्ताधिकारे मत्वर्थतद्धितप्रकरणम् ।

५.

प्रथमायाः ॥१॥

प्रथमान्तादिच्छमाणाः प्रत्ययाः स्युः । अधिकारोऽयम् ।

१·८· ६· ७·०१· ०१·

तदस्यास्त्यस्मिन् वा मतुँप् ॥२॥

प्रथमान्तादस्त्यर्थोपाधिकात् षष्ठ्यर्थे सप्तम्यर्थे च मतुँप् स्यात्। उपावितो। गौरस्त्यस्यास्मिन् वा गोमान्। वह्निरस्त्यस्यास्मिन् वा वह्निमान्।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः।

५· ५· ५·०१· ६·१· ५:·

अमान्तात्तदुपधात् झयश्च मतोर्वोऽयवादिभ्यः ॥२॥

अवर्णान्तान्मान्तात्, तदुभयोपधात्, झयन्ताच्च मतोर्मस्य वः स्यात् न तु यवादिभ्यः। अवर्णान्तात्, धनवान् दुग्धवान् ज्ञानवान् विद्यावान्। मान्तात्, किंवान्। अवर्णोपधात्, यशस्वान् भास्वान्। मकारोपधात्, लक्ष्मीवान्। झयन्तात् विद्युत्वान् (१४७पृ० २सू०) पदत्वाभावेन न जश्। यवादेस्तु न, यवमान् भूमिमान्। यव ऊर्मि भूमि कृमि क्रुञ्चा द्राक्षा हरित् ककुद् मरुत् गरुत् यवादि।

इटा सह वसोर्वस्य मतावुत्त्वं मतं ततः।
विदुष्मानेवमादि स्यात् विद्वत्पृथक्त्वात् कृते मतौ।

७·

संज्ञायाम् ॥४॥

संज्ञायां मतोर्मस्य वः स्यात् इति मस्य वत्वे

(४२४पृ० ३२सू०) दीर्घं अमरावती शरावती। उदन्वानुदधौ ज्ञेयो राजन्वान् स्यात् सुराजके।

५:० ६० ०१०

गुणवचनेभ्यो मतुपो लुक्॥५॥

गुणवाचिभ्यो मतुपो लुक् स्यात्। शुक्लः शुक्ला

५० ५० १० ०१० ७०

प्राण्यङ्गादातो लो—वा—मत्वर्थे—॥६॥

मत्वर्थे प्राण्यङ्गात् आकारान्तात् लो वा स्यात्। चूडालः शिखालः। पक्षे मतुप्। प्राण्यङ्गात् किम् चिकीर्षावान्।

५:० ०१०

सिध्मादिभ्यश्च॥७॥

एभ्यो लो वा स्यान्मत्वर्थे। सिध्मलः पित्तलः। (सि० पू० ६८०पृ०) सिध्मादिर्द्रष्टव्यः।

५: ७:

वत्सांसाभ्यां स्नेहबलवतोः॥८॥

आभ्यां क्रमेणानयोरर्थयोर्वा लः स्यात्, मत्वर्थे। वत्सलः स्नेहवान्। अंसलो बलवान्।

५: १०

फेनादिलः॥९॥

फेनादिलो वा स्यात् मत्वर्थे। फेनिलः फेनवान्।

५:० १० ५:० १० ५:०

लोमादिभ्यः शः, पामादिभ्यो नः, पिच्छादिभ्य

१०

इलः ॥१०॥

क्रमेणैभ्य एते स्युर्वा मत्वर्थे । लोमशः लोमवान् । पामनः पामवान् पिच्छिलः पिच्छवान् । ते च गणा (सि० पू० ६८१पृ०) द्रष्टव्याः ।

५:० १०

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥११॥

एभ्यो णः स्याद्वा मत्वर्थे । चद्वत् । प्राज्ञः प्रज्ञावान् श्राद्धः श्रद्धावान् ।

५: १:

तपःसहस्राभ्यां विनीनी ॥१२॥

आभ्यां क्रमेण विनीनी स्यातां मत्वर्थे । अन्यबाधनार्थं सूत्रम् । इकारवत् । तपस्वी सहस्री ।

५: १० १०

ताभ्यामण् च ॥१३॥

ताभ्यामण् च स्यात् मत्वर्थे । तापसः साहस्रः ।

५: १० १०

सिकताशर्कराभ्यामण् वा ॥१४॥

आभ्यामण् स्याद्वा मत्वर्थे । सैकतः शार्करः ।

७० १: १०

देशे लुबिलचौ च ॥१५॥

देशे वाच्ये आभ्यामणो लुप् इलच्स्यात् अण्मतुपौ ।

सिकताः सन्त्यस्मिन् देशे सिकताः तद्धितलुपि प्रकृतिलिङ्गवचनतेतिसिद्धान्तः, सिकतिलः सैकतः सिकतावान् एवं शर्करेत्यादि।

७· ५· १·

औन्नत्ये दन्तादुरः ॥१६॥

उन्नताः दन्ताः सन्त्यस्य दन्तुरः।

५ः १· ०१·

ऊषादिभ्यो रो वा ॥१७॥

एभ्यो रो वा स्वाम्यलर्थे। ऊषरः शुषिरः। ऊष शुषि सुष्क मधु नख मुख कुञ्ज नग पाण्डु इति ऊषादि।

५ः १· ५· १·

द्युद्रुभ्यां मः, केशाद्वः—॥१८॥

द्युमः द्रुमः। केशवः। पक्षे मतुवादि।

५ः ७·

गाण्डाजगाभ्यां संज्ञायाम् ॥१९॥

गाण्डीवं गाण्डिवमर्ज्जुनधनुः अजगवं पिनाकम्।

५ः· १·

रजःकृषिपरिषत्पर्षद्भ्यो वलः ॥२०॥

एभ्यो वलः स्वाम्यलर्थे (२४७पृ० २सू०) पदत्वाभावे न विसर्गः रजस्वला। दीर्घं कृषीवलः परिषद्वलः।

५ः ७·

दन्तशिखाभ्यां संज्ञायाम् ॥२१॥

संज्ञायामाभ्यां वलःस्वाम्यलर्थे दन्तावलो हस्ती शिखावलो मयूरः।

१: १:

ज्योत्स्नादयोनिपात्या: ॥२२॥

ज्योतिरस्त्यस्यां ज्योत्स्ना । तमस्-तमिस्रा शृङ्ग-शृङ्गिण: । ऊर्ज्जस्-ऊर्ज्जस्वी ऊर्ज्जस्वल: । गो-गोमी मल-मलिन:-मलीमसश्च ।

५· ५· १:

अनेकाजोऽत इनिठौ ॥२३॥

अनेकाचोऽवर्णान्तात् इनिठौ स्तो मत्वर्थे । इकार-इत् । दण्डी । ठस्येके दण्डिक: ।

५:· १··१·

तुन्दादिभ्य इलश्च ॥२४॥

एभ्य इल: स्यात् चात् इनिठौ मतुप् च । तुन्दिल: तुन्दी तुन्दिक: तुन्दावान् । तुन्दा उदर पिचण्ड (स्वाङ्गादिविवृद्धौ) तुन्दादि ।

५:· १··१·

अस्मायामेधामयस्रग्भ्यो विनिर्वा ॥२५॥

एभ्योविनिर्वा स्यान्मत्वर्थे । इकारइत् । पक्षे यथा-प्राप्तम् । यशस्वी यशस्वान् । मायावी मायी मायिक मायावान् । दीर्घं आमयावी ।

५: १·

शृङ्गवृन्दाभ्यामारक: ॥२६॥

आभ्यामारक: स्यान्मत्वर्थे । शृङ्गारक: वृन्दारक: ।

५: १० ०१०

फलवर्हाभ्यामिनो वा ॥२७॥

आभ्यामिनो वा स्यान्मत्वर्थे। फलिनः वर्हिणः।

५० १० ०१०

हृदयादालुश्च ॥२८॥

अस्मादालुश्चात् इनिठादयः। हृदयालुः हृदयी हृदयिकः हृदयवान्।

५: १० ०१०

पर्व्वमरुद्भ्यां तो वा ॥२९॥

आभ्यां तो वा स्यान्मत्वर्थे। पर्व्वतः मरुत्तः।

५० १० ७० ५० ७० ०१०

बलादूलोऽसहने वातात्समूहे च ॥३०॥

बलशब्दात् असहनेऽर्थे वातात्तु समूहे चार्थे ऊलः स्यात्। बलं न सहते बलूलः। वातं न सहते वातस्य समूहोवा वातूलः।

वाग्मी प्रशस्तवचनो वाचाटः कुबहूक्तिमान्।
स वाचालश्च वाचः स्युर्मिन्याटालेषु ते क्रमात्।
प्रभी स्वामी स्वान् मिनी स्यात् करीहस्ती गजे त्विनी
ब्रह्मचारिणि वर्णी च कराग्रस्तात्र वर्णतः॥

५:० ०१०

अर्शआदिभ्योऽच् ॥३१॥

एभ्यो मत्वर्थेऽच् स्यात्। चद्दत्। (सि० उ० ६८६पृ०)
आकृतिगणः। पदत्वाभावेन न विसर्गादि अर्शसः।

५: १०

रोगगर्ह्यप्राण्यङ्गाभ्यामिनिः ॥२२॥

ठादिबाधनार्थमिदम्। रोगात्-कुष्ठी शूली। गर्ह्यप्राण्यङ्गात्, ककुदावर्त्ती काकुतालुकी।

५: १० १०

वातातिसाराभ्यां कुँक् च ॥२३॥

आभ्यामिनिः स्यात् तयोः कुँक् च। वातकी अतिसारकी।

५०

धर्म्मशीलवर्णान्तात् ॥२४॥

धर्म्मान्तात्, शीलान्ताद्वर्णान्ताच्च इनिः स्यान्मत्वर्थे। विप्रधर्म्मी यवधर्म्मी धर्म्मशीली विप्रवर्णी।

५:० ७०

पुष्करादिभ्यो देशे ॥२५॥

देशे वाच्ये एभ्य इनिः स्यात्। पुष्करिणी पद्मिनी अन्यत्र पुष्करवान् हस्ती। पुष्करादि (सि० पृ० ६८८पृ०)

५:० १०

अहंशुभंयोः युः ॥२६॥

एभ्यो युः स्यात्। अहंयु शुभंयुः शंयुः।

५: १० ७०

तुन्दिवलिभ्यां भो वृद्धौ ॥२७॥

वृद्धौ गम्यायाम् आभ्यां भःस्यात्। वृद्धा तुन्दिरस्यस्य तुन्दिभः वलिभः।

इति प्रथमान्ताधिकारे मत्वर्थीय तद्धितप्रकरणम्।

अथ प्रथमान्ताधिकारे स्वार्थिकतद्धिताः ।

५॰ १॰ ॰१॰ ७॰ १॰ ७॰
देवात्तो वा स्वार्थे-तदन्तः स्त्रियाम् ॥१॥

स्वार्थे देवशब्दात्तः स्याद्वा तदन्तस्य स्त्रियाम् । देवता

५॰ १॰
तीयादीकक् ॥२॥

स्वार्थे तीयान्तादीकक्स्याद्वा । क् इत् । कित्त्वाद्वृद्धिः । द्वितीयः द्वैतीयीकः । तृतीयः तार्त्तीयीकः ।

५ः॰ १॰
असुरादिभ्योऽण् ॥३॥

स्वार्थे एभ्योऽण् स्यात् । आसुरः राक्षसः वायसः मारुतः दाशार्हः सात्वतः पैशाचः वासवः कार्षापणः । वैसारिणो मत्स्यः । औषधम् ।

५ः॰ १॰
शाखादिभ्यो यः ॥४॥

शाखैव शाख्यः मुख्यः जघन्यः अग्र्यः शरण्यः ।

५ः॰ १॰
यावादिभ्यः कः ॥५॥

यावकः । मणिकः । (सि॰पू॰७२४पृ॰) यावादिः ।
अज्ञाने कुत्सिते नाम्नि ह्रस्वेऽल्पे नीतिशालिनि ।
दयायां कः सुपः स्वार्थे शास्त्रकारैर्निदर्शितः ।
इत्युक्तेः अज्ञातोऽश्वः अश्वकः । कुत्सिते करटकः ।

संज्ञायां शूद्रकः आर्थिकः दण्डकः । कुत्से मुचकः । अल्पे तैलकं विन्दुकम् जालकम् । नीतियुक्ते धानकाः अपूपकाः । दयायां पुत्रकः बालकः । स्वार्थे चौरकः ।

५।० १०

भागरूपनामभ्यो धेयः ॥६॥

स्वार्थे । भागधेयः रूपधेयम् नामधेयम् ।

५।० ०१०

चतुर्वर्णादिभ्यः ष्यञ् ॥७॥

प्रज्ञावितौ । चातुर्वर्ण्यम् (सि०पू०६५४पृ०) चतुर्वर्णादि

५।० ०१०

विनयादिभ्यष्ठक् ॥८॥

वैनयिकः सामुदयिकः (सि०पू०७२५पृ०) विनयादि ।

५।० १०

प्रज्ञादिभ्यो णः ॥९॥

प्राज्ञः वाणिजः नैगमः (सि०पू०७२६पृ०) प्रज्ञादि ।

५।० १०

अनन्तादिभ्योऽञः ॥१०॥

आनन्त्यं भैषज्यम् । आवसथ्यम् ऐतिह्यम् ।

५।० १० ५।०।० १० ०

अध्युत्तरपदात् खोऽखोऽपि वाऽदिपि ॥११॥

स्वार्थे अध्युत्तरपदात् खः स्यात् अध्वन्तात्तु वा न तु

दिशि। खस्य ईन्। रामाधीनः। नित्यसमासोऽयम्। प्राक् प्राचीनः सम्यक् समीचीनः। दिशि तु प्राची दिक्।

५ः १०

विसंप्रोद्भ्यः कटः ॥१२॥

एभ्यः स्वार्थे कटः स्यात्। विकटः संकटः प्रकटः।

५० १ः ७०

वेःशालशङ्कटौ विस्तारे ॥१३॥

विस्तारवति स्वार्थे वेरेतौ स्तः। विशालं विशङ्कटम्

७० ५० १ः

पृथग्भावे विनञ्भ्यां नानाञौ ॥१४॥

पृथग्भाववति स्वार्थे आभ्यामेतौ क्रमेण स्तः। अद्रुत्। विना नाना।

५ः १० ७ः

उपाधिभ्यां त्यक आसन्नाधिरूढयोः ॥१५॥

क्रमेणैताभ्यामेततोरर्थयोः त्यकः स्यात्। आसन्नं स्थानमुपत्यकम्। अधिरूढा भूमिः अधित्यका

१ः १ः

निविड़ाधिकानुकाभिकाभीकप्रतीकानिपात्याः॥१६॥

नैविडः अध्यादिभ्यः कः। अभिमत्योर्दीर्घश्च।

ह्रस्वा कुटी कुटीरः स्यात् कुतुपोऽल्पकुतुस्तथा।
अल्पा वधूर्वधूटी स्यात् चिरंटी तु सुवासिनी।

अल्पत्वे वत्सोक्षाश्वर्षभेभ्यस्तरट् ॥१७॥

अल्पत्ववति स्वार्थे एभ्यस्तरट् स्यात् । टद्वत् । वत्सतरः वत्सतरी । उक्षतरः । अश्वतरः । ऋषभतरः ।

सुप्तिङ्भ्यामीषदसमाप्तौ कल्पदेश्यदेशीयाः ॥१८॥

ईषदसमाप्तिः स्वार्थस्य किञ्चिदपकर्षः । तद्वति स्वार्थे सुप्तिङ्भ्य एते स्युः । ईषदसमाप्तः पटुः पटुकल्पः पटुदेश्यः पटुदेशीयः । स्त्रियान्तु पुंवत् पटुदेशीया । एवं पचतिकल्पम् पचतिदेश्यम् पचतिदेशीयम् ।

सुपो बहुः प्राक् ॥१९॥

ईषदसमाप्त्यर्थे सुबन्तात् प्राक् बहुः स्यात् । ईषदसमाप्तो गुडः बहुगुडो द्राक्षा ।

प्रशंसायां रूपस्तिङश्च ॥२०॥

प्रशंसावति स्वार्थे सुप्तिङश्च रूपः स्यात् । पटुरूपः पचतिरूपम् ।

सुपः कुत्सिते पाशः ॥२१॥

कुत्सिते स्वार्थे सुबन्तात् पाशः स्यात् । कुत्सितो वैद्यः वैद्यपाशः । गणकपाशः ।

७॰ ५॰ ९॰

असहाये एकादाकिनिकौ ॥२२॥

असहाये स्वार्थे एकशब्दादेतौ स्तः। इकारइत। असहाय एकः एकाकी एककः।

७॰ ॰१॰ ॰१॰ ॰१॰

भूतपूर्व्वे चरट् गोष्ठात्तु खञ् ॥२३॥

भूतपूर्व्वे स्वार्थे प्रथमान्ताच्चरट् स्यात् गोष्ठात्तु खञ्। टञावितौ। भूतपूर्व्वः आढ्यः आढ्यचरः। आढ्यचरी। भूतपूर्व्वं गोष्ठं गोष्ठीनम्।

कुशाग्राच्च इवार्थे स्यात् कुशाग्रीयं ततो भवेत्।
काकतालोपमेये तु काकतालीयमिष्यते।
एवं घुणाचरीयं स्यादनुद्देश्यफलोदये।
स्थानान्तात् स्थानसदृशे पितृस्थानीय इष्यते।
जात्यन्ताज्जातियुक्ते छे विप्रजातीयसाधनम्।
जातौ तु विप्रजातिः स्यादेवं शास्त्रार्थनिर्णयः।
प्राचुर्य्ये च प्रस्तुतेऽर्थे तद्विशिष्टे मयट् भवेत्।
तेनान्नमिवान्नमयम् यज्ञाद्यन्नमयं मतम्।
तदात्मके मयट् तद्वत् वाङ्मयादि ततो भवेत्।
संदिष्टार्था तु या वाणी वाचिकं तदितीष्यते।
स्वार्थे मृदस्तिकः प्रोक्तो मृत्तिकेति ततो भवेत्।
प्रशंसायां तु सस्नौ च मृत्सा मृत्स्ना ततः स्मृता।

७॰ १॰

प्रकारवति जातीयः ॥२४॥

सामान्यस्य भेदको विशेषः प्रकारः। तद्वति स्वार्थे जातीयः स्यात्। पटुप्रकारः पटुजातीयः(४०२पृ०८सू० पुंवद्भावे शुभ्राप्रकारा शुभ्रजातीया पाचकजातीया

७॰ १॰

अतिशायने-तमिष्ठौ ॥२५॥

अतिशयविशिष्टे स्वार्थे प्रथमान्तात् तमिष्ठौ स्तः। अयमेषामतिशयेन आढ्यः आढ्यतमः। पाचकतमः। लघुतमः। इष्ठस्तु गुणवचनादेव।

५॰ ७॰ ७॰ ०१॰ १॰

द्विवचनात् विभज्ये उपपदे च तरेयसू ॥ २६ ॥*

द्वयोर्मध्ये एकस्यातिशयेन विभक्तव्ये (निर्द्धार्य्ये) उपपदे च तरेयसू स्याताम्। पूर्व्वसूत्रापवादः। उकारइत्। अयमनयोरतिशयेन आढ्यः आढ्यतरः। लघुतरः। पाचकतरः। प्रतीच्याः प्राच्येभ्य आढ्याः आढ्यतराः पटुतराः। ईयसुस्तु गुणवचनादेव

५॰ १॰ ०१॰

गुणवचनादिष्ठेयसू वा ॥२७॥

गुणवाचकादेतौ वा स्तः। पक्षे तरतमौ। तौ च प्र-

---

* बहूनां मध्ये एकस्यातिशायनेऽपि तरेयसू स्त इति विधानार्थं विभज्ये उपपदे चेत्युक्तम् तथोदाहरणेन ज्ञापितम् मुग्धबोधकारेण तु तरतमादीनां सामान्यतो द्वयोरपि बहूनां मध्ये एकस्यातिशायेन विधानं कृतं तच्चापाणिनीयत्वादुपेक्षणीयम्। तरतमप्रत्ययान्तस्य द्विबहूनामेकस्योत्कर्षवाचकं तरतमप्रत्ययान्तरमप्यस्ति तेन तारतम्येन वर्त्तमान इत्यादि शारीरकभाष्यप्रयोगः।

गुणार्थविशेषे एव। अयमेषामतिशयेन लघुरितीष्ठे (२१६पृ०१२ प०)डिद्वद्भावे टिलोपे लघिष्ठः गरिष्ठः। अयमनयोरतिशयेन पटुः पटीयान्। लघीयान् गरीयान्। प्रतीच्याः प्राच्येभ्यः पटवः पटीयांसः। (२१५पृ०१८प०) स्थवाद्यादेशेस्थूल-स्थविष्ठः स्थवीयान्। दूर-दविष्ठः। प्रिय-प्रेष्ठः अनेकाच्त्वाभावात् न डिद्वद्भावस्तेनैव ज्ञापकेनावर्णस्यापि न लोपप्रसङ्गः। वृद्धज्येष्ठः (४२६पृ०३१सू०) आत्वे ज्यायान्।

५· १·
तिङो घः ॥२८॥

तिङन्तादप्युक्तेऽर्थे घः स्यात्।

७· ५ः ६·
अद्रव्यप्रकर्षे किमेत्तिङव्ययेभ्यो घस्य तरान्त-
१ः
मामौ ॥२९॥*

किमः, एतदन्तात्, तिङः, अव्ययाच्च परस्य घस्य स्थाने एतौ स्तः नतु द्रव्यप्रकर्षे। किन्तराम् किन्तमाम्। प्राह्णेतराम् प्राह्णेतमाम्। अतएव सुपोऽलुक्। पचतितराम् पचतितमाम्। सुतराम् नितराम्। उच्चैस्तराम्। उच्चैस्तमाम्। द्रव्ये तु उच्चैस्तरस्तरुः।

५ः ६ः ६· ७· १·
किमेकयत्तद्भ्यो द्वयोरेकस्य निर्द्धारणे डतरो
६ः १·
बहूनां डतमः ॥३०॥

---

* घसंज्ञकयोस्तरतमयोरेवार्थे तरां तमामौस्त इत्यर्थः।

जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम् । तद्वति स्वार्थे एतेभ्य एतौ स्तः । तत्र द्वयोर्मध्ये एकस्य निर्द्धारणे डतरः, बहूनां मध्ये एकस्य निर्द्धारणे डतमः । डइत् तेन टेर्लोपः । जात्या, अनयोः को विप्रः कतरो विप्रः । एषां को विप्रो कतमो विप्रः । गुणेन, कतरः कतमः शुक्लः । क्रियया, कतरः कतमः पाचकः । संज्ञया, कतरः कतमो मैत्रः । एवम् एकतरः एकतमः । यतरः यतमः ततरः ततमः ।

इतिस्वार्थिकतद्धितप्रकरणम् ।

अथ प्रथमान्ताधिकारे प्रमाणाद्यर्थीयाः ।

तदस्य प्रमाणं द्वयसज्दघ्नञ्मात्रचः ॥ १ ॥

प्रथमान्तात् प्रमाणमस्येत्यर्थे एते स्युः । टइत् तेन स्त्रियामीप् ।

प्रथमश्चोर्द्ध्वमाने स्याद् द्वितीयश्च तदर्थके ।
तृतीयो मानसामान्ये शास्त्रकारैरुदाहृतः ।

वंशद्वयसः हस्तिदघ्नः । गजपतिद्वयसीरिति माघः ।
हस्तिमात्रम् हस्तमात्रम् प्रस्थमात्रं द्रोणमात्रम् ।

५॰ ॰१॰॰१॰

पुरुषादण् च ॥ २ ॥

चात् द्वयसादयः। पुरुषः प्रमाणमस्य पौरुषम् पुरुष द्वयसं पुरुषदघ्नं पुरुषमात्रम्।

५।॰ १॰ १॰

यत्तदेतद्भ्यः परिमाणं वतुः ॥ ३ ॥

संख्यापरिच्छेदः परिमाणम्। तदस्येत्यर्थे प्रथमान्तेभ्य एभ्यो वतुः स्यात्। उकारइत्। यत् परिमाणमस्येति वाक्ये वतौ (२६५पृ॰५॰सू॰) आत्वे यावान् तावान्।

बहुत्वे कतियत्यादि डत्यन्तन्तु निपात्यते।

कियानियान् निपात्यश्च किमाद्येकादिसंख्ययोः।

काः संख्या येषां कति। का संख्या यस्य कियान् एवमियान्। कियन्तस्तु कियच्छब्दैकशेषे।

६॰ ७॰ ५॰ ॰१॰

अस्यावयवे संख्यायास्तयट् ॥४॥

अवयवे वर्त्तमानात् प्रथमान्तात् संख्यावाचकशब्दादस्येति षष्ठ्यर्थेऽवयविनि द्योत्ये तयट् स्यात्। टइत्। पञ्च अवयवा अस्य पञ्चतयः। पञ्चतयी।

५: ॰१॰॰१॰

द्वित्रिभ्यामयट् वा ॥ ५ ॥

आभ्यामयट् स्याद्वा प्रागुक्तेऽर्थे। द्वयं द्वितयं त्रयं

त्रितयम्। संख्यामात्रेऽपि तयादयस्तेन षट्त्रितयम्।

५॰ ॰१॰ ७॰ ॰१॰ २॰

उभादयट् वृत्तौ च नित्यम् ॥ ६ ॥

उभशब्दादुक्तेऽर्थे वृत्तिमात्रे च (समासादौ) नित्यमयट् स्यात्। उभयम् उभयी। उभयधनम्

॰१॰ ७॰ १॰ ५॰ ५ः ॰१॰ ॰१॰

तदस्मिन्नधिकं दशान्तात् शदन्तविंशतिभ्यश्च डः ॥७॥

अस्मिन्नधिकमित्यर्थे दशान्तात् शदन्तविंशतिभ्यां च डः स्यात्। डइत्। एकादश अधिका अस्मिन् शते एकादशम् शतम् एकादशाधिकमित्यर्थः। दशान्तात् किम् केवलदशतो मा भूत्। त्रिंशत् अधिका अस्मिन् त्रिंशं शतम्। एवं चत्वारिंशम् विंशतेस्तु डिति (२८१पृ॰२सू॰) तिलोपे। विंशम्।

१॰ १॰ १॰ ५ः १॰

तत्कृतमनेनेष्टादिभ्य इनिँः ॥ ८ ॥

तत्कृतमनेनेत्यर्थे इष्टादिभ्यः साम्तेभ्य इनिः स्यात्। इकारइत्। इष्टमनेन इष्टी अधीतमनेन अधीती। इष्टादिराकृतिगणः।

श्राद्धं भुक्तमनेनेति श्राद्धी श्राद्धिक इष्यते।
परान्वेष्टा त्वनुपदी शास्त्रकारैर्निपात्यते।*
अन्यदेहे चिकित्स्यस्तु रोगः चेन्निय इष्यते।

* प्रथमान्ताधिकारेऽपि मत्स्थात् पदानुष्टेत्यादि द्वितीयान्तप्रकृतिकस्योदाहरणमेवमन्येऽपि।

इन्द्रेण जुष्टे दत्ते वा स्यादिन्द्रियनिपातनम्

•१• ६• १• ५:• १•

तदस्य संजातं तारकादिभ्य इतः ॥ ९ ॥

तारकादिभ्यः प्रथमान्तेभ्यः संजातमस्येत्यर्थे इतः स्यात्। तारका संजाताऽस्य तारकितम् फलितम् तारकादि (सि०पू०६६६पृ०)

•१• ६• १• •१•

तदस्य पण्यं ठक् ॥ १० ॥

लवणं पण्यमस्य लावणिकः मौक्तिकः।

•१• ६• १•

तदस्य शिल्पम् ॥ ११ ॥

वृत्तिलाभोपयोगिद्रव्यं तदीयकौशलञ्च शिल्पम्। मृदङ्गं शिल्पमस्य मार्दङ्गिकः पाणविकः। अत्र मृदङ्गादिपदं तत्तद्वादने लाक्षणिकम्।

•१• ६• १• •१• ५: •१• •१•

तदस्य प्रहरणं ठक् शक्तियष्टिभ्यान्तु ईकक् ॥१२॥

प्रहरणमस्येत्यर्थे प्रथमान्तात् ठक् शक्तियष्टिभ्यान्तु ईकक्। प्रासः प्रहरणमस्य प्रासिकः कौन्तिकः। पारश्वधिकः। धानुष्कः। शाक्तीकः याष्टीकः।

•१• •१• १• •१• १• ६• •१•

अस्ति नास्ति दिष्टमिति मतिरस्य ठक् ॥ १३ ॥

अस्तीति, नास्तीति दिष्टं (सर्व्वं भाग्यकृतम्) इति च

मतिरस्येत्यर्थे ठक् स्यात् अस्तीति मतिरस्य आस्तिकः। एवं नास्तिकःदैष्टिकः।

•१• ६• १• •१• ५:••१• १•
तदस्य शीलं ठक् छत्रादिभ्यस्तु णः ॥ १४॥

शीलमस्येत्यर्थे प्रथमान्तात् ठक् छत्रादिभ्यस्तु णः। उदरं (तत्पूरणम्) शीलमस्य औदरिकः। धार्मिकः याज्ञिकः। गुरोर्दोषावरणं छत्रं तच्छीलमस्य छात्रः (सि०पू० ६११६पृ०) छत्रादिर्द्रष्टव्यः।

•१• ७• १• ८• १•
तदस्मिन् हव्यादिना दीयते कः ॥ १५॥

प्रथमान्तात् हव्यायलाभकरोत्कोचादिरूपेण दीयतेऽस्मिन्नित्यर्थे कः स्यात्। पञ्च हव्यादिना दीयन्तेऽस्मिन् शते पञ्चकम् दशकं द्विकमित्यादि

•१• ७• १• ७• ७••१•
सास्मिन् पौर्णमासी मासि संज्ञायामण् ।१६॥

सा पौर्णमासी अस्मिन् मासीत्यर्थे संज्ञायामण् स्यात् पौषी पौर्णमासी अस्मिन् मासे पौषः। एवं माघः फाल्गुन इत्यादि।

५• •१•
आग्रहायण्याः ठक् फाल्गुनीचैत्रीश्रावणीका-
५:• •१•
र्त्तिकीभ्यो वा ॥ १७ ॥

उक्तेऽर्थे। आग्रहायणी पौर्णमासी अस्मिन् मासे

आग्रहायणिकः पक्षेऽण्। फाल्गुनी पौर्णमासी अस्मिन् मासे फाल्गुनिकः फाल्गुनः। चैत्रिकः चैत्रः।

•१• ६• •१••१•

साऽस्य देवताण्॥ १८॥

प्रथमान्तात् देवताऽस्येत्यर्थेऽण् स्यात्। शिवोदेवता ऽस्य शैवः वैष्णवः।

५• १ः ५• •१•

माहेन्द्रात् घाणौ सोमाट्‌ट्यण्॥ १९॥

उक्तोऽर्थे। टणावितौ। माहेन्द्रियं माहेन्द्रम्। सौम्यं हविः टित्त्वात् स्त्रियामीपि

५• ६• ६• १• ७•

हलस्तद्धितयस्य भस्य लोपोऽनाति॥ २०॥

आकारादिभिन्ने प्रत्यये परे भसंज्ञकस्य हलःपरस्य तद्धितयस्य लोपः स्यात्। इति यलोपे सौमी। एवं सूर्य्योदेवतास्या इति अणि स्त्रियामीपि ३११पृ० १२सू०) यलोपे सौरी ऋक्।

५ः १•

वाय्वृतूषःपितृभ्यो यः॥ २१॥

अस्य देवतेत्यर्थे एभ्यो यः स्यात्। वायुर्देवताऽस्य वायव्यं ऋतव्यं उषस्यम्। पितुर्ये

•१•१• ७• ७•

ऋद्री ये तद्धिते॥ २२॥

ऋकारस्य रः स्यात्तद्धिते ये परे। पित्र्यम्।

५॰ ॰१॰
अग्नेर्ढक् ॥ २३ ॥

अग्निर्देवताऽस्य आग्नेयश्चरुः । आग्नेयी ऋक् ।

७॰ ६॰ १ः ॰।॰
संग्रामेऽस्य प्रयोजनयोद्धारावण् ॥ २४ ॥

संग्रामे वाच्ये प्रथमान्तात् प्रयोजनं योद्धा वास्येत्यर्थेऽण् स्यात् । सुभद्रा प्रयोजनमस्य सौभद्रः संग्रामः । भरता योद्धारोऽस्य भारतः संग्रामः ।

१॰ ६॰ १॰ ।॰ ॰१॰ ॰१॰
सोऽस्य निवासोऽभिजनो वाऽण् ॥ २५ ॥

प्रथमान्तात् निवासोऽस्येति अभिजनो वास्येत्यर्थेऽण् स्यात् । मथुरा निवासोऽभिजनो वाऽस्य माथुरः । संप्रति वासस्थानं निवासः । पूर्व्ववासस्थानमभिजनः

।ः॰ ।ः॰
पङ्क्त्यादयो निपात्याः ॥ २६ ॥

पङ्क्ति विंशति त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टि सप्तति अशीति नवति शत सहस्र पङ्क्त्यादि । पञ्च पदानि परिमाणमस्य पङ्क्तिश्छन्दः पदस्य द्व्यक्षरत्वात् द्विगुणितपञ्चाक्षरयुक्तपादकत्वात्तथात्वम् । द्वे दशके परिमाणमस्य विंशतिः एवं त्रीणि दशकानि परिमाणमस्येत्याद्यर्थे त्रिंशदादीनि निपात्यन्ते ।

इति प्रथमान्ताधिकृततद्धितप्रकरणम् ।

अथ द्वितीयान्ताधिकृततद्धिताः ।

द्वितीयायाः ॥ १ ॥

द्वितीयान्ताद्वक्ष्यमाणास्तद्धिताः स्युः ।

·२· ८· ·२· ८· ·१··१· ·१·

तदधीते तद्वेद वेत्यण् ॥ २ ॥*

द्वितीयान्तात् अधीते वेद वेत्यर्थेऽण् स्यात् । व्याकरणमधीते वेद वा वैयाकरणः । औपनिषदः ।

५·: ·१·

वेदादिभ्यष्ठक् ॥ ३ ॥

उक्तेऽर्थे एभ्य ष्ठक् स्यात् । वैदिकः । वेद पुराण संहिता न्याय तर्क ज्योतिष यज्ञ धर्म्म वृत्ति लक्षण निमित्त संग्रह सूत्रान्त वेदादि ।

५·: १·

मीमांसादिभ्यो वुः ॥ ४ ॥

मीमांसकः पदकः क्रमकः शिक्षकः ।

छन्दोऽधीते छान्दसः स्यात् श्रोत्रियोऽत्र निपात्यते ।

२· ८· ७: ·१· ५· ·१· १·

तद्गच्छति पथिदूतयोरणनुपदात्तु खः ॥ ५ ॥

पथिदूतयोर्व्वाच्ययोर्द्दितीयान्ताद्गच्छतीत्यर्थे ऽण् अनुपदात्तु खः स्यात् । मथुरां गच्छति दूतः पन्था वा माथुरः । अनुपदं गच्छति अनुपदीनः ।

---

* अक्षरग्रहणमात्रमध्ययनम् अर्थज्ञानं वेदनमित्यनयोर्भेदादुभयार्थग्रहणम् ।

॰।॰ ७॰ ७॰ ॰।॰

अधिकृत्य कृते ग्रन्थेऽण् ॥ ६ ॥

द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽण् स्यात् । सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः शाकुन्तलः ।

७॰ ॰।॰ ॰२॰

आख्यायिकायां वा लुप् ॥ ७ ॥

पूर्व्वसूत्रेण कृततद्धितस्य लुप् स्याद्वा आख्यायिकारूपे ग्रन्थे वाच्ये। वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता। शकुन्तला तद्धितलुपि प्रकृतिलिङ्गतेति स्त्रीत्वम् ।

५॰ ।॰ ।॰

द्वन्द्वाच्छो बहुलम् ॥ ८ ॥

द्वन्द्वसमाससाध्याद्द्वितीयान्तादुक्तेऽर्थे बहुलं छः स्यात् । छस्य ईय्। वाक्यस्य पदस्याधिकृत्य कृतं प्रकरणं वाक्यपदीयम् किरातस्यार्ज्जुनस्याधिकृत्य कृतं काव्यं किरातार्ज्जुनीयम्। बहुलग्रहणात् मालतीमाधवमित्यत्र पूर्व्वेणाणेव ।

तद्वृत्तीति ठक् प्रोक्तस्तेन सामाजिको भवेत् ।
तत्करोतीति शब्दात् ठक् शाब्दिकस्ते न कीर्त्तितः ।
पक्षिमीनमृगान् हन्तीत्यर्थे शाकुनिकादयः ।
धावत्यर्थे त्वनुपदात् ठकानुपदिकः स्मृतः ।
ललाटात् पश्यतीत्यर्थे भवेत् लालाटिकष्ठका ।
अर्थे ष्टक्षात्वायिकः स्यात् धर्म्मं चरति धार्म्मिकः ।

रथात् रथ्यं युगाद्युग्यं वहत्यर्थे यता भवेत् ।
शकटादण् वहत्यर्थे शाकटं तेन कीर्त्तितम् ।
विध्यत्यर्थे पदात् येन पद्या स्यात् शर्करादिका ।
ज्ञेयो धन्यो धनं लब्धा गणाद्गण्यस्तथा मतः ।*
वशाद्वश्यो गते त्वर्थे यता चैते बुधैः स्मृताः ।
अलं गच्छत्यध्वनः खो यश्च तस्माद्विधीयते ।
तेनाध्वनीनोऽध्वन्यश्च क्रमादेतौ मतौ सताम् ।
अलं यातीत्यभ्यमित्रात् यखौ छश्च विधीयते ।
अभ्यमित्र्योऽभ्यमित्रीणोऽप्यभ्यमित्रीय इत्यपि ।
वहत्यर्थे धुरो ढः स्यात् यत् खश्च क्रमशो भवेत् ।
धौरेयस्तेन धुर्यः स्यात् धुरीणश्चापि धूर्वहे ।
धुरः सर्व्वधुरीणः स्यात् सर्व्वादेः खे तदर्थके ।
आपन्नार्थे संशयात् ठक् तेन सांशयिको मतः ।†
गच्छत्यर्थे योजनात् ठक् तेन यौजनिकः स्मृतः ।
पथष्ठक् स्यात्तदर्थे च पथिकः पथिकी स्त्रियाम् ।
नित्यं यातीति पान्थः स्यात् पथो णेन निपात्यते ।

५० ८० ०१० ५० १००।०

संघात् समवैति ठक् सेनाया ण्यश्च ॥ ८ ॥

द्वितीयान्तात् संघवाचिनः समवैतीत्यर्थे ठक् सेनाया ण्यश्चात् ठक् । सामूहिकः । सैन्यः सैनिकः ।

* गर्व्वं गणनां प्रशंसया संख्यानमिति यावत् तं सर्व्वोत्कर्षात् गण्यः प्रशंसनीय इत्यर्थः ।

† संशयशब्दस्य तद्विषयत्वपरत्वे सांशयिकः विषयोऽपि भवतीति द्रष्टव्यम् । अतएव सांख्यतत्त्वकौमुद्यां सांशयिकेन गृहस्थत्वेनेत्युक्तम् ।

·२ ८·१· ·१· ५· ·१·

समावेशयति पचतीति वा परिमाणात् ठक् ॥१०॥

द्वितीयान्तात् परिमाणवाचिनः समावेशयति, पचतीति वार्थे ठक् स्यात् । प्रस्थं समावेशयति प्रास्थिकः कटाहः द्रोणं पचति द्रौणिका ब्राह्मणी ।

२· ८· ·१· ·१·

तदर्हतीति यत् ॥ ११ ॥

सोममर्हतीति सोम्यो विप्रः । शीर्षच्छेदमर्हतीति शीर्षच्छेद्यश्चौरः दण्ड्यः वध्यः कशामर्हतीति कश्यः अर्घ्यः स्तुत्यः भाग्यः दृश्यः मूल्यम् ।

अर्हत्यर्थे तु शालायाः खे शालीनः सलज्जकः ।

कडङ्गरीयश्छेन स्यादर्हत्यर्थे कडङ्गरात् ।

५:· १: ५· १:

शतादिभ्योयठकौ पात्रादघयौ ॥१२॥

शतमर्हतीति शत्यः शतिकः । पात्रमर्हतीति पात्रियः पात्र्यः ।

५· १:

दक्षिणायाश्छयञौ ॥ १३॥

दक्षिणामर्हतीति दक्षिणीयः दाक्षिण्यः ।

५· १· ५· ·१· ·२· ८· ·१·

यज्ञाद्घ ऋत्विजः खञ् तत्कर्मार्हतीति ॥१४॥

तत्कर्मार्हतीत्यर्थे यज्ञात् घः, ऋत्विजः खञ् स्यात् यज्ञकर्मार्हति यज्ञियः । आर्त्विजीनः ।

·२· ८· ५· ·१· ५··१· ·१·

तद्व्याप्नोति कालाट्ठक् द्विगोर्लुग्वा ॥१५॥

व्याप्नोतीत्यर्थे कालवाचिनष्ठक् स्यात् द्विगोस्तु तस्य वा लुक्। पक्षं व्याप्नोति पाक्षिकं मासिकं चान्द्रायणमशौचञ्च। दाशाह्निकं दशाहम् द्वादशरात्रिकं द्वादशरात्रं त्रैवार्षिकं त्रिवर्षं षाड्वार्षिकं षड्वर्षम्।

५: ५: १·

पथ्यङ्गकर्म्मपात्रपत्रेभ्यः सर्व्वादिभ्यः खः ॥१६॥

व्याप्नोतीत्यर्थे एभ्यः खः स्यात्। सर्व्वपथं व्याप्नोति सर्व्वपथीनः। सर्व्वाङ्गीनः। सर्व्वकर्म्मीणः।

८· ५· १·

प्राप्नोत्याप्रपदात् खः ॥ १७ ॥

आप्रपदं प्राप्नोति आप्रपदीनः।

८· ·१· ५: १:

अनुभवतीति परम्परापुत्रपौत्राभ्यां खञ्खौ ॥१८॥

अनुभवतीत्यर्थे आभ्यां क्रमेण खञ्खौ स्तः। परम्परामनुभवति पारम्परीणः पुत्रपौत्राननुभवति पुत्रपौत्रीणः।

५: ७· १·

अवारपारात्यन्तानुकामेभ्यो गन्तरि खः ॥१९॥

एभ्योगन्तर्य्यर्थे खःस्यात्। अवारंगन्ता अवारीणः अवारपारेति व्यस्तस्य समस्तस्य विपरीतस्यापि ग्रहणं तेन अवारपारीणः पारावारीणः।

१॰ १॰ ७॰ ८॰

समांसमीना प्रतिवर्षं प्रसूतायां निपात्यते ॥२०॥

समां समां प्रसूते समांसमीना ।

२॰ ८॰ १॰ १॰

तदर्हतीति वत् ॥२१॥

राजानमर्हतीति राजवत् पूज्यवत् । यथावत् ।

इति द्वितीयान्ताधिकृततद्धितप्रकरणम् ।

अथ तृतीयान्ताधिकृततद्धिताः ।

५॰

तृतीयायाः ॥१॥

तृतीयान्ताद्वक्ष्यमाणाः प्रत्ययाः स्युः ।

२॰ १॰ ५॰॰१॰

तेन रक्तं—रञ्जनादण् ॥२॥

तेन रक्तमित्यर्थे तृतीयान्ताद्रञ्जनवाचिनोऽण् स्यात् । मञ्जिष्ठया रक्तं माञ्जिष्ठं स्त्रियामीपि माञ्जिष्ठी ।

५: ॰१॰

लाचारोचनाभ्यां ठक् ॥३॥

तेन रक्तमित्यर्थे आभ्यां ठक् स्यात् । कद्रुत् । लाक्षिकं रौचनिकम् ।

५॰ १॰ ५॰१॰

नील्या अः पीतात् कः ॥४॥

नील्या रक्तं नीलम् पीतेन रक्तं पीतकम् ।

२· १· ७· ५· ·१· ६· ·१·१· ·१·

तेन युक्तं काले नक्षत्रादण् तस्य च वा लुक् ॥५॥

काले वाच्ये तेन युक्तमित्यर्थे नक्षत्रवाचिनोऽण् स्यात् तस्य च वा लुक् । पुष्येण युक्ता रात्रिः अणि स्त्रियामीपि (३११पृ० १२सू०) यलोपे पौषी श्रवणेन युक्तः कालः श्रावणः पक्षे पुष्यं श्रवणम् ।

२· १· ७· ·१·

तेन परिवृतं रथेऽण् ॥६॥

रथे वाच्ये तेन परिवृतमित्यर्थेऽण् स्यात् । समन्ताद्वेष्टितः परिवृतः । चर्म्मणा परिवृतो रथः चार्म्मणः ।

२· ·१··१··१·

तेन ग्राह्यादीत्यण् ॥७॥

तृतीयान्तात् ग्राह्यमित्याद्यर्थे अण् स्यात् । चक्षुषा ग्राह्यम् चाक्षुषं रूपम् श्रावणः शब्दः रासनो रसः । अश्वैरुह्यः आश्वोरथः वृषभैर्वाह्यं वार्षभं शकटम् ।

२· ·१··१··१·५··१·१·

तेनैकदिगित्यणुरसस्तु यः ॥८॥

एका समाना दिक् स्थानं यस्य स एकदिक् । एकदिगित्यर्थे तृतीयान्तादण् स्यात् उरसस्तु यः । सुदाम्ना पर्व्वतेनैकदिक् सौदामनी (४२१पृ०२४सू०) न नलोपः । उरसैकदिक् उरस्यम् ।

२० १०.१० .१० ५०.२..१०

तेन कृतमित्यण् पाणिनेस्तु छः ॥९॥

तृतीयान्तात् कृतमित्यर्थेऽण् स्यात्। पाणिनेस्तु छः। मक्षिकाभिः कृतं माक्षिकं सारघं मधु। पाणिनिना कृतं पाणिनीयं व्याकरणम्।

२० ८० १० ३० ८०.१..१० .१०

तेन दीव्यति जितं खनति तरति वेति ठक् ॥१०॥

तृतीयान्तात् दीव्यतीत्याद्यर्थे ठक् स्यात्। अक्षैर्दीव्यति जितो वा आक्षिकः। खनित्रेण खनति खानित्रिकः। उडुपेन तरति औडुपिकः।

२० ८०.१० .१० ५०:.१० १० ५०

तेन चरतीति ठक् रथादिभ्यस्तु ठः खगणादुभयम् ॥११॥

१०

तृतीयान्ताच्चरतीत्यर्थे ठक्, रथादिभ्यस्तु ठः, खगणात् ठक्ठौ स्तः। हस्तिना चरति हास्तिकः। रथिकः आश्विकः। खागणिकः खगणिकः।

२० ८..१ ५०:.१०.५० .१० .१०

तेन जीवतीति वेतनादिभ्यष्ठक् व्रतात्तुखञ् ॥१२॥

वेतनेन जीवति वैतनिकः। धनुषा-धानुष्कः (४१९पृ० ४सू०) ठस्य कः। वाहन जाल वेश शक्ति उपदेश पाद उपस्थान वेतनादि। व्रातीनः।

२॰ ८॰ ५॰ १॰

तेन प्रवर्त्तते सहओजोऽओभ्यष्ठक् ॥१३॥

सहसा (बलेन) प्रवर्त्तते साहसिकः ओजसिकः।

२॰ १॰ ॰१॰ ५॰१॰

तेन संयुक्तमिति गृहपतेर्ण्यः ॥१४॥

गृहपतिना संयुक्तः गार्हपत्योऽग्निः।

२॰ ७॰ ५॰१॰ ५॰ ॰१॰१॰॰

तेन निर्म्मिते छन्दसो यउरसोऽण् च ॥१५॥

छन्दसा निर्म्मितं छन्दस्यम्। उरस्यः औरसः।

२॰ १॰ ५॰ ॰१॰ ५॰॰१॰१॰ ६॰॰१॰

तेन साध्यं सप्तपदात् खञ् द्विगोस्तु खस्तस्य च

॰१॰ ॰१॰

न लुक् ॥१६॥

सप्तभिः पदैः (उच्चारितैः) साध्यं साप्तपदीनं मैत्रम्। द्वाभ्यामहोभ्यां साध्यो द्व्यहीनो यज्ञः। खस्यात न लुक्।

२॰ १॰ १ः

तेन वित्तं चुञ्चु चणौ ॥१७॥*

विद्यया वित्तः (ख्यातः) विद्याचुञ्चुः विद्याचणः।

इमौ धवन्ताभ्रिर्वृत्ते पाकिमादि ततो भवेत्।

संरावादेर्णिनो व्याप्तौ तेन सांराविणादयः॥

नावा तार्य्ये तु नाव्यः स्यात् वयस्यो वयसा समे।

तुलया संमिते तुल्यो मूल्यं मूलसमे यता॥

---

* चणप्रत्ययस्य मूर्द्धन्यणत्वमप्यर्षाय केचिदिच्छन्ति।

३॰ १:॰ ५॰ १॰

तेन परिजय्यलभ्यकार्य्याः कालात् ठक् ॥१८॥

तृतीयान्तात् परिजय्याद्यर्थे कालवाचकात् ठक् स्यात्। मासेन परिजय्यः (जेतुं शक्यः) मासिको व्याधिः। मासेन लभ्यं मासिकं वेतनम्। मासेन कार्य्यं मासिकं चान्द्रायणम्।

१:॰ १:॰

अषडक्षीणालंकर्म्मीणालंपुरुषीणा निपात्याः ॥१९

षड्भिरक्षैः (इन्द्रियैः कर्णैः) न क्षुतः अषडक्षीणो मन्त्रः द्वाभ्यामेव कृत इत्यर्थः। अलंकर्म्मणे अलं कर्म्मीणः अलंपुरुषाय अलंपुरुषीणः।

३॰ ७॰ १॰

तेन तुल्यक्रियायां वतिः ॥२०॥

तृतीयान्तात् तुल्यक्रियायां द्योत्यायां वतिः स्यात् इकारश्चेत्। मैत्रेण तुल्यं पचति मैत्रवत् अत्र मैत्रतुल्यक्रियातुल्या प्रकृतक्रियेति गम्यते। वत्यन्त-त्वादव्ययत्वम्।

इति तृतीयान्ताधिकृततद्धितप्रकरणम्।

अथ चतुर्थ्यन्ताधिकृततद्धिताः।

५॰

चतुर्थ्याः ॥१॥

चतुर्थ्यन्ताद्वक्ष्यमाणाः प्रत्ययाः स्युः।

४॰ १॰ १॰ ५: १॰ ७॰ १॰ ०।॰

तस्मै हितमित्यवयव रथाभ्यां यः संज्ञायां स च

७॰

स्त्रियाम् ॥२॥

दन्ताय हितम् दन्त्यम् नसि हितं नस्यं शिरस्यम्।
रथाय हिता रथ्या सुपद्धतिः।

५: ०१॰

कर्मन् ब्रह्मभ्यां च ॥३॥

कर्मणे हितं कर्मण्यम् ब्रह्मण्यम्।

५॰: १॰

आत्मन्विश्वजनसर्व्वजनपञ्चजनभोगान्तेभ्यः खः ॥४॥

एभ्यः खः स्यात् हितार्थे। आत्मनीनः (४२३पृ॰ २५सू॰) नलोपाभावः। विश्वजनीनः। सर्व्वभोगीनः।

५॰ ७॰ ७॰ १॰

विकृतेस्तदर्थायां प्रकृतौ छः ॥५॥

चतुर्थ्यन्तात् विकृतिवाचकात् तदर्थायां प्रकृतौ वाच्यायां छः स्यात्। अङ्गारेभ्य इमानि अङ्गारीयाणि काष्ठानि। कुण्डलाय इदं कुण्डलीयं स्वर्णम्।

५॰ ०१॰

वलेर्ढक् ॥६॥

उक्तेऽर्थे। वलये इमे वालेयास्तण्डुला।

७॰ ८॰ ५॰: ०१॰

तस्मै प्रभवति संग्रामादिभ्यष्ठक् ॥७॥

तस्मै प्रभवतीत्यर्थे चतुर्थ्यन्तेभ्य एभ्य ठक् स्यात्। संग्राम संनाह संयोग संपराय संवेश संसर्ग

निसर्ग उपसर्ग प्रवास उपवास संघात संताप संग्रामादि। संग्रामाय प्रभवति सांग्रामिकः।

५॰ १ः

योगाद्यठकौ॥८॥

उक्तेऽर्थे योगाद्यठकौ स्तः। योग्यः यौगिकः।

५॰ ॰१॰

कर्म्मण उकञ्॥९॥

कर्म्मणे प्रभवति कार्म्मुकम्।

७॰ ५॰ ॰१॰

तादर्थ्ये देवतान्तात् यः॥१०॥

तादर्थ्ये चतुर्थ्यन्तात् देवतान्तात् यः स्यात्। पितृदेवतायै इदम् पितृदेवत्यम्। अग्निदेवत्यम्।

५ः ॰१॰ ६॰ ॰१॰

पाद्यार्घाभ्यां चातिथेर्ञ्यः॥११॥

चतुर्थ्यन्ताभ्याम् आभ्यामपि तादर्थ्ये यः। अतिथेस्तु ञ्यः। ञ्यत्। पादाय इदं पाद्यम् अर्घ्यम् अतिथये इदम् आतिथ्यम्।

२॰ ८॰ ॰१॰ ५॰ ॰१॰ १॰ ॰१॰

तदर्थं प्रयच्छति ठक् वृद्धेस्तु वृधुषिश्च॥१२॥

तदर्थं प्रयच्छतीत्यर्थे चतुर्थ्यन्तात् ठक्, वृद्धिशब्दस्य तु वृधुषिरादेशश्च स्यात्। द्विगुणाय प्रयच्छति द्वैगुणिकः। वृद्धये प्रयच्छति वार्द्धुषिकः। मूलादधिकलाभो वृद्धिः।

५॰ ॰१॰

कुसीदात् ठः ॥१३॥

कुसीदाय (वृद्धैर) प्रयच्छति कुसीदिकः ।

इति चतुर्थ्यन्ताधिकृततद्धितप्रकरणम् ।

अथ पञ्चम्यन्ताधिकृततद्धिताः ।

५॰

पञ्चम्याः ॥१॥

पञ्चम्यन्ताद्वक्ष्यमाणाः प्रत्ययाः स्युः ।

५॰ १॰ ॰१॰ ॰१॰ ५ः॰ ॰१॰ ॰१॰

तत आगत इत्यण् तीर्थाय स्थानेभ्यस्तु ठक् ॥२॥

आगत इत्यर्थे पञ्चम्यन्तादण् स्यात् तीर्थात् आय स्थानवाचिभ्यश्च ठक् । मथुराया आगतः माथुरः । तीर्थादागतः तैर्थिकः शुल्कशालातआगतः शौल्कशालिकः । आपणिकः ।

५ः॰ ॰१॰

विद्याजन्मसंबन्धिभ्यो वुञ् ॥३॥

आगत इत्यर्थे पञ्चम्यन्तात् विद्यासंबन्धिनो जन्मसंबन्धिनश्च वुञ् स्यात् ञइत् । उपाध्यायादागतः औपाध्यायिकः । पितामहादागतः पैतामहकम् ।

५॰ ॰१॰ ५॰ ॰१॰ १॰ ॰१॰

ऋतष्ठक् पितुस्तु यश्च ॥४॥

ऋदन्तेभ्यस्तेभ्यष्ठक् स्यात् पितृशब्दात्तु यथात् ठक्

स्यात्। मातृकं भ्रातृकम्। पितुस्तु पित्र्यं पैतृकम्।

५.　　८.१.१.　　५.१.१.

तस्मात् प्रभवतीत्यण् विदूरात्तु ञ्यः ॥५॥

पञ्चम्यन्तात् प्रभवतीत्यर्थेऽण् विदूरशब्दात्तु ञ्यः स्यात्। हिमवतः प्रभवति हैमवती गङ्गा। विदूरात् प्रभवति वैदूर्य्योमणिः।

५.　　७.　　५.१.

तस्मादनपेते धर्म्मपथ्यर्थन्यायेभ्यो यः ॥६॥

धर्म्मादनपेतः धर्म्म्यः पथ्यः अर्थ्यः न्याय्यः।

इति पञ्चम्यन्ताधिकृततद्धितप्रकरणम्।

अथ षष्ठ्यन्ताधिकृततद्धिताः।

५.

षष्ठ्याः।

षष्ठ्यन्ताद्वक्ष्यमाणाः प्रत्ययाः स्युः। अधिकारोऽयम्।

६.　　१.　　१.१.

तस्यापत्य—मित्यण् ॥१॥

षष्ठ्यन्तात् अपत्यमित्यर्थेऽण् स्यात्। यदोरपत्यं यादवः।

५.　　१.　　५.

दित्यदितियमपत्यन्तेभ्योण्योऽगणपतेः ॥२॥

अपत्यमित्यर्थे षष्ठ्यन्तेभ्य एभ्यो ण्यः स्यात् न तु

गणपतेः। अणोऽपवादः। दितेरपत्यं दैत्यः आदित्यः*
याम्यः आधिपत्यः प्राजापत्यः गणपतेस्तु गाणपतः।

५० ५:० ०१० ०१०

अतो बाह्वादिभ्यश्चेञ् ॥४॥

अपत्यमित्यर्थेऽदन्तात् बाह्वादिभ्यश्च इञ् स्यात्। दशरथस्यापत्यं दाशरथिः। (सि० पू० ४६८पृ०) बाह्वादिर्द्रष्टव्यः। बाहविः सौमित्रिः।

६० ०१० ७०

व्यासस्याकङ् इञि ॥५॥

इञि परे व्यासस्याकङ् स्यात् ङ्इत्। वैयासकिः।

७० ७० ०१० ५:० ०१०

गोत्रे—भवे च नडादिभ्यः फञ् ॥६॥

गोत्रेभवे चार्थे एभ्यः फञ् स्यात्। ञ्इत्। फस्यायन्। (सि० पू०४६८पृ०) नडादि। द्वैपायनः नारायणः।

५:० ०१०

गर्गादिभ्यो यञ् ॥७॥

गोत्रेऽर्थे एभ्यो यञ्। (सि० पू० ५०१पृ०) गर्गादि द्रष्टव्यः। गार्ग्यः वात्स्यः। आगस्त्यः पौलस्त्यः।

५:० ०१० ७० ०१०

विदादिभ्योऽञपत्ये च ॥८॥

एभ्यो गोत्रेऽपत्ये चाञ् स्यात्। इञाद्यपवादः। (सि० पू०५०१पृ०) विदादि। वैदः और्वः काश्यपः पौत्रः दौहित्रः कौशिकः भारद्वाजः। शौनकः।

* शुभ्रादित्वाददितेः ढक् अयं वक्ष्यते तेन दैतेयः

७॰ ५: ७॰ ॰१॰ ५॰ ॰१॰ ॰१॰ ॰१॰

गोत्रे यञिञ्भ्यां यूनि फञ् द्रोणात्तु फिञ् वा ॥९॥

गोत्रे यौ यञिञौ तदन्ताभ्यां युवसंज्ञकेऽपत्ये फञ् स्यात् द्रोणात्तु फिञ् वा । गर्गस्यापत्यं युवेत्यर्थे यञि तदन्तात् फञि च (४४४पृ० २सू०) यलोपनिषेधे गार्ग्यायणः वात्स्यायनः । दक्षस्य गोत्रापत्यं युवेतीञि फञि च इवर्णलोपे दाक्षायणः । द्रोणस्य तु इञि फिञि च द्रौणायणिः पक्षे इञि द्रौणिः ।

५:॰ ॰१॰ ७॰

शिवादिभ्योऽणपत्ये—॥१०॥

अपत्येऽर्थे एभ्योऽण् स्यात् । इञोऽपवादः । (सि० पू० ५०४पृ०) शिवादिर्द्रष्टव्यः । शैवः ।

५:॰

नदीमानुषीपर्य्यायेभ्यः ॥११॥

एभ्योऽपि अण् स्यात् । ढकोऽपवादः । नद्याः यामुनः सारस्वतः । गाङ्गेयस्तु देवत्वविवक्षया नदीपरत्वे गाङ्ग इत्येव । मानुष्याः पार्थः सौभद्रः । आबन्तादेवाण् ईबन्तात्तु ढगेव तेन कौन्तेयः द्रौपदेयः ।

५:॰ ॰१॰

ऋष्यन्धकवृष्णिकुरुवंशेभ्यो वा ॥१२॥ *

एभ्योऽप्यपत्ये अण् स्याद्वा । पक्षे इञादिः । मन्त्रद्रष्टार ऋषयः । वासिष्ठः गौतमः । वैश्वामित्रः । अन्धक-

---

* वाग्रहणमपाणिनीयमपि नाकुलिः आर्जुनिः फाल्गुनिः कार्ष्णिरित्यादिभूरिप्रयोगमनुसृत्य कृतम् ।

वंशात् आन्धकः। वृष्णिवंशात् वासुदेवः आनिरुद्धः। कुरुवंशात् नाकुलः साहदेवः। पक्षे इञ्।

५० ५० ०१० ०१० ०१०

संख्यादेर्मातुरण् उर् च ॥१३॥

संख्यापूर्व्वात् मातृशब्दादण् स्यादपत्ये मातुरुर् च। द्वयोर्मात्रोरपत्यं द्वैमातुरः षाण्मातुरः।

५: ०१० ५: ५० ७०

पुंस्त्रीभ्यां च ताभ्यां स्नञावणि ॥१४॥

आभ्यामपत्येऽर्थेऽण् ताभ्याञ्च क्रमेणाणि परे स्नञावागमौ स्याताम्। पुंसोऽपत्यम् पौंस्नः स्त्रियाःस्त्रैणः। इदमाद्यर्थेऽपीष्यते।

५० ०१० ०१०

कन्यायाः कनीन् च ॥१५॥

कन्याशब्दादण् स्यात् तस्याश्च कनीनादेशः। ढकोऽपवादः। कन्याया अपत्यं कानीनः।

५:० ०१०

स्त्रीभ्यो ढक् ॥१६॥

स्त्रीप्रत्ययान्तेभ्योऽपत्ये ढक् स्यात्। सरमाया अपत्यम् सारमेयः वैनतेयः रौहिणेयो बुधः।

५० ५० ५० ५:० ०१०

इयचोऽनिञइतः शुभ्रादिभ्यश्च ॥१७॥

इञन्तभिन्नात् द्विस्वरयुक्तादिदन्तात् शुभ्रादिभ्यश्चापत्ये ढक् स्यात्। अत्रि-आत्रेयः। अग्नि-आग्नेयः।

शुभ्रादि (सि॰पू॰५॰६पृ॰) द्रष्टव्यम्। शौभ्रेयः मार्कण्डेयः काद्रवेयः। आदितेयः वैमानेयः।

६॰ ॰१॰ ७॰

कल्याण्यादीनामिनङ् ढकि ॥१८॥

ढकि परे आसामिनङादेशः स्यात्। (सि॰पू॰५॰८ पृ॰) कल्याण्यादि। सौभागिनेयः दौर्भागिनेयः।

५ः ५॰ १ः ७॰ १॰॰१॰

मातृपितृभ्यां स्वसुश्छण्ठकौ ढकि लोपश्च ॥१०॥

आभ्यां परस्मात् स्वसृशब्दादपत्येऽर्थे छण्ठकौ स्तः ढकि परे तयोरन्त्यलोपश्च। मातृष्वस्रीयः मातृष्वसेयः पितृष्वस्रीयः पितृष्वसेयः।

५ः १॰

राजन्श्वशुराभ्यां यः ॥२०॥

आभ्यामपत्ये यः स्यात्। राजन्यः श्वशुर्य्यः।

५॰ १॰ ७॰

क्षत्राद्घो जातौ ॥२१॥

क्षत्रियो जातिः क्षात्रिरन्यः।

५॰ १॰

कुलात् खः ॥२२॥

कुलीनः।

सत्कुलात् खे सत्कुलीनः सकुल्यः सकुलाद्यता। खञा माहाकुलीनः स्यात् दौष्कुलेयो ढका तथा।

५· १·   ५·१··१·

स्वसुश्छो भ्रातुर्व्यश्च ॥२३॥

चात् छः। स्वस्रीयः। भ्रातृव्यः भ्रात्रीयः।

५· ७· १: ·१··१·

मनोर्जातावञ्यौ षुक्च ॥२४॥

मनोरपत्यं मानुषः मनुष्यः।

अपत्ये कुत्सिते मूढ़े मनोरौत्सर्गिके त्वणि।

नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणवः।*

५··१·

जनपदवचनक्षत्रियादञ् ॥२५॥

जनपदवाचकशब्दस्य क्षत्रियपरत्वे तदन्तादपत्येऽर्थेऽञ् स्यात्। पाञ्चालः कैकयः कैकटः ऐक्ष्वाकः निपातनादन्त्यलोपः।

५··१·

द्व्यञ्मगधकलिङ्गादण् ॥२६॥

द्व्यचः, आङ्गः वाङ्गः सैन्धवः। मागधः कालिङ्गः।

५:· १·

कुर्व्वादिभ्यो ण्यः ॥२७॥

अपत्येऽर्थे एभ्यो ण्यः। कौरव्यः। काव्यः। (सि० पू०५१८ सू०)

५:· ·१·

वृद्धेत्कोशलेभ्यः ष्यञ् ॥२८॥

वृद्धात् मालव्यः। इतः आवन्त्यः। कौशल्यः।

---

* तदुत्तरं स्वार्थकेऽके माणवकोऽपि कुत्सितार्थस्यैव द्योतनात् न तदर्थके इति बोध्यम्।

५। ।१।
पाण्डोर्ड्यण् ॥ २९ ॥
इच्कत्वेनाणि द्व्यच्त्वेन ण्यत्रि च प्राप्ते आरम्भः। पाण्ड्यः।

५।। ७। ६। ।१। २। ।१।
यस्कादिभ्यो गोत्रे विहितानां लुप् तेनैव बहु-
७। ७।
त्वेऽस्त्रियाम् ॥२०॥
यस्कादिभ्यो गोत्रेऽर्थे विहितानां लुप् स्यात् तदन्त-त्वेनैव बहुत्वे न तु स्त्रियाम्। यस्क अत्रि भृगु कुत्स वसिष्ठ गोतम अङ्गिरस् यस्कादि। यस्काः। अत्रयः भृगवः। बहुत्वे किम् आत्रेयः आत्रेयौ इत्यत्र न। तेनैव किं प्रियभार्गवाः। स्त्रियां तु आत्रेय्यः। आपत्यार्थका अपि केचित् प्रत्ययाः भवाद्यर्थे भवन्ति प्रयोगानुसारात्ते चावगन्तव्याः।

इति षष्ठ्यन्ताधिकारे अपत्यार्थतद्धितप्रकरणम्।

अथ षष्ठ्यन्ताधिकारे तद्राजाद्यर्थीयाः।

५।। १।। ६।। ७।
जनपदवाचिक्षत्रियेभ्यो विहितास्तेषां राजनि॥१॥
जनपदवाचिक्षत्रियरूढेभ्यो विहिता अणादयस्तद्रा-जनि (तेषां राजनि) अप्यर्थे स्युः। पञ्चालानां राजा पाञ्चालः कैकेयः। आङ्गः वाङ्गः मागधः।

६॰ १॰ २॰॰१॰ ७॰ ७॰

तद्राजस्य लुप् तेनैवार्थबहुत्वेऽस्त्रियाम् ॥२॥

तद्राजार्थकप्रत्ययस्य लुप् स्यात् तदन्तत्वेनैव बहुत्वे न तु स्त्रियाम्। पञ्चालानां राजानः पञ्चाला अङ्गाः वङ्गाः। बहुत्वे किं वाङ्गः वाङ्गौ। तेनैव किं प्रियो वाङ्गो येषां ते प्रियवाङ्गा इत्यादौ समासकृतबहुत्वे न। स्त्रियान्तु आङ्ग्यः वाङ्ग्यः।

७॰ ५ः॰

स्त्रियां कुरुकुन्त्यवन्तिभ्यः ॥३॥

एभ्यः परस्य तद्राजार्थकप्रत्ययस्य लुप्स्यात् स्त्रियाम्। कुरूः अत्र ण्यस्य लुपि (२१७पृ० २२सू०) ऊङ्। कुन्ती अवन्ती उभयत्र ण्यञः ञित्वात् स्त्रियामीप्। लुपा लुप्तत्वेनोभयत्र स्त्रीत्वम्।

६॰ १॰ ॰१॰॰१॰ ५ः॰॰१॰

तस्य समूह इत्यण् भिक्षादिभ्यश्च ॥४॥

षष्ठ्यन्तात् भिक्षादिभ्यश्च समूह इत्यर्थेऽण् स्यात्। भिक्षादिग्रहणं बाधकप्रत्ययबाधनार्थम्। काकानां समूहः काकम् औलुकं वाडवम् श्वानम् कापोतं मायूरम् भिक्षादि। (सि०पू०५२४पृ०) भैक्षम्।

५ः॰ १॰ ५ः॰ १॰

वृक्षवाचिभ्यः खण्डो दूर्वादिभ्यः काण्डः ॥५॥*

एतेभ्यः क्रमेणैतौ स्तः समूहेऽर्थे। वृक्षखण्डः तरु-

---

* केचित् खण्ड इत्यत्र षण्ड इत्येव पठन्त्युदाहरन्ति च

खण्ड: पादपखण्ड:। दूर्व्वाकाण्डम् तमस्काण्डम् कर्म्मकाण्डम्।

५:· ·१·

इष्टीचादिभ्यो वुञ् ॥६॥

उष्ट्रादि (सि०पू०५३४पृ०) वार्षकम् औष्ट्रकं राजन्यकम्।

गणिकायास्तु गाणिक्यं केदारात् ठञ् यञौ च वुञ्।
कैदारिकं च कैदार्य्यं कैदारकमपीष्यते।

५:· ·२·

अचित्तधेनुहस्तिभ्यष्ठक् ॥७॥

अचित्तात् आपूपिकं शाष्कुलिकम्। धैनुकं हास्तिकम्

५· १: ५· १:

अश्वाच्छाणौ केशादयञ् ठकौ ॥८॥

अश्वीयम् आश्वम्। कैश्यम् कैशिकम्।

पाश: पक्षश्च हस्तश्च स्युरेते केशतो गणे।
केशपाश: केशपक्ष: केशहस्तस्ततो भवेत् ॥

५:·१· १· ·१· ७·

ग्रामजनगजबन्धुसहायेभ्यस्त: स च स्त्रियाम् ॥९॥

एभ्य: समूहे त: स्यात्तदन्तस्य स्त्रियाम्। ग्रामता जनता बन्धुता।

५:· १·

पाशादिभ्यो य: ॥१०॥

एभ्यो य: स च स्त्रियाम्। पाश्या तृण्या वात्या धूम्या

५: ·१·

कमलादिभ्य इनिः ॥११॥

एभ्य इनिः स च स्त्रियाम्। इकारइत्। कमल पद्म अम्भोज सरोज कुमुद नल कैरव कमलादि। कमलिनी कुमुदिनी। नलिनी उपचारात्तद्दृक्षेऽप्येतदन्तं प्रयुज्यते।

६·१· ·१··१·

तस्येदमित्यण् ॥१२॥

षष्ठ्यन्तादिदमर्थेऽण् स्यात्। सिन्धोरिदं सैन्धवम्।

५· १·

रथाद्यः ॥१३॥

रथस्येदं रथ्यम्।

५:· ·१·

वाहनाध्वर्युपरिषद्भ्योऽञ् ॥१४॥

हास्तिनं वार्षभम् औष्ट्रम्। आध्वर्यवम् पारिषदम्।

५: ·१·

छन्दोगनटाभ्यां यः ॥१५॥

इदमर्थे। छान्दोग्यं नाट्यम्।

६· ७· ५:· ७··१··१·

तस्य विकारे प्राण्योषधिवृक्षेभ्योऽवयवे चाण् ॥६॥

षष्ठ्यन्तात् विकारेऽर्थे प्राण्यादिभ्योऽवयवे चार्थेऽण् स्यात्। भस्मनो विकारः भास्मनः वार्त्तिकः। कपोतस्य विकारोऽवयवो वा कापोतः। दौर्व्वं काण्डं भस्म वा। वैल्वं भस्म मूलं वा।

५ः ·१· ·१·

त्रपुजतुभ्यां षुक् च ॥१७॥

आभ्यां विकारेऽर्थेऽण् तस्मिंश्च सति तयोः षुगागमः स्यात् । उकावितौ । त्रापुषं जातुषम् ।

·१· ·१· ७ः

मयट् वाऽभक्ष्याच्छादनयोः ॥१८॥

षष्ठ्यन्तात् विकारेऽवयवे चाऽर्थे मयट् वा स्यात् न तु भक्ष्याच्छादनयोः । पक्षेऽण् । अश्ममयम् आश्मनम् भक्ष्ये तु मौद्गः सूपः । आच्छादने कार्पासं वस्त्रम् ।

५· ५ः··१· ·२·

वृद्धात् शरादिभ्यश्च नित्यम् ॥१९॥

वृद्धसंज्ञकात् षष्ठ्यन्तात् शरादिभ्यश्चोक्तेऽर्थे नित्यं मयट् स्यात् न तु भक्ष्याच्छादनयोः । वृद्धात् आम्रमयं शालमयम् । शरादि (सि०पृ०५९८पृ०) शरमयम् इक्षुमयं भक्ष्ये त्वणेव ऐक्षवम् ।

५· ७· ५· ७· ५· ७·

पिष्टादन्ने गोः पुरीषे ऊर्णाया वस्त्रे ॥२०॥

एतेषु वाच्येष्वेभ्यो नित्यं मयट् स्यात् । पिष्टमयमन्नम् गोमयम् ऊर्णामयं वस्त्रम् । इदन्त्वपाणिनीयम् । तन्मते और्णमेव ।

७· ५ः ७· १· ·१·

असंज्ञायां तिलयवाभ्यां संज्ञायां तु वुक् ॥२१॥

भक्ष्यार्थम् । तिलमयम् यवमयमन्नम् संज्ञायां तु तैलकं यावकम् ।

७. १.

संज्ञायां कः ॥२२॥

पिष्टकोऽपूपः चूर्णकः मण्डकः।

५. .१.

एण्याढक् ॥२३॥

ऐणेयं मांसं चर्म्म वा।

५: १.

गोपयोभ्यां यः ॥२४॥

गव्यं पयो मांसं वा। पयस्यं नवनीतम्।

७. .१..१. ५:.

फले लुक् न प्लक्षादिभ्यः ॥२५॥

विकारार्थे तद्धितस्य फले वाच्ये लुक् स्यात् न तु प्लक्षादिभ्यः। आमलक्या विकारः (फलम्) आमलकम् बदरम्। प्लक्षादेस्तु प्लाक्षम्। न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु बृहती प्लक्षादि।

५. १: .१.

जम्ब्वा लुगलुपौ वा ॥२६॥

जम्बूशब्दात् परस्य विकारार्थकस्य तद्धितस्य फले वाच्ये लुगलुपौ वा स्तः। पक्षे प्रत्ययस्थितिः। जम्बु लुपा लुप्त्वे प्रकृतिलिङ्गता जम्ब्वः। जाम्बवम्।

५:. ५:..१. .१.

फलपाकशुष्यद्भ्यो हरितक्यादिभ्यश्च लुप् ॥२७॥

फलपाकेन शुष्यद्भ्यः (व्रीह्यादिभ्यः) हरितक्यादिभ्यश्च

विकारार्थकप्रत्ययस्य फले वाच्ये लुप् स्यात् । व्रीहे विकारः फलं व्रीहिः यवः मुद्गः (सि०पू०५५१८०) हरितक्यादि । हरितक्याः विकारः फलम् हरितकी

६· ·१· ·१· ·१·
तस्य धर्म्यमिति ठक् ॥२८॥

षष्ठ्यन्तात् धर्म्यमित्यर्थे ठक् स्यात् । आपणस्य धर्म्यमापणिकम् ।

हृदयस्य प्रियं हृद्यं पौरुषेयो ढका प्रिये ।
पुत्राद्यच्छौ निमित्तेऽर्थे पुत्र्यः पुत्रीय इष्यते ॥

६· १· ·१· ५: ·१·
तस्येश्वर इति सर्व्वभूमिपृथिवीभ्यामण् ॥२९॥

सर्व्वभूमेरीश्वरः सार्व्वभौमः । पृथिव्याः-पार्थिवः ।

७· १:
भूतपूर्व्वे रूप्यचरटौ ॥३०॥

षष्ठ्यन्तात् भूतपूर्व्वेऽर्थे रूप्यचरटौ स्तः । टइत् । राज्ञो भूतपूर्व्वा भूमिः राजरूप्या । शुभ्रायाः भूतपूर्व्वा भूमिः शुभ्रारूप्या । चरटि राजचरी शुभ्रचरी ।

६· १· १: ७:
तस्य भावस्त्वतौ स्त्रीनपुंसकयोः ॥३१॥

षष्ठ्यन्तात् भाव इत्यर्थे त्वतौ स्तः तदन्तौ च क्रमेण

स्त्रीनपुंसकयोः स्तः। भावः शब्दस्य प्रवृत्तिनिमित्तं यद्धर्म्मं निमित्तीकृत्य शब्दः स्वार्थे प्रवर्त्तते स धर्म्मः शब्दस्य प्रवृत्तिनिमित्तं स च जातिगुणक्रियासंज्ञादिः। घटत्वं घटता शुक्लत्वम् शुक्लता। पाचकत्वं पाचकता। चैत्रत्वं चैत्रता।

५:० १०।१०

पृथ्वादिभ्य इमनिर्वा ॥२२॥

एभ्यो भावे इमनिः स्याद्वा। इकारइत्। पक्षे त्वतौ। इमनि डिद्भावे प्रथाद्यादेशे च प्रथिमा म्रदिमा (सि० पू० ६५३पृ०) पृथ्वादि।

५:० ०१००१०

वर्णदृढ़ादिभ्यः ष्यञ्च ॥२३॥

शुक्लादिवर्णवाचिभ्यः दृढ़ादिभ्यश्च भावे ष्यञ् स्यात्। चात् इमनिः त्वतौ च। पक्षाविती। शौक्ल्यम् शुक्लिमा शुक्लत्वम् शुक्लता। दार्ढ्यम् द्रढ़िमा दृढ़त्वम् दृढ़ता। दृढ़ादि (सि० पू० ६५३पृ०) द्रष्टव्यः।

७० ५० १० ०१०

संख्येये संख्यावचनात् को वा ॥२४॥*

संख्येये वर्त्तमानात् संख्यावाचकाद्भावे कः स्याद्वा। पक्षे त्वतौ। पञ्चानां भावः पञ्चकम् पञ्चत्वम् पञ्चता पञ्चसंख्येत्यर्थः।

---

* कविधान मपाणिनीयमपि भूरि प्रयोगात् कृतम्।

५:॰ ७॰१॰ १॰

गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ष्यञ् ॥३५॥*

एभ्यो भावे कर्म्मणि च ष्यञ् स्यात् । शुक्लस्य भावः कर्म्म वा शौक्ल्यम् । ब्राह्मणस्य भावः कर्म्म वा ब्राह्मण्यम् ब्राह्मणादि (सि॰पू॰६५४पृ॰)

भावे कर्म्मणि सख्युर्यः सख्यं तेन निदर्शितम् ।
स्तेनात् तदर्थके ये च स्तेयमेतत् निपात्यते ।
वाणिज्यं वणिजो येन दूत्यं दूतात्तदर्थयोः ।

५:॰ ॰१॰

पत्यन्तपुरोहितादिभ्यो यक् ॥३६॥

भावे कर्म्मणि चार्थे एभ्यो यक् स्यात् । आधिपत्यम् सैनापत्यं । पौरोहित्यम् पुरोहितादि (सि॰पू॰६५५पृ॰)

५: ॰१॰

प्राणिजातिवयोवचनाभ्योऽञ् ॥३७॥

आभ्यां प्रागुक्तेऽर्थेऽञ् स्यात् । प्राणिजातेः, अश्वस्य भावः कर्म्म वा आश्वम् वार्षभम् । वयोवचनात्, कौमारं कैशोरम् ।

५॰ ५॰ ५:॰॰१॰

इगन्ताच्च लघुपूर्व्वाद्धायनयुवादिभ्यश्च ॥३८॥

एभ्योऽण् स्यात् । शुचि शौचं मौनम् लाघवं गौरवम् लघुपूर्व्वात् किं पाण्डुत्वम् । द्वैहायनं चातुर्हायनम्† यौवनम् । युवादि (सि॰पू॰६५६पृ॰)

---

* गुण सक्ता यानिति व्युत्पत्त्या गुणवाचकस्यैव द्रव्यपरत्वे प्रत्ययस्तेन शुक्लादिशब्देभ्य एव द्रव्यपरेभ्यः प्रत्ययः न रूपादिशब्देभ्य स्तेषां गुणि परत्वा भावात् ।

† चातुर्हायण मित्यत्र णत्वमपीच्छन्ति ।

५॰ ५॰ १॰ ५॰॰१॰ ॰१॰॰१॰

योपधाद्गुरूपोत्तमाद्वुञ् सहायात्तु यञ् च ॥३९॥

गुरूपान्त्यवर्णयुक्तात् योपधात् वुञ् स्यात् सहायात्तु यञ्वुञौ। रामणीयकम् कामनीयकम्। साहायकम् साहाय्यम्। साह्यमत्र निपात्यते इति केचित्।

७॰ ७॰ ५: ॰१॰

भवने क्षेत्रे व्रीहिशालिभ्यां ढक् ॥४०॥

व्रीहीणां भवनं क्षेत्रं व्रैहेयम् शालेयम्।

यथामुखात् संमुखाच्च षष्ठ्यन्तात् दर्शने तु खः।
यथामुखीनस्तेन स्यात् सम्मुखीनस्तथा भवेत्।

६॰ ७॰ ५: १॰ ५॰ ॰१॰ १॰

तस्य मूले कर्णादिभ्यो जाहः पक्षात्तु तिः ॥४१॥

कर्णस्य मूलम् कर्णजाहम्। (सि॰पू॰ ६६२पृ॰) कर्णादि। पक्षस्य मूलं पक्षतिः।

६॰ ७॰ ५॰ ॰१॰

तस्य पूरणे संख्याया डट् ॥४२॥

तस्य पूरणेऽर्थे संख्यावाचिभ्यो डट् स्यात्। डटावितौ। एकादशानां पूरणः एकादशः। द्वादशः।

५॰ ५॰ ॰१॰

नान्तादसंख्यादेर्मट् ॥४३॥

असंख्यादेर्नान्तात् मट् स्यात्। डटोऽपवादः। पञ्चमः अष्टमः नवमः दशमः। संख्यादेस्तु डटि

५॰ ॰१॰ ६॰
षट्कतिकतिपयचतुरां थुक् डट: — ॥४४॥

एभ्यो डटस्थुगागमः स्यात्। उकारवितौ। षष्ठः

५॰ ॰१॰
बहुगणपूगसंघेभ्यस्तिथुक् ॥४५॥*

एभ्यो डटस्तिथुक् स्यात्। उकारवितौ। बहुतिथः गणतिथः। पूगतिथः संघतिथः।

५॰ ॰१॰
वतोरिथुक् ॥ ४६ ॥

वत्वन्ताड्डट इथुक् स्यात्। यावतिथः तावतिथः।

५॰ १॰६॰ ॰१॰॰१॰
द्वित्रिभ्यां तीयस्त्रेः सम्प्रसारणं च ॥ ४७ ॥

आभ्यां तीयः स्यात् पूरणेऽर्थे त्रेस्तृ चादेशः। डटोऽपवादः। द्वितीयः तृतीयः।

५॰ ॰१॰॰१॰
विंशत्यादिभ्यस्तमडन्यतरस्याम् वा ॥ ४८ ॥

संख्यादिभ्योऽपि। पक्षे डट्। विंशतितमः विंशः। एकविंशतितमः एकविंशः।

२॰ ५॰
नित्यं शतादिमासार्धमाससंवत्सरेभ्यः ॥ ४९ ॥

शततमः। सहस्रतमः। मासतमः अर्द्धमासतमः

५॰ ॰१॰ ९॰
षष्ट्यादेश्चासंख्यादेः ॥ ५० ॥

षष्टितमः। सप्ततितमः। संख्यादेस्तु एकषष्टः।

* पूगसंघयोर्ग्रहणादसंख्यात्वेऽपि ताभ्यां डट्।

पितृव्यादयो निपात्याः ॥ ५१ ॥

पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः। पितुःपिता पितामहः। मातुःपिता मातामहः।

इति षष्ठ्यन्ताधिकृततद्धित प्रकरणम्।

अथ सप्तम्यन्ताधिकृततद्धिताः।

सप्तम्याः ॥ १ ॥

सप्तम्यन्तादुच्यमानाः प्रत्ययाः स्युः। अधिकारोऽयम्

तत्र संस्कृतमित्यण् शूलोखाभ्यां तु यः ॥२॥

सप्तम्यन्तात् संस्कृतमित्यर्थेऽण् शूलोखाभ्यान्तु यः स्यात्। भ्राष्ट्रे संस्कृता भ्राष्ट्रा यवाः। पैठरः शूले संस्कृतं शूल्यम् उख्यं मांसम्।

तत्र पिष्टादीत्यण् ॥ ३ ॥

सप्तम्यन्तात् पिष्टादीत्यर्थेऽण् स्यात्। दृषदि पिष्टाः दार्षदाः सक्तवः। उलूखले क्षुण्णं औलूखलं चूर्णम् चतुर्दश्यां दृष्टं चातुर्दशं रक्षः।

तत्र भवादीत्यण् ॥ ४ ॥

सप्तम्यन्तात् भवादिष्वर्थेष्वण् स्यात् भव, जात,

वद्ध,शोभी, क्षत, क्रीत,कुशल,संभूत, उप्त, देय,साधु, पुष्यत्, पच्यमान, इति भवादि । मथुरायां भवादि माथुरः । प्रकृतिभेदात् अर्थभेदे प्रत्ययभेदा अपेक्ष्यन्ते । वसन्ते पुष्यन्ती वासन्ती । शरदि पच्यमाना शारदाः ।

५॰ ॰१॰ ५ः ७॰ ॰१॰

राष्ट्राद्घः पारावाराभ्यां व्यस्तसमस्तवैपरीत्ये खः ॥५॥

राष्ट्रे भवादि राष्ट्रियः । पारीणः अवारीणः पारावारीणः अवारपारीणः ।

५॰ १ः

ग्रामाद्यखञौ ॥ ६ ॥

ग्रामे भवादि ग्राम्यः ग्रामीणः ।

५ः॰ ७ः॰ ॰१॰

कुलकुक्षिग्रीवाभ्यः श्वखड्गालङ्कारेषु ढकञ् ॥७॥

आभ्यः क्रमेणैतेषु वाच्येषु भवाद्यर्थे ढकञ् स्यात् । अइत् । कुले भवः कौलेयकः श्वा । कुक्षौ भवः कौक्षेयकोऽसिः । ग्रैवेयकः ग्रीवाशोभी अलङ्कारः ।

५ः॰ ॰१॰

नद्यादिभ्यो ढक् ॥ ८ ॥

भवाद्यर्थे नादेयम् (सि॰पू॰५५६पृ॰) नद्यादि ।

५ः॰ ७॰

दक्षिणापश्चात्पुरोभ्यस्त्यक् ॥ ॥

दक्षिणेत्याजन्तम् । दाक्षिणात्यः पाश्चात्यः पौरस्त्यः ।

५ः० १० ५० ०१००१०

द्युप्रागपागुदक्प्रत्यग्भ्योयो दिवोऽनुत्वञ्च ॥१०॥

दिवि भवादि दिव्यम् उत्वाभावः। प्राच्यं प्रतीच्यम्

५ः० १०

अमेहक्वतसिभ्यस्त्यः ॥ ११ ॥

अमा (सह) भवादि। अमात्यः इहत्यः क्वत्यः कुनत्य

तत्रत्यः ततस्त्यः कुतस्त्यः।

५० ०१० ५००१०

अव्ययात्तनट् शश्वतस्तु इकञ् ॥१२॥

भवाद्यर्थे अव्ययात्तनट् स्यात् शश्वतस्तु इकञ्।

प्रातस्तनं दोषातनी। सायन्तनी सदातनः। निपा-

तनात् दाखाने नादेशे सनातनः। शाश्वतिकः।

५ः १ः

ह्यश्श्वोभ्यां त्यतनटौ ॥१३॥

ह्यः (गताहनि) भवादि ह्यस्त्यं ह्यस्तनम्। श्वः

(अनागताहनि) भवादि श्वस्त्यं श्वस्तनम्।

५ः १० ५० ०१००१०

हृद्वान्याभ्यां कः राज्ञः कुक्च ॥१४॥

शालायां भवादि शालीयं आरातीयः त्यदादेः

(४१७पृ०४सू०) हृद्वसंज्ञतया तदीयः यदीयः एतदीयः

(४०६पृ०२४सू०) दुकि अन्यदीयः। राजकीयम्।

५० १ः १००१०

वत्वन्तभवतष्ठक्छौ पदत्वञ्च ॥१५॥

वत्वन्तभवच्छब्दादेतौ स्तः तस्मिंश्च पदत्वम्। भाव-

त्कः। भवदीयः। वत्वन्तेति किं भवन्नाम्ना भूत्।

५ः ०१० ०१० ७० ७० ०१०

युष्मदस्मदोर्वा खञ् तस्मिन्नणि च युष्माका-

१ः ७० ०१० १ः

स्माकौ एकवचने तु तवकममकौ ॥१६॥

आभ्यां वा खञ् स्यात्। तस्मिन् खञि औत्सर्गि-केऽणि च परेऽनयोरेतौ स्तः एकवचने तु तवक-ममकौ। युष्मासु भवादि यौष्माकीनः पक्षे छे युष्मदीयः। आस्माकीनः अस्मदीयः। एकवचने तु तावकीनः त्वदीयः। मामकीनः मदीयः। औत्स-र्गिकेऽणि तु यौष्माकम्। आस्माकं तावकं मामकम्।

५० ०१० ७ः०

अरण्याद्वुञ् पथिग्रन्थहस्तिषु ॥१७॥

एषु वाच्येषु भवाद्यर्थे अरण्याद्वुञ् स्यात् आरण्यकः पन्थाः ग्रन्थः (वेदैकदेशः) हस्ती वा।

५० ५३०१० १०

गर्त्तोत्तरपदात् गहादिभ्यश्च छः ॥१८॥

शृगालगर्त्तीयम्। गहादिराकृतिगणः मत्वर्थीयः पर्व्वतीयः उपाध्यानीयः।

५ः० ५ः० ०१० ०१०

स्वार्थादिभ्योऽध्यात्मादिभ्यश्च ठक् ॥१९॥

स्वार्थिकः आध्यात्मिकम् आधिभौतिकम् आधिदैविकम्

५ः १०

वर्हिर्देवपञ्चजनगम्भीरेभ्यो ण्यः ॥२०॥

(४२४पृ०३०सू०) टिलोपे । वाह्यः दैव्यः पाञ्चजन्यः । गाम्भीर्य्यः ।

५ः १० ६० १००१०

मध्यमाधराभ्यां मोऽधरस्य रलोपश्च ॥२१॥

मध्ये भवादि । मध्यमः । अधरे भवादिः अधमः ।

५० १ः

आदेर्य्यमौ ॥२२॥

आद्यः आदिमः ।

५ः १० ५० १ः०१०

अन्तपश्चाद्भ्यां डिमोऽग्राद्यघञ्चाश्च ॥२३॥*

चात् डिमः । डइत् तेन टिलोपः । अन्तिमः पश्चिमः । अग्र्यः अग्रियः अग्रीयः अग्रिमः ।

५० ०१०

कालात् ठक् ॥२४॥†

कालवाचिनो भवाद्यर्थे ठक् स्यात् । कालिकः सामयिकः मासिकः पाक्षिकः वार्षिकः सांवत्सरिकः ।

५ः० ०१० ५०१० ०१०

निशाप्रदोषाभ्यां वा श्वसस्तुट् च ॥२५॥

आभ्यां श्वसश्च वा ठक् ठकि श्वसस्तुडागमः स्यात् । पक्षे निशाप्रदोषाभ्यामण् श्वसस्तु त्यतनटौ । नैशिकं नैशम् प्रादोषिकं प्रादोषम् । शौवस्तिकम् ।

* अन्त शब्दाद्योऽपीष्यते तेन अन्त्य इत्यादि सिध्यति ।

† अङ्गोऽह्नाद्देग्योऽपि वाच्यस्तेन आह्निकमिति सिध्यति ।

५:० ०१० ५००१० ७० ०१०

सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् शरदस्तु श्राद्धे ठक् ॥२६॥

ठकोऽपवादः (सि०पू० ५७१पृ०) सन्धिवेलादि। सान्धिवेलम् पार्वणम् सान्ध्यम्। ऋतोः, ग्रैष्मिकं ग्रैष्मं, वासन्तम् शारदिकम् श्राद्धं अन्यत्र शारदम्।

५० १० ७००२० ५:००१० ०२०

प्रावृष एण्यो जाते तु वर्षाभ्यश्च ठक् ॥२७॥

ऋत्वणोऽपवादः। प्रावृषि भवः प्रावृषेण्यः प्रावृषि जातस्तु प्रावृषिकः। वर्षासु जातः वार्षिकः।

५० १: १००१० ७०

हेमन्तादण्ठञौ तलोपश्चाणि ॥२८॥

हैमनः हैमन्तिकः।

७० ५: ०१० ५० १० ०१०

संभूते कोशकुक्षिभ्यां ढक् ग्रीवाया अण् च ॥२९॥

कौशे संभूतं कौशेयम् वसनं। ग्रैवेयं ग्रैवम्।

५:० १० ७०

दिगादिभ्यो यो भवे—॥३०॥

दिशि भवं दिश्यं रहस्यम् (सि०पू०५७९पृ०) दिगादि

५० १० ५: ०२०

शरीरावयवाद्योऽहिकुक्षिभ्यां ढक् ॥३१॥

भवेऽर्थे शरीरावयवात् यः स्यात् अहिकुक्षिभ्यां ढक्। दन्त्यम् ओष्ठ्यम्। कौक्षेयम् आहेयः।

५: ०१० ७० ७०

कर्णललाटाभ्यां कः स्त्रियां भूषायाम् ॥३२॥

कर्णिका ललाटिका भूषा।

५:० १०

जिह्वामूलाङ्गुलिवर्गान्तेभ्यश्छः ॥३३॥

जिह्वामूलीयम् अङ्गुलीयम् कवर्गीयः पवर्गीयः।

७० १० ०१० ०१०

तत्र नियुक्त इति ठक् ॥३४॥

सप्तम्यन्तात् नियुक्त इत्यर्थे ठक् स्यात्। आपणे नियुक्त आपणिकः।

७० १० ५:० ०१०

तत्र साधुवितण्डावृत्तिसंग्रहायुर्वेदेभ्यष्ठक् ॥३५॥

वैतण्डिकः। वार्त्तिकः सांग्रहिकः।

५:००१० ५० ०१०

संग्रामापूपसंघातनिवासेभ्यश्च संयुगात् खञ् ॥३६॥

संग्रामे साधुः सांग्रामिकः। आपूपिकः। सांघातिकः नैवासिकः। सांयुगीनः।

५:० ०१०

पथ्यतिथिवसतिभ्यो ढञ् ॥३६॥

पथि साधुः पाथेयम् आतिथेयम् वासतेयम्।

५० ०१० १:

परिषदोण्यः सभाया यठौ ॥३८॥

परिषदि साधुः पारिषद्यः। सभ्यः सभिकः।

७० १० ०१०१०

समानतीर्थे वासीति यः ॥३९॥

समानतीर्थे (गुरौ) वसतीति सतीर्थ्यः। यविषये (४०६पृ० २२सू०) समानस्य सादेशः।

७० ८० ०१० १० ६० १० ०१०

समानोदरे शेते इति यः प्रकृतेः सोदरो वा ॥४०॥

समानोदरे शेते। समानोदर्थ्यः सोदर्य्यः।

७· १· ५: ·१·

तत्र विदितः सर्व्वभूमिपृथिवीभ्यामण् ॥४१॥

सर्व्वासु भूमिषु विदितः सार्व्वभौमः । पार्थिवः ।

५:· ·१·

इहलोकसर्व्वलोकेभ्यष्ठक् ४२॥

इहविदित ऐहिकः लोके विदितः लौकिकः । सार्व्वलौकिकः अनुशतिकादित्वादुभयपदवृद्धिः ।

७· १· ५:· १· ५··१· ·१·

तत्र प्रसितः स्वाङ्गेभ्यः कः उदरात्तु ठक् ।४३॥

दन्ते प्रसितः दन्तकः । औदरिकः आद्यून इत्यर्थः ।

घटते कर्म्मणीत्यर्थे कर्म्मठस्तु निपात्यते ।
प्रसोष्यमानाऽस्य ख्रो वा साधख्रोना टिलोपतः ।
परशब्दाद्भवे छे कुक् परकीयं ततो भवेत् ।
स्वभवे च स्वकीयं स्यात् स्वीयं केचिच्च मेनिरे ॥
उपनीविप्रायभव औपनीविक इष्यते ।
उपजानुप्रायभवे औपजानुकसाधनम् ॥

इति सप्तम्यन्ताधिकततद्धितप्रकरणम् ।

अथ चातुरर्थिकतद्धिताः ।

१· ७· ८· ७· ·१·

तदस्मिन्नस्ति देशेऽण् ॥१॥

प्रथमान्तादस्य अस्मिन्नित्यर्थे देशे वाच्येऽण् स्यात् मतुबाद्यपवादः । पर्व्वतोऽस्त्यस्मिन् देशे पार्व्वतः ।

२· १·

तेन निर्वृत्तम् ॥ २ ॥

तृतीयान्तात् निर्वृत्ते (निष्पन्ने) ऽर्थेऽण्। कुशाम्बेन निर्वृत्ता पुरी कौशाम्बी। हस्तिना निर्वृत्तं हास्तिनम्

६॰ १॰ १॰॰१॰
तस्य निवासोऽदूरभवश्च ॥३॥

षष्ठ्यन्तात् निवासइत्यस्मिन् अदूरभव इत्यस्मिंश्चार्थेऽण्। शिवेर्निवासः शैवः। विदिशाया अदूरभवं वैदिशं पुरम्। एते चत्वारोऽर्थाः।

५ः॰ ॰१॰ ५ः ॰१॰ ॰१॰
कुमुदनडवेतसेभ्यो ड्वतुप् नडशादाभ्यां ड्वलश्च ॥४॥

चतुर्ष्वर्थेषु एभ्यो ड्वतुप् स्यात् नडादिभ्यां ड्वलश्च। उडपा इतः। कुमुद्वान् वेतस्वान्। नड्वलः नड्वान् शाद्वलः।

७॰ ७ः॰ ६ः॰ ५ः॰॰१॰ ॰१॰
जनपदे बहुषु तेषां वरणादिभ्यश्च लुप् ॥५॥

चतुर्ष्वर्थेषु विहितानां तेषां जनपदे (ग्रामसमूहे) वाच्ये बहुषु वरणादिभ्यस्त्वबहुष्वपि लुप् स्यात्। पञ्चालानां निवासा जनपदाः पञ्चलाः अङ्गाः वङ्गाः। बहुषु किम् पाञ्चालः पाञ्चलौ। वरणा ताम्रपर्णी जम्बू चम्पा उज्जयिनी गया मथुरा तक्षशिला गोमती वरणादि। गयाया अदूरभवः गया।

इति चातुरर्थिकतद्धितप्रकरणम्।

अथाव्ययतद्धिताः ।

५॰ ७॰ १॰

संख्यायाः क्रियाजन्मगणनायां कृत्वसुः ॥१॥

संख्यावाचकात् क्रियाजन्मगणनायां कृत्वसुः स्यात् । उकारइत् । पञ्चकृत्वः पचति दशकृत्वो ददाति ।

५॰ १॰ ६॰ ०।०॰१॰

द्वित्रिचतुर्भ्यः सुरेकस्य सकृच्च ॥२॥

प्रागुक्तेऽर्थे एभ्यः सुः स्यात् एकशब्दात्तु सुः, एकस्य सकृदादेशश्च । उकारइत् । द्विर्ददाति त्रिःपचति । रात्सस्येति नियमात् सलोपे चतुर्भुङ्क्ते । एकशब्दात् सौसकृदादेशे संयोगान्तलोपे सकृत् पठति

५॰ ०।० ०१॰

बहोर्धा वा ॥३॥

उक्तेऽर्थे । बहुधा बहुकृत्वो वा भुङ्क्ते ।

५॰ ०।० ७॰

संख्याया धा क्रियाप्रकारे ॥४॥

क्रियाप्रकारेऽर्थे संख्यावाचकात् धा स्यात् । पञ्चधा दशधा दत्ते ।

ऐकध्यमेकधा वा स्यात् द्वैधं द्वेधा द्विधा तथा ।
त्रैधं त्रेधा त्रिधा षोढा षड्धेत्येते निपातिताः ।

५॰ ५॰ ०।० ०१॰

बह्वल्पार्थात् कारकाच्छस्—वा ॥५॥

बह्वर्थात् अल्पार्थाच्च कारकात् शस् स्याद्वा । बहूनि बहुभिः, बहुभ्यो वा ददाति बहुशो ददाति ।

एवमल्पशः पचति। शसि पुंवद्भाव इष्यते।

५· ५··१· ७·

संख्यायाः परिमाणार्थैकवचनाच्च वीप्सायाम् ॥६॥

संख्यावाचकात्परिमाणार्थैकवचनाच्च कारकात् वीप्सायां शस् स्याद्वा। द्वौ द्वौ, द्वाभ्यां द्वाभ्यां, वा ददाति द्विशो ददाति। शसा वीप्सोक्तेर्न द्वित्वम्। पादंपादं पादेन पादेन वा पचति पादशः पचति। एकवचनात् किं पादौपादौ पादान्पादान् पचतीत्यादौ न।

६· ७··१··१· १·

तस्य तत्रेव वा वतिः ॥७॥

षष्ठ्यन्तात् सप्तम्यन्ताच्च इवार्थे वतिः स्यात्। कृष्णस्येव कृष्णे इव वा कृष्णवत्।

इति अव्ययतद्धितप्रकरणम्।

अथाव्ययेषु सर्वविभक्तितद्धिताः।

५· ६:· ·१· ·१·

प्रातिपदिकात् सर्व्वविभक्तीनां तसिँल् वा ॥१॥

प्रातिपदिकमात्रात् सकलविभक्तिस्थाने तसिँल् स्याद्वा। इलावितौ। लोकतः शास्त्रतः। सर्व्वतः। विभक्त्यादेशतया स्थानिवद्भावे त्यदाद्यत्वे यतः ततः। तद्धितविषये त्यदाद्यत्वे इदंपर्य्यन्तानामेव ग्रहणान्न युष्मदस्मदोरत्वम् तेन त्वत्तः अस्मत्तः। पक्षे यथायथं विभक्तयः।

कस्मात् कुत इतश्चास्मादेतस्मादत इष्यते।

किमादिभ्यस्तु पञ्चम्यास्तसिल्येते निपातिताः ॥
परेस्तसिल्स्यात् सर्व्वार्थात् परितस्तेन जायते ।
उभयार्थादभेस्तद्वदभितस्तेन साध्यते ॥

५ः ६ १ ५ः

किंसर्व्वनामबहुभ्यः सप्तम्या-त्रोऽद्व्यादिभ्यः ॥२॥

द्व्यादिभिन्नेभ्यः किमादिभ्यः परस्याः सप्तम्याः स्थाने त्रःस्यात्। द्व्यादिमध्यपतितत्वात् किमः पृथग्ग्रहणम्। सर्व्वस्मिन् सर्व्वयोः सर्व्वेषु वा सर्व्वत्र। यत्र तत्र बहुत्र। द्व्यादेस्तु द्वयोस्त्वयि मयि।

किमः कुत्से ततः कुत्र कुह क्केति च वा भवेत्।
इह स्यादिदमस्ते तु शास्त्रेष्वेते निपातिताः ॥
भवद्योगे तु सर्व्वासां स्थाने त्रः स्यादतोऽचिते।
प्रयुज्यते तत्रभवानेवमत्रभवानपि ॥

५ः ७ १

सर्व्वैकान्यकिंयत्तद्भ्यः काले दा ॥३॥

एभ्यः कालेऽर्थे सप्तम्या दा वा स्यात्। सर्व्वस्मिन् काले सर्व्वदा एकदा अन्यदा। किमः (८४पृ०१४सू०) कत्वे कदा यदा तदा।

सर्व्वतो दाविधौ प्राक्ते वा सदेति निपात्यते।
अस्मिन् कालेऽधुनेदानीञ्चेदमस्तु विभाषया ॥
तदानीञ्च तदा पक्षे तस्मिन् काले तदा भवेत्।
अनद्यतनकाले हि किं यत्तद्भ्यस्तु वा ततः।
किमः कर्हि कदेत्येवं यदा यर्हि यदेति च।

तदस्तर्हि तदा नित्यं त्वेतर्हि चेदमेतदोः ॥
अस्मिन्नह्नि भवेदद्य सद्यो भवति तत्क्षणे।
अस्मिन् वर्षे ऐषमः स्यात् पूर्व्ववर्षे परुद्भवेत् ॥
तथा पूर्व्वतरे वर्षे परारि स्यात् निपातितम्।
पूर्व्वादिभ्यस्त्वहन्यर्थे सप्तम्या एद्युसुच्यते।
तेन पूर्व्वेद्युरन्येद्युरितरेद्युरितीदृशम्।
परस्मिन्नहनीत्यर्थे परेद्यवि निपातितम् ॥

५:० ५० ७०

किंसर्व्वनामबहुभ्यस्तृतीयायाः प्रकारेऽद्यादि-

५: ०।०

भ्यस्था ॥४॥

प्रकारेऽर्थे एभ्यस्तृतीयास्थाने था स्यात्‌ न तु द्या-दिभ्यः सर्व्वप्रकारैः सर्व्वथा यथा तथा बहुथा। द्यादिस्तु द्वाभ्यां त्वया मया।

किमिदंभ्यां थाविधौ तु कथमित्थं क्रमादिमे।

५: ६:०

दिक्शब्देभ्यः प्रथमापञ्चमीसप्तमीनां दिग्देश

७:० १० ५००२० ०।०

कालेष्वस्तातिरञ्चतेस्तु लुक् ॥५॥

दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः परासामासां स्थानेऽस्तातिः स्यात् अञ्चन्तात्तु तस्य लुक्। इकार-इत्। परस्तात्। प्राक्।

५: १००२० ६:० १:००२० ७:

पूर्व्वाधरावरेभ्योऽसिश्च तेषां पुरधवश्च तयोः ॥६॥

एभ्यः परासां तासां स्थानेऽसिप्रांदस्तातिः स्यात् प्रागुक्ते विषये असौ अस्तातौ च परतस्तेषां स्थाने क्रमेण पुर, अध, अव, इत्यादेशाश्च स्युः। इकारइत्। पूर्व्वा पूर्व्वस्याः पूर्व्वस्यां वा पुरः पुरस्तात्। अधर-अधः अधस्तात्। अवर-अवः अवस्तात्।

ऊर्द्ध्वादस्तातिविषये उपरिष्टात् तथोपरि।
अपराच्च तथा पश्चात् प्रास्त्रे च्वेति निपातिता॥

५: १०

दक्षिणोत्तराभ्यामतसुः॥७॥

आभ्यां परासां तासां स्थानेऽतसुः स्याद्वा प्रागुक्त-विषये। अस्तातेरपवादः। उकारइत्। दक्षिणा दक्षिणस्याः दक्षिणस्यां वा दक्षिणतः। उत्तरतः। तसिलैव सिद्धेरस्तातिवारणार्थं अतसर्थेत्यादिना षष्ठीविधानार्थञ्च सूत्रम्।

५:० १००१०

उत्तराधरदक्षिणेभ्य आतिर्वा॥८॥

इकारइत्। उत्तरा उत्तरस्या उत्तरस्यां वा उत्त-रात्। अधरात्। पक्षे यथाप्राप्तम्।

०१००१० ७० ५०

एनब्वाऽदूरेऽपञ्चम्याः॥९॥

प्रागुक्तेभ्यः परासां तासां स्थाने एनप् वा स्यात् अदूरे गम्ये न तु पञ्चम्याः। उत्तरेण दक्षिणेन पक्षे यथाप्राप्तम्।

५॰ ॰१॰ ७॰ ॰१॰ १॰

दक्षिणोत्तराभ्यामाच् दूरे त्वाहिः ॥१०॥

आभ्यामदूरे गम्ये तासामाच् स्यात् । दूरे तु आहिः । नतु पञ्चम्याः । चकारइत् । दक्षिणा उत्तरा । दूरे तु दक्षिणाहि उत्तराहि ।

इत्यसर्व्वविभक्तितद्धितप्रकरणम् ।

अथाव्ययेषु च्विप्रभृतितद्धिताः ।

७॰ ५॰ १॰॰१॰ ७॰

अभूततद्भावे सुपश्च्विर्वा कृभ्वस्तिप्रयोगे ॥१॥

अन्यथाभावं प्राप्तायां प्रकृतौ वर्त्तमानादिकारशब्दात् सुबन्तात् च्विर्वा स्यात् कृभ्वस्तिप्रयोगे । चकारेकाराविती । अशुक्लं शुक्लं करोतीत्यर्थे च्वौ (२६४पृ॰ ४७सू॰) वमाचस्य लोपे (२०८पृ॰ ३सू॰) अस्य ईत्वे (२६१पृ॰२७सू॰) गतिसमासे शुक्लीकरोति । एवं अशुक्लः शुक्लो भवति अस्ति वेत्यर्थे शुक्लीभवति शुक्लास्ति । दिवाभूता रात्रिः दोषाभूतमहः इत्यादिभाष्यप्रयोगात् अव्ययस्य न ईत्वमिति स्थितिः ।

७॰ १॰

च्वौ-दीर्घः ॥२॥

च्वौ परे पूर्व्वस्वरस्य दीर्घः स्यात् । अशुचिं शुचिं करोति शुचीकरोति लघूकरोति ऋतः (२०६पृ॰ १४सू॰) रीङि मात्रीकरोति ।

६॰॰ १॰

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपः ॥३॥

च्वौ परे एषामन्त्यलोपः स्यात् । अरुकरोति सुमनीकरोति । सरजीकरोति । नीरजीकरोति । अराजानं राजानं करोतीत्यादौ च्वौ प्रत्यये सुपो लोपे पदान्ततया न ख लुपि (४८पृ०२सू०) ननुपोऽसिद्धता नियमेनात्र सिद्धत्वात् अस्य ईत्वे राजीकरोति ।

७॰ १॰॰१॰ १॰ ७॰

च्विविषये सातिर्वा साकल्येन संपद्यमाने ॥४॥

इकारइत् । अजलं जलं साकल्येन संपद्यते तत् तथा करोति जलसात्करोति जलसाद्भवति जलसादस्ति । पक्षे च्विः । अग्निसात्करोतीत्यादौ तु न णत्वं ।

७॰ १॰ ७॰

तदधीनवचने सातिः कृभ्वस्तिसंपद्प्रियोगे ॥५॥

तदधीनत्वेऽर्थे सुबन्तात् सातिः स्यात् कृभ्वादिप्रयोगे । देवाधीनं करोति देवसात्करोति देवसाद्भवति देवसादस्ति देवसात्संपद्यते ।

७॰॰१॰ ॰१॰

देये त्रा च ॥६॥

तदधीने देयेऽर्थे त्रा चकारात् सातिः स्यात् कृभ्वादिप्रयोगे । विप्राधीनं देयं करोति विप्रत्राकरोति विप्रत्राभवतीत्यादि । पक्षे विप्रसात्करोतीत्यादि ।

५॰ ५॰ ५॰॰१॰ ७॰

संख्यायाः गुणान्तायास्तीयान्तायाश्च कृञो

७॰ ॰१॰

कृञ्योगे डाच् ॥७॥

गुणान्तायास्तीयान्तायाश्च संख्यायाः कृषावर्थे डाच् स्यात् कृञ्प्रयोगे। डचावितौ। द्विगुणं कर्षणं करोति द्विगुणाकरोति। द्वितीयं कर्षणं करोति द्वितीयाकरोति तृतीयाकरोति।

५ः ७॰

सपत्रनिष्पत्राभ्यामतिव्यथने ॥८॥

अतिव्यथनेऽर्थे कृञ् प्रयोगे आभ्यां डाच् स्यात्। सपत्राकरोति मृगं संपुङ्खशरप्रवेशेनातिव्यथितं करोतीत्यर्थः।

५ः ७॰ ५॰ ७॰

सुखप्रियाभ्यामानुलोम्ये दुःखात् प्रातिलोम्ये ॥९॥

कृञ्योगे आभ्यामानुलोम्ये द्योत्ये दुःखात्तु प्रातिलोम्ये डाच्। सुखाकरोति प्रियाकरोति अनुकूलयतीत्यर्थः। दुःखाकरोति पीड़यतीत्यर्थः।

५॰ ७॰ ५॰ ७॰

शूलात् पाके सत्यादशपथे ॥१०॥

शूलाकरोति शूलेन पचतीत्यर्थः। सत्याकरोति क्रेतव्यमिति वाक्येन तथ्यं करोतीत्यर्थः।

५॰ १॰॰१॰ ७॰ ॰१॰ १॰

अव्यक्तानुकरणात् द्विश्च तस्मिंश्च टिलोपः ॥११॥

अव्यक्तस्यानुकरणात् (पटत् झनत्प्रभृतेः) डाच् स्यात् कृञ्प्रयोगे तस्मिंश्च प्रकृतेर्द्वित्वं टिलोपश्च स्यात्। पटपटाकरोति।

५॰　५॰　९ः　७॰　६॰१॰　॰१॰

किमः सुबन्ताच्चिच्चनावनिर्द्धारणे सुपो न लुक्॥१२॥

सुबन्तात् किमश्चिच्चनौ स्यातामनिर्द्धारणे गम्ये तत्र च सुपो न लुक्। किञ्चित् किञ्चन केनचित् केनचन विभक्त्यादेशान्ततया कुत्रचित् क्वचिदित्यादि।

इति च्विप्रभृत्यव्ययतद्धितप्रकरणम्।

अथाकच्।

स्वार्थे कस्यापवादेन सर्व्वनाम्नां विकल्पतः।
टेः प्रागकच् ततस्तेषां सम्मता सर्व्वनामता॥
त्यदाद्यत्वं ततस्तेषां पुंवद्भावादिकं भवेत्।
स्वार्थिके केन तत्सिद्धिस्तदन्तस्याप्यशब्दता॥
तेनासकौ चासुको वा त्यदाद्यत्वेन सिध्यति।
अकज्युताददस्शब्दात् सोरौस्त्वन्तु विभाषया॥
औत्वपक्षे दस्य सत्वं मत्वं तदन्यपक्षतः।
याऽसकौ रह इत्यादि माघकाव्यप्रयोगतः॥
अत्राहममुकः साक्षीत्येवं योगीश्वरोक्तितः।
द्विविधं हि भवेत् साधु त्यदाद्यत्वं तु सर्व्वथा॥
सर्व्विकस्याः प्रिय इतिवाक्ये स्यात् सर्व्वकप्रियः।
केचिद्विभाषयेच्छन्ति तेभ्यः स्याट्कैस्मिनाद्यतः।
मुनेर्मनोहृत्तिरिव स्विकायामिति नैषधे॥

प्रयुक्तं यत् स्मृतिग्रन्थेऽमुके मासीति साधु तत्।
अव्ययानां तु केषाञ्चित्तथैवाकच् विभाषया।
उच्चैः स्यादुच्चकैर्नीचैर्नीचकैस्तैवमादिकम्॥
सर्व्वनाम्नां सुबन्तानां तिङन्तानामकज्विधिः।
प्रयोगादर्शनान्नोक्तः स तु शास्त्रे व्यवस्थितः॥
रसो रूपं तथा गन्धः स्पर्शः शब्दो रसादयः।
एतेभ्यो मतुबेव स्यात् नेनिः ठो वा भवेन्न च॥
रसवान् रूपवांस्तेन न रसी रसिको न वा।
रूपी घटोऽनित्य इति प्रयोगेऽतो न साधुता॥
एकाचरकदन्ताच मतुबेव न तौ मतौ।
पाकवानेवमेव स्यात् न पाकी न च पाकिकः॥
भोगियोगीत्यादिसिद्धैर घिनुण् स्यात् सार्थकस्ततः।
न जातिवचनात्तौ च समस्यर्थे कथञ्चन॥
मतुबेव भवेत्तस्मात् घटवद् भूतलं ततः।
न घटि घटिकं वापि प्रयोगो नहि जायते॥
मत्वर्थीयात् सरूपात्तु न सरूपान्तरं पुनः।
गुणिमानेवमेव स्यात् गुणवत्वान् न वा भवेत्॥
गुणवत्वान् प्रयोगस्तु न साधुरिति देशना।

इति तद्धितप्रकरणम्।

अथ द्वित्वप्रकरणम् ।

अचः परस्य द्वित्वं वा यरो हलि विभाषया ।
द्विधा रूपं भवेत्तेन यथा सिद्ध्यति सिध्यति ॥
अचः परस्माद्रेफात्तु यरो द्वित्वञ्च वा भवेत् ।
कार्य्यं कार्य्यमार्त्तिरार्तिर्दुर्ग्गं दुर्गमितीदृशम् ।
हलः परा झरो लोप्याः सवर्णे झरि पञ्चतः ।
रुन्धो रुन्द्धस्ततो रूपं द्विधा स्यात् शास्त्रसम्मतम् ।
[२०२पृ०७५सू०] द्वित्वे द्वर्चंद्वर्चं प्रति । यांयां प्रति । येनयेन गतम् यस्मैयस्मै दत्तमित्यादि ।

६· १· १·
एकस्य द्वित्वं समासवद्भावः ॥१॥

सुबन्तस्य एकशब्दस्य द्वित्वं समासवद्भावश्च । तेन सुपो लुक् । एकैकः एकैकेन एकैकस्मै ।

७· ६· १·
कर्म्मव्यतिहारे सर्व्वनाम्नः समासवत्त्वम् ॥२॥

स्वस्य यादृशक्रियायां यस्य यत्कारकत्वं तस्य तादृश्यामेव क्रियायां स्वस्य तत्कारकत्वं कर्म्मव्यतिहारः । तत्र द्योत्ये सर्व्वनाम्नो द्वित्वं समासवत्त्वञ्च स्यात् । इतरेतरं पश्यति । इतरेतरस्मै ददाति ।

६: ६: ६· १·
पूर्व्वपदस्ययोरन्यपरयोर्विभक्तेः सुँः ॥२॥

एतयोः परस्या विभक्तेः स्थाने सुः स्यात् । उकार-

इत्। समासवद्भावेन विभक्तेर्लोपे प्राप्ते वचनम्। अन्योन्यं नमन्ति विप्राः परस्परस्मै ददाति। अन्योन्येषां पुष्करैराममृशन्त इति माघः।

डिशब्दस्य द्विर्वचने रहस्ये द्वन्द्वमिष्यते।
अन्योऽन्यार्थे तथान्योन्याम् तत्रैवार्थे परस्पराम्।
यथाशब्दस्य द्विर्भावे यथास्वे च यथायथम्।
समासवत्त्वं द्वित्वञ्च स्यात्तथा गुणवाचिनः।
उष्णोष्णः शीतशीतञ्च श्वेतश्वेतादिकं ततः॥

इति द्वित्वप्रकरणम्।

अम्बिकानाम नगरी वर्द्धमानप्रदेशगा।
तस्यां निवासी विप्रः श्रीतारानाथसमाह्वयः॥
वात्स्यवंशकालिदासपण्डितोत्तंससम्भवः।
कलकाता नगरे विद्यामन्दिरेऽध्यापकोऽधुना॥
प्रसिद्धशब्दसंघातसाधनार्थमिदं नवम्।
आशुबोधं व्याकरणं पाणिन्यादिमतेऽकरोत्॥
वेदाब्धिग्रहरात्रीशमिते संवत्सरे गते।
सुप्रचाराय सर्व्वत्र मुद्रायन्त्रे न्ययोजयत्॥

सम्पूर्णम्।